

5386

F = 157.

Complete.

~~२५~~

नं. १७६

पंचदशी संस्कृत टीका "उपदेशग्रन्थ विवरणम्।"

विद्यारण्य, २२६ पत्र

पं. आनन्द[illegible]   सं. १७४८

कर्ता - रामकृष्ण

५.५

नं० ५३८६-घ

पंचदशी 'उपदेशग्रंथविवरणम्' (वेदान्तः)

पत्राणि १५६ (सम्पूर्णम्)

लेखकः रामकृष्णः संवत् १९४५

पंचदशी (वेदान्तः)
व्यारव्यासहितम 'उपदेश ग्रंथ विवरणम'
पत्राणि १५६ (सम्पूर्णम)

पंचदशीवेदान्तः



श्री॰
पं॰ वि॰
टी॰
१

ॐ स्वस्ति श्रीगणेशाय नमः ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ प्रत्यक्तत्त्वविवेकस्य क्रियते पददीपिका १ आरिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणं मंगलाचरणं स्वेनानुष्ठितं शिष्य शिक्षार्थं श्लोकेनोपबध्नाति अर्थात् विषयप्रयोजने च सूचयति नम इति शं सुखं करोतीति शंकरः सकलजगदानंदकरः परमात्मा एष ह्येवानंदयातीति श्रुतेः आनंदो निरतिशयप्रेमास्पदत्वेन परमानंदरूपः प्रत्यगात्मा शंकरश्चासावानंदश्चेति शंकरानंदः प्रत्यगभिन्नः परमात्मा स एव गुरुः परिपक्वमलोपेतानुत्पादनहेतुशक्तिपातेन योजयति परे तत्त्वे स दीक्षयाचार्यमूर्तिस्थ इत्यागमात् श्रीमांश्चासौ शंकरानंदगुरुश्चेति गंथह्विपवक्तमासः अनेन गुरोरणिमाद्यैश्वर्यसंपन्नत्वं सूचितं

ॐ नमः श्रीशंकरानंदगुरुपादांबुजन्मने ।
सविलासमहामोहग्राहग्रासैककर्मणे १ ॥

यद्वा श्रियामूर्त्या शं करोतीति शंकरः रातेर्दातुः परायणमिति श्रुतेः अनेन श्रीगुरोर्भक्तेष्टसंपादने सामर्थ्यं सूचितं भवति तस्य गुरोः पादा देवांबुजन्म चरणकमलं तस्मै नमः प्रह्वीभावोऽस्तु किं विधाय सविलासमहामोहग्राहग्रासैककर्मणे विलासः कार्यवर्गः तेन सह वर्तत इति सविलासः एवंविधो यो महामोहो मूलाज्ञानं स एव ग्राहो मकरादिवत्स्ववशं प्राप्तस्यातीवदुःखहेतुत्वात्तस्य ग्रासो निवर्तनं स एवैकं मुख्यं कर्म व्यापारो यस्य तत्तथा तस्मा इत्यर्थः अत्र च शंकरानंदपदद्वयसामानाधिकरण्येन जीवब्रह्मणोरेकत्वलक्षणो विषयः सूचितः जीवस्य भूमब्रह्मरूपतयाऽपरिच्छिन्नस्वाविर्भावलक्षणं प्रयोजनं च सूचितं सविलासेत्यादिना निःशेषानर्थनिवृत्तिलक्षणं प्रयोजनं मुख्यत एवाभिहितं १ ॥

इदानीमवांतरप्रयोजनकथनपुरःसरं ग्रंथारंभं प्रतिजानीते तत्पादांबुरुहद्वेति तस्य गुरोः पादावेवांबुरुहे कमले तयोर्द्वंद्वं तस्य सेव
या परिचर्यया स्तुतिनमस्कारादिलक्षणया निर्मलं रागादिरहितं चेतोंतःकरणं येषां ते तथोक्तास्तेषां सुखबोधायानायासेन तत्त्व
ज्ञानोत्पादनाय यावद्वक्ष्यमाणप्रकारस्य तत्त्वस्यानारोपितस्वरूपस्य अखंडसच्चिदानंदं महावाक्येन लक्ष्यते इति वक्ष्यमाणस्य वि
वेकस्यारोपितात्पंचकोशादिलक्षणाज्जगतो विवेचनं विधीयते क्रियत इत्यर्थः २ जीवब्रह्मणोरेकत्वलक्षणविषयसंभाव
नाय जीवस्य सत्यज्ञानादिरूपत्वं दिदर्शयिषुरादौ ज्ञानस्याभेदप्रतिपादनेन नित्यत्वं साधयति शब्दस्पर्शादय इत्यादिना त
त्र तावद्विषयव्यवहारं प्रति जागरे ज्ञानाऽभेदं साधयति शब्दस्पर्शादय इति जागरे इंद्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणेऽ

तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसाम् सुखबोधाय तत्त्वस्य विवेकोयं विधीयते २ शब्द
स्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ततो विभक्ता तत्संविदैकरूप्यान्न भिद्यते ३ ॥

वस्थाविशेषे वेद्याः संविद्विषयभूताः शब्दस्पर्शादयश्चाकाशादिगुणत्वेन प्रसिद्धास्तदाधारत्वेन प्रसिद्धाश्चाकाशादयश्च वै
चित्र्यात्परस्परं गवाश्वादिवद्वैलक्षण्योपेतत्वात्पृथक्परस्परं भिद्यंते तत्र तेभ्यो विभक्ता बुद्ध्या विवेचिता तत्संवित्तेषां शब्दा
दीनां संवित्तानैकरूप्यात्संवित्संविदित्येकाकारेणावभासमानत्वाद्गगनमिव न भिद्यते अत्रायं प्रयोगः विवादाध्यासिता
संवित्स्वाभाविकभेदशून्याउपाधिकपरामर्शमंतरेण विभाव्यमानभेदत्वाद्गगनवत् शब्दसंवित्स्पर्शसंविदो न भिद्य
न्ते संवित्त्वात्स्पर्शसंविद्वदिति एकस्याप्येवसंविदो गगनस्येवौपाधिकभेदेनापि भिन्नव्यवहारोपपत्तौ वास्तवभेदक
ल्पनायां गौरवं बाधकमुन्नेयम् ३ ॥

पं·टी
तत्त्व·
२

2

उक्तन्यायं स्वप्नेप्यतिदिशति तथा स्वप्नेत्रेति यथा जागरणे वैविध्याद्विषयाणां भेदप्रकटरूपात्संविदोऽभेदस्तथा तेनैव प्रकारेण स्वप्नेक
रणोद्भूपसंप्लुतेषु सत्सु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नः स्वप्नत्वोक्तलक्षणायां स्वप्नावस्थायामपि विषयापरभिन्नानसंविदिति
ननु यदि स्वप्नजागरयोरेकाकारता विषयतत्संविदोर्भेदाभ्यां तर्हि स्वप्नो जागर इति भेदव्यवहारः किंनिमित्तक इत्याशङ्क्याह अत्र
वेद्यं त्विति अत्र स्वप्ने वेद्यं परिदृश्यमानं वस्तुजातं न स्थिरं तस्याप्रतीतिमात्रशरीरत्वात् जागरे तु परिदृश्यमानं वस्तुजातं स्थि
रं स्थायि कालान्तरेपि दृष्टं योग्यत्वादतः स्थिरास्थिरविषयत्वलक्षणवैलक्षण्यात्तद्भेदस्तयोः स्वप्नजागरयोर्भेद इत्यर्थः ननु स्वप्न
जागरयोर्भेदश्चेत्तत्संविदोपि भेदः स्यादित्याशङ्क्याह तयोरिति एकरूपेति हेतुगर्भितं विशेषणं ४ एवमवस्थाद्वये ज्ञानस्यै

तथा स्वप्नेत्र वेद्यं तु न स्थिरं जागरे स्थिरम् तद्भेदोऽतस्तयोः संविदेकरूपान्न भिद्यते ४ सुप्तो
त्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिः सा चावबुद्धविषयावबुद्धं तत्तदा तमः ५ ॥

कत्वं प्रसाधयन् सौषुप्तिकालीनस्यापि तस्यानेनैक्यप्रसाधनाय तत्र तावज्ज्ञानं साधयति सुप्तोत्थितस्येति सुप्तश्चासावुत्थितः सुप्तोत्थितः
सुप्तं सौषुप्तिं तस्मादुत्थित इति वा तस्य सौषुप्ततमोबोधः सौषुप्तिकालीनस्य तमसोऽज्ञानस्य यो बोधो ज्ञानमासीन्न किंचिदवेदि
षमिति सा स्मृतिरेव भवेत्तत्रानुभवस्य कारणस्येन्द्रियसन्निकर्षव्याप्तिलिङ्गादेरभावादिति भावः ततः किं तत्राह सा चेति सा च स्मृतिर
वबुद्धविषया अवबुद्धोऽनुभूतो विषयो यस्याः सा तथोक्ता या स्मृतिः सानुभवपूर्विकेति व्याप्तिर्लोके दृष्टेति भावः ततोपि किं तत्राह
अवबुद्धमिति ततः तस्मात्कारणात्तत्सौषुप्तं तमस्तदा सुषुप्तावबुद्धमनुभूतमित्यर्थः तस्य अत्रायं प्रयोगः विमतं न किंचिदवेदि
षमिति ज्ञानमनुभवपूर्वकं भवितुमर्हति स्मृतित्वात्सा मे मातेति स्मृतिवदिति ५ ॥

तस्यानुभवस्य स्वविषयादज्ञानाद्भेदं बोधान्तरादभेदं चाह द्वाभ्यां सबोध इति स बोधः सोऽस्माज्ज्ञानानुभवः विषयादज्ञानाद्भिन्नः
इष्यशभवितुमर्हतीति बोधत्वात् घटबोधवत् बोधान्तरात्तु भिद्यते बोधत्वात्स्वमबोधवत् फलितं कथयन्नुक्तन्यायमन्यत्राप्य
तिदिशति एवमित्यादिना स्थानत्रयेऽपि एकदिनवर्त्तिजाग्रदाद्यवस्थात्रयेऽपि संविदेकैव सर्वदा कं सावधारणमिति न्याया
त् तद्वद्दिनान्तर इति यथैकस्मिन्दिवसेऽवस्थात्रयेऽपि ज्ञानस्याभेद एवमन्यस्मिन्नपि दिवसेऽनेकधाऽनेकप्रकारेण गताग
म्येषु अतीतानागामिषु मासेषु चैत्रादिषु वर्षेषु प्रभवादिषु युगेषु कृतादिषु कल्पेषु ब्राह्म्यादिषु ज्ञानस्याभेद एवेत्यर्थः सं

सबोधो विषयाद्भिन्नो न बोधात्स्वमबोधवत् एवं स्थानत्रयेऽप्येका संवित्तद्वद्दिनां
तरे ८ मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ७

विदेकत्वसमर्थने फलमाह नोदेतीति यतः संविदेकाऽतो नोदेति नोत्पद्यते नास्तमेति न विनश्यति च अस्मात्तिकयोरु
त्पत्तिविनाशयोरसिद्धेः स्वोत्पत्तिविनाशयोस्तयैव संविदा ग्रहीतुमशक्यत्वात्संविदन्तराभावाच्चेति भावः ननु संविदन्तराभा
वे ग्राहकाभावादस्याप्यभावे जगदान्ध्यं प्रसज्येतेत्यत आह एषेति अत्रायं प्रयोगः संवित्स्वप्रकाशा भवितुमर्हति अवेद्य
त्वे सत्यपरोक्षत्वाद्व्यतिरेके घटवत् न चायं विशेषणासिद्धो हेतुः संविदः स्वयं वेद्यत्वे कर्मकर्तृत्वविरोधात् परवेद्यत्वे
ऽनवस्थानात् अतः स्वप्रकाशत्वेन भासमानायाः संविदः सर्वावभासकत्वसंभवान्न जगदान्ध्यप्रसं इति भावः ७ ॥

पं॰ टी॰
तत्त्व॰
३

भवत्वेवं संविदो नित्यत्वं स्वप्रकाशत्वं च ततः किमित्यत आह इयमिति अत्रायं प्रयोगः इयं संविदात्मा भवितुमर्हति नित्य
त्वे सति स्वप्रकाशत्वात् यन्नैवं तन्नैवं यथा घट इति आत्मनो नित्यत्वं संविद्रूपत्वं प्रसाधनेन सत्यत्वमपि साधितं भवति
नित्यत्वातिरिक्तसत्यत्वाभावात् नित्यत्वं सत्यत्वं तयस्यास्ति तन्नित्यं सत्यमिति वाचस्पतिमिश्रैरुक्तत्वादिति भावः आत्म
न आनन्दरूपत्वं साधयति परानन्द इति आत्मेत्यनुषज्यते परश्चासावानन्दश्च परानन्दः निरतिशयसुखस्वरूप इत्यर्थः
तत्र हेतुमाह परप्रेमास्पदमिति यतो यस्मात्कारणात्परस्मान्निरुपाधिकत्वेन निरतिशयस्य प्रेम्णः स्नेहस्यास्पदं वि

इयमात्मा परानन्दः परप्रेमास्पदं यतः मानभूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ८

षयस्तस्मात् अत्रेदमनुमानं आत्मा परानन्दरूपः परप्रेमास्पदत्वात् यः परानन्दरूपो न भवति नासौ परप्रे
मास्पदमपि यथा घटः तथा न चायं परप्रेमास्पदं न भवति न तस्मात्परमानन्दरूपो न भवतीति ननु आत्मनि
पिउज्जामिति द्वेषस्योपलभ्यमानत्वात्प्रेमास्पदत्वमेवासिद्धं कुतः परप्रेमास्पदत्वमित्याशंक्य तस्य हेतोः स्वसंबंध
निमित्तकत्वेनान्यथासिद्धत्वात् प्रेम्णश्चात्मनि अनुभवसिद्धत्वान्नैवमिति परिहरति मानभूवमिति हि यस्मा
त्कारणादात्मनि विषये मा न भूवमहं मा भूवमिति न ममासत्त्वं कदापि मा भूत् किंतु भूयासमेव सदा सत्त्वमे
व भूयादित्येवंविधप्रेमेक्ष्यते सर्वैरनुभूयते अतो नासिद्धिरित्यर्थः ८ ॥

माभूत्स्वरूपासिद्धिः प्रेम्णः परत्वे प्रमाणाभावाद्विशेषणासिद्धेर्हेतोरित्याशंक्याह तत्प्रेमेति अन्यत्र स्वातिरिक्ते पुत्रादौ यत्प्रेम तत्
दात्मार्थं तेषामात्मशेषत्वनिमित्तकमेव न स्वाभाविकमेवमात्मनि विद्यमानं प्रेमाऽन्यार्थं नात्मनोऽन्यशेषत्वनिमित्तकं न भव
ति किं त्वात्मनिमित्तकमेव अतो निरुपाधिकत्वात्तत्परमं निरतिशयं फलितमाह तेनेति निरतिशयप्रेमास्पदत्वेनात्मनः परमा
नन्दता निरतिशयसुखस्वरूपत्वं सिद्धं ९ एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति इत्थमिति शब्दस्पर्शाद
य इत्यादिना ज्ञानस्य नित्यत्वं प्रसाध्य तस्यैव यमात्मेत्यात्मत्वप्रसाधनेनात्मनः सच्चिद्रूपत्वं साधितं परानन्द इत्या

तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि अतस्तत्परमं तेन परमानन्दतात्मनः ९ इत्थं स
च्चित्परानन्द आत्मा युक्त्या तथाविधं परं ब्रह्म तयोश्चैक्यं श्रुत्यन्तेषूपदिश्यते १० ॥

दिना च परमानंदरूपत्वं समर्थितं अत आत्मा महावाक्ये त्वंपदार्थः सच्चिदानन्दरूपः सिद्धः नन्वेकलक्षणस्यात्मनो
युक्त्यैवावगतत्वादुपनिषदां निर्विषयत्वेनाऽप्रामाण्यप्रसंग इत्याशंक्याह तथाविधमिति तथात्मादृशी विधा प्रकारो य
स्य तत्तथाविधं सच्चिदानंदरूपं परं ब्रह्म तत्पदार्थस्तयोस्तत्त्वंपदार्थयोरैक्यमखंडैकरसत्वं च श्रुत्यन्तेषु वेदान्तेषूपदि
श्यते प्रतिपाद्यत इति अतो न वेदान्तानां निर्विषयत्वमित्यर्थः १० ॥

प॰टी॰
त॰त्र॰
४

आत्मनः परमानन्दरूपत्वमाविष्पति अभानमिति परमानन्दरूपत्वं न भासते भासते वा अभाने ऽप्रतीतौ न परं प्रेमात्मनि निरतिशयः
स्नेहो न स्यात् विषयसौन्दर्यज्ञानजन्यत्वात् स्नेहस्य भाने प्रतीतौ तु विषये सुखसाधने स्रगादौ तज्जन्ये सुखे वा स्पृहेच्छा न स्यात्
फलप्राप्तौ सत्यां साधने इच्छानुपपत्तेर्नित्यनिरतिशयानंदलाभे सति स्रगादिके साधनानुपादानं आदिदोषदूषिते वैषयिके सुखे स्पृहा
योगाद् तस्मादानन्दरूपता आत्मन उपपन्नेति प्रकारांतरस्यासम्भवादेवमिति परिहरति अत इति यतो भानाभानप
क्षयोरुभयोरपि दोषोऽस्ति अतः कारणादात्मनोऽसौ परमानंदता भानेऽपि प्रतीतौ सत्यामपि अभानता ऽप्रतीतिर्भवति ॥ ११ ॥ न

अभानेन परं प्रेम भानेन विषये स्पृहा अतो भानेऽप्यभाता सौ परमानन्दतात्मनः ॥ ११ ॥ अध्ये
तृवर्गमध्यस्थपुत्राध्ययनशब्दवत् भानेऽप्यभानं भानस्य प्रतिबंधेन युज्यते ॥ १२ ॥

न्वेकस्य युगपद्भानाभानेन युज्येते इत्याशंक्य किमिदमयुक्तत्वं शब्दस्य चरत्वस्य उपपत्तिरहितत्वं वा नायमित्याह अध्येतृवर्गेति
अध्येतॄणां वेदपाठकानां वर्गः समूहस्तस्य मध्ये तिष्ठतीति अध्येतृवर्गमध्यस्थः स चासौ पुत्रश्चेति तथा तस्याध्ययने तत्का
र्तृकपठने तस्य शब्दो ध्वनिर्यथा वहिःस्थस्यापि तु भासमानोऽपि सामान्यतो भासते न विशेषतः अयं मत्सुतध्वनिरिति तथा
नन्दस्यापि भानेऽप्यभानं भवतीत्यर्थः द्वितीयं प्रत्याह भानस्येति भानेऽप्यभानमित्येतदप्यनुवर्जनीयं भानस्य स्फुरणस्य
प्रतिबंधेन वक्ष्यमाणलक्षणेन भानेऽप्यभानं सामान्यतः प्रतीतावपि विशेषाकारेणाप्रतीतिर्युज्यत उपपद्यत इत्यर्थः ॥ १२ ॥

कोसौ प्रतिबंध इत्यत आह प्रतिबंध इति अस्ति भातीति व्यवहारार्हे वस्तुनि अस्ति विद्यते भाति प्रकाशते इत्येवंप्रकारं व्यव
हारं अर्हतीत्यस्ति भातीति व्यवहारार्हं तच्च तद्वस्तु चेति तत्तथा तस्मिन्नत्र पूर्वोक्तं व्यवहारं निरस्य निराकृत्य विरुद्धस्य नास्ति न
भातीत्येवंरूपस्य तस्य व्यवहारस्योत्पादनं जननं प्रतिबंध उच्यते १३ उक्तलक्षणस्य प्रतिबंधस्य कारणं दृष्टांतदार्ष्टांतिक
योः क्रमेण दर्शयति तस्येति पुत्रध्वनिश्रुतौ पुत्रध्वनिश्रवणलक्षणे दृष्टांते तस्य प्रतिबंधस्य हेतुः कारणं समानाभिहारो
बहुभिः सह पठनं इह दार्ष्टांतिके व्यामोहैकनिबंधनं व्यामोहानां विपरीतज्ञानानां एकनिबंधनं मुख्यकारणमना

प्रतिबंधोऽस्ति भातीति व्यवहारार्हवस्तुनि तन्निरस्य विरुद्धस्य तस्योत्पादनमुच्यते १३ तस्य हेतुः
समानाभिहारः पुत्रध्वनिश्रुतौ इहानादिरविद्यैव व्यामोहैकनिबंधनं १४ चिदानंदमयब्रह्मप्र
तिबिंबसमन्विता तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा १५ ॥

दिरुत्पत्तिरहिता विद्यावद्रूपमाणामप्रतिबंधकस्य हेतुरित्यर्थः १४ इदानीं प्रतिबंधहेतुभूतामविद्यामुत्पादयितुं त
न्मूलभूतां प्रकृतिमुत्पादयति चिदानंदमयेति यच्चिदानन्दरूपं ब्रह्म तस्य प्रतिबिंबेन प्रतिच्छायया समन्विता यु
क्ता तमोरजःसत्वगुणा सत्वरजस्तमोगुणानां साम्यावस्था या सा प्रकृतिरित्युच्यते सा च द्विविधा द्विप्रकारका भव
ति चकाराद्वहुप्रमाणं प्रकारांतरं सूचयति १५ ॥

सहेतुकं द्वैविध्यमेव दर्शयति सत्वशुद्ध्यविशुद्धिभ्यामिति सत्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिर्गुणान्तरेणाकलुषीकृतता अविशुद्धिर्गुणा
न्तरेणकलुषीकृतता ताभ्यां तेच द्विविधे मायाऽविद्ये मायेत्यविद्येति च मते संमते विशुद्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधानाऽविद्येत्यर्थः
यदर्थं मायाऽविद्ययोर्भेद उक्तस्तदिदानीं दर्शयति मायेति मायाबिम्बो मायायां प्रतिफलितश्चिदात्मा तां मायां वशीकृत्य वर्तमानः स
र्वज्ञः सर्वज्ञत्वादिगुणक ईश्वरः स्यात् १८ अविद्यावशगोऽविद्यायां प्रतिबिंबत्वेन स्थितः तत्परतंत्रस्तु चिदात्मा अन्यो जीवः स्यात् स
च तद्वैचित्र्यात्तस्या अविद्याया उपाधिभूताया वैचित्र्याद विशुद्धितारतम्यादनेकधाऽनेकप्रकारो देवतिर्यगादिभेदेन विविधो भवती

सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः १८ अविद्याव
शगस्त्वन्यस्तद्वैचित्र्यादनेकधा साकारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान् १७ ॥

त्यर्थः यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते इत्युत्तरत्र शरीरत्रितयाद्धि वेचितस्य जीव
स्य परंब्रह्मत्वं वक्ष्यति तत्र तानि कानि त्रीणि शरीराणि तदुपाधिको वा जीवः किंरूपो भवतीत्याकांक्षायां तत्सर्वं क्रमेण व्युत्पादयति
साकारणशरीरमित्यादिना सेति साऽविद्या कारणशरीरं स्थूलसूक्ष्मशरीरादिकारणभूतप्रकृत्यवस्थाविशेषत्वात् कारणमुपचारा
त् शीर्यते तत्त्वज्ञानेनेति शरीरं स्यात् तत्र कारणशरीरेऽभिमानवान् तादात्म्याध्यासेनाहमित्यभिमानवान् जीवः प्राज्ञः
प्रज्ञाऽविनाशित्वरूपानुभवरूपायस्य स प्रज्ञः प्रज्ञ एव प्राज्ञः एतन्नामकः स्यादित्यर्थः ७ ॥

क्रमप्राप्तं सूक्ष्मशरीरं तदुपाधिकं जीवं च तस्मादपि तत्कारणाकाशादिसृष्टिमाह तमःप्रधानप्रकृतेरिति तद्भोगाय ते-
षां प्राज्ञादीनां भोगाय सुखदुःखसाक्षात्कारसिद्धये तमःप्रधानप्रकृतेस्तमोगुणप्रधानायाः प्रकृतेः पूर्वोक्ताया उपादान-
कारणभूतायाः सकाशात् ईश्वराज्ञया ईशानादिशक्तियुक्तस्य जगदधिष्ठातुराज्ञया इच्छापूर्वकसर्जनेच्छारूपया नि-
मित्तकारणभूतया वियदादीनि पृथिव्यन्तानि पंच भूतानि जज्ञिरे प्रादुर्भूतानि उत्पन्नानीत्यर्थः १८ भूतसृष्टिमभिधाय भौ-
तिकसृष्टिमभिदधानः श्रोत्रादेर्ज्ञानेंद्रियसृष्टिमाह सत्त्वांशैरिति तेषां वियदादीनां पंचभिः सत्त्वांशैः सत्त्वगुणभागैरुपा-
दानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यं धीन्द्रियपंचकं धीन्द्रियाणि ज्ञानेन्द्रियाणि तेषां पंचकं क्रमादुपजायते एकैक-

तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया वियत्पवनतेजोम्बुभुवो भूतानि जज्ञिरे १८ सत्त्वांशैः पंचभि-
स्तेषां क्रमाद्धीन्द्रियपंचकं श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते १९ तैरन्तःकरणं सर्वैर्वृत्तिभेदे-
न तद्द्विधा मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका २०

भूतसत्त्वांशादेकैकमिन्द्रियं जायत इत्यर्थः १९ सत्त्वांशानां प्रत्येकं असाधारणकार्याण्यभिधाय सर्वेषां साधारणं कार्यमाह तै-
रिति तैः सहसत्त्वांशैः सर्वैः संभूय वर्तमानैरन्तःकरणं मनोबुद्ध्युपादानभूतद्रव्यमुपजायत इत्यनुषंगः तस्यावान्तरभेदं
सनिमित्तमाह वृत्तिभेदेनेति तदन्तःकरणं वृत्तिभेदेन परिणामभेदेन द्विधा द्विप्रकारं भवति वृत्तिभेदमेव दर्शयति
मन इति विमर्शरूपं विमर्शः संशयात्मिका वृत्तिः सा स्वरूपं यस्य तत्तथा तन्मनः स्यात् निश्चयात्मिका निश्चयोऽध्य-
वसायः स एवात्मा स्वरूपं यस्याः सा निश्चयात्मिका सा वृत्तिर्बुद्धिः स्यात् २० ॥

पं· टी·
पत्र·
९

क्रमशस्तासां रजोंशानां व्यस्तैकैकसाधारणकार्याण्याह रजोंशैरिति तेषां वियदादीनामेव पंचभिः रजोंशैः रजोभागैस्तूपादानभू
तैर्वाक्पाणिपादपायूपस्थाभिधानानि एतन्नामकानि कर्मेन्द्रियाणि क्रियाजनकानीन्द्रियाणि जज्ञिरे २१ रजोंशानामेव साधार
णकार्यमाह तैरिति तैः सर्वैः सहितैः संभूय मिलित्वा कारणतां गतैः प्राणो जायत इति शेषः तस्यावान्तरभेदमाह वृत्तिभेदा
दिति स प्राणो वृत्तिभेदात् प्राणापानादिव्यापारभेदात् पंचधा पंचप्रकारो भवति वृत्तिभेदानेव दर्शयति प्राणोऽपानः समानश्चे

रजोंशैः पंचभिस्तेषां क्रमात्कर्मेंद्रियाणि तु वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे २१
तैः सर्वैः सहितैः प्राणो वृत्तिभेदात्स पंचधा प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः २२ बु
द्धिकर्मेंद्रियप्राणपंचकैर्मनसा धिया शरीरं सप्तदशभिः सूक्ष्मं तल्लिंगमुच्यते २३ ॥

ति ते पुनस्ते तु भेदाः प्राणापानादिशब्दवाच्या इत्यर्थः २२ यदर्थमाकाशादिप्राणान्तानां सृष्टिरुक्ता तदिदानीं दर्शयति बुद्धिक
र्मेन्द्रियप्राणपंचकैरिति बुद्धयो ज्ञानानि कर्माणि व्यापारास्तज्जनकानीन्द्रियाणि बुद्धिकर्मेन्द्रियाणि बुद्धीन्द्रियाणि कर्मेन्द्रियाणि
चेत्यर्थः बुद्धिकर्मेन्द्रियाणि च प्राणाश्च ते बुद्धिकर्मेन्द्रियप्राणास्तेषां पंचकानि तैर्मनसा विमर्शात्मकेन धिया निश्चयरूपया बुद्ध्या
च सप्तदशभिः सप्तदशसंख्याकैः सूक्ष्मशरीरं भवति तस्यैव संज्ञान्तरमाह तल्लिंगमिति उच्यते वेदान्तेष्वित्यर्थः २३ ॥

एवंसूक्ष्मशरीरमभिधाय तदभिमानित्वप्रयुक्तं प्राज्ञेश्वरयोरवस्थान्तरं दर्शयति प्राज्ञइति प्राज्ञोमलिनसत्त्वप्रधानोऽविद्योपाधि
कोजीवस्तत्रतैजसः प्राहुर्वाच्यान्तःकरणोपलक्षितलिंगशरीरेऽभिमानेनतादात्म्याभिमानेनतैजसत्वंतैजसनामकत्वंप्रपद्यतेप्रा
प्नोति ईशःशुद्धसत्त्वप्रधानमायोपाधिकःपरमेश्वरस्तत्रशरीरेऽहमित्यभिमानेनहिरण्यगर्भसंज्ञिकत्वंप्रपद्यतइत्यनुषंगः
तैजसहिरण्यगर्भयोर्लिङ्गशरीराभिमानित्वेसमानेसतितयोःपरस्परंभेदः किंनिबंधनइत्यतआह तयोरिति तयोस्तैजसहिर
ण्यगर्भयोर्व्यष्टित्वंसमष्टित्वंचयतोभवतिततएवभेदइत्यर्थः २४ ईश्वरस्यसमष्टिरूपत्वेजीवानांव्यष्टिरूपत्वेचकारणमाह
समष्टिरितिईशईश्वरोहिरण्यगर्भःसर्वेषांलिंगशरीरोपाधिकानांतैजसानांस्वात्मनातादात्म्यवेदनात् स्वात्मनातादात्म्यस्ये

प्राज्ञस्तत्राभिमानेनतैजसत्वंप्रपद्यते हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता २४ समष्टिरीशः
सर्वेषांस्वात्मतादात्म्यवेदनात् तदभावात्ततोऽन्येतुकथ्यन्तेव्यष्टिसंज्ञया २५ तद्भोगायपुनर्भोग्यभो
गायतनजन्मने पंचीकरोतिभगवान्प्रत्येकंवियदादिकम् २६ ॥

कत्वस्यवेदनाज्ज्ञानात्समष्टिर्भवति ततईश्वरादन्येजीवास्तुतदभावात्स्वतादात्म्यवेदनस्याभावाद्व्यष्टिसंज्ञयाव्यष्टिशब्देन
कथ्यन्ते २५ एवंलिंगशरीरंतदुपाधिकौतैजसहिरण्यगर्भौचदर्शयित्वास्थूलशरीराद्युत्पत्तिसिद्धयेपंचीकरणंनिरूपयि
तुमाह तद्भोगायेति भगवानैश्वर्यादिगुणषट्कसम्पन्नःपरमेश्वरः पुनःपुनरपितद्भोगायतेषांजीवानांभोगायैवभोग्य
भोगायतनजन्मनेभोग्यस्यान्नपानादेर्भोगायतनस्यजरायुजादिचतुर्विधशरीरजातस्यचजन्मनेउत्पत्तयेवियदादिक
माकाशादिभूतपंचकंप्रत्येकमेकैकंपंचीकरोति अपंचात्मकंपंचात्मकंसंपद्यमानंकरोति २६ ॥

कथमेकैकस्य पंचपंचात्मकत्वमित्यत आह द्विधेति वियदादिकमेकैकं द्विधा द्विधा तंत्रेणोच्चारितो द्विधाशब्दः विधाय कृत्वा भागद्वयोपेतं कृत्वे त्यर्थः पुनस्तु पुनरपि प्रथमं प्रथमं भागं चतुर्धा भागचतुष्टयोपेतं विधायेत्यनुषज्यते स्वस्वेतरद्वितीयांशैः स्वस्मात्स्वस्मादितरेषां चतुर्णां चतुर्णां भूतानां यो यो द्वितीयः स्थूलो भागस्तेन तेन सह प्रथमप्रथमभागांशानां चतुर्णां चतुर्णां मध्ये एकैकस्य योजनात्ते वियदादयः प्रत्येकं पंचपंचात्मका भवंति २७ एवं पंचीकरणमभिधाय तैर्भूतैः कृत्स्नायं कार्य्यवर्गं दर्शयति तैरंड इति तैः पंचीकृतैर्भूतैरुपादानकारणभूतैरंडो ब्रह्माण्डमुत्पद्यते तत्र ब्रह्माण्डान्तर्भुवनानि उपरि उपरिभागे वर्तमाना भूम्यादयः सप्तलोकाः

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते २७ तैरण्ड
स्तत्र भुवनं भोग्यभोगाश्रयोद्भवः हिरण्यगर्भः स्थूलेस्मिन्देहे वैश्वानरो भवेत् २८ ॥

भूमेरधः स्थितान्यतलादीनि सप्त पातालानि तानि तेषु च भुवनेषु तैस्तैः प्राणिभिर्भोक्तव्यो ग्राह्यान्नादीनि तत्तल्लोकोचितशरीराणि च तैरेव पंचीकृतैर्भूतैरीश्वराज्ञया जायंते एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरीरेष्वभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वं एकैकस्थूलशरीराभिमानवतां व्यष्टिरूपाणां तैजसानां विश्वसंज्ञकत्वं च भवतीत्याह हिरण्यगर्भ इति अस्मिन्स्थूले देहे वर्तमानो हिरण्यगर्भो वैश्वानरो भवेत् २८ हंसोहम् ॥

तत्रैव वर्तमानास्तैजसा विश्राम भवंति तेषामवांतरभेदमाह देवतिर्यङ्नरादय इति इदानीं तेषां विश्वसंज्ञानां प्राज्ञानां जीवानां तत्त्वज्ञानर
हितत्वेन संसारापत्तिप्रकारं सदृष्टांतं श्लोकद्वयेनाह तेपराग्दर्शिन इति ते देवादयः पराग्दर्शिनः बाह्यानेव घटादीन्पश्यंति न तु
प्रत्यगात्मानं पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्निति श्रुतेः ननु तार्किकादयो देहव्यतिरिक्तमात्मानं
जानंतीत्याशंक्य यथा यथात्मानं जानंति तथापि श्रुतिसिद्धं तत्त्वं न जानंतीत्याशयेनोत्तरमाह प्रत्यगिति २९ अत एव भोगाय स्व
स्वायत्तानुभवाय मनुष्यादिशरीराण्यपि प्राप्य कर्म तत्तच्छरीरोचितानि कर्माणि कुर्वंते नानात्वे एकवचनं पुनश्च कर्मकर्तृ देवादि

तैजसा विश्वतां याता देवतिर्यङ्नरादयः ते पराग्दर्शिनः प्रत्यक्तत्त्वबोधविवर्जिताः २९ कुर्वते
कर्म भोगाय कर्म कर्तुं च भुंजते नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते व्रजंतो जन्मनो जन्म लभ
न्ते नैव निर्वृतिं ३० सत्कर्मपरिपाकात्ते करुणानिधिनोद्धृताः प्राप्य तीरतरुच्छायां विश्राम्यंति यथा
सुखं ३१ ॥

शरीरैस्तत्तत्फलं भुंजते च फलानुभवाभावे तत्तत्सजातीयेच्छानुपपत्त्या तत्तत्साधनानुष्ठानानुपपत्तेः एवं वर्तमानास्ते
जीवाः नदीप्रवाहपतिताः कीटा इवावर्तादावर्तान्तरमाशु व्रजंतो यथा निर्वृतिं सुखं न लभंते एवमाशु जन्मनोपि जन्म व्र
जंतः सुखं नैव लभंत इति ३० एवं संसारापत्तिमभिधाय तन्निवृत्त्युपायं दर्शयितुं दृष्टांतं तावदाह सत्कर्मपरिपाकात्
पूर्वोपार्जितपुण्यकर्मपरिपाकात्कृपालुना केनचित्पुरुषविशेषेणोद्धृता नदीप्रवाहाद्बहिर्निस्सारिताः संतस्तीरतरु
च्छायां प्राप्य यथा सुखं सुखं यथा भवति तथा विश्राम्यंति ३१ ॥

इदानीं दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति उपदेशमवाप्यैवेति एवमुक्तेन प्रकारेण पूर्वोपार्जितपुण्यकर्मपाकवशादेव तत्त्वदर्शि
नः प्रत्यगभिन्नब्रह्मसाक्षात्कारवतः आचार्याद्गुरोः सकाशात् उपदेशं तत्त्वमस्यादिवाक्यार्थज्ञानसाधनं श्रवणं वक्ष्यमाणमवा
प्य संपाद्य पंचकोशविवेकेन अन्नमयादीनां पंचानां कोशानां विवेकेन वक्ष्यमाणविवेचनेन परां निर्वृतिं मोक्षसुखं लभन्ते
प्राप्नोति ३२ ते केऽन्नादयः पंचकोशा इत्याकांक्षायां तानुद्दिशति अन्नमिति अन्नं प्राणो मनो बुद्धिरानन्दश्चेत्येते पंचकोशाः बु
द्धिर्विज्ञानं तेषामन्नादीनां कोशशब्दाभिधेयत्वे कारणमाह तैरावृत इति तैः कोशैरावृत आच्छादितः स्वात्मा स्वस्वरूपभूत आ

उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः पंचकोशविवेकेन लभंते निर्वृतिं पराम् ३२ अ
न्नं प्राणो मनो बुद्धिरानंदश्चेति पंच ते कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत् ३३
स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः लिंगे तु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह ३४

त्मा विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं जननादिरूपं संसारं व्रजेत् स्वदेहं कोशो यथा कोशकारकृमेरावरकत्वेन क्लेशहेतु
रेवमन्नादयोप्यद्वयानन्दत्वाद्यावरकत्वेनात्मनः क्लेशहेतुत्वात्कोशा इत्युच्यन्ते इत्यर्थः ३३ तेषां कोशानां स्वरूपं क्रमेण प्रतिपाद
यति स्यात्पंचीकृतेत्यादिना मोदादिवृत्तिभिरित्यन्तेन सार्द्धश्लोकद्वयेन पंचीकृतेभ्यो भूतेभ्य उत्पन्नः स्थूलो देहोऽन्नसंज्ञकोऽ
न्नमयशब्दितः कोशः स्यात् प्राणस्तु प्राणमयस्तु कोशः लिंगे लिंगशरीरे वर्तमानैः राजसैः रजोगुणकार्यभूतैः प्राणैः प्रा
णापानादिभिः पंचभिर्वागादिभिः कर्मेन्द्रियैः सह दशभिः स्यात् प्राणमयस्तु कोशः ३४ ॥

सात्त्विकैरिति विमर्शात्मा संशयात्मकं पंचभूतसत्त्वकार्यं यन्मन उक्तं तत्सात्त्विकैः प्रत्येकभूतसत्त्वकार्यभूतैः धीन्द्रियैः श्रोत्रादि-
भिः पंचभिर्ज्ञानेन्द्रियैः साकं सहितं मनोमयः कोशः स्यादिति पूर्वेण सह संबन्धः निश्चयात्मिका धीः तेषामेव सत्त्वकार्यरूपा बुद्धिस्तै-
रेव सर्वैर्ज्ञानेन्द्रियैरेव साकं सहिता सती विज्ञानमयो विज्ञानमयाख्यः कोशः स्यात् ३५ कारणे कारणशरीरभूतायामविद्या-
यां यन्मलिनं सत्त्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्यैरिष्टदर्शनलाभभोगजन्यैः सत्त्वविशेषैः सहितमानंदमयः
आनंदमयाख्यकोशः स्यादिति ननु स्थूलशरीरादीनामन्नमयादिशब्दवाच्यत्वे स वा एष पुरुषोऽन्नरसमय इत्युपक्रम्य तस्माद्वा
एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः प्राणमयादन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतत्वादात्मनोऽन्नमयादिशब्दवा-

सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका
३५ कारणे सत्त्वमानंदमयो मोदादिवृत्तिभिः तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ३६
अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते ३७ ॥

च्यत्वं कथमुच्यते इत्याशंक्य देहादीनामन्नादिविकारत्वेनान्नमयादिशब्दवाच्यत्वं आत्मनस्तु तेन तेन कोशेन सह तादात्म्याभि-
मानादित्याह तदिति आत्मा प्रत्यगात्मा तत्तत्कोशैस्तेन तेन कोशेन सह तादात्म्यात्तादात्म्याभिमानात् तत्तन्मयस्तत्तत्कोशमयः
स्यात् व्यवहारकालेऽन्नमयादिकोशप्राधान्यादन्नमयादिशब्दवाच्य इत्यर्थः तुशब्द आत्मनः कोशेभ्यो वैलक्षण्यद्योतनार्थः ३६
कथं तर्ह्येवंविधस्यात्मनो ब्रह्मत्वं भवतीत्याशंक्य कोशेभ्यो विवेकाद्भवतीत्याह अन्वयव्यतिरेकाभ्यामिति अन्वयव्यतिरेका-
भ्यां वक्ष्यमाणलक्षणाभ्यां पंचकोशविवेकतः पंचानां कोशानामन्नमयादीनां विवेकतः प्रत्यगात्मनो विवेचनेन पृथक्क-
रणेन यद्वा पंचकोशेभ्योऽन्नमयादिभ्य आत्मनः पृथक्करणेन स्वात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्य उद्धृत्य बुद्ध्या निः-
कृष्य चिदानंदस्वरूपं निश्चित्य परं ब्रह्म सर्वोत्कृष्टं लक्षणं प्रपद्यते प्राप्नोति ब्रह्मैव भवतीत्यर्थः ३७ ॥

इदानीं विवक्षितावन्वयव्यतिरेकौ दर्शयति अभान इति स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभाने प्रतीतौ सत्यामात्म
नः प्रतीचो यद्भानं स्वप्नसाक्षित्वेन यत्स्फुरणमस्ति स आत्मनोऽन्वयः तस्यामेव स्वप्नावस्थायां तद्भाने तस्यात्मनः स्फुरणे सति अन्या
नवभासनं अन्यस्य स्थूलदेहस्यानवभासनं अप्रतीतिर्व्यतिरेकः स्थूलदेहस्येति शेषः अस्मिन्प्रकरणेऽन्वयव्यतिरेकशब्दाभ्या
मनुवृत्तिव्यावृत्ती उच्येते ३८ एवं स्थूलदेहस्यानात्मत्वावबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेहस्य तथात्वावगमकौ
तौ दर्शयति लिंगाभान इति सुषुप्तावस्थायां लिंगस्य सूक्ष्मदेहस्याभानेऽप्रतीतौ आत्मनो भानं तदवस्थासाक्षित्वेनात्मनः स्फु

अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः सोऽन्वयो व्यतिरेकस्तद्भानेऽन्यानवभासनम् ३८
लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः व्यतिरेकस्तु तद्भाने लिंगस्याभानमुच्यते ३९ तद्वि
वेकाद्विविक्ताः स्युः कोशाः प्राणमनोधियः ते हि तत्र गुणावस्थाभेदमात्रात्पृथक्कृताः ४० ॥

रणं आत्मनोऽन्वयः स्यात् तद्भाने आत्मभाने लिंगस्याभानं लिंगदेहस्यास्फुरणं व्यतिरेक इत्युच्यते ३९ ननु पंचकोशविवेचन
मुपक्रम्य लिंगदेहविवेचनं प्रकृतावसंगतमित्याशंक्य प्राणमयादिकोशत्रितयस्य तत्रैवांतर्भावान्न प्रकृतासंगतिरित्याह
तद्विवेकादिति तस्य लिंगशरीरस्य विवेकाद्विवेचनात्प्राणमनोधियः एतन्नामकाः कोशा विविक्ताः आत्मनः पृथक्कृता
स्युः कुत इत्यत आह तेहितत्रेति हि यस्मात्कारणात्ते प्राणमयादयस्त्रयस्तत्र तस्मिंल्लिंगशरीरे गुणावस्थाभेदमात्राद्गुणयोः
सत्त्वरजसोरवस्थाभेदमात्राद्गुणप्रधानभावेनावस्थानविशेषादेव पृथक्कृता भेदेन निर्दिष्टा इत्यर्थः ४० ॥

इदानीमानंदमयकोशत्वेन विवक्षितस्य कारणशरीरस्य विवेचनोपायमाह सुषुप्त्यभान इति समाधौ वक्ष्यमाणलक्षणायां समाध्य-
वस्थायां सुषुप्त्यभाने सुषुप्तिशब्दोपलक्षितस्य कारणदेहरूपस्याज्ञानस्याप्रतीतौ आत्मनस्तु शब्दोऽवधारणे आत्मन एव भानं
स्फुरणं यदस्ति स आत्मनोऽन्वयः आत्मभाने आत्मस्फूर्तौ सत्यां सुषुप्त्यनवभासनं सुषुप्त्युपलक्षितस्याज्ञानस्याप्रतीतिरेव व्यति-
रेकस्तस्येति शेषः अत्रायं प्रयोगः अयमात्मा अन्नमयादिभ्यो भिद्यते तेषु परस्परं व्यावर्तमानेष्वपि स्वयमव्याहतत्वात् यद्येषु
व्यावर्तमानेष्वपि न व्यावर्तते तत्तेभ्यो भिद्यते यथा कुसुमेभ्यः सूत्रं यथा वा खंडादिभ्यो गोत्वमिति ४१ एवमन्व-

सुषुप्त्यभाने भानं तु समाधावात्मनोऽन्वयः व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभासनम् ४१
यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते ४२ ॥

यव्यतिरेकाभ्यां कोशपंचकाद्विभक्तस्यात्मनो ब्रह्मप्राप्तिर्भवतीत्युक्तं तत्प्रतिपादिकामंगुष्ठमात्रः पुरुषोंऽतरात्मेत्यादि-
कांतैत्तिरीयाद्युक्तमस्तनामिस्पंताकठश्रुतिमर्थतः पठति यथा मुंजादिति यथा येन प्रकारेण मुंजादेतन्नामकात्तृणवि-
शेषादिषीकां गर्भस्थं कोमलं तृणं युक्त्या बहिरावरकत्वेन स्थितानां स्थूलपत्राणां विभजनलक्षणेनोपायेन समुद्ध्रियते
एवमात्मापि युक्त्या अन्वयव्यतिरेकलक्षणेनोपायेन शरीरत्रितयात्स्थूलसूक्ष्मकारणशरीरत्रयाद्धीरैर्ब्रह्मचर्यादिसाधनसम्पन्नैर-
धिकारिभिः समुद्धृतः पृथक्कृतश्चेत्स परं ब्रह्मैव जायते चिदानंदरूपत्वस्य लक्षणस्योभयोरविशिष्टत्वादित्यभिप्रायः ४२

एतावता ग्रंथसंदर्भेण सफलस्य तत्त्वस्य निरूपितत्वादुत्तरग्रंथभागस्यानारंभप्रसंग इत्याशंक्य तदारम्भसिद्धये वृत्तानुकीर्तनपूर्वकमुत्तर
ग्रंथस्य तात्पर्यमाह परापरात्मनइति एवमुक्तेन प्रकारेण परापरात्मनोस्तत्त्वंपदार्थयोः परात्मजीवात्मनोरेकताऽभिन्नता युक्त्या
लक्षणसाम्यप्रदर्शनाद्युपायेन संभाविताङ्गीकारिता सा एकता तत्त्वमस्यादिवाक्यैः स्वंशभागत्यागेन विरुद्धांशपरित्यागेन लक्ष्यते
लक्षणया बोध्यते ४३ तत्त्वमसीति वाक्यार्थज्ञानस्य तदादिपदार्थज्ञानपूर्वकत्वात् तत्पदस्य वाच्यमर्थं तावदाह जगतइति
यत्सच्चिदानंदलक्षणं ब्रह्म तामसीं तमोगुणप्रधानां मायामादाय उपाधित्वेन स्वीकृत्य जगतश्चराचरात्मकस्य कार्यवर्गस्यो

परापरात्मनोरेवं युक्त्या संभावितैकता तत्त्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते ४३ जग
तो यदुपादानं मायामादाय तामसीं निमित्तं शुद्धसत्त्वां तामुच्यते ब्रह्म तद्गिरा ४४ यदाम
लिनसत्त्वां तां कामकर्मादिदूषितां आदत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते ४५ ॥

पादानं प्रधानं साधिष्ठानं शुद्धसत्त्वां विशुद्धसत्त्वप्रधानां तामुपाधित्वेन स्वीकृत्य निमित्तं उपादानाद्यऽभिन्नं कर्तृ भवति
तन्निमित्तोपादानोभयरूपं ब्रह्म तद्गिरा तत्त्वमसिवाक्यस्थेन तत्पदेनोच्यते ४४ त्वंपदवाच्यार्थमाह यदेति तदेव
ब्रह्म यदा यस्यामवस्थायां मलिनसत्त्वामीषद्रजस्तमोमिश्रेण मलिनसत्त्वप्रधानामत एव कामकर्मादिदूषितां तां
मविद्याशब्दवाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति तदा त्वंपदेनोच्यते ४५ ॥

एवं तत्त्वंपदार्थावभिधाय वाक्यार्थमाह त्रितयीमिति त्रितयीमपि त्रिप्रकारामपि तमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधा
नत्वभेदेनोक्तामत एव परस्परविरोधिनीं तां मायां मुक्त्वा परित्यज्य अखण्डं भेदरहितं सच्चिदानन्दं ब्रह्म महावाक्येन लक्ष्यत इत्युक्तं
४६ नन्वेवं लक्षणाहत्या वाक्यार्थबोधनं कुत्र दृष्टमित्याशङ्क्याह सोयमिति सोयं देवदत्त इत्यादिवाक्ये पूर्वं तदिदं तयोः तद्देशतद्दे
शकालवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादेकत्वानुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैकाश्रयो देवदत्तस्वरूपमेकमेव
यथा लक्ष्यते ४७ एवं दृष्टान्तमभिधाय दार्ष्टान्तिकमाह मायाऽविद्येति एवं सोयं देवदत्त इत्यादिवाक्ये यथा देवदत्तस्वरूप
मेकमेव लक्ष्यते तेन हन्त परजीवयोरुपाधिभूते मायाऽविद्ये द्वे अंशे विहाय परित्यज्याऽखण्डं भेदरहितं सच्चिदानन्दं परं ब्र

त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीं अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते ४६ सोय
मित्यादिवाक्ये प्रविरोधात्तदिदं तयोः त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा ४७ मायावि
द्ये विहायैवमुपाधी परजीवयोः अखण्डं सच्चिदानन्दं परं ब्रह्मैव लक्ष्यते ४८ सविकल्पस्य ल
क्षत्वे लक्ष्यस्य स्यादवस्तुता निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च सम्भवि ४९ ॥

सैव महावाक्येन लक्ष्यते ननु किं महावाक्येन लक्ष्यं सविकल्पकमुत निर्विकल्पकमिति विकल्प्य प्रथमे पक्षे दोषमाह
सविकल्पस्येति सविकल्पकस्य विकल्पेन विपरीतत्वेन कल्पितेन नामजात्यादिरूपेण सह वर्तत इति स
विकल्पं तस्य लक्ष्यत्वे वाक्येन बोध्यत्वे लक्ष्यस्य वाक्यार्थतया लक्षणस्यावस्तुता साक्षिमिथ्यात्वं स्यात् द्वितीये दोषमाह नि
र्विकल्पस्येति निर्विकल्पस्य नामजात्यादिरहितस्य लक्ष्यत्वं न दृष्टं लोके तत्क्वापि दृष्टं न च सम्भवि उपपद्यमानमपि
न भवति लक्ष्यत्वस्य मेवतो निर्विकल्पकस्याचानादिति ४९ ॥

पं·टी·
तन्त्र·
११

सिद्धं नीजात्मनुत्रभ्वान्नेदं चोद्यमिति विकल्पपूर्वकं दोषमाह विकल्प इति सविकल्पस्य निर्विकल्पस्य वा लक्षत्वमिति यो विकल्पस्तया
कृतः स किं निर्विकल्पस्य उत सविकल्पस्य वा भवेत् आद्ये प्रथमे पक्षे व्याहतिस्तयोक्तोऽर्थाभावात एव अन्यत्र हि द्वितीये पक्षेऽनवस्थादयः
तथा हि सविकल्पस्य विकल्प इत्यत्र विकल्पेन सह वर्त्तत इत्यत्र तृतीयान्तविकल्पपदेन प्रथमान्तविकल्पपदेनैक एव विकल्पोऽभि
धीयते द्वौ वा एक एव चेत् स्वयमेक एव विकल्पाश्रयविशेषणतयाऽऽश्रयस्तदाश्रितो विकल्पश्चेत्तदात्माश्रयता द्वौ चेत्तदा तृतीयान्त
शब्दनिर्दिष्टस्यापि विकल्पस्य विकल्परूपत्वात्तदाश्रयस्यापि सविकल्पत्वात् न हि विशेषणभूतो विकल्पः किं प्रथमान्तशब्दनिर्दिष्ट एव विकल्पः

॥

विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत् आद्ये व्याहतिरन्यत्रानवस्थात्माश्रयादयः ५·
इदं गुणक्रियाजातिद्रव्यसंबन्धवस्तुषु समं तेन स्वरूपस्य सर्वमेतदितीष्यते ५१ ॥

उत ताभ्यामन्यः आद्ये त्वन्योन्याश्रयता द्वितीयेऽपि धर्मिविशेषणीभूतो विकल्पः किं प्रथमान्तशब्दनिर्दिष्ट उत तेभ्योऽन्यः आद्ये चक्रिकापत्तिः
द्वितीयेऽपि तस्याप्यन्यः तस्याप्यन्य इत्यनवस्थापात इति ५· न केवलमत्रैवेदं दूषणमपि तु सर्वत्रैवं विधं विकल्पपूर्वकं दूषणं प्रसरतीत्या
ह इदमिति इदं विकल्पदूषणजातं गुणक्रियाजातिद्रव्यसंबन्धवस्तुषु गुणादिसंबन्धान्तेषु पंचसु वस्तुषु समं तथा हि गुणः किं निर्गुणे वर्त्तते उ
त गुणवति क्रियापि क्रियारहिते वर्त्तते क्रियावति वा आद्ये व्याघातः अन्यत्रात्माश्रयादय इति सर्वत्रैव सूक्ष्मं न त्विदमसङ्गतं चेत्किं सङ्गतम
मित्याशंक्याह तेनेति तेनैव विकल्पस्यासंगतत्वेनैतद्गुणादिकं सर्वं स्वरूपस्येतीष्यते गुणादयः सर्वे वस्तुस्वरूपे वर्त्तन्त इत्यभिप्रायः ५१

भवत्वेवमन्यत्र प्रकृते किमायातमित्यत आह विकल्पतदभावाभ्यामिति विकल्पतदभावाभ्यां विकल्पेन विकल्पाभावेन वा संस्पृष्टात्मवस्तुनि संस्पर्शरहिते परमात्मवस्तुनि विकल्पितेन वलता त्व संबन्धाद्यास्तत्र विकल्पितत्वं नाम सविकल्पस्य वा निर्विकल्पस्य वेति सर्वोक्तेन विषयीकृतत्वं वलत्वं लक्षणा इत्याज्ञाप्यत्वे संबन्ध संयोगादिः आदिशब्देन द्रव्यादयो गृह्यन्ते तथाह्यवधारणे तत्र द्रव्यं नाम गुणानामाश्रयो द्रव्यं समवायिकारणं द्रव्यमिति वा तार्किकैर्लक्षितं कर्मव्यतिरिक्तत्वे सति जातिमात्राश्रयो गुणः नित्यमेकमनेकवृत्ति सामान्यमिति लक्षिता जातिः संयोगवियोगयोरसमवायिकारणं जातीयकर्मे-

विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि विकल्पितेन वलता त्व संबंधाद्यास्तु कल्पिताः ५२
इष्ट्वा वा कौलदृष्ट्या तु सत्यां न श्रवणं भवेत् श्रुत्वा संभावितज्ञानानुसंधानं मननं हि तत् ५३

ति लक्षिता क्रिया एते सर्वे स्वरूपे कल्पिता एवेत्यर्थः ५२ एतावता ग्रन्थसंदर्भेण किमुक्तं भवतीत्याकाङ्क्षायां फलितमाह इष्ट्वेति इष्ट्वा जगतो यदुपादानमित्यादिग्रन्थजातेनोक्तप्रकारेण वा कौलक्रमस्यादिवाक्यैस्तदर्थानुसंधानेन वा वाक्यानामर्थस्य जीवब्रह्मणोरेकत्वलक्षणस्यानुसंधानं श्रवणं भवेत् श्रुत्वा शब्दस्पर्शादयो वेद्या इत्यादिना परापरात्मनोरेवं श्रुत्या संभावितैकतेष्यन्ते न ग्रन्थसंदर्भेणोक्तप्रकरणसंभावितज्ञानानुसंधानं श्रुतस्यार्थस्योपपद्यमानत्वज्ञानं यदस्ति तन्मननमित्युच्यते ५३ ॥

पं·टी·
तत्रे·
१२

इदानीं निदिध्यासनमाह ताभ्यामिति ताभ्यां श्रवणमननाभ्यां निर्विचिकित्से ऽर्थे निर्गतविचिकित्सा संशयो यस्मादसौ निर्विचिकि-
त्सस्तस्मिन्नर्थे विषये स्थापितस्य धारणाविषये वर्तमानस्य चेतसो देशबन्धश्चित्तस्य धारणेति पतञ्जलिनोक्तत्वात् यदेकताना-
नत्वमेकाकारवृत्तिप्रवाहवत्त्वमेतन्निदिध्यासनमुच्यते हि प्रसिद्धं योगशास्त्रे तत्र प्रत्ययैकतानता ध्यानमिति ५४ तस्यै-
व निदिध्यासनस्य परिपाकदशारूपं समाधिमाह ध्यातृध्यानेति निदिध्यासनेनावधानात् ध्यानं ध्येयं चेति त्रयं भासते
तत्र यदा चित्तमभ्यासवशेन ध्यातृध्याने ध्यातारं ध्यानं च क्रमात् परित्यज्य ध्येयैकगोचरं ध्येयमेकमेव गोचरो विषयो यस्य तत्त-

ताभ्यां निर्विचिकित्से ऽर्थे चेतसः स्थापितस्य यत् एकतानत्वमेतद्धि निदिध्यासनमुच्यते ५४
ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम् निर्वातदीपवच्चित्तं समाधिरभिधीयते ५५ वृत्त-
यस्तु तदानीमज्ञाता अप्यात्मगोचराः स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात् ५६ ॥

पावियं भवति तदा समाधिरित्युच्यते तत्र दृष्टान्तः निर्वातदीपवदिति वायुरहिते प्रदेशे वर्तमानो दीपो यथा नि-
श्चलो भवति तद्वदित्यर्थः ५५ ननु समाधौ वृत्तीनामनुपलब्धौ ध्येयैकगोचरत्वमपि चित्तं न शक्यतद्व्याप्य शक्य
वृत्तिसद्भावस्यानुमानगम्यत्वान्नैवमित्याह वृत्तयस्त्विति आत्मगोचराः आत्मा गोचरो विषयो यासां ता वृत्तयस्तु
तदानीं समाधिकाले अज्ञाता अपि व्युत्थितस्य समाधेरुत्थितस्य समुत्थितादुत्पन्नात् स्मरणादेतावन्तं कालं समा-
हितो ऽभूवमित्येवंरूपादनुमीयन्ते यद्यत्स्मर्यते तत्तदनुभूतमिति व्याप्तेर्लोकसिद्धत्वादित्यर्थः ५६ ॥

12

ननु तदानीं हठस्यादकप्रयत्नाभावात्कथं हठस्यानुहृत्तिरित्याशंक्य तात्कालिकप्रयत्नाभावेपि प्राथमिकादेव प्रयत्नाददृष्टादिसहकारिस
हितादृवतीत्याह हृत्तीनामिति ध्येयैकगोचराणां हृत्तीनामनुहृत्तिस्तु प्रवाहरूपेणानुगतिस्तु प्रथमादपि प्रयत्नात्समाधिपूर्वकाली
नादपि अदृष्टे अशुक्लकृष्णस्याप्योयः पुण्यविशेषः कर्माशुक्लकृष्णं योगिनः त्रिविधमितरेषामिति पतंजलिना सूत्रितत्वात् यस्मात्
सकृदभ्यासस्संस्कारः पुनः पुनः समाध्यभ्यासेन जनितो भावनाख्यः संस्कारविशेषस्ताभ्यां सहकारिकारणाभ्यां सह वर्तमानाद्भ
वति ५७ ननु वयं समाधिः सर्वाचार्यैर्न निरूपितो दृष्टइत्याशंक्य सर्वं गुरुणा श्रीकृष्णेनैव निरूपितत्वान्नैवमिति यथा दीप इति
यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेत्यादिभिः श्लोकैरनेकथा नानाप्रकारेण भगवानुक्तानेव योगादि संपन्नश्चमेव निर्विकल्पक

हृत्तीनामनुहृत्तिस्तु प्रयत्नात्प्रथमादपि अदृष्टात्सकृदभ्याससंस्कारसचिवाद्भवेत् ५७ यथा
दीपो निवातस्थ इत्यादिभिरनेकदा भगवान्निममेवार्थमर्जुनाय निरूपयत् ५८ अनादाविह
संसारे संचिताः कर्मकोटयः अनेन विलयं यान्ति शुद्धो धर्मो विवर्धते ५९ धर्ममेघमिमं प्राहुः स
माधिं योगवित्तमाः वर्षत्येष यतो धर्मामृतधाराः सहस्रशः ६० ॥

समाधिरूपमर्थमर्जुनाय शिक्षायति निरूपयन्निरूपितवान् ५८ अस्य समाधेरवांतरफलमाह अनादाविति अनादौ स्पष्टे इहास्मिन्संसा
रे संचिताः कर्मकोटयः कर्मणां पुण्यापुण्यलक्षणानां कोटय इत्युपलक्षणं अपरिमितानि कर्माणीत्यर्थः अनेन समाधिना विलयं या
न्ति विनश्यन्ति क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर इति श्रुतेः ज्ञानाग्निः सर्वकर्माणीति स्मृते श्च शुद्धो धर्मस्सविलासा विद्यानि
वर्तकतत्त्वसाक्षात्कारसाधनभूतो धर्मो विवर्धते स्पष्टं ५९ तत्र किं प्रमाणमित्युक्तस्त्राह धर्ममेघमिति योगवित्तमा इति शायेनयो
गज्ञाः ब्रह्मसाक्षात्कारवंत इति यावत् इमं निर्विकल्पसमाधिं धर्ममेघं प्राहुः स्पष्टं पतञ्जलिपादयति वर्षतीति यतः कारणादेष निर्वि
कल्पसमाधिर्धर्मामृतधाराः धर्मलक्षणामृतधाराः सहस्रशो वर्षति क्षणमेकं क्रतुशतस्यापीति श्रुतेः अतो धर्ममेघं प्राहुरिति पूर्वे

इदानीं समाधेः परं प्रयोजनमाह अमुनेति अमुना समाधिना वासनाजाले अहंकारममकारकर्तृत्वाद्यभिमानहेतुभूते ज्ञानविरुद्धसंस्कारसमूहे निःशेषं यथा भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्ये कर्मसंचये समूलोन्मूलिते समूलं यथा भवति तथोन्मूलिते उद्धृते विनाशिते इत्येतावत् ६१ फलितमाह वाक्यमिति वाक्यं तत्त्वमस्यादिवाक्यम् अप्रतिबद्धं सत् कामवासनाद्यप्रतिबन्धरहितं सत् प्राक् परोक्षावभासिते पूर्वं परोक्षतया प्रकाशिते तत्त्वे करामलकवत् करस्थितामलकगोचरम् इव अपरोक्षम् अपरोक्षतया तत्त्वावभासनसमर्थं बोधं ज्ञानं प्रसूयते संजनयति ६२ इदानीं परोक्षज्ञानस्य फलमाह परोक्षमिति देशिकपूर्वकं गुरुमुखाल्लब्धं शाब्दं तत्त्वमस्यादिवाक्यजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकं ज्ञानपूर्वकं यथा भवति तथा भूतं कृत्स्नं समस्तं पापं वह्निवद्दहतीति ६३

अमुना वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ६१ वाक्यमप्रतिबद्धं सत् प्राक् परोक्षावभासिते करामलकवद्बोधमपरोक्षं प्रसूयते ६२ परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ६३ अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकं संसारकारणाज्ञानतमसश्चण्डभास्करः ६४ इत्थं तत्त्वविवेकं विधाय विधिवन्मनः समाधाय विगलितसंसृतिबन्धः प्राप्नोति परं पदं नरो न चिरादिति ६५ इति पंचदश्यां प्रत्यक्तत्त्वविवेकः समाप्तः १

इदानीम् अपरोक्षज्ञानस्य फलमाह अपरोक्षेति शाब्दं देशिकपूर्वकं व्याख्यातम् अपरोक्षात्मविज्ञानम् अपरोक्षतया आत्मनो विज्ञानं संशयविपर्ययरहितं यज्ज्ञानं तत् संसारकारणाज्ञानतमसः संसारकारणम् यदज्ञानम् आत्मतत्त्वाज्ञानं तमस्तस्य चण्डभास्करो मध्याह्नकालीनः सूर्यः वा यथा तमसश्चण्डभास्कर इव अज्ञानतमसो निवर्तकम् इत्यर्थः ६४ ग्रन्थाभ्यासफलमाह इत्थमिति नरः इत्थम् उक्तेन प्रकारेण तत्त्वविवेकं तत्त्वस्य ब्रह्मात्मैकत्वलक्षणस्य विवेकं कोशपंचकादिविवेचनं विधाय कृत्वा तस्मिन् तत्त्वे विधिवत् शास्त्रोक्तप्रकारेण मनः समाधाय स्थिरीकृत्य विगलितसंसृतिबन्धः अपरोक्षज्ञानेन विनिहतसंसारबन्धः सन् परं पदं निरतिशयानन्दरूपं मोक्षं न चिरात् अविलम्बेन प्राप्नोति सत्यज्ञानानन्दलक्षणं ब्रह्मैव भवतीत्यर्थः ६५ इति श्रीरामकृष्णाख्यविदुषा विरचिता प्रत्यक्तत्त्वविवेकव्याख्या

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पंचभूतविवेकस्य व्याख्यानं क्रियते मया १ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेति श्रुत्या जगदुत्पत्तेः पुरा यज्जगत्कारणं सद्रूपमद्वितीयं ब्रह्म श्रुतं तस्य वाङ्मनसागोचरत्वेन स्वतोवगंतुमशक्यत्वात्तत्कार्यत्वेन तदुपाधिभूतस्य भूतपंचकस्य विवेकद्वारेण तदवबोधनायोपोद्घातत्वेन भूतपंचकविवेकं प्रतिजानीते सदद्वैतमिति तत्र तावदाकाशादीनां पंचानां भूतानां गुणतो भेदज्ञापनाय तद्गुणानाह शब्दस्पर्शाविति ननु ते गुणाः किं सर्वे सर्वेषामुत एकैकस्यैकैको गुण इति विमर्शे यन्नोभयथापि किंतु प्रकारांतरमस्तीत्यभिप्रायेणाह एकद्वित्रिचतुरिति २ तदे

सदद्वैतं श्रुतं यत्तत्पंचभूतविवेकतः बोद्धुं शक्यं ततो भूतपंचकं प्रविविच्यते १ शब्दस्पर्शौ रूपरसौ गंधो भूतगुणा इमे एकद्वित्रिचतुःपंचगुणा व्योमादिषु क्रमात् २ प्रतिध्वनिर्वियच्छब्दो वायौ वीसीति शब्दनम् अनुष्णाशीतसंस्पर्शो वह्नौ भुगुभुगुध्वनिः ३ उष्णस्पर्शः प्रभा रूपं जले बुलबुलुध्वनिः शीतस्पर्शः शुक्लरूपं रसो माधुर्यमीरितम् ४ ॥

वप्रकारांतरं विशदयति प्रतिध्वनिरित्यादिभिः आकाशे तावच्छब्द एक एव गुणः स च प्रतिध्वनिरूपः वायोः शब्दस्पर्शौ तत्र वायोः शब्दमनुकारेण दर्शयति वीसीति एवमुत्तरत्राप्यनुकरणशब्दं द्रष्टव्यं तस्य स्पर्शमाह अनुष्णाशीतसंस्पर्श इति वह्नेः शब्दस्पर्शरूपाणि त्रयो गुणाः ते क्रमेणाभिधीयंते वह्नौ भुगुभुगुध्वनिः ३ उष्णस्पर्शः प्रभा रूपमिति जले शब्दादयो रसांताश्चत्वारो गुणास्तानाह जले बुलबुलुध्वनिः शीतस्पर्शः शुक्लरूपं रसो माधुर्यमीरितमिति ४ ॥

भूमौ शब्दादिगन्धान्ताः पञ्च गुणास्तानुदाहरति भूमौ कडकडाशब्द इत्यादिना सुरभीतरगन्धौ द्वावित्यनेन तदुक्तमर्थमुपसंहरति गुणा इति ५
एवं गुणतो भेदमभिधाय कार्यतो भेदं वक्तुं तावत् तत्कार्याणि ज्ञानेन्द्रियाणि तावदाह श्रोत्रमिति ६ तेषां स्थानानि व्यापारं च दर्शयति कर्णा
दिगोलकस्थमिति इन्द्रियसद्भावे किं प्रमाणमित्याकाङ्क्षायां कार्यलिङ्गकानुमानमित्याह सौक्ष्म्यादिति न चक्षू रूपोपलब्धिः करणज
न्या क्रियात्वात् छिदिक्रियावदित्यादिकं द्रष्टव्यं सौक्ष्म्यादपञ्चीकृतभूतकार्यत्वेन दुर्लक्ष्यत्वादित्यर्थः एतेषां स्वभावमाह प्राय इति

भूमौ कडकडाशब्दः काठिन्यं स्पर्श इष्यते नीलादिकं चित्ररूपं मधुराम्लादिको रसः ५ सुरभीतरगन्
धौ द्वौ गुणाः सम्यग्विवेचिताः श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेन्द्रियपञ्चकम् ६ कर्णादिगोलकस्थं
तच्छब्दादिग्राहकं क्रमात् सौक्ष्म्यात्कार्यानुमेयं तत्प्रायो धावेद्बहिर्मुखम् ७ कदाचित्पिहिते कर्णे
श्रूयते शब्द आन्तरः प्राणवायौ जाठराग्नौ जलपानेऽन्नभक्षणे ८ व्यज्यन्ते ह्यान्तराः स्पर्शा मील
ने चान्तरं तमः उद्गारे रसगन्धौ चेत्यक्षाणामान्तरग्रहः ९ ॥

पराञ्चि खानि व्यतृणत्स्वयम्भूरिति श्रुतेरित्यर्थः ७ प्रायःशब्देन सूचितं क्वचित्करणानामान्तरविषयग्राहकत्वं दर्शयति
कदाचिदिति कदाचित्करणस्य पिधाने कृते सति प्राणवायौ जाठराग्नौ च विद्यमान आन्तरः शब्दः श्रूयते ८ जलपानेऽन्नभक्षणे
चान्तराः स्पर्शा अभिव्यज्यन्ते अभिव्यक्ता भवन्ति नेत्रमीलने कृते आन्तरं तम उपलभ्यते उद्गारे जाते रसगन्धौ द्वौ गृह्येते इत्यनेन प्रकारे
णाक्षाणामान्तरग्रहो ऽक्षाणामिति कर्मणि षष्ठी आन्तरस्य विषयस्य ग्रहो ग्रहणं इन्द्रियकर्तृकमान्तरविषयग्रहणं भवति ९ ॥

एवं ज्ञानेंद्रियव्यापारान्निरूप्य कर्मेंद्रियाणां तत्त्ववादिनं प्रति तत्सद्भावसमर्थनाय तत्तल्लिंगभूतांस्तत्तद्व्यापारानाह पंचेति उक्तिश्च आदा
नं च गमनं च विसर्गश्च आनंदश्चेति द्वंद्वसमासः उक्त्यादानगमनविसर्गानंदाख्याः पंच क्रियाः प्रसिद्धा इति शेषः ननु कृष्यादीनां कि
यांतराणामपि सत्त्वात्कथं पंचैवेत्युक्तमित्याशंक्याह कृषीति १० कानि तानि क्रियाजनकानीन्द्रियाणीत्यत आह वागिति वागा
दिभिरेतैस्तत्क्रियाजनिस्तासां क्रियाणामुत्पत्तिर्भवतीति शेषः अत्राप्युक्तिः करणसविका क्रियात्वादित्यादिकार्यलिंगकानु
मानेन दृष्टं यत्तत्कर्मेन्द्रियपंचकस्य स्थानान्याह मुखादिगोलकेष्विति आदिपदेन करचरणगुदशिश्नच्छिद्रे च गृह्येते ११
इदानीमुक्तदशेंद्रियप्रेरकत्वेन प्रसक्तं तस्य मनसः कृत्यं स्थानं च दर्शयति मन इति तस्यांतरिंद्रियत्वं सनिमित्तकमाह त

पंचोक्त्यादानगमनविसर्गानंदकाः क्रियाः कृषिवाणिज्यसेवाद्याः पंचस्वंतर्भवंति हि १० वाक्पाणिपा
दपायूपस्थैरेतैस्तत्क्रियाजनिः मुखादिगोलकेष्वास्ते तत्कर्मेंद्रियपंचकं ११ मनो दशेंद्रियाध्यक्षं
हृत्पद्मगोलके स्थितं तदंतःकरणं बाह्येष्वस्वातंत्र्याद्धि नेंद्रियैः १२ अंतेष्वर्थार्पितेष्वेतद्गुणदोषवि
चारकं सत्त्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः १३ वैराग्यं ज्ञानमौदार्यमित्याद्याः सत्त्वसंभवाः का
मक्रोधौ लोभयत्नाद्याः स्युर्या रजसोत्थिताः १४ ॥

दिति १२ दशेंद्रियाध्यक्षत्वमेव दर्शयति अंतेष्विति अंतेषु इंद्रियेषु अर्थार्पितेषु विषयेषु स्थापितेषु सत्सु एतन्मनो गुणदोषवि
चारकमिदं समीचीनमिदमसमीचीनमित्यादिविचारकारीत्यर्थः अयं भावः आत्मनः प्रमातृत्वेन सर्वज्ञानसाधारण्याच्चक्षुरा
दीनां च रूपादिज्ञानजननमात्रेण चरितार्थत्वात् गुणदोषविचारस्योपलभ्यमानस्यान्यथानुपपत्त्या तत्कारणत्वेन मनोऽभ्युपगं
तव्यमिति मनसो वैराग्यकामाद्यनेकविधवृत्तिमत्त्वप्रदर्शनाय सत्त्वादिगुणवत्त्वं दर्शयति सत्त्वमिति तेषां तद्गुणत्वकारणमाह
विक्रियत इति हि यतः तैर्गुणैर्विक्रियते विकारं प्राप्नोतीत्यर्थः १३ गुणैस्तस्य विक्रियमाणत्वमेव प्रपंचयति वैराग्यमिति १४ ॥

पं·टी·
पं·मू·
१५

आलस्येति सप्तत्वान्व्याख्यायते वैराग्यादीनां कार्याणि विभज्य दर्शयति सात्विकैरिति १५ एषां बुद्धिस्थत्वादन्तःकरणादीनां सर्वेषां स्वामि
नमाह अत्राहमिति अत्राहमितिप्रत्ययवान्कर्ता प्रभुरित्यर्थः लोकेपि कार्यकर्ता प्रभुरित्येव व्यपदिश्यते १६ एवं जगतः स्थितिमभि
धाय इदानीं तस्य भौतिकत्वज्ञानोपायमाह सप्तशब्दादियुक्तेष्विति सप्तशब्दादियुक्तेषु सप्तभिः शब्दादिगुणैः सहितेषु पृथ्व्यादिषु वस्तु
ष्वभूतकार्यत्वं स्पष्टमेवावगम्यते ननु इंद्रियादिषु कथं भूतकार्यत्वनिश्चय इत्याशंक्यागमानुमानाभ्यामित्याह अन्नादाविति अ
न्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागित्यादिशास्त्रं अनुमानं च विमतानि श्रोत्रादीनि भूतकार्याणि भवितुमर्हंति भूता

आलस्यभ्रांतितंद्राद्याविकारास्तमसोत्थिताः सात्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः १५
तामसैर्नोभयं किंतु वृथायुःक्षपणं भवेत् अत्राहंप्रत्ययीकर्तेत्येवं लोकव्यवस्थितिः १६ स
प्तशब्दादियुक्तेषु भौतिकत्वमतिस्फुटम् अन्नादावपि तच्छास्त्रयुक्तिभ्यामवधार्यताम् १७
एकादशेंद्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते यावत्किंचिद्भवेदेतदिदंशब्दोदितं जगत् १८ ॥

न्वयव्यतिरेकानुविधायित्वात् यद्यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं दृष्टं यथा मृदन्वयव्यतिरेकानुविधायी घटो मृत्कार्यो दृ
ष्टस्तथा चेमानि तस्मात्तथेति तदन्वयव्यतिरेकानुविधायित्वं च षोडशकलः सोम्य पुरुष इत्यादिनान्नादोयस्तुतौ मनसः श्रुतं तद्व
द्यत्राप्रदृष्टव्यं १७ एवं भूतानि भौतिकानि च विविच्य दर्शयित्वा प्रकृतं सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयब्रह्मप्रतिपादिका
श्रुतिं व्याचक्षाणस्तद्वाक्यस्थितस्येदंपदस्यार्थमाह एकादशेंद्रियैरिति प्रत्यक्षादिभिः सर्वैः प्रमाणैरपि शब्दादर्थापत्त्यादिप्रमाणज्ञा
नैश्च यावत्किंचिज्जगदवगम्यते तत्सर्वं सदेवेत्यादिवाक्यस्थेनेदंपदेनाभिहितमित्यर्थः १८ ॥

एवमिदं शास्त्रार्थमभिधाय इदानीं तां श्रुतिं स्वयमेवार्थतः पठति इदमिति आरुणस्यापत्यमारुणिरुद्दालकस्तस्य मुनेर्वचनमित्यर्थः १९ एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगतादिभेदत्रयं प्रसक्तं निवारयितुं लोके स्वगतादिभेदत्रयं तावद्दर्शयति वृक्षस्येति स्पष्टं २० एवमनात्मनि भेदत्रयं प्रदर्श्य सद्वस्तुन्यपि प्रसक्तं तद्भेदत्रयं श्रुतिः पदत्रयेण निवारयतीत्याह तथेति वस्तुत्वसामान्यादनात्मनीव सद्रूपात्मन्यपि प्रसक्तं स्वगतादिभेदत्रयमैक्यावधारणद्वैतप्रतिषेधाभिधायकैरेकमेवा

इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकं सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः १९ वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः वृक्षान्तरात्सजातीयो विजातीयः शिलादितः २० तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् २१ सतो नावयवाः शङ्क्यास्तदंशस्यानिरूपणात् नामरूपे न तस्यांशौ तयोरद्याप्यनुद्भवात् २२ नामरूपोद्भवस्यैव सृष्टित्वात्सृष्टितः पुरा न तयोरुद्भवस्तस्मान्निरंशं सद्यथा वियत् २३ ॥

द्वितीयमिति त्रिभिः पदैः क्रमेण निवार्यत इत्यर्थः २१ सद्वस्तुनस्तावत्स्वगतभेदः शङ्कितुं शक्यतेऽस्य निरवयवत्वादित्याह सत इति नामरूपयोः सदवयवत्वं किं न स्यादित्याशङ्क्य सृष्टेः पुरा तयोरभावान्न सदंशत्वमित्याह नामरूप इति २२ कुतो नामरूपयोरभाव इत्याशङ्क्याह नामरूपोद्भवस्येति फलितमाह तस्मादिति अत्रायं प्रयोगः सद्वस्तु स्वगतभेदशून्यं भवितुमर्हति निरवयवत्वात् गगनवदिति २३ ॥

पं॰ टी॰
पं॰ भू॰
२९

माक्षत्वगत भेदः सजातीयभेदः किं न स्यादित्याशंक्य तत्सजातीयं सदंतरमिति वक्तव्यं न तु नास्ति रूपयितुं शक्यते सतो वैलक्षण्याभा
वादित्याह सदंतरमिति ननु घटसत्ता पटसत्तेति सतो भेदः प्रतिभासत इत्याशंक्य घटाकाशमहाकाशवदौपाधिको भेदो न स्वतो
भातीत्याह नामरूपोपाधिभेदमिति अत्रायं प्रयोगः सद्वस्तु सजातीयभेदरहितं भवितुमर्हति उपाधिपरामर्शमंतरेणाविभाव्यमा
नभेदत्वात् गगनवदिति २४ भवतु तर्हि विजातीयाद्भेद इत्याशंक्य सतो विजातीयमसत् तस्यासत्त्वेनैव प्रतियोगित्वासंभवेन तत

16

सदंतरं सजातीयं न वैलक्षण्यवर्जनात् नामरूपोपाधिभेदं विना नैव सतो भिदा २४ विजाती
यमसत्तत्तु न खल्वस्तीति गम्यते नास्यातः प्रतियोगित्वं विजातीयाद्भिदा कुतः २५ एकमेवा
द्वितीयं सत् सिद्धमत्र तु केचन विह्वला असदेवेदं पुरासीदित्यवर्णयन् २६ मग्नस्याब्धौ
यथाऽक्षाणि विह्वलानि तथास्य धीः अखंडैकरसं श्रुत्वा निःप्रचारा बिभेत्यतः २७ गौडाचा
र्या निर्विकल्पे समाधावन्ययोगिनां साकारब्रह्मनिष्ठानामत्यंतं भयमूचिरे २८ ॥

प्रतियोगिकोऽपि भेदो नास्तीत्याह विजातीयमिति २५ फलितमाह एकमेवेति इदानीं स्थूणानिखननन्यायेन सदद्वैतमेव दृढ
यितुं पूर्वपक्षमाह अत्र त्विति २६ विह्वलत्वे दृष्टांतमाह मग्नस्येति दार्ष्टांतिके योजयति तथास्य धीरिति अक्षासहादिनः
जातावेकवचनं धीरंतःकरणं अखंडैकरसं वस्तु श्रुत्वा निष्प्रचारा साकारवस्तुनीवाखंडैकरसे वस्तुनि प्रचाररहिता स
ती अतोऽस्मादहस्तुनो बिभेति २७ अत्रार्थे आचार्यसंमतिं दर्शयति गौडाचार्या निर्विकल्पे इति २८ ॥

केन वाक्येनोक्तवं तत्र इत्याकांक्षायां तदीयवार्त्तिकमेव पठति अस्पर्शयोग इति योयमस्पर्शयोगाख्यो निर्विकल्पः समाधिः एष सर्वयो
गिभिः साकारध्याननिष्ठैर्दुर्दर्शः दुःखेन द्रष्टुं योग्यो दुःप्राप इत्यर्थः अत्रोपपत्तिमाह योगिन इति हि यस्मात्कारणात् योगिनः
पूर्वोक्तद्वैतवादिनः अभये भयशून्ये समाधौ निर्जने देशे बाला इव भयदर्शिनो भयहेतुत्वं कल्पयन्त अस्माद्योगाद्भीतिं प्राप्नु
वन्ति २९ श्रीमदाचार्यैरपि एतदभिहितमित्याह भगवत्पूज्यपादा इति ३० तद्वार्त्तिकं पठति अनादेरस्येति ३१ इदानीम

अस्पर्शयोगो नामैष दुर्दर्शः सर्वयोगिभिः योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः २९ भगव
त्पूज्यपादाश्च शुष्कतर्कपटूनमून् आहुर्माध्यमिकान् भ्रान्तानचिन्त्येऽस्मिन्सदात्मनि ३० अनादे
रस्युत्पत्तिं मोक्षादिमेवोहात्समस्विनः प्रापेदिरे निरात्मत्वमनुमानैकचक्षुषः ३१ शून्यमासी
दिति ब्रूषे सद्योगं वा सदात्मताम् शून्यस्य न तु तद्युक्तमुभयं व्याहतत्वतः ३२ न युक्तस्तमसा
सूर्यो नापि चासौ तमोमयः सच्छून्ययोर्विरोधित्वाच्छून्यमासीत्कथं वद ३३ वियदादेर्नामरू
पे मायया सति कल्पिते शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरम् ३४ ॥

सद्वादं विकल्प्य दूषयति शून्यमिति शून्यमासीदित्यनेन वाक्येन शून्यस्य सत्तां जातियोगित्वं वा सद्रूपतां वा ब्रूष इति वि
कल्पार्थः तदुभयं सत्तासंबंधसद्रूपत्वलक्षणं शून्यस्य व्याहतत्वान्न युज्यत इत्यर्थः ३२ व्याहतत्वमेव दृष्टान्तेन दृढीकर
दयति न युक्त इति ३३ ननु भवन्मतेऽपि वियदादीनां निर्विकल्पे ब्रह्मणि सत्त्वं व्याहतमित्याह वियदादेरिति तर्हि शून्यस्या
पि नामरूपे सद्ब्रह्मणि कल्पिते इति वदतो बौद्धस्यापसिद्धान्त इत्यभिप्रायेणाह शून्यस्येति ३४ ॥

पं· दी·
पं· भू·
१७

ननु तर्हि शून्यस्यैव सहस्तनोपि नामरूपे द्वे कल्पिते एवं गीकर्तव्ये भवन्मते वा सतयोर्नामरूपयोरभावादिति शंक्यते सतोपीति
विकल्पासहत्वादयं पक्षएवानुपपन्न इत्यभिप्रायेण परिहरति तदावदेति प्रथमभिप्रायः सतो नामरूपे किं सति कल्पिते उतास
ति अथवा जगति नाद्यः अन्यस्य रजतादेर्नामरूपयोः अन्यत्र शुक्तिकादावारोपदर्शनात् सतो नामरूपयोः सत्येव कल्पनायोगान्न
द्वितीयः असतो निरात्मकस्य चाधिष्ठानत्वायोगान्न तृतीयः सतउत्पन्नस्य जगतः सन्नामरूपकल्पनाधिष्ठानत्वानुपपत्तेरिति माभूद
धिष्ठानं अनयोः कल्पना किं न स्यादित्याशंक्याह निरधिष्ठान इति ३५ नन्वसदेवेदमग्र आसीदित्यत्र यथाख्यातात उक्तलक्षणात् सदेव सोम्ये

17

सतोपि नामरूपे द्वे कल्पिते चेत्तदा वद कुत्रेति निरधिष्ठानो न भ्रमः क्वचिदीक्ष्यते ३५ सदासीदि
ति शब्दार्थभेदे वैगुण्यमापतेत् अभेदे पुनरुक्तिः स्यान्मैवं लोके तथेक्षणात् ३६ कर्तव्यं कु
रु ते वाक्यं ब्रूते धार्ष्ट्यस्य वारणम् इत्यादि वासनाविष्टं प्रत्यासीत्सदितीरणं ३७ कालाभावे पुरे
त्युक्तिः कालवासनया युते शिष्ये प्रत्येव तेनात्र द्वितीयं न हि शंक्यते ३८ ॥

दमग्र आसीदित्यत्रापि दोषोस्तीति शंक्यते सदिति तथा हि सदासीदिति शब्दयोरर्थभेदोस्ति न वा अस्ति चेदद्वैतहानिः नास्ति चेत्पुनरुक्तिः
स्यात् अतः सदासीदित्यनुपपन्नमिति द्वितीयं पक्षमादाय परिहरति मैवमिति पुनरुक्तिदोषस्य कः परिहार इत्याशंक्याह लोक इ
ति ३६ ननु लोके एवंविधेषु प्रयोगेषु पुनरुक्त्यभावः कुत्र दृष्ट इत्याशंक्याह कर्तव्यमिति भवत्वेवं लोके श्रुतौ किमायातमित्यत आ
ह इत्यादीति ३७ नन्वद्वितीये वस्तुनि भूतकालाभावादग्र आसीदित्युक्तिरनुपपन्नेत्याशंक्याह कालाभाव इति ननु जगदुत्पत्तेः
पुरा जगदभावेन सद्वितीयत्वं ब्रह्मण इत्याशंक्य श्रुतिप्रवृत्तेर्द्वैतवासनाविष्टशिष्यप्रबोधनार्थत्वान्नातिशंकनीयमित्याह तेनात्रे

दी· ३८ ॥

इदानीं सिद्धान्तरहस्यमाह चोद्यमिति व्यवहारदशायां चोद्यादिकर्तव्यं परमार्थतस्त्वद्वैतमेव तत्त्वमित्यर्थः ४९ परमार्थतो द्वैता
भावे सत्ति प्रमाणयति तदेति स्तिमितेति निश्चलं गम्भीरं दुरवगाहं मनसाविषयीकर्तुमशक्यं न तेजः तेजस्त्वाधिकरणं न तमः
तमोविलक्षणमनावरणस्वभावं ततं व्याप्तं अनाख्यमाख्यातुमशक्यं अनभिव्यक्तं चक्षुरादिभिरप्यविषयीकृतं सच्छून्यावि
लक्षणमनपवर्किंचिदिदन्तया निर्देष्टुमशक्यमवशिष्यते द्वैतनिषेधावधित्वेनावतिष्ठत इत्यर्थः ५० ननु जनिमत्त्वनाशि
त्वस्य भूम्यादेरसत्त्वमस्तु नित्याकाशादेस्तु सत्त्वं कथमङ्गीक्रियत इत्याशंक्याह ननु भूम्यादिकमिति ५१ दृष्टान्तावष्टम्भेनप

चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम् ४९ तदा
स्तिमितगम्भीरं न तेजो न तमस्ततम् अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ५० ननु भूम्या
दिकं मा भूत्परमार्थेन नाशतः कथं नेवियतो सत्त्वबुद्धिमारोहतीति चेत् ५१ अस्त्येतन्निर्जग
द्व्योम यथा ते बुद्धिमाश्रितम् तथैव सन्निराकाशं कस्मान्नाश्रयते मतिम् ५२ निर्जगद्व्योमदृ
ष्टं चेत्स्वकाशलमसीविना कटष्टं किंचेतप्वेन प्रत्यक्षं विषयत्वलु ५३ सहस्र रुद्रत्वसाभि
निश्चिनैरनुभूयते तस्मीस्थितेन शून्यत्वे शून्यबुद्धेस्वर्जनात् ५४ ॥

विहरति अस्त्येतदिति अस्त्येतन्निर्जगज्जगन्मात्ररहितमित्यर्थः ५२ नहि दृष्टे नुपपन्नं नामेति न्यायमाश्रित्य चोदयति निर्ज
गद्व्योमदृष्टं चेदिति दर्शनमेवासिद्धमिति परिहरति अकाशतमसीविनेति अप्रसिद्धान्तोपीत्याह तेपद्वेन प्रत्यक्षमिति
५३ ननु दर्शनाभावः सहस्रत्वपि समान इत्याशंक्य सतः सर्वानुभवसिद्धत्वान्नैवमित्याह सहस्रेति ननु हसीभावेषू
न्यमेव इतरस्य कस्यापि प्रतीत्यभावादित्याशंक्य शून्यप्रतीत्यभावाच्छून्यमपि न संभवतीत्याह न शून्यत्वमिति ५४ ॥

ननु तर्हि सद्बुद्ध्यभावात्तत्त्वमपि न घटत इति शंकते सद्बुद्धिरिति तस्य स्वप्रकाशत्वान्न तद्बुद्ध्यभावोऽनिष्ट इति परिहरति मास्त्वस्ये
ति ननु स्वगोचरबुद्ध्यभावे कथं सद्वस्त्ववगन्तुं शक्यत इत्यत आह निर्मनस्कत्वसाक्षित्वादिति ४५ एवं निष्प्रपंचस्य साक्षिणस्तू
ष्णीस्थितौ मानं प्रदर्श्य प्रत्यक्षदृष्टान्तबलेन सृष्टेः पुरापि सद्वस्तु तथावगन्तुं शक्यत इत्याह मनोजृम्भणराहित्य इति ४६ मायायाः
किं लक्षणमित्यत आह निस्तत्त्वा कार्यगम्यास्येति निस्तत्त्वा जगत्कारणभूतात्सद्वस्तुनः पृथक्तत्त्वरहिता कार्यगम्या वियदादि
कार्यलिंगगम्या अस्य सद्वस्तुनः शक्तिर्वियदादिकार्यजननसामर्थ्यं मायेत्युच्यते वस्तुस्वरूपातिरिक्तशक्तिसद्भावे दृष्टां

सद्बुद्धिरपि चेन्नास्ति मास्त्वस्य स्वप्रभत्वतः । निर्मनस्कत्वसाक्षित्वात्सन्मात्रं सुगमं नृणाम् ॥ ४५ ॥
मनोजृम्भणराहित्ये यथा साक्षी निराकुलः । मायाजृम्भणतः पूर्वं सत्तथैव निराकुलम् ॥ ४६ ॥
निस्तत्त्वा कार्यगम्यास्य शक्तिर्मायाग्निशक्तिवत् । न हि शक्तिः क्वचित्कैश्चिद्बुध्यते कार्यतः पुरा ॥ ४७ ॥
न सद्वस्तु सतः शक्तिर्न हि वह्नेः स्वशक्तिता । सद्विलक्षणतायां तु शक्तेः किं तत्त्वमुच्यताम् ॥ ४८ ॥

न्तमाह अग्निशक्तिवदिति यथाग्न्यादिस्वरूपातिरिक्तं स्फोटादिकार्यलिंगगम्यं वह्न्यादिनिष्ठं सामर्थ्यमस्ति तद्वदित्यर्थः
शक्तेः कार्यलिंगगम्यत्वं व्यतिरेकमुखेन द्रढयति न हीति ४७ एवं शक्तेः कार्यलिंगगम्यत्वमुपपाद्य निस्तत्त्वरूपता
मुपपादयति नेति अयमभिप्रायः सद्वस्तुनः शक्तिः किं सती उतासती न तावत्सती तथात्वे सतो भिन्नत्वेन तच्छ
क्तितायोगात् उक्तार्थे दृष्टान्तमाह न हीति द्वितीयेऽपि किं नरविषाणतुल्या उत सद्विलक्षणेति विकल्पाभिप्रायेण
पृच्छति सद्विलक्षणतायामिति ४८ ॥

तत्राद्यपक्षमनूद्य दूषयति शून्यत्वमिति शून्यस्य तामसरूपे चेत्तथा चेज्जीवन्तो चिरमित्यत्रेत्यर्थः तस्माद्द्वितीयः पक्षः परिशिष्यत इत्याह तच्छून्यमिति मायास्वरूपं सत्त्वासत्त्वाभ्यां निर्वचनानर्हमित्यभिप्रायः ४९ अस्मिन्नर्थे श्रुतिं प्रमाणयति नासदासीदिति तमश्चासीत्तमसा गूढमग्र इत्यादिश्रुतिः प्रमाणमित्यर्थः तर्हि तमश्चासीदिति कथं सत्त्वमुच्यत इत्यत आह सद्योगादिति उत इत्यत आह तन्निषेधनादिति ५० फलितमाह अत एवेति यतः स्वतः सत्त्वं मायाया नास्ति अत एव शून्यस्येव मायाया अपि द्वितीयत्वं न गण्यते नैवाद्वितीयत इत्यर्थः अत्र तस्या द्वितीयत्वानङ्गीकारे दृष्टान्तमाह न लोक इति ५१ ननु शक्त्याधिक्ये जी

शून्यत्वमिति चेच्छून्यं मायाकार्यमितीरितम् । न शून्यं नापि सद्यादृक्तादृक्तत्त्वमिहेष्यताम् ४९
नासदासीन्नो सदासीत्तदानीं किं त्वभूत्तमः । सद्योगात्तमसः सत्त्वं न स्वतस्तन्निषेधनात् ५० अ
त एव द्वितीयत्वं शून्यवन्न हि गण्यते । न लोके चैत्रतच्छक्त्योर्जीवितं लिख्यते पृथक् ५१ शक्त्या
धिक्ये जीवितं चेद्वर्द्धते तत्र वृद्धिकृत् । न शक्तिः किं तु तत्कार्यं युद्धकृष्यादिकं तथा ५२ सर्वथा
शक्तिमात्रस्य न पृथग्गणना क्वचित् । शक्तिकार्यं तु नैवास्ति द्वितीयं शङ्क्यते कथम् ५३ न कृत्स्न
ब्रह्मवृत्तिः सा शक्तिः किं त्वेकदेशभाक् । घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते ५४ ॥

वितापि किं न दृश्यते अतः शक्तेरपि पृथक् जीवितत्वमस्तीति शङ्कते शक्त्याधिक्य इति न शक्तिर्जीवितवर्द्धने कारणमपि तु तत्कार्यं युद्धकृष्यादीति परिहरति तत्रेति ५२ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति तथा सर्वथेति मायाशक्तेरसद्द्वितीयत्वं सतो पि तत्कार्येण तद्वत्त्वे वेत्याशङ्क्य तस्य तदानीमसत्त्वान्नेनापि न सद्द्वितीयमित्याह शक्तिकार्यमिति ५३ ननु सच्छक्तिः सती सर्वत्र वर्तते ऽनेकदेशो नाद्यः श्रुतेः प्राप्य ब्रह्माभावप्रसङ्गात् न द्वितीयः निरंशत्वेन विरोधित्वादित्याशङ्क्याद्यानङ्गीकारात् द्वितीये परिहारो वक्ष्यते इत्यभिप्रायेणाह न कृत्स्नब्रह्मवृत्तिरिति एकदेशवृत्तौ दृष्टान्तमाह घटशक्तेरिति ५४ ॥

श्रुतेरेकदेशवृत्तित्वे प्रमाणमाह पादोऽस्येति ५५ न केवलं श्रुतिरेव स्मृतिरप्यस्तीत्याह विष्टभ्याहमिति ५६ इदानीं निर्मायस्वरूपम
स्वावे प्रमाणमाह सम्भूमिमिति विकारावर्तित्वं तथाहि स्थितमाहेति तत्र कारवचनमित्यर्थः ५७ तर्हि निरंशत्वे विरोध इत्याशङ्क्यः प
रिहार इत्याशङ्क्य वास्तव निरंशत्वाभ्युपगमान्न विरोध इत्यभिप्रायेणोदाहृतश्रुत्यभिप्रायमाह निरंश इति ५८ यदर्थं वस्तुनो मा
यासमर्पितानदिदानीमाह सत्तत्त्वमिति विक्रियाविविधत्वेन क्रियन्त इति विक्रियाः कार्यविशेषा इत्यर्थः अत्र दृष्टान्तमाह व

पादोऽस्य विश्वा भूतानि त्रिपादस्ति स्वयंप्रभः एकदेशवृत्तित्वं मायाया वदति श्रुतिः ५५ विष्टभ्या
हमिदं कृत्स्नमेकांशेन स्थितो जगत् इति कृष्णोऽर्जुनायाह जगतस्त्वेकदेशताम् ५६ सम्भूमिं विश्व
तो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् विकारावर्तितां चास्ति श्रुतिस्तत्त्वकृतो वचः ५७ निरंशोऽप्यंशमारो
प्य कृत्स्नेंऽशे वेति पृच्छतः तत्राप्ययोत्तरं ब्रूते श्रुतिः श्रोतृहितैषिणी ५८ सत्तत्त्वमाश्रिता शक्तिः
कल्पयेत्सति विक्रियाः वर्णा भित्तिगता भित्तौ चित्रं नानाविधं यथा ५९ आद्यो विकार आकाशः सो
ऽवकाशस्वरूपवान् आकाशोऽस्तीति सत्तत्त्वमाकाशोऽप्यनुगच्छति ६० एकस्वभावं सत्तत्त्वमाकाशो
द्विस्वभावकः नावकाशः सति व्योम्नि सद्वैशिष्ट्यापि ह्ययं स्थितम् ६१ ॥

र्णाभित्तिगता इति वर्णा रक्तपीतादयो यथा तद्विशेषाः ५९ तत्र प्रथमं कार्यविशेषं दर्शयति आद्यो विकार इति तत्स्वरूप
माह सोऽवकाशस्वरूपवानिति आकाशस्य वस्तु कार्यत्वे हेतुमाह आकाश इति ६० ततः किमित्यत आह एकस्वभा
वमिति उक्तमर्थं विशदयति नावकाश इति सति सद्रूपे त्ववकाशो नास्ति किन्तु सत्त्वभाव एक एव आकाशे तु स
त्स्वभावस्य एषोऽप्यवकाशस्वभावोऽपीति ह्ययं स्थितं वियत इत्यर्थः ६१ ॥

सदाकाशयोरेकद्विस्वभावत्वंप्रकारान्तरेणाप्युत्पादयति यद्वेति प्रतिध्वनिर्व्योम्नोगुणइत्युपपादितमधस्तात् असौप्रतिध्वनिः सतिसद्ध्
स्तनितेसत्येवोपलभ्यते व्योम्नितसद्ध्वनी सत्त्वहावुभावप्युपलभ्येते तेनकारणेनसदेकमेकस्वभावंवियत् द्विगुणंद्विस्वभावकमित्यर्थः
९२ ननुवाकाशस्यसद्रूपत्वकार्यत्वेऽप्याकाशस्यसत्तेतिसमनप्याकाशधर्मेनाकृतः प्रतिभातीत्याशंक्याह याशक्तिरिति मायासद्रूपत्वन्या
कापंकल्पयति साप्रथमतःसद्व्योम्नोरभेदंकल्पयति पश्चाद्रूक्तंधर्मधर्मिभावंवैपरीत्येनकल्पयति अतएवाकाशस्यसत्तेतिप्रा
नुपपद्यतइत्यर्थः ९३ माययावैपरीत्यंकथंकृतमित्याशंक्याह सतइति वस्तुतत्त्वविचारेक्रियमाणेसद्व्योमघटरूपत्वमिवस

यद्वाप्रतिध्वनिर्व्योम्नोगुणोनासौमतोह्यते व्योम्निद्वौसद्ध्वनीतेनसदेकंद्विगुणंवियत् ९२ याश
क्तिःकल्पयेद्व्योमसासद्व्योम्नोरभिन्नतां आधाराधेयधर्मधर्मित्वंव्यत्ययेनावकल्पयेत् ९३ सतोव्यो
मत्वमापन्नंव्योम्नःसत्तांतुलौकिकाः तार्किकाश्चावगच्छन्तिमायायाउचितंहितत् ९४ यद्यथा
वर्ततेतस्यतथात्वंभातिमानतः अन्यथात्वंभ्रमेणेतिन्यायोयंसार्वलौकिकः ९५ ॥

तोव्योमत्वमापन्नंसद्वस्तुनत्वाकाशरूपत्वंप्राप्तं लौकिकाःप्राणिनः प्राकृतायेप्रमथेतार्किकाश्चतद्वैपरीत्येनव्योम्नोगगनस्यधर्मि
णः सत्तांसद्रूपत्वधर्मजातिंवावगच्छन्तिजानन्ति नन्वन्यस्यान्यथाप्रतीतिरनुपपन्नेत्याशंक्याह मायायाइति नहिविपरीतदर्शनेहे
तुत्वंमायायायुक्तमित्यर्थः ९४ मायायाविपरीतप्रतीतिहेतुत्वंलौकिकन्यायप्रदर्शनेनस्पष्टीकरोति यद्यथेति यच्छुक्त्यादियथा
येनशुक्तिकादिरूपेणवर्तते तस्यतथात्वंशुक्त्यादिरूपत्वंप्रमाणतः स्फुरति अन्यथात्वंरजतादिरूपत्वंतुभ्रमेणभ्रांत्याप्रतिभा
तीत्ययंन्यायःसर्वलोकप्रसिद्धइत्यर्थः ९५ ॥

पं॰टी॰
पं॰भू॰
२०

एवं भ्रान्त्या विपरीतप्रतिभानं दर्शयित्वा तन्निहन्तुमुपायमाह एवमिति एवमुक्तप्रकारेण श्रुतिविचारात्प्राक् श्रुत्यर्थविचारात्पूर्वं यद्वस्तु यत्स्वरूपं ब्रह्म भ्रान्त्या यथा येन गगनादिरूपेण वर्तते तत् श्रुत्यर्थपर्यालोचनेन विपर्येति गगनादिभावं परित्यज्य सद्रूपं ब्रह्मैव भवति ततः श्रुतिविचारेण वस्तुयाथात्म्यदर्शनसंभवाद्वियच्चिन्त्यतां विचार्यतामित्यर्थः ९६ विचारस्वरूपमेव दर्शयति भिन्न इति भिन्ने इति प्रतिज्ञातार्थे हेतुमाह शब्दभेदादिति वियच्छब्दयोरपर्यायत्वादित्यर्थः हेत्वन्तरमाह बुद्धेरिति तमेव हेतुं विशदयति वाय्वादिष्विति वाय्वादिषु भूतेषु सद्वायुः सत्तेज इत्येवंप्रकारेणानुवृत्तं भासते व्योम तु नैवं भासत इति यस्मात्तस्माद्भेदधीः भेदबुद्धिरित्यर्थः ९७

एवं श्रुतिविचारात्प्राग्यथा यद्वस्तु भासते विचारेण विपर्येति ततस्तच्चिन्त्यतां वियत् ९६ भिन्ने वियत्सती शब्दभेदाद्बुद्धेश्च भेदतः वाय्वादिष्वनुवृत्तं सन्न तु व्योमेति भेदधीः ९७ सद्वस्त्वधिकवृत्तित्वाद्धर्मि व्योम तु तस्य धर्मता धिया सतः पृथक्कारे ब्रूहि व्योम किमात्मकम् ९८ अवकाशात्मकं तच्चेदसत्तदिति चिन्त्यतां भिन्नं सतोऽसच्च नेति वक्ति चेद्व्याहतिस्तव ९९ ॥

एवं सदाकाशयोर्भेदं प्रसाध्य व्योम्नो सत्त्वेति भ्रान्त्या प्रतीतस्य धर्मिधर्मभावस्य विचारेणान्यथात्वं दर्शयति सद्वस्त्विति रूपरसादिष्वनुवृत्तस्य द्रव्यस्येवाकाशवाय्वादिष्वनुवृत्तस्य सतो धर्मित्वं रसादिभ्यो व्यावृत्तस्य रूपस्येव वाय्वादिभ्यो व्यावृत्तस्य नभसो धर्मत्वमित्यर्थः ननु नहि चराद्भिन्नस्य रूपस्य यथा वास्तवत्वं तथा सतो भिन्नस्य नभसोऽपि स्यादित्याशङ्क्य सद्व्यतिरिक्तस्य नभसोऽनिरूपत्वान्नैवमित्याह धिया सत इति ९८ दुर्निरूपत्वमसिद्धमिति शङ्कते अवकाशात्मकमिति तर्हि सतो विलक्षणत्वादसदेव स्यादिति परिहरति असत्तदिति सतो विलक्षणस्यासत्त्वं नास्तीति वदतो दोषमाह भिन्नमिति ९९ ॥

20

असत्त्वेमानेनस्यादित्याशंक्याहतच्छविलक्षणत्वाज्ज्ञानेनविरुध्यतइत्याह भातीतीति अविरोधंदर्शयितुंमिथ्यावस्तुनोलक्षणंसदृष्टांतमा
ह यदसज्ज्ञानतामिति यदसत्स्वरूपेणाविद्यमानमपिभासतेतत्स्रग्गजादिवन्मिथ्येत्यर्थः ७० ननुनियमेनसहोपलभ्यमानयोर्भे
दोनदृष्टश्चरत्स्मात्त्वाशंक्याह जातिव्यक्तीति ७१ भेदोयद्यपितुच्छत्वेनतथापिनिश्चितोनभवतीतिशंकते तुच्छोपिभेदइति तस्यपरिहारंव
क्तुंनिश्चयाभावेकारणंपृच्छति अनेकाग्र्यादिति ७२ आद्यपरिहारमाह अप्रमत्तइति आद्येप्रथमेविकल्पेध्यानात्तत्रप्रत्ययैकता
नताध्यानमित्युक्तलक्षणादप्रमत्तोभवसावधानमनाभवेतियावत् द्वितीयेपरिहारमाह अन्यस्मिन्निति ततःकिमित्यतआ

भातीतिचेज्ज्ञानवन्नामस्वरूपंमायिकस्यतत् यदसज्ज्ञानमानेनतन्मिथ्यास्रग्गजादिवत् ७० जाति
व्यक्तीदेहदेहीगुणद्रव्ययथापृथक् वियत्तत्तोस्त्येवास्तुयाथार्थ्यंकोत्रविस्मयः ७१ तुच्छोपिभेदो
नोविज्ञेनिश्चिद्यातिचेत्तदा अनैकाग्र्यात्तथायाहात्तत्वाभावोस्यतेवद ७२ अप्रमत्तोभवध्यानादाद्येऽ
न्यस्मिन्विवेचनम् उक्तप्रमाणयुक्तिभ्यांततोनात्तत्वमोभवेत् ७३ ध्यानान्मानाद्युक्तितोपिद्वैतभेदेविय
त्तत्तोः नकदाचिद्वियत्सत्यंसहस्तुच्छिद्वच्च ७४ ज्ञस्यभातिसदाव्योमनित्यत्वाहुल्यपूर्वकम् सह
त्वपिविभात्यस्यनिश्छिद्रवत्पुरःसरम् ७५ वासनायांप्रहत्यायांवियत्सत्यत्ववादिनं सन्मात्राबोधप्र
हृष्टंचदृष्ट्वाविस्मयतेबुधः ७६ ॥

ह ततइति ततोपिकिमित्यतआह ध्यानादिति ध्यानंपूर्वोक्तलक्षणं मानंभिन्नेवियत्तत्तीप्राहुर्भेदाद्धेश्चभेदतइत्यत्रोक्तं युक्ति
स्तु सहस्तुच्छापिकहाभिन्नादित्यादावुक्ता एतैर्ध्यानादिभिर्वियत्तत्तोर्भेदेविज्ञेनिश्चितेयातेसति वियत्कदाचित्सत्यं किंतुसर्वदा
मिथ्यैवावभासते सहस्त्वपितुच्छिद्वदवकाशावत्त्वचनैवभवतीतिशेषः ७४ वियत्तत्वविवेचनफलमाह ज्ञस्येति ७५ विय
न्मिथ्यात्वेसत्तोवस्तुत्वंचसदाचिंतयतःकिंभवतीत्यतआह वासनायामिति तुच्छोवियत्तत्तोस्तत्ववेत्तागगनस्यसत्यत्वंतुवा
णंनिरवकाशसहस्तत्त्वबोधरहितंचदृष्ट्वाविस्मयंप्राप्नोतीत्यर्थः ७६ ॥

पं. टी.
पं. मू.
२१

उक्तन्यायमन्यत्राप्यतिदिशति एवमाकाशमिथ्यात्वेति ७७ न त्वाकाशकार्यस्य वायोरकारणभूतेन सहस्तेन तादात्म्यप्रतीत्ययोगात्त
तो विवेचनमप्रयोजकमित्याशंक्य साक्षात्संबंधाभावेपि परंपरया संबंधोस्तीत्याह सहस्तेनेति ७८ एवं सहास्तयोः संबंधं प्रदर्श्य तयो
र्धर्मितो भेदज्ञानाय वायौ प्रतीयमानान्धर्मानाह शोषइति एवं प्रातिस्विकान्धर्मानभिधाय कारणतः प्राप्तांस्तानाह त्रयइति सत्त्वा
याव्योम्नाये त्रयः स्वभावाः शीलविशेषास्तेपि वायुगा वायौ विद्यन्त इत्यर्थः ७९ केन ते धर्मा इत्यत आह वायुरिति वायुरस्तीति व्यवहारहे

21

एवमाकाशमिथ्यात्वे सत्यत्वे च वासिते न्यायेनानेन वाय्वादेः सहस्तप्रविविच्यताम् ७७ सहस्त
स्यैकदेशास्या मायातत्रैकदेशगाम् वियत्तत्राप्येकदेशगतो वायुः प्रकल्पितः ७८ शोषस्पर्शौ ग
तिर्वेगो वायुधर्मा इमे मताः त्रयः स्वभावाः सत्त्वाद्या व्योम्नो ये तेपि वायुगाः ७९ वायुरस्तीति सद्भा
वः सतो वायोः पृथक्कृते तिः सत्त्वरूपता माया स्वभावो व्योमगो ध्वनिः ८० सतोनुवृत्तिः सर्वत्र व्योम्नो
नेति प्ररोहणम् व्योमानुवृत्तिरधुना कथं नु व्याहतं वचः ८१ छिद्रानुवृत्तिर्नेतीति सर्वोक्तिरधुना
पियं शब्दानुवृत्तिरेवोक्ता वचसो व्याहतिः कुतः ८२ ॥

तः सद्रूपत्वं सहस्तेनो धर्म एकः वायौ सहस्तेनो विवेचिते सति यन्निःसत्त्वरूपत्वं सा माया धर्मो द्वितीयः शब्दो व्योम्नः सकाशादागतो
धर्मस्तृतीय इत्यर्थः ८० ननु व्योमविवेचनप्रस्तावे वाय्वादिष्वनुवृत्तं सन्न तद्व्योमेति भेदधीरित्यत्र वाय्वादावाकाशानुवृत्तिर्निवारितेदानीं
व्योमानुवृत्तिरभिधीयते अतः पूर्वोत्तरविरोध इति शंकते सत इति अनुवृत्तिरिति व्योमानुवृत्तिरधुनोच्यत इति शेषः ८१ पूर्वमवकाशलक्षणस्व
रूपानुवृत्तिर्निवारिता इदानीं धर्मानुवृत्तिरेवाभिधीयते न स्वरूपानुवृत्तिरतो न व्याहतिरिति परिहरति छिद्रानुवृत्तिरिति ८२ ॥

ननु वायोः सद्भूतविलक्षणत्वादसत्त्वलक्षणं मायामयतां युज्यते तर्ह्यव्यक्तस्वरूपमायावैलक्षण्यादमायामयत्वमपि किं न स्यादिति चोदयति ननु सद्भूतपार्थक्यादिति ८३ नाव्यक्तत्वं मायामयत्वे प्रयोजकं किं तु निस्तत्त्वरूपत्वं तच्च मायायामिव वायावप्यस्तीति न मायामयत्वहानिरिति परिहरति निस्तत्त्वरूपतैवेति ८४ ननु शक्तिकार्ययोरुभयोरपि निस्तत्त्वरूपतायामविशिष्टायां व्यक्ताव्यक्तत्वलक्षणो भेदः कुतस्त्य इत्याशंक्यास्य न हि विचारः प्रकृतानुपयुक्त इति परिहरति सदसत्त्वविवेकस्येति असतो मायातत्कार्यरूपस्यावान्तरभेदो व्यक्ताव्यक्तत्वरूप इत्यर्थः ८५ फलितमाह सद्वस्त्विति वायौ यः सदंशः तद्ब्रह्मरूपं शिष्टोंशो नि

ननु सत्त्वपार्थक्यादसत्त्वं चेत्तदा कथम् अव्यक्तमायावैषम्यादमायामयतापि नो ८३ निस्तत्त्वरूपतैवात्र मायात्वस्य प्रयोजिका सा शक्तिकार्ययोस्तुल्या व्यक्ताव्यक्तत्वभेदिनोः ८४ सदसत्त्वविवेकस्य प्रस्तुतत्वात्स चिन्त्यताम् असतो वान्तरो भेद आस्तां तच्चिन्तयात्र किम् ८५ सद्वस्तु शिष्टांशो वायुर्मिथ्या यथा वियत् वासयित्वा चिरं वायोर्मिथ्यात्वं मरुतं त्यजेत् ८६ चिन्तयेद्वह्निमप्येवं मरुतो न्यूनवर्तिनम् ब्रह्मांडावरणेष्वेषां न्यूनाधिकविचारणा ८७ वायोर्दशांशतो न्यूनो वह्निर्वायौ प्रकल्पितः पुराणोक्तं तारतम्यं दशांशैर्भूतपंचके ८८ ॥

स्तत्त्वरूपादिर्वायोः स्वरूपं स च वायुर्निस्तत्त्वरूपत्वादेवाकाशवन्मिथ्या इत्थं वायोर्मिथ्यात्वं चिरं वासयित्वा मरुतं त्यजेत् मरुतस्तत्त्वबुद्धिं त्यजेदित्यर्थः ८६ वायावुक्तं विचारमन्यत्रातिदिशति चिन्तयेदिति ननु सद्वस्त्वेकदेशस्था मायातद्वेत्यादिना वियदादीनां न्यूनाधिकभाव उक्तः स लोके न क्वापि दृश्यत इत्याशंक्याह ब्रह्मांडावरणेष्विति ८७ वायोः कियतांशेन न्यूनो वह्निरित्यत आह वायोरिति तस्य वास्तवत्वशंकां वारयति वायौ प्रकल्पित इति नन्वयं न्यूनाधिकभावः स्वकपोलकल्पित इत्याशंक्याह पुराणोक्तमिति ८८ ॥

वह्नेः स्वरूपमाह वह्निरिति अत्रापि वायाविव कारणधर्मानुगत्यं इत्याह पूर्वानुगतिरिति केनेत्यर्थः धर्मा इत्याकाङ्क्षायामाह अस्तीति ८९ एवमग्नौ कारणधर्मानुगत्यनुवादपूर्वकं स्वकीयं धर्मं दर्शयति सन्मायाव्योमवाय्वंशैरिति इत्थं सविशेषणं वह्निस्वरूपमुक्त्वा इदानीं सद्वस्तुनो वह्निं विविनक्ति सत इति सत्तत्त्वेषु मध्ये सतः सद्वस्तुनोऽन्यत् सर्वं धर्मजातं मिथ्येति बुद्ध्या विविच्य तत्पृथक्क्रियतामित्यर्थः ९० एवं वह्नेर्मिथ्यात्वनिश्चयानन्तरमपां मिथ्यात्वं चिन्तयेदित्याह सत इति ९१ अपामपि कारणधर्मान् स्वधर्मांश्च विभज्य दर्शयति सन्त्या

वह्निर्ह्रस्वप्रकाशात्मा पूर्वानुगतिरत्र च अस्ति वह्निः सनिःस्वनः शब्दवान्स्पर्शवानपि ८९ सन्मायाव्योमवाय्वंशैर्युक्तस्याग्नेर्निजो गुणः रूपं तत्र सतः सर्वमन्यद्बुद्ध्या विविच्यताम् ९० सतो विवेचिते वह्नौ मिथ्यात्वे सति वासिते आपो दशांशतो न्यूनाः कल्पिता इति चिन्तयेत् ९१ सन्त्यापोऽमूः शून्यतत्त्वाः सशब्दस्पर्शसंयुताः रूपवत्योऽन्यधर्मानुवृत्त्या स्वीयो रसो गुणः ९२ सतो विवेचितास्वप्सु तन्मिथ्यात्वे च वासिते भूमिर्दशांशतो न्यूना कल्पिताप्स्विति चिन्तयेत् ९३ अस्ति भूस्तत्त्वशून्यासौ शब्दस्पर्शौ सरूपकौ रसश्च परतो गन्धो नैजः सत्ता विविच्यताम् ९४ पृथक्कृतायां सत्तायां भूमिर्मिथ्यावशिष्यते भूमेर्दशांशतो न्यूनं ब्रह्माण्डं भूमिमध्यगम् ९५ ब्रह्माण्डमध्ये तिष्ठन्ति भुवनानि चतुर्दश भुवनेषु वसन्त्येषु प्राणिदेहा यथायथम् ९६ ॥

प इति शब्देन सहवर्तत इति सशब्दः सशब्दश्चासौ स्पर्शश्च सशब्दस्पर्शः तेन युक्ता इत्यर्थः ९२ विवेकध्यानाभ्यामपां मिथ्यात्वनिश्चित्यानन्तरं भूमेर्मिथ्यात्वं चिन्तनीयमित्याह सत इति ९३ तस्या मिथ्यात्वचिन्तनाय तद्धर्मानपि विभजते अस्तीति तेभ्यः सत्तामात्रं पृथक्कर्तव्यमित्याह सत्ता विविच्यतामिति ९४ सत्तापृथक्करणे फलमाह पृथक्कृतायामिति इदानीं भौतिकेभ्यो ब्रह्माण्डादिभ्यः सतो विवेचनाय तदवस्थानप्रकारं दर्शयति भूमेरित्यादिसार्धश्लोकेन ९६ ॥

तेषु सद्विवेचनफलमाह ब्रह्माण्डलोकदेहेष्विति ९७ तज्ज्ञाने का क्षतिरित्युक्तमेवार्थं स्पष्टीकरोति भूतभौतिकमिति भूतानामाकाशादीनां भौतिकानां ब्रह्माण्डादीनां मायायाश्च तत्कारणभूताया मिथ्यात्वविवेकध्यानाभ्यां चित्ते दृढं वासिते सति सदद्वैते तत्त्वबुद्धिः कदाचिन्न विहन्यत इत्यर्थः ९८ ननु भूम्यादीनामसत्त्वे विद्वद्दृष्ट्या व्यवहारलोपः प्रसज्येतेत्याशंक्य विवेकेन मिथ्यात्वनिश्चयेपि भूम्यादेः स्वरूपोपमर्दनाभावान्न व्यवहारो लुप्यत इत्याह सदद्वैतादिति ९९ ननु सत्त्वस्याद्वैतरूपत्वे सांख्यादिभिरभिधीयमानस्य भेदस्य कुतो न निरासः क्रियत इत्याशंक्य व्यावहारिकभेदस्यास्माभिरभ्युपगतत्वान्न निरासाय प्रय

ब्रह्माण्डलोकदेहेषु सद्वस्तुनि पृथक्कृते असन्तोण्डादयो भान्तु तज्ज्ञानेपीह का क्षतिः ९७ भूतभौतिकमायानामसत्त्वेत्यन्तवासिते सदद्वैतमित्येषा धीर्विपर्येति न क्वचित् ९८ सदद्वैतात्पृथग्भूते द्वैते भूम्यादिरूपिणि तत्तदर्थक्रियाप्यत्र यथादृष्टा तथैव सा ९९ सांख्यकाणादबौद्धाद्यैर्जगद्भेदो यथा यथा उत्प्रेक्ष्यतेनेकयुक्त्या भवत्वेवं तथा तथा १०० अवज्ञातं सदद्वैतं निःशंकैरन्यवादिभिः एवं का हानिरस्माकं तद्द्वैतमवजानताम् १०१ द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत् स्थैर्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते १०२ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छति १०३ ॥

त्न इत्याह सांख्येति १०० ननु प्रमाणसिद्धस्य तत्त्वभेदस्यावज्ञानुपपन्नेत्याशंक्याह अवज्ञातमिति यथान्यवादिभिः सांख्यादिभिर्निःशंकैः श्रुत्यादिसिद्धस्यापि सदद्वैतस्यावज्ञा क्रियते तथा श्रुतियुक्त्यनुभवावष्टंभेनास्माकं तदीयद्वैतानादरणे किं हीयत इत्यर्थः १०१ ननु निःप्रयोजनेयं द्वैतावज्ञेत्याशंक्य जीवन्मुक्तिलक्षणप्रयोजनसद्भावान्नैवमित्याह द्वैतेति १०२ न केवलं जीवन्मुक्तिरेव प्रयोजनमपि तु विदेहमुक्तिरपीत्यभिप्रायेण कृष्णवाक्यमुदाहरति एषेति १०३ ॥

23

अन्तकालशब्देन वर्तमानदेहपातोऽभिधीयत इत्याशङ्कां वारयितुं विवक्षितमर्थमाह सदद्वैत इति सद्रूपे द्वैतेऽनृतरूपे द्वैते च यदन्यो
न्याध्याससलक्षणमैक्यज्ञानमस्ति तस्यैक्यभ्रमस्यान्तकालो नाम तयोरद्वैतद्वैतयोः सत्यानृतरूपेण भेदबुद्धिरेव नापरो वर्तमानदेह
पात इत्यर्थः १०४ इदानीं लोकप्रसिद्धार्थस्वीकारेऽपि न दोष इत्यभिप्रायेणाह यद्वेति १०५ उक्तमेवार्थं प्रपञ्चयति नीरोग इति
१०६ ननु प्राणवियोगकाले मूर्छादिना ज्ञाननाशे भ्रान्तिः स्यादेवेत्याशङ्क्य ज्ञाननाशाभावे दृष्टान्तमाह दिने दिन इति यथाऽप्र

सदद्वैतेऽनृतद्वैते यदन्योन्यैक्यवीक्षणम् तस्यान्तकालस्तद्भेदबुद्धिरेव न चेतरः १०४ यद्वान्तका
लः प्राणस्य वियोगोऽस्तु प्रसिद्धितः तस्मिन्कालेऽपि न भ्रान्तेर्गताया पुनरागमः १०५ नीरोग उप
विष्टो वा रुग्णो वा विलुठन्भुवि मूर्छितो वा त्यजत्येष प्राणान्भ्रान्तिर्न सर्वथा १०६ दिने दिने
स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययम् परेद्युर्नानधीतः स्यात्तद्वद्विद्या न नश्यति १०७ प्रमाणोत्पा
दिता विद्या प्रमाणं प्रबलं विना न नश्यति न वेदान्तात्प्रबलं मानमीक्ष्यते १०८ तस्माद्वेदान्त
संसिद्धं सदद्वैतं न बाध्यते अन्तकालेऽप्यतो भूतविवेकान्निर्वृतिः स्थिता १०९ इति श्रीमत्प
रिव्राजकाचार्यभारतीतीर्थविरचितो महाभूतविवेकः २ गुहाहितं ब्रह्म यत्त
त्पञ्चकोशविवेकतः बोद्धुं शक्यं ततः कोशपञ्चकं प्रविविच्यते १ ॥

त्यहमधीते वेदे स्वप्नाद्यवस्थायां विस्मृतेऽपि परेद्युरनधीतवेदत्वं नास्ति तथा मृतिकालेऽपि तत्त्वानुसंधानाभावेऽपि ज्ञानना
शाभाव इत्यर्थः १०७ ज्ञाननाशाभावमेवोपपादयति प्रमाणोत्पादितेति १०८ उपपादितमर्थमुपसंहरति तस्मादिति
१०९ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनीश्वरशिष्येण श्रीरामकृष्णाख्येन विदुषा विरचिता म
हाभूतविवेकस्य तात्पर्यदीपिका समाप्ता २ ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पञ्चकोशविवेकस्य कुर्वे व्याख्यां समा
सतः तैत्तिरीयोपनिषत्तात्पर्यव्याख्यानरूपं पञ्चकोशविवेकाख्यं प्रकरणमारभमाण आचार्यस्तत्र श्रोतृप्रवृत्तिसिद्धये प्रयोजनमभिधे

यो वेद निहितं गुहायां परमे व्योमन्निति श्रुत्या गुहानिहितत्वेनाभिहितं यद्ब्रह्मास्ति तत् गुहाशब्दवाच्यान्नमयादिकोशपंचकविवेकेन ज्ञातं प्रा
प्यते यतस्तेषां कोशानां पंचकं प्रकर्षेण प्रत्यगात्मनः सकाशाद्भिन्नत्वप्रदर्शनेनेत्यर्थः १ ननु केयं गुहा यस्यां निहितं ब्रह्म तत्कोशपंचकवि
वेकेनावबुध्यते इत्याशंक्य श्रुत्या गुहाशब्देन विवक्षितमर्थमाह देहादिति देहादन्नमयात्प्राणः प्राणमयः अभ्यंतरः आन्तरः प्राणात्प्रा
णमयादात्मनो मनोमयः अभ्यन्तरं आन्तरं ततो मनोमयात्कर्ता विज्ञानमयः आन्तर इत्यनुषज्यते ततो विज्ञानमयाद्भोक्ता आनंदमयः
सोऽपि पूर्ववदान्तर इत्यर्थः सेयमन्नमयाद्यानंदमयान्ता परंपरा गुहाशब्देनोच्यत इत्यर्थः २ इदानीमन्नमयस्य स्वरूपं तदात्मना
त्मत्वं च दर्शयति पितृभुक्तान्नजादिति पितृभुक्तान्नजान्मातापितृभ्यां भुक्ताद्यवव्रीह्यादिलक्षणादन्नाज्जायमानेन यद्वीर्यम

देहादभ्यंतरः प्राणः प्राणादभ्यंतरं मनः ततः कर्ता ततो भोक्ता गुहा सेयं परंपरा २ पितृभुक्ता
न्नजाद्वीर्याज्जातोऽन्नेनैव वर्द्धते देहः सोऽन्नमयो नात्मा प्राक्चोर्ध्वं तदभावतः ३ पूर्वजन्मन्यसत्वे
तज्जन्म संपादयेत्कथं भाविजन्मन्यसत्कर्म न भुंजीतेह संचितम् ४ ॥

त्तस्माद्वीर्याद्यो देहो जातः यश्च जननानन्तरं क्षीराद्यन्नेनैव वर्धते स देहोऽन्नमयोऽन्नस्य विकारः स आत्मा न भवति कुत इत्यत
आह प्रागिति जन्मनः प्राक् मरणादूर्ध्वं च तदभावतस्तस्य देहस्याभावादित्यर्थः विवादाध्यासितो देह आत्मा न भवति कार्यत्वात् घ
टादिवदिति भावः ३ हेतुरयं तु साध्यमात्रे हि पूर्वं बाधकाभावादप्रयोजकोऽयं हेतुरित्याशंक्याकृताभ्यागमकृतविप्रनाशरूपबाधकस
द्भावान्नैवमिति परिहरति पूर्वजन्मनीति एतद्देहरूपस्यात्मनः पूर्वस्मिन् जन्मन्यसत्वादेतज्जन्महेतुदृष्टासंभवेऽप्यस्य जन्मनो भोगक्रिय
माणत्वादकृताभ्यागमः प्रसज्येत तथा भाविजन्मन्यपि अस्य देहस्यात्मनोऽसत्वादभावादिहानुष्ठितयोः पुण्यपापयोः फलभोक्तुरभावेन भो
गमन्तरेणापि कर्मक्षयः प्रसज्येत अयं कृतविप्रणाशः एवं कृतविप्रणाशाकृताभ्यागमरूपबाधकसद्भावादात्मनः कार्यत्वं नाङ्गीकर्तव्य

सिद्धमः ४ ॥

पंच॰
टी॰
२४

एवमन्नमयकोशस्यानात्मत्वं प्रदर्श्य प्राणमयकोशस्य स्वरूपं तदनात्मत्वं च दर्शयति पूर्ण इति योवायुर्देहे पूर्णः पादादिमस्तकपर्यंतं व्याप्तः
सन् बलं यच्छन् व्यानरूपेण सामर्थ्यं प्रयच्छन् अक्षाणां चक्षुरादीनामिंद्रियाणां प्रवर्तकः प्रेरको वर्तते स वायुः प्राणमय इत्युच्यते असावपि आत्मा
न भवति तत्र हेतुमाह चैतन्यवर्जनादिति विवादाध्यासितः प्राणः आत्मा न भवति जडत्वात् घटादिवदिति भावः ५ इदानीं मनोमयस्वरू
पप्रदर्शनपूर्वकं तस्याप्यनात्मत्वमाह अहन्तामिति देहे अहन्तां अहंभावं गृहादौ ममतां मदीयत्वाभिमानं च यः करोति असौ मनोम
य आत्मा न भवति कुत इत्यत आह कामाद्यवस्थया भ्रान्त इति हेतुगर्भितं विशेषणं कामक्रोधादिहेतिमत्त्वेनानियतस्वभावत्वादि
त्यर्थः तथा च मनोमय आत्मा न भवति विकारवत्त्वाद्देहवदिति भावः ६ अनन्तरं कर्तृशब्दवाच्यस्य विज्ञानमयस्य स्वरूपं प्रदर्शयं

पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्तकः वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात् ५
अहन्तां ममतां देहे गृहादौ च करोति यः कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ६ ली
ना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ७ कर्तृ
त्वकरणत्वाभ्यां विक्रियेतान्तरिंद्रियं विज्ञानमनसी चान्तर्बहिश्चैते परस्परं ८ ॥

न्तदनात्मत्वं च दर्शयति लीना सुप्तौ इति या चिच्छायोपेता धीः चिदाभाससहिता बुद्धिः सुप्तौ सुषुप्तिकाले लीना विलीना सती बोधे जाग
रणकाले आनखाग्रगा नखाग्रपर्यन्तं वर्तमाना सती वपुः शरीरं व्याप्नुयात् संव्याप्य वर्तते सा विज्ञानमयशब्दभाक् विज्ञानशब्देनो
च्यमाना असावपि आत्मा न भवति विलयाद्यवस्थावत्त्वात् घटादिवदित्यर्थः ७ ननु मनोबुद्ध्योरन्तःकरणत्वाविशेषात् मनोमय
विज्ञानमयरूपेण कोशद्वयकल्पनानुपपन्नेत्याशंक्य कर्तृत्वकरणत्वाभ्यां भेदसद्भावात् घटत एव मनोमयत्वादिभेद इत्या
ह कर्तृत्वेति अन्तरिन्द्रियं अन्तःकरणं कर्तृत्वकरणत्वाभ्यां कर्तृरूपेण करणरूपेण च विक्रियेत परिणमत इत्यर्थः एते कर्तृ
करणे विज्ञानमनसी विज्ञानमनःशब्दवाच्ये भवतः एते च परस्परमंतर्बहिर्भावेन वर्तेते अतस्तत्कोशद्वयमुपपद्यत इत्य

25

पं॰ ८ ॥

इदानीं भोक्तृरूपत्ववाच्यस्यानंदमयस्यानात्मत्वं दर्शयितुं तस्य स्वरूपमाह क्वचिदिति पुण्यभोगे पुण्यभोगे पुण्यकर्मफलानुभवकाले कदाचिदंतर्वृत्तिरंतर्मुखा सती आनंदप्रतिबिंबभाक् आत्मस्वरूपस्यानंदस्य प्रतिबिंबभजनत्सैव भोगशान्तौ पुण्यकर्मफलभोगोपरमे सति निद्रारूपेण लीयते विलीना भवति सा हि निरानंदमय इत्यभिप्रायः ९ तस्यानात्मत्वमाह कादाचिदिति अयमानंदमयोऽपि कादाचित्कत्वादात्मा न स्याद् घटादिपदार्थवदित्यर्थः ननु विद्यमानानामानंदमयादीनां सर्वेषां आत्मत्वनिरासे नैरात्म्यं प्रसज्येतेति शंक्याह बिंबेति [illegible] बिंबतयावस्थितस्य प्रियादिशब्दवाच्यस्यानंदमयस्य बिंबभूतः कारणभूतो य आनंदोऽसावेवात्मा भवति अतस्तत्त्वमाह सर्वदेति नित्यत्वादित्यर्थः विवादाध्यासितमानंद आत्मा भवितुमर्हति नित्यत्वात् य आत्मा न भवति ना

क्वचिदंतर्मुखा वृत्तिरानंदप्रतिबिंबभाक् पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ९ कादाचित्कत्वतो नात्मा स्यादानंदमयोऽप्ययं बिंबभूतो य आनंद आत्मासौ सर्वदा स्थितः १० ननु देहमुपक्रम्य निद्रानंदान्तवस्तुषु माभूदात्मत्वमन्यत्तु न कश्चिदनुभूयते ११ बाढं निद्रादयः सर्वेऽनुभूयन्ते न चेतरः तथाप्येतेऽनुभूयन्ते येन तं को निवारयेत् १२ स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यता ज्ञातृज्ञानान्तराभावादज्ञेयो न त्वसत्तया १३ ॥

सोऽनित्यो यथा देहादिः गगनादेरुत्पत्तिमत्त्वेनानित्यत्वान्नानैकांतिकतेति भावः १० चोदयति नन्विति अन्नमयाद्यानंदमयान्तानां कोशानामुक्तैर्हेतुभिरात्मत्वं न घटते चेन्माभवतु किंत्वन्यत्त्वस्यानुपलभ्यमानत्वान्नैव संभवतीति ११ परिहरति बाढमिति अत्र निद्राशब्देन निद्रानंदो लक्ष्यते निद्रादयो देहान्ता उपलभ्यन्ते अन्यो नानुभूयत इति यदुक्तं तत्सत्यं न हि तद्दरिद्रस्यास्माभिरंगीकर्तुं शक्यत इत्याह तथापीति अन्यस्यानुपलभ्यमानत्वेऽपि यदनुभवादेतेषामानंदमयादीनामुपलभ्यमानता भवति सोऽनुभवः कथं नांगीक्रियत इत्यर्थः १२ ननु केनाप्यात्मा घटादिविषयवदुपलभ्येत न चोपलभ्यते अतो नास्तीत्याशंक्याह स्वयमिति आनंदमयादीनां साक्षिणानुभवरूपत्वादेवानुभाव्यत्वं नास्तीति ननु अनुभवरूपत्वेऽप्यनुभाव्यत्वं कुतो न स्यादित्याशंक्याह ज्ञात्विति ज्ञाता च ज्ञानं च ज्ञातृज्ञाने अन्ये ज्ञातृज्ञाने ज्ञातृज्ञानान्तरे तयोरभावस्तस्मादज्ञेयः ज्ञानविषयो न भवति ननु ज्ञात्राद्यभावादज्ञायते स्वस्य वासत्त्वाहा

किमत्र निगमने कारणमित्यत आह नत्वसत्त्वयेति निदानंदादिसाक्षित्वेनासत्त्वस्फूर्तिमेव निराकृतत्वादिति भावः ॥ १२ ॥ अननुभवरूपस्या
त्मनोऽनुभाव्यत्वाभावे दृष्टान्तमाह माधुर्यादीति आदिशब्देनाम्लादयो गृह्यन्ते माधुर्यादयः स्वभावाः सहजा धर्मा विशेषा येषां ते माधु
र्यादिस्वभावाः गुडादयस्तेषामन्यत्र स्वसंसृष्टपदार्थेषु चणकादिषु स्वगुणार्पिणां स्वगुणान्माधुर्यादीन् अर्पयन्तीति स्वगुणार्पिणस्ते
षां स्वस्मिन् स्वस्मिन्स्वरूपेषु गुडादिलक्षणेषु तदर्पणापेक्षा न तेषां माधुर्यादीनामर्पणे संपादने अपेक्षा आकाङ्क्षा माधुर्यादिकं केनचित्स्व
दार्थे न संपादनीयमित्येवंरूपा नो नैव विद्यते किं चान्यदर्पकं नास्ति गुडादीनां माधुर्यादि अर्पकं वस्त्वन्तरं नास्तीत्यर्थः ॥ १३ ॥ सदृष्टान्त
फलितमाह अर्पक इति माधुर्यादिसमर्पकवस्त्वन्तराभावेऽपि यथा गुडादीनां माधुर्यादिस्वभावता यथा विद्यते एवमात्मनो ह्यनुभ
वविषयत्वं मा भूत् तदनुभवरूपता तु भवत्येवेत्यर्थः ॥ १४ ॥ उक्तार्थे प्रमाणमाह स्वयमिति अत्रायं पुरुषः स्वयंज्योतिर्भवति अस्मा

माधुर्यादिस्वभावानामन्यत्र स्वगुणार्पिणां स्वस्मिंस्तदर्पणापेक्षा नो न चास्त्यन्यदर्पकं ॥ १३ ॥ अर्पका
न्तरराहित्येऽप्यस्त्येषां तत्स्वभावता मा भूत्तस्यानुभाव्यत्वं बोधात्मा तु न हीयते ॥ १४ ॥ स्वयंज्योतिर्भव
त्येष पुरोऽस्माद्भासतेऽखिलात् तमेव भान्तमन्वेति तद्भासा भासते जगत् ॥ १५ ॥ येनेदं जानते सर्वं के
नान्येन जानतां विज्ञातारं केन विद्याच्छक्तं वेद्ये तु साधने ॥ १६ ॥

त्सर्वस्मात्पुरतः स्वभावाद्विभाति तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिश्रुतय आत्मनः स्वप्रकाशत्वं
बोधयन्तीत्यर्थः ॥ १५ ॥ येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति वाक्यमर्थतः पठति ये
न साक्षिचैतन्यरूपेणात्मनेदं सर्वं दृश्यजातं जानते प्राणिनस्तं साक्षिणमात्मानमन्येन केन साक्षिभूतेन जडेन जानतां
मवगच्छन्तु पुंमांस इति शेषः अस्यैव वाक्यस्य तात्पर्यमाह विज्ञातारमिति दृश्यजातस्य विज्ञातारं केन दृश्यभूतेन विद्याद्विजा
नीयान्न केनापि जानातीत्यर्थः ननु मनसा ज्ञास्यतीत्याशङ्क्याह शक्तमिति साधनं तु ज्ञानसाधनं तु मनो वेद्ये ज्ञातव्ये विषये
शक्तं समर्थं न तु ज्ञातर्यात्मनि नैव वाचा न मनसेत्यादिश्रुतेः तस्यापि तद्विषयत्वे कर्मकर्तृत्वकर्मविरोधाच्चेति भावः ॥ १६ ॥

आत्मनः स्वप्रकाशात्वप एव स वेत्ति वेद्यं न च तस्यास्ति वेत्ता अन्यदेव तद्विदितादथो अविदितादधीति वाक्यद्वयमपि प्रमाणमिति मन्वानस्त
द्वाक्यद्वयमर्थतः पठति स वेत्तीति सर्वज्ञात्मा यद्वेद्यं तत्सर्वं वेत्ति तस्यात्मनो वेदिता ज्ञाता अन्यो नास्ति तद्बोधस्वरूपं ब्रह्म विदिताविदिता
भ्यां विदितं ज्ञातं तेन विषयीकृतं अविदितमज्ञातं ताभ्यां पृथग् विलक्षणं बोधस्वरूपत्वादेवेत्यर्थः १७ ननु विदिताविदिताति
रिक्तो बोधो नानुभूयत इत्याशंक्य विदितविप्रेषणस्य वेदनस्यैव बोधस्वरूपत्वात्तदनुभवाभावे विदितस्याप्यनुभवाभावप्रसं
गाद्बोधानुभवोवश्यमङ्गीकर्तव्य इति सोपहासमाह बोधेपीति यस्य मंदस्य बोधेपि घटादिस्फुरणरूपेप्यनुभवः साक्षात्कारः
कथंचन कथमपि न जायते नोत्पद्यते तं नरस्समाकृतिं नरसमानाकारं लोष्टं लोष्टवज्जडं नरं मनुष्यं शास्त्रं कथं बोधयेन्न कथम

स वेत्ति वेद्यं तत्सर्वं नान्यस्तस्यास्ति वेदिता विदिताविदिताभ्यां तत्पृथग्बोधस्वरूपकं १७ बो
धेप्यनुभवो यस्य न कथंचन जायते तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृतिं १८ जिह्वा मे
ऽस्ति न वेत्युक्तिर्लज्जायै केवलं यथा न बुध्यते मया बोधो बोद्धव्य इति तादृशी १९ यस्मिन्सत्य
खिलो लोके बोधस्तत्तद्रूपलक्षणे यद्बोधमात्रं तद्ब्रह्मेत्येवंधीर्ब्रह्मनिश्चया २० ॥

पि बोधयेदित्यर्थः १८ बोधो न बुध्यत इत्युक्तिरेव व्याहतेति सदृष्टान्तमाह जिह्वेति मे जिह्वास्ति न वेत्युक्तिर्भाषणं यथा लज्जायै
केवलं लज्जाजननायैव भवति न तु हि सत्त्वज्ञापनाय जिह्वया विनाभाषणानुपपत्तेः एवं मया बोधो न बुध्यते इतः परं बोद्ध
व्य इत्युक्तिरपि तादृशी लज्जाहेतुरेव बोधेन विना तद्व्यवहारासिद्धेरित्यर्थः १९ भवत्वेवं विधास्य बोधस्य तथापि तद्ब्रह्म तेन ब्रह्मा
वबोधे किमायातमित्याशंक्याह यस्मिन्निति लोके जगति यस्मिन् घटादिलक्षणे विषये बोधो ज्ञानमस्ति तज्जडरूपेक्षणे
तस्य तस्य घटादिविषयस्यापेक्षणेनादरणे कृते सति पश्चाद्बोधमात्रं घटादिषु सर्वत्रानुस्यूतं यत्स्फुरणमस्ति तदेव ब्रह्मे
त्येवंरूपा धीर्बुद्धिर्ब्रह्मनिश्चया ब्रह्मावगतिरित्यर्थः २० ॥

२९

ननु घटादिविषयोपेक्षया तद्द्रष्टुरनुभवरूपं ब्रह्मावगम्यते चेत् कोशपंचकविवेको निष्प्रयोजनः स्यादित्याशंक्य ब्रह्मणः प्रत्यग्रूपतया ज्ञानेन विना संसारानिवृत्तेस्तथात्वावबोधोपयोगित्वान्न तस्यापि वैयर्थ्यमित्याह पंचकोशेति पंचानां कोशानामन्नमयादीनां परित्यागे बुद्ध्यानात्मत्वनिश्चये कृते तत्साक्षिरूपस्य बोधस्यावशेषणात् साक्षिरूपो बोध एव स्वस्वरूपं ब्रह्मैव स्यात् नन्वन्नमयादीनामनुभवसिद्धानां त्यागे शून्यपरिशेषरूपं लौकिकानां वैदिकानां च मते तावदस्त्येव कुत इत्यत आह शून्यत्वमिति तस्य साक्षिरूपबोधस्य शून्यत्वं दुर्घटं दुःसंपाद्यमित्यर्थः २२ उक्तमेवोपपादयति अस्तीति स्वयं स्वशब्दवाच्यं स्वरूपं लौकिकानां वैदिकानां च मते तावदस्त्येव कुत इत्यत आह विवादेति स्वस्वरूपस्य विप्रतिपत्तिविषयत्वाभावादित्यर्थः विपक्षे बाधकमाह स्वस्मिन्निति स्वात्मन्यपि विप्रतिपत्तौ सत्यामत्रास्यां विप्रतिपत्तौ कः प्रतिवादी स्या

पंचकोशपरित्यागे साक्षिबोधावशेषतः स्वस्वरूपं स एव स्याच्छून्यत्वं तस्य दुर्घटम् २२ अस्ति तावत्स्वयं नाम विवादाविषयत्वतः स्वस्मिन्नपि विवादश्चेत्प्रतियोग्यत्र को भवेत् २३ स्वासत्त्वं तु न कस्मैचिद्रोचते विभ्रमं विना अत एव श्रुतिर्बाधं ब्रूते चासत्त्ववादिनः २३ असद्ब्रह्मेति चेद्वेद स्वयमेव भवेदसत् अतोऽस्य मा भूद्वेद्यत्वं स्वसत्त्वं त्वभ्युपेयताम् २४ कीदृक्तर्हीति चेत्पृच्छेदीदृक्ता नास्ति तत्र हि यदनीदृगतादृक्च तत्स्वरूपं विनिश्चिनु २५ ॥

त्को पीत्यर्थः २३ ननु स्वासत्त्वबाधे एव प्रतिवादी भविष्यतीत्याशंक्य तथाविधः कोऽपि नास्तीत्याह स्वासत्त्वमिति २४ भ्रांतिमेकां विहायान्यस्यां दशायां स्वसत्त्वाभावः केनापि नांगीक्रियत इत्यर्थः अत एवं निश्चीयत इत्याशंक्याह अत इति यतः कस्मैचिन्न रोचते अत एव श्रुतिरपि असत्त्ववादिनो बाधं ब्रूते २३ केयं श्रुतिरित्याकांक्षायामसद्ब्रह्मेत्यादिकां श्रुतिमर्थतः पठति असदिति यदि ब्रह्मासदिति जानीयात्तर्हि स्वयमेव ब्रह्मणोऽनन्यत्वात्तज्ज्ञानी असन्नेव स्यात् स्वस्यैव ब्रह्मरूपत्वादित्यर्थः फलितमाह अत इति २४ इदानीमात्मनः स्वप्रकाशत्वं वक्तुंकामस्तस्य वेद्यत्वाभावे कीदृक्स्वरूपत्वमिति प्रश्नमनूद्यापाकरोति कीदृगिति अयमभिप्रायः आत्मन इदंतयान्यत्वेनाकेनचिद्रूपेण वैशिष्ट्यांगीकारे तेनैव रूपेण वेद्यत्वं स्यात्तदनंगीकारे शून्यत्वमिति सत्यमीदृक्त्वांगीकारे तथैव वेद्यत्वं तन्नांगीक्रियते इत्याहेदृगिति उपलक्षणमेतत्तादृक्त्वस्यापि उभयाभाव

तर्हि प्रत्यक्षमात्रेणार्थः सिद्ध इत्याशंक्य ईदृक्तादृक्शब्दयोरर्थमभिदधदात्मनस्तदवाच्यत्वमुपपादयति अक्षाणामिति प्रत्यक्षस्यैव च
घटादेरीदृक्शब्दवाच्यत्वं दृष्टपरीक्षस्यैव धर्माधर्मादेस्तादृक्शब्दवाच्यत्वं द्रष्टुरात्मनस्त्विन्द्रियजन्यज्ञानविषयत्वाभावान्नेदृक्त्वं स्व
त्वेनैव परोक्षत्वाभावान्न तादृक्त्वमित्यर्थः २६ तर्हि शून्यमिति द्वितीयं पक्षं फलप्रदर्शनव्याजेन परिहरति अवेद्य इति इन्द्रियज
न्यज्ञानविषयत्वाभावे परोक्षत्वात्स्वप्रकाश इत्यर्थः तत्रायं प्रयोगः आत्मा स्वप्रकाशः संवित्कर्मतामन्तरेणापरोक्षत्वात्संवेदनवद्
इति न च विशेषणासिद्धो हेतुः आत्मनः संवित्कर्मत्वे कर्मकर्तृभावविरोधप्रसंगात् स्वस्वरूपेण कर्तृत्वं विशिष्टरूपेण कर्मत्वमिति
विरोध इति चेन्न गमनक्रियायामप्येकस्यैव स्वरूपेणैव कर्तृत्वं विशिष्टरूपेण कर्मत्वमित्यतिप्रसंगात् न च साधनविकल्पो दृष्टा

अक्षाणां विषयस्त्वीदृक् परोक्षस्तादृगुच्यते विषयी नाक्षविषयः स्वत्वान्नास्य परोक्षता २६
अवेद्योऽप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययम् सत्यं ज्ञानमनन्तं चेत्यस्तीह ब्रह्मलक्षणम् २७ सत्य
त्वं बाधराहित्यं जगद्बाधैकसाक्षिणः बाधः किंसाक्षिको ब्रूहि न त्वसाक्षिक इष्यते २८ ॥

न्तः संवेदनस्य संवेदनान्तरापेक्षायामनवस्थानादिति नन्वात्मनः स्वप्रकाशत्वे सिद्धेऽपि ब्रह्मलक्षणाभावान्न ब्रह्मत्वसिद्धिरित्याशंक्य
तल्लक्षणं तत्र योजयति सत्यमिति २७ सत्यं ज्ञानमनन्तं चेत्यस्तीह ब्रह्मलक्षणमनन्त इति श्रुत्या यद्ब्रह्मणो लक्षणमुक्तं तदि
हात्मनि विद्यत इत्यर्थः २७ आत्मनः सत्यत्वोपपादनाय तावत्सत्यत्वस्य लक्षणमाह सत्यत्वमिति बाधशून्यत्वं सत्यत्वमबाध्यं वा यत्किंचिदिति तद्वि
वेक इति सर्वाचार्यैरुक्तत्वात् अस्त्वेवं प्रकृते किमायातमित्यत आह जगदिति जगतः स्थूलसूक्ष्मशरीरादिलक्षणस्य यो बाधः सुषुप्तिमू
र्छासमाधिषु अविद्यमानत्वात्तत्साक्षित्वेनैव वर्तमानस्यात्मनो बाधः किंसाक्षिकः कः साक्षी अस्य बाधस्यासौ किंसाक्षिकः न कोऽपि साक्षी
विद्यत इत्यर्थः असाक्षिकोऽप्यात्मबाधः किं न स्यादित्याशंक्याह नत्विति साक्षिरहितो बाधो नाभ्युपगन्तव्योऽन्यथातिप्रसंगादिति भावः २८

उक्तमर्थं दृष्टान्तेन स्पष्टयति मूर्तेष्विति मूर्तेषु घटादिष्वपनीतेषु बुद्ध्यादिभ्यो निःसारितेषु सत्सु यथाऽपनीतमशक्यं नभ एवावशि-
ष्यते एवं सद्व्यतिरिक्तेषु मूर्तामूर्तेषु देहेन्द्रियादिषु निराकर्तुं शक्येषु नेति नेतीति श्रुत्या निराकृतेषु सत्सु अन्ते अवसाने सर्वनि-
राकरणसाक्षित्वेन योऽबाध्योऽवशिष्यते स एव बाधरहितः आत्मेत्यर्थः ॥ २९ ॥ ननु प्रतीयमानस्य सर्वस्यापि निषेधे किंचिन्ना-
वशिष्यते तत्कथं शिष्यते यत्तदेव तदित्यवशिष्टस्यात्मत्वमुच्यते इति प्राकृते सर्वबाध इति न किंचिदवशिष्यते इति वद-
तां किं तथा प्रयोगसिद्ध्ये सर्वाभावविषयज्ञानमवश्यमभ्युपेतव्यम् अतस्तदेवास्मदभिमतात्मस्वरूपमित्यभिप्रायेण परि-

अपनीतेषु मूर्तेषु ह्यमूर्तं शिष्यते वियत् । शक्येषु बाधितेष्वन्ते शिष्यते यत्तदेव तत् ॥ २९ ॥
सर्वबाधे न किंचिच्चेद्यन्न किंचित्तदेव तत् । भाषा एवात्र भिद्यन्ते निर्बाधं
तावदस्ति हि ॥ ३० ॥ अत एव श्रुतिर्बाध्यं बाधित्वा शेषयत्परः । स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः
॥ ३१ ॥

हरति सर्वेति न किंचिदिति शब्देन यच्चैतन्यमुच्यते तदेव तत्त्वमित्यर्थः ननु न किंचिदित्यभाववाचिकेन किंचिच्छब्देन क-
थं चैतन्यमुच्यत इत्याशङ्क्य बाधसाक्षिणोऽवश्यमभ्युपेयत्वादभिधायकशब्दभेद एव विप्रतिपत्तिर्नाभिधेय इति परिहरति
भाषेति अत्र बाधसाक्षिणि प्रत्यगात्मनि भाषा एव न किंचिन्नास्तीत्यादिशब्दा एव भिद्यन्ते निर्बाधं बाधरहितं साक्षिणं
चैतन्यं तु विद्यत एवेत्यर्थः ॥ ३० ॥ उक्तमर्थं श्रुत्यारूढं करोति अत एवेति बाध्यमिति यतः साक्षिचैतन्यमबाध्यं अत ए-
व स एष नेति नेत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतोऽनात्मपदार्थनिराकरणद्वारेण बाध्यं निराकरणयोग्यं सर्वमनात्म-
वस्तुजातं बाधित्वा निराकृत्य पश्चादनिराकर्तुमशक्यं प्रत्यक्स्वरूपं शेषयत्यवशेषयति ॥ ३१ ॥

27

नेति नेतीति निषेद्धुं निर्बाध्य योग्यं बाधित्वाबाधितमशक्यमवशेषयतीत्युक्तं तत्र कीदृशं बाधितुं शक्यं कीदृशमशक्यमिति विवक्षा
यां तदुभयं विभज्य दर्शयति इदमिति इदमित्येवंरूपं दृश्यं प्रत्यक्षेणानुभूयमानं रूपं यस्य देहादेस्तदिदंरूपं तच्छास्त्रव्यापारेण यथा
वदिति पदद्वयं सर्वदृश्योपसंग्रहार्थं एवं च सति यद्दृश्यं तदखिलं त्यक्तुं शक्यं तदेवेत्यर्थः संप्रत्येतस्मादनिदंरूपः प्रत्यक्षो नेदं
तयावगन्तुमयोग्यः साक्षी स अशक्यस्त्यक्तुमित्यर्थः हीति निपातेन प्रसिद्धद्योतकेन त्यक्तुः स्वरूपत्वेन त्यागयोग्यतां सू
चयति फलितमाह स स्वात्मेति यो बाध्यरहितः साक्षी स एवात्मा नाहंकारादिदृश्यमित्यर्थः ३२ भवत्वात्मनो बाध्यत्वं ब्रह्म

इदंरूपं तु यद्यावत्तत्त्यक्तुं शक्यतेऽखिलं अशक्यो ह्यनिदंरूपः स स्वात्मा बाध्यवर्जितः ३२
सिद्धं ब्रह्मणि सत्यत्वं ज्ञानत्वं तु पुरेरितं स्वयमेवानुभूतित्वादित्यादिवचनैः स्फुटं ३३ न व्या
पित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः न वस्तुतोऽपि सर्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ३४ ॥

ते किमायातमित्यत आह सिद्धमिति ब्रह्मणि ब्रह्मलक्षणे यत्सत्यत्वमुक्तं तदात्मनि सिद्धं भवतु सत्यत्वं ज्ञानत्वं कथमित्याकांक्षायां त
त्सर्वमेवोपपादितमित्याह ज्ञानत्वमिति स्वयमेवानुभूतित्वाद्धि यस्मिन्नानुभाव्यतेत्यादिवचनैर्ज्ञानरूपत्वं पूर्वमेवाभिहितमित्य
र्थः ननु सत्यत्वज्ञानत्वयोरात्मनि सिद्धत्वेऽप्यानन्त्यं न घटते ब्रह्मण्यपि तन्न सिद्धेरित्याशंक्य ब्रह्मणि तावत्तत्साधयति न व्यापित्वा
दिति नित्यं विभुं सर्वगतं सुसूक्ष्मं आकाशवत्सर्वगतश्च नित्यः नित्यो नित्यानां चेतनश्चेतनानां इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वमित्यादिश्रु
तिभ्यो व्यापित्वनित्यत्वसर्वात्मत्वप्रतिपादनात् ब्रह्मणस्त्रिविधमनन्त्यं देशकालवस्तुकृतपरिच्छेदराहित्यमभ्युपेतव्यमित्यर्थः ३४

न केवलं श्रुतितः किंतु युक्तितोऽपीत्याह देशेति परिच्छेदहेतूनां देशकालान्यवस्तूनां मायया कल्पितत्वाच्च गंधर्वनगरादिभिर्ग
गनस्येव न देशादिभिःकृतः पारमार्थिकः परिच्छेदो ब्रह्मणः संभवति यतोतो ब्रह्मणऽप्यानन्त्यं नावश्यकमेव तदेतत्सत्यमात्मा
ब्रह्मैव ब्रह्मात्मैवात्र ह्येवं न विचिकित्स्यमित्यों सत्यमात्मैव तत्सिद्धो देवो ब्रह्म भवति अयमात्मा ब्रह्मेत्यादिभिरात्मनो ब्रह्मा
भेदप्रतिपादनात्तस्याप्यानन्त्यं सिद्धमिति तात्पर्यं ३५ ननु जडस्य जगतो ब्रह्मण्यारोपितत्वेन ब्रह्मणः परिच्छेदकत्वाभावे
ऽपि चेतनयोर्जीवेश्वरयोस्तदसंभवात्तत्कृतपरिच्छेदत्वादानन्त्यं ब्रह्मणो न संगच्छत इत्याशंक्य तयोरप्यौपाधिकरूपत्वेन पा

देशकालान्यवस्तूनां कल्पितत्वाच्च मायया न देशादिकृतोऽन्तोऽस्ति ब्रह्मानन्त्यं परिस्फुटं ३५ स
त्यज्ञानमनन्तं यद्ब्रह्म तद्वस्तु तस्य तत् ईश्वरत्वं च जीवत्वमुपाधिद्वयकल्पिते ३६ शक्तिरस्त्यै
श्वरी काचित्सर्ववस्तुनियामिका आनन्दमयमारभ्य गूढा सर्वेषु वस्तुषु ३७ ॥

रमार्थिकत्वाभावान्न वास्तवपरिच्छेदहेतुत्वमित्यभिप्रायेणाह सत्यमिति ३६ यत्सत्यादिरूपं ब्रह्म तद्वस्तु तदेव पारमार्थिकं तस्य
ब्रह्मणो यदत्र लोकप्रसिद्धमीश्वरत्वं जीवत्वं चेदृश्यमाणमुपाधिद्वयेन कल्पितं अतः कल्पितत्वादेव जडवज्जीवेश्वरयोरपि तत्परि
च्छेदकत्वाभाव इति भावः ३७ किं तदुपाधिद्वयमित्याकांक्षायां तदुभयं क्रमेण दिदर्शयिषुरादावीश्वरोपाधिभूतां शक्तिं निरू
पयति शक्तिरिति ऐश्वरी ईश्वरोपाधितया ईश्वरसंबन्धिनी काचिदसदसत्त्वादिरूपैर्निर्वक्तुमशक्या सर्ववस्तुनियामिनोप
लभ्यत इत्याशंक्याह आनन्दमयमिति आनंदमयादिब्रह्माण्डान्तेषु सर्वेषु वस्तुषु गूढा वर्तते अतो नोपलभ्यत इत्यर्थः ३७

नियमेनानुपलभ्यमानायास्तस्याः असत्त्वमेव किं न स्यादित्याशंक्य जगन्नियमनान्यथानुपपत्त्या तस्या वश्यमभ्युपेयेत्याह वस्तूनां पृथिव्यादीनां काठिन्यद्रवतादयो यथाशक्त्या नव्यवस्थाप्यन्ते तदा तेषां धर्माणां सांकर्याद्व्यासिद्धेरेकत्रावस्थानाज्जगदिदं प्लवेत अनियतव्यवहारविषयतां प्राप्नुयादित्यर्थः खल्विति प्रसिद्धिं द्योतयति ३८ ननु जडाया अस्या जगन्नियामकत्वं न युज्यत इत्याशंक्याह चिच्छायेति सा शक्तिश्चिच्छायावेशात् चिदाभासप्रवेशाच्चेतनेव चेतनत्वमापन्नेव विभातीति प्रतीयते अतो अस्या नियामकत्वं घटत इति भावः अस्त्वेतत्ततः किमायातमित्यत आह तदिति सा चासौ शक्तिश्चेति कर्मधारयः सैवोपाधिस्तेन संयोगः संबंधस्तस्मादिह ब्रह्मैव सत्यादिलक्षणमीश्वरतां सर्वज्ञत्वादिधर्मयोगितां व्रजेदत्रा-

वस्तुधर्मा नियम्येरन् शक्त्या नैव यदा तदा अन्योन्यधर्मसांकर्याद्विप्लवेत जगत्खलु ३८ चिच्छायावेशतः शक्तिश्चेतनेव विभाति सा तदुपाधिसंयोगाद्ब्रह्मैवेश्वरतां व्रजेत् ३९ कोशोपाधिविवक्षायां याति ब्रह्मैव जीवतां पिता पितामहश्चैकः पुत्रपौत्रौ यथा प्रति ४० पुत्रादेरविवक्षायां न पिता न पितामहः तद्वन्नेशो नापि जीवः शक्तिकोशविलक्षणः ४१ ॥

भ्युपात् ३९ जीवतोपाधिभूतानां कोशानां प्रागेवाभिहितत्वात् तन्निमित्तकं जीवत्वमिदानीमाह कोशेति कोशा एवोपाधिर्धर्मयोगिः कोशोपाधेरित्यादि तद्विवक्षायां क्रियमाणायां ब्रह्मैव सत्यादिलक्षणमेव जीवतां जीवव्यवहारविषयतां गच्छति नन्वेकस्यैव विरुद्धधर्मद्वययोगित्वं युगपत्क्वापि दृष्टचरमित्याशंक्याह पितेति यथैक एव देवदत्ताख्यकादेव पुत्रं प्रति पिता भवति पौत्रं प्रति पिता भवति पौत्रं प्रति तु पितामहः एवं ब्रह्मापि कोशोपाधिविवक्षायां जीवो भवति शक्त्युपाधिविवक्षायामीश्वरश्च भवतीत्यर्थः ४० वस्तुतस्तु जीवत्वमीश्वरत्वं वा ब्रह्मणो नास्तीत्येतत्स्पष्टयन्नाह पुत्रा-

इदानीमुक्तज्ञानस्य फलमाह यएवमिति ५१ इतिपंचकोशः यः साधनचतुष्टयसंपन्न एवमुक्तेन प्रकारेण पंचकोशविवेकपुरः
सरं ब्रह्म प्रत्यगभिन्नं सत्यादिलक्षणं वेद साक्षात्करोति स एष स्वयं ब्रह्मैव भवति स यो ह वै तत्परं ब्रह्मैव भवति ब्रह्मविदाप्नो
ति परमित्यादिश्रुतिभ्यः ततोपि किमित्यत आह ब्रह्मण इति नजायते म्रियते वा विपश्चिदित्यादिश्रुतेर्ब्रह्मणस्तावज्ज
न्म नास्ति अत एव विद्वानपि स्वात्मनस्तद्रूपत्वावगमान्नैव जायते न संवर्तत इति श्रुतेरिति इति पंचकोशविवेकव्याख्या
३ ॐ तत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ मायाद्वैतविवेकस्य क्रियते पदयोजना चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूह

यएवं ब्रह्म वेदैष ब्रह्मैव भवति स्वयं ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ५२ इति पंच
कोशविवेकाख्यस्तृतीयः प्रकरणः ३ ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते विवेके सति
जीवेन हेयो बंधः स्फुटी भवेत् १ ॥

परिसमाप्त्याभिलषितदेवतातत्त्वानुस्मरणलक्षणं मंगलमाचरन्नस्य वेदान्तप्रकरणत्वाच्छास्त्रीयमेवानुबन्धचतु
ष्टयं सिद्धवत्कृत्य ग्रन्थारम्भं प्रतिजानीते ईश्वरेणेति ईश्वरेण कारणोपाधिकेनान्तर्यामिणा जीवेनापि कार्योपाधिके
नाहंप्रत्ययिना च सृष्टमुत्पादितं जगद्धि विविच्यते विभज्य प्रदर्श्यतेऽस्मिन् द्वैतविवेचनस्य काकदन्तपरीक्षावन्निष्प्रयोज
नत्वं वारयति विवेक इति विवेके जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचने सति जीवेन स्वीकृतेन हेयः परित्याज्यो बंधहेतुः
द्वैतं स्फुटी भवेत् स्पष्टतां गच्छेत् एतावज्जीवेन हेयमिति निश्चीयत इत्यर्थः १ ॥

ननु स्रष्टृद्वारा जीवानामेव जगद्धेतुत्वं वादिनो वर्णयंति अतः कथमीश्वरस्य स्रष्टृत्वमुच्यते जगत इत्याशंक्य बहुश्रुति
विरोधान्नेदं चोद्यं युक्तमित्याशयेनाह मर्हतीत्यभिप्रेत्य श्वेताश्वतरवाक्यं तावदर्थतः पठति मायामिति मायोपाधिकमीश्वरं प्र
स्तुत्यास्मान्मायी सृजते विश्वमेतदिति तस्यैवेश्वरस्य जगतः स्रष्टृत्वं श्वेताश्वतरशाखिनो वर्णयन्तीत्यर्थः तैत्तिरीयोप
निषद्वाक्यमर्थतोऽनुसंक्रामयति आत्मेति आत्मा वा इदमग्रे भूत्स ऐक्षत सृजा इति संकल्पेनासृजल्लोकान्संकल्पेनासृजल्लो
कान्स एतानिति बह्वृचः ३ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ऐक्षत लोकान्नु सृजा इति स इमांल्लोकानसृ

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं समायी सृजतेत्याद्यः श्वेताश्वतरशाखिनः ३ आ
त्मा वा इदमग्रे भूत्स एक्षत सृजा इति संकल्पेनासृजल्लोकान्स एतानिति बह्वृच ३ खं वाय्व
ग्निजलोर्व्योषध्यन्नदेहाः क्रमादमी संभूता ब्रह्मणस्तस्मादेतस्मादात्मनोऽखिलाः ४ बहु
स्यामहमेवातः प्रजायेयेति कामतः तपस्तप्त्वासृजत्सर्वं जगदित्याह तैत्तिरिः ५ ॥

ततेत्यनेन वाक्येनाद्वितीयस्य परमात्मन एव जगत्स्रष्टृत्वं बह्वृचा ऋक्शाखाध्यायिन आहुरित्यर्थः ३ ईश्वरस्य जगत्
कारणत्वे तैत्तिरीयश्रुतिरपि प्रमाणमित्यभिप्रेत्य तद्वाक्यमर्थतः पठति खमिति द्वाभ्यां सत्यं ज्ञानमनन्तं ब्रह्मेत्युप
क्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिनान्नात्पुरुष इत्यन्तेन वाक्येन गुहानिहितत्वेन प्रत्यगभिन्नाद्ब्र
ह्म आकाशादिदेहपर्यन्तं जगदुत्पन्नमित्यभिधायोपरिष्टादपि सोऽकामयत इति बहु स्यां प्रजायेयेति स तपोऽतप्य
त स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेति वाक्येन तस्यैव ब्रह्मणो जगत्सर्जने ईक्षापूर्वकपर्यालोचनेन जग
त्स्रष्टृत्वं तैत्तिरिविवरहेत्यर्थः ५ ॥

पंच॰ टी॰ ६॰

छान्दोग्येऽपि ब्रह्मण एव जगत्स्रष्टृत्वं श्रुतमित्याह इदमिति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सद्रूपमद्वितीयं ब्रह्मोपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिना तस्यैवेक्षणपूर्वकं तेजोबन्नस्रष्टृत्वमभिधाय तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जरायुजमुद्भिज्जमित्यादिना अण्डजादिशरीरनिर्मातृत्वं च सामगा वर्णयन्तीत्यर्थः ६ मुण्डकोपनिषद्यपि तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवन्ते सरूपाः तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्तीत्यक्षराख्याद्ब्रह्मणो जगदुत्पत्तिः श्रूयत इत्याह विस्फुलिंगा इति ७ एवं

इदमग्रे सदेवासीद्बहुत्वाय तदैक्षत तेजोबन्नाण्डजादीनि ससर्जेति च सामगाः ६ विस्फुलिंगा यथा वह्नेर्जायन्तेऽक्षरतस्तथा विविधाश्चिज्जडा भावा इत्याथर्वणिकी श्रुतिः ७ जगदव्याकृतं पूर्वमासीद्व्याक्रियतेऽधुना दृश्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटे ८ विराण्मनुर्नरा गावः खराश्वाजावयस्तथा पिपीलिकावधि द्वन्द्वमिति वाजसनेयिनः ९ ॥

बृहदारण्यकेऽप्यव्याकृतशब्दवाच्याद्ब्रह्मणो नामरूपात्मकं जगदुत्पन्नमिति श्रुतमित्याह जगदिति ८ विराण्मनुर्नरा गाव इति तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिदंरूप इति वाक्येन स्पष्टः पुरास्पष्टनामरूपत्वेनाव्याकृतशब्दवाच्यमायोपाधिकाद्ब्रह्मणो नामरूपस्पष्टीकरणलक्षणसृष्टिरुक्ता तयोर्नामरूपयोर्विराडादिषु स्थूलकार्येषु स्पष्टता च तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिदंरूप इति वाक्येनाभिहितास्ते च विराडादयः आत्मैवेदमग्र आसीत्पुरुषविध इत्यादिना एवमेव यदिदं किंचित् मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजतेत्यनेन दर्शिता इ

॥ ९ ॥ श्रीं शि

30

उदाहृताभिः श्रुतिभिः ह्येतत्स्पष्टाभिधानान्तरं ब्रह्मणो जीवरूपेण तत्र प्रवेशोऽप्यभिहित इत्याह कृत्वेति श्रुतयो ह्येवं जीवसंबं
धिरूपान्तरं प्रविक्रियाद्ब्रह्मणो विलक्षणं विकाररूपमित्यर्थः देहे देहजाते जीवत्वं कुत इत्यत आह जीवत्वमिति प्राणादी
नां सामान्यत्वेन प्रेरकत्वं प्राणधारणं ९ तस्माज्जैवं रूपं कृत्वा प्रावेशादित्युक्तं किं तदित्यपेक्षायामाह चैतन्यमिति अधि
ष्ठानं लिंगदेहकल्पाधारभूतं यच्चैतन्यमस्ति यच्च तत्र कल्पितो लिंगदेहो यच्च तस्मिंल्लिंगदेहे विद्यमानश्चिदाभास
स्तत्संघस्तेषां त्रयाणां समूहो जीवशब्देनोच्यत इत्यर्थः ११ नन्वीश्वरस्यैव जीवरूपेण प्रविष्टत्वेन तस्य तत्त्वदुःखिता

कृत्वा रूपान्तरं जैवं देहे प्राविशदीश्वरः इति ताः श्रुतयः प्राहुर्जीवत्वं प्राणधारणात् ९ चैतन्यं
यदधिष्ठानं लिंगदेहश्च यः पुनः चिच्छाया लिंगदेहस्था तत्संघो जीव उच्यते १० माहेश्वरी त्र
या माया तस्या निर्माणशक्तिवत् विद्यते मोहशक्तिश्च तं जीवं मोहयत्यसौ ११ मोहादनीश
तां प्राप्य मग्नो वपुषि शोचति ईशसृष्टमिदं द्वैतं सर्वमुक्तं समासतः १२ ॥

द्विविधमेव त्वं कुत इत्याशंक्याह माहेश्वरीति माहेश्वरी मायिनं तु महेश्वरमिति श्रुत्युक्तं महेश्वरसंबन्धिनी या माया
स्तस्या निर्माणशक्तिवत्सर्जनसामर्थ्यवन्मोहनशक्तिश्च मोहनसामर्थ्यमप्यस्ति तदेतज्ज्ञ उमोहात्मकमिति श्रुतेः
ततः किमित्यत आह तामिति असौ मोहनशक्तिस्तत्सर्वोक्तं जीवं मोहयति चिदानंदस्वरूपत्वानवहितं करोति १२
ततोऽपि किमित्यत आह मोहादिति मोहादनीशतामिष्टानिष्टप्राप्तिपरिहारयोरसमर्थत्वं प्राप्य वपुषि मग्नः शरीरेता
दात्म्याभिमानं गतः शोचति दुःखिताभिमानं करोति समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति श्रुतेरित्य

॥ ४८ ॥

वक्ष्यमाणशंकायंपरिहारायद्वैतंनिगमयति ईशसृष्टमिति समासतः संक्षेपेणेत्यर्थः ननुजीवस्यद्वैतस्रष्टृत्वेकिंमानमित्याशंक्या
हसप्तेतिकथंतत्रप्रपंचितमित्याशंक्यसप्तान्नशब्दवाच्यद्वैतस्रष्टृप्रतिपादकंयत्सप्तान्नानिमेधयातपसाजनयत्पितेति
वाक्यमर्थतःपठतिसंगृह्णाति अन्नानीति पितास्वादृष्टद्वाराजगदित्यादनेन सर्वलोकदेहपालकोजीवइत्यर्थः १४
नन्वन्नसप्तकसर्जनंकिमर्थमित्याशंक्य तद्विनियोगोप्येकमस्यसाधारणंद्वेदेवानभाजयत्त्रीण्यात्मनेऽकुरुतपशुभ्य
एकंप्रायच्छदितिवाक्येनेत्याह १३ तानिचसप्तान्नान्येकमस्यसाधारणमितीदमेवास्यतत्साधारणमन्नंयदि

सप्तान्नब्राह्मणेद्वैतंजीवसृष्टंप्रपंचितं अन्नानिसप्तज्ञानेनकर्मणाजनयत्पिता १२ मर्त्या
न्नमेकंदेवान्नेद्वेपश्वन्नंचतुर्थकं अन्यत्त्रितयमात्मार्थमन्नानांविनियोजनं १३ व्रीह्यादि
कंदर्शपौर्णमासौक्षीरंतथामनः वाक्प्राणश्चेतिसप्तत्वमन्नानामवगम्यताम् १४ ईशे
नयद्यपीमानिनिर्मितानिस्वरूपतः तथापिज्ञानकर्मभ्यांजीवोकार्षीत्तदन्नतां १५

दमस्यतइत्यादिनायमात्मावाङ्मयोमनोमयप्राणमय इत्यन्तेन वाक्यसन्दर्भेणषडन्नकाण्डिकाद्वयरूपेणदर्शितानीत्या
ह व्रीह्यादिकमिति १४ ननूक्तसप्तान्नानांजगदन्तःपातित्वेनेश्वरनिर्मितत्वाज्जीवनिर्मितत्वाभिधानमयुक्तमित्या
शंक्य तत्स्वरूपस्येश्वरनिर्मितत्वेपिभोग्यत्वाकारस्यजीवनिर्मितत्वान्नैवमित्याह ईशेनेति १५ ज्ञानकर्मभ्यामिति
ज्ञानंविहितंप्रतिषिद्धंचदेवतापरयोषिदादिविषयंज्ञानंकर्मचविहितंयज्ञादिरूपंप्रतिषिद्धं हिंसादिरूपंताभ्या
मित्यर्थः तदन्नतांतेषांव्रीह्यादिप्राणान्तानांस्वभोगकारकत्वंइत्यर्थः १५ ॥

किमुक्तं भवति इतित्यत्राह ईशइति जगत्तस्मात्त्वेनोक्तं व्रीह्यादिरूपमीशकार्यत्वेन जीवभोग्यत्वेन च द्वाभ्यां संबद्धमित्यर्थः एकस्यैवाभयसम्बन्धे दृष्टान्तमाह पित्रिति १८ ईशजीवयोर्जगत्सर्जने किं साधनमित्यत आह मायेति १७ ननु ईश्वरसृष्टवस्तुस्वरूपातिरिक्तो भोग्यत्वाकार एव नास्ति को जीवेन सृज्यत इत्याशंक्याह ईशेति एकस्मिन्नेव विषये बहुविधो भोग उपलभ्यमानस्तु योजकं भोग्याकारभेदं गमयतीत्यर्थः १८ ननु सति भोगभेदे भोग्यभेदः कल्प्येत स एव नास्तीत्याशंक्य दृश्यमानत्वान्नैवमित्याह हृष्यतीति एको मणिपर्थी तं लब्ध्वा हृष्यति अन्यस्तु याचितस्तदलाभात्क्रुध्यति अत्र मणौ विषये

ईशकार्यं जीवभोग्यं जगद्द्वाभ्यां समन्वितं पितृजन्यं भर्तृभोग्यं यथा योषित्तथेष्यतां १९ मायाह्वयात्मको ह्यीशसंकल्पः साधनं जनौ मनोह्वयात्मको जीवसंकल्पो भोगसाधनं २० ईशनिर्मितमण्यादौ वस्त्वेकविधं स्थिते भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते २१ हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति १९ प्रियोऽप्रियउपेक्ष्यश्चेत्याकाराः मणिगास्त्रयः सृष्टा जीवैरीशसृष्टं रूपं साधारणं त्रिषु २० भार्या स्नुषा ननान्दा च याता मातेत्यनेकधा प्रतियोगिधिया योषिद्भिद्यते न स्वरूपतः २१ ॥

विरक्तस्तु तं मणिं पश्यत्येव लाभालाभनिमित्तकौ हर्षक्रोधौ न प्राप्नोतीत्यर्थः १९ केन भोगभेदो परक्तो जीवसृष्टाकारभेद इत्यत आह प्रिय इति मणिस्थानियाः प्रियाद्युपेक्ष्यत्वलक्षणाः आकारभेदा जीवैः सृष्टाः त्रिष्वपि साधारणं तु स्वरूपं यत्तन्मणिरूपं तदीश्वरनिर्मितमित्यर्थः २० उक्तं जीवसृष्टाकारभेदमुदाहरणान्तरेण स्पष्टयति २१ भार्येति ननान्दा भर्तृभगिनी याता देवरपत्नी प्रतियोगिधिया भर्तृश्वशुरादिलक्षणप्रतियोगिगोचरया बुद्ध्या न तद्देहत्यर्थः २१ ॥

ननु योषिद्विषयाणि भार्यादुहित्रादिज्ञानान्येव भिन्नानि उपलभ्यन्ते न तु तद्विषयभूताया योषितः स्वरूपे भेदो दृश्यते अतः प्रति
योगिपियायोषिद्विद्यतद्वस्तुकमिति शंकते नन्विति ज्ञानवैलक्षण्यस्य ज्ञेयवैलक्षण्याविनाभूतत्वात् ज्ञेयाकारभेदोकर्तव्य
एवेत्याशयेन परिहरति मैवमिति मैवं मांसमयी योषित्काचिदन्या मनोमयी ननु भ्रान्त्यादिस्थले बाह्यविषयाभावात्
तत्र वस्तु मनोमयमस्तु प्रमितिस्थले तदुपपत्तेर्बाह्यवस्तुनः सत्त्वादिति शंकते भ्रान्तीति मानेन प्रत्यक्षादिप्रमाणेन
मेयस्य प्रमेयस्येत्यर्थः २३ प्रमितिस्थले बाह्यविषयसत्त्वमंगीकरोति बाढमिति कथं तर्हि तद्विषयस्य मनोमयत्व

ननु ज्ञानानि भिद्यन्तामाकारस्तु न भिद्यते योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मितः २२ भ्रां
तिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयं जाग्रन्मानेन मेयस्य न मनोमयतेति चेत् २३ बाढं
मानेन मेयेन योगात्स्याद्विषयाकृतिः भाष्यवार्तिककाराभ्यामयमर्थ उदीरितः २४ मू
षासिक्तं यथा ताम्रं तन्निभं जायते तथा रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् २५

मुच्यतेऽत आह मानेनेति मानेन चक्षुरादिप्रमाणेन विषयाकृतिस्तु तस्य मेयेन योगात् सम्बन्धात्स्यात् नन्विदं स्व
कपोलकल्पितमित्याशंक्याह भाष्येति २४ तत्र तावद्भाष्यकारवचनमुदाहरति मूषेति यथा द्रुतं ताम्रं मूषायां सि
क्तं सत्तन्निभं जायते तत्समानकारं भवति तथा रूपादीन्विषयान्व्याप्नुवद्विषयीकुर्वच्चित्तं ध्रुवमवश्यं तन्निभं दृश्यत
इत्यर्थः २५ ननु ताम्रादेरग्निसंपर्काद्द्रुतस्य मूषानिषिक्तस्य कठिनमूषाभिघातेन शैत्यापत्तेर्मूषाकारापत्तौ अपि बुद्धे
रमूर्तायास्ताम्रादिविलक्षणाया विषयव्याप्तावपि कुतस्तदाकारापत्तिरित्याशंक्य दृष्टान्तमाह २५ ॥

यथा व्यञ्जकः प्रकाशक आलोक आतपादिर्व्यङ्ग्यस्य प्रकाश्यस्य घटादेराकारतां साकारत्वं नाभियात् प्राप्नुयात् एवं धी
रपि सर्वव्यञ्जकत्वात्सकलपदार्थप्रकाशकत्वादर्थाकाराश्रयस्याकारद्वयाकारो यस्याः सा न तथा प्रदृश्यते प्रकर्षेणो
पलभ्यत इत्यर्थः इदानीं वार्तिककारवचनमाह मातुरिति मातुः स्वाधिष्ठानबुद्धिस्थचिदाभासरूपात्प्रमातुर्मानाभिनि
ष्पत्तिमानस्य साभासान्तःकरणवृत्तिरूपस्याभिनिष्पत्तिर्भवतीति शेषः निष्पन्नमुत्पन्नं तन्मानं मेयं घटादिरूपमेति
प्राप्नोति किंच तन्मानं मेयाभिसंगतं प्रमेयेन सम्बद्धं सन्मेयाभत्वं मेयस्याभेवाभा यस्य तन्मेयाभं तत्त्वं तस्य भावस्तत्त्वं मेय
समानाकारतां प्रपद्यते प्राप्नोतीत्यर्थः २७ भवत्वेवं प्रकृते किमायातमित्यत आह तस्येति ननु मन्मयस्य घटस्यैवमन्तोम

व्यञ्जको वा यथालोको व्यङ्ग्यस्याकारतामियात् सर्वार्थव्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्यते २६ मा
तुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते २७ सत्येवं वि
षयौ द्वौ स्तो घटौ मृन्मयधीमयौ मृन्मयो मानमेयः स्यात्साक्षिभास्यस्तु धीमयः २८ अन्वयव्य
तिरेकाभ्यां धीमयो जीवबन्धकृत् सत्यस्मिन्सुखदुःखे स्तस्तस्मिन्नसति न द्वयं २९ ॥

यस्य घटस्यानेनैव मनसा ग्रहीतुमशक्यत्वात् ग्राहकान्तराभावाच्चासिद्धिरेवेत्याशंक्य ग्राहकान्तराभावोऽसिद्ध इत्याह मृण्मय
येति यथा मृण्मयो मानमेयः तथा धीमयः साक्षिभास्य इत्यर्थः २८ भवत्वेवं द्विविधं द्वैतं मत्तकस्य हेयत्वं कस्य वानेति
न जायत इत्याशंक्य जीवसृष्टस्य हेयत्वमित्यभिप्रेत्य तस्यैव बन्धहेतुत्वं दर्शयति अन्वय इति २९ अन्वयव्यतिरेकावेव दर्शय
ति सतीति अस्मिन्जीवसृष्टे मानसप्रपञ्चे सति विद्यमाने सुखदुःखे स्तः भवतः असति तु तस्मिन्द्वयं सुखदुःखं च नास्तीत्यर्थः २९

नन्वेतावन्वयव्यतिरेकौ बाह्यार्थविषयौ किं न स्यातामित्यत आह असतीति नरो मनुष्य एतदुपलक्षणमन्येषामपि स्वप्नादौ स्वप्न
स्मरणादिकाले बाह्यार्थे अनुकूले योषिदादौ प्रतिकूले व्याघ्रादौ च पारमार्थिके विषये असत्यपि अविद्यमानेऽपि बध्यते दुःखसुखा
भ्यां युज्यते समाध्यादिषु तु अस्मिन्बाह्यार्थे सत्यपि न बध्यते न दुःखसुखादिभाग्भवति अतस्तु विषयावन्वयव्यतिरेकौ न स्त
इत्यर्थः ३० मनोमयप्रपंचस्य बंधकत्वेनान्वयव्यतिरेकावुदाहरणेन स्पष्टयति परमिति देशान्तरं ग्रामे पुत्रे तत्र जीवत्ये

33

असत्यप्यस्मिन्बाह्यार्थे स्वप्नादौ बाध्यते नरः समाधिसुप्तिमूर्छासु सत्यप्यस्मिन्न बध्यते ३०
परदेशं गते पुत्रे जीवत्येवात्र तत्पिता विप्रलम्भकवाक्येन मृतं मत्वा प्ररोदिति ३१ मृतेऽपि
तस्मिन्वार्तायामश्रुतायां न रोदिति अतः सर्वस्य जीवस्य बंधकृन्मानसं जगत् ३२ विज्ञा
नवादो बाह्यार्थवैयर्थ्यात्स्यादिहेति चेत् न हृद्याकारमाधातुं बाह्यस्यापेक्षितत्वतः ३३

वसत्यत्र स्वगृहे स्थितस्यापि तातो विप्रलम्भकस्य मिथ्यावचनैः प्रवंचकस्य त्वत्सुतो मृत इत्येवंरूपेण वाक्येन स्वपुत्रं मृ
तं कल्पयित्वा प्रकर्षेण रोदनं करोति ३१ तस्मिन्नेव पुत्रे तत्रैव मृतेऽपि तन्मृतिवार्तायामश्रुतायां न रोदनं करोति फ
लितमाह अत इति धीमयस्यैव जगतो बन्धहेतुत्वाङ्गीकारे बाह्यार्थापलापादयं विज्ञानवादः स्यादिति शंकते
विज्ञानेति नेत्याह हृदीति यद्यपि मानसप्रपंचस्यैव बन्धहेतुत्वं तथापि तद्धेतुत्वेन बाह्यार्थस्यापि स्वीकारान्न विज्ञा
नवादप्रसंगः इतिभावः ३३ ॥

ननु ध्याकारसमर्पणाय बाह्यपदार्थोऽपेक्षणीयः सर्वं सर्वमानसप्रपंचसंस्कारस्यैवोत्तरोत्तरमानसप्रपंचहेतुत्वोपप
त्तेरित्याशंक्य प्रौढिवादेन तदंगीकरोति नहि विज्ञानवादात्को भेद इत्यत आह बाह्यमिति विज्ञानवादिनो बाह्यार्थमेवा
पलपंति वयं न तथेत्ययमेव भेद इत्यर्थः प्रयोजनशून्यस्याभ्युपगमो व्यर्थ एवेत्याशंक्याह प्रयोजनमिति मानाधीना वस्तुसि
द्धिर्न प्रयोजनाधीना मानसिद्धस्य प्रयोजनशून्यत्वमात्रेण सत्त्वस्य लौकिकैर्वादिभिश्चानभ्युपगमादिति भावः ३३ मानस

वैयर्थ्यमस्तु वा बाह्यं न वारयितुमीप्स्महे प्रयोजनमपेक्षन्ते न मानानीति हि स्थितिः ३३
बन्धश्चेन्मानसं द्वैतं तन्निरोधेन शाम्यति अभ्यसेद्योगमेवातो ब्रह्मज्ञानेन किं वद ३४ ॥

द्वैतस्यैव बंधहेतुत्वे तस्य मनोनिरोधात्मकयोगेनैव निवृत्तिसंभवाद् ब्रह्मज्ञानस्य बन्धनिवर्तकत्वाभ्युपगमो विरुद्ध
इत्याशंकते बन्धश्चेदिति ३४ योगेन किं हेतोः प्रशमस्तात्कालिक उच्यते आत्यंतिको वेति विकल्प्याद्यमंगीकृत्याद्वि
तीयं दूषयति तात्कालिकेति ज्ञात्वा देवं मुच्यते सर्वपाशैः ज्ञात्वा शिवं शान्तिमत्यन्तमेति यदा चर्मवदाकाशं वे
ष्टयिष्यंति मानवाः तदा देवमविज्ञाय दुःखस्यान्तो भविष्यतीत्यादि श्रुतिष्वन्वयव्यतिरेकाभ्यां ब्रह्मज्ञानादेव
बंधनिवृत्तिरभिधीयत इति भावः ३५ ॥

न तु वास्तवाद्वैतनिवारणमन्तरेणाद्वितीयब्रह्मज्ञानमेवनोदीयात् इत्याशंक्य तन्निवारणाभावेपि तस्य मिथ्यात्वज्ञानादेव पारमा
र्थिकमद्वैतमपि बोद्धुं शक्यत इत्याह अनुत्पन्नेपीति ३७ न द्वैतमथास्त्वज्ञानमद्वैतज्ञानप्रयोजकमपि तु तन्निवारणमेवेत्य
भिप्रेत्य विशेषमाह प्रलयइति ३७ प्रलये प्रलयावस्थायां तन्निवृत्तौ तु तस्य द्वैतस्य निवृत्तौ सत्यां तु विरोधित्वेन भवदभि
मतस्य द्वैतस्य निवारणे सत्यपि गुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्य ज्ञानसाधनस्याभावादद्वैतोऽद्वयं वस्तु बोद्धुं श
क्यं भवति अतस्तन्निवारणमप्रयोजकमिति भावः ३७ तथापि सति द्वैते कथमद्वैतज्ञानमित्याशंक्याह अबाधक

34

अनुत्पन्नेपीशास्त्रस्थे द्वैतेतेनस्य स्वधामतो बुद्धाब्रह्माद्वयं बोद्धुं शक्यं वस्त्वैक्यवादिना ३६ प्रल
ये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः विरोधि द्वैताभानेपि न शक्यं बोद्धुमद्वयं ३७ अबा
धकं साधकं च द्वैतमीश्वरनिर्मितं अपनेतुमशक्यं चेत्यास्तां तद्विष्यते कुतः ३८ जीव
द्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधा उपाददीत शास्त्रीयमातत्त्वस्यावबोधनात् ३९

मिति ३८ ईश्वरनिर्मितं द्वैतमबाधकं न तत्स्वरूपात्वज्ञाने नैवाद्वैतज्ञानोत्पत्तेरुक्तत्वात्साधकं च गुरुशास्त्रादिरूपस्य तस्य
ज्ञानसाधनत्वादाकाशादिरूपं द्वैतमस्माभिरपनेतुमशक्यं चेति द्वैतोस्तद्वैतमास्तां अतः कारणाद्विष्यते इति भावः
३८ इदानीं जीवस्रष्टं द्वैतं विभजते जीवद्वैतमिति किं द्विविधमपि सदा हेयमेवनेत्याह उपाददीति आतत्त्वस्या
वबोधनात्तत्त्वस्यावबोधनपर्यन्तमित्यर्थः ३९ ॥

किं तच्छास्त्रीयद्वैतमित्याकाङ्क्षायामाह आत्मब्रह्मेति प्रत्यगात्मपरब्रह्मणो विचाराख्यं यच्छ्रवणादिकं तच्छास्त्रीयं मानसं
जगदित्यर्थः नन्वात्मतत्त्वस्यावबोधनादिरुक्तमनुपपन्नं आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तयेत्युक्तत्वादित्याशङ्क्याह
बुद्धे तत्त्वे च तद्धेयमिति तच्छास्त्रीयद्वैतं तत्त्वे ब्रह्मात्मैक्यलक्षणे बुद्धे साक्षात्कृते सतीत्यर्थः तर्ह्यासुप्तेरितिवाक्यस्य का
गतिरिति चेत् दृष्टान्ताद्यभावे कं चित्कामादीनामनागपीति सर्वार्थेन कामाद्यवसरप्रदानस्य निषिद्धत्वात्तत्परत्वेनैवेति

आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् बुद्धे तत्त्वे च तद्धेयमिति श्रुत्यनुशासनं ४०
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ४१
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ४२
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ४३
तमेवैकं विजानीथ ह्यन्या वाचो विमुञ्चथ यच्छेद्वाङ्मनसी प्राज्ञ इत्याद्याः श्रुतयः स्फुटाः ४४
अशास्त्रीयमपि द्वैतं तीव्रं मन्दमिति द्विधा कामक्रोधादिकं तीव्रं मनोराज्यं तथेतरं ४५ ॥

वदामः अतो न काप्यनुपपत्तिः ४० तत्त्वबोधोत्तरं कालं तद्धेयत्वप्रतिपादनपराः श्रुतीरुदाहरति शास्त्राण्यधीत्येति ४१ ग्र-
न्थमभ्यस्येति ४२ तमेव धीर इति ४३ तमेवैकं विजानीथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुरिति श्रुतिरर्थपाठि-
त्वा ४४ अशास्त्रस्यापि द्वैतस्यावान्तरभेदमाह द्विविधमप्युक्रमेणोदाहरति कामक्रोधादिकमिति किंमितरन्मन्दमित्य-
र्थः ४५ किमनयोरशास्त्रीयद्वैतस्यैव तत्त्वबोधोत्तरकालमेव हेयत्वं नेत्याह उभयमिति ४५ ॥

प्राक्निवारणं किमर्थं इत्यत आह बोधसिद्धये इति तत्र लिंगमाह शम इति यतस्तत्त्वावबोधात्प्राक् योग्यत्वं तत एव नित्या
नित्यवस्तुविवेकादिब्रह्मज्ञानसाधनेषु शमप्रेप्शान्तः समाहित इति यदाभ्यां शान्तिसमाधी श्रूयेते इत्यर्थः ४६ ननु तत्त्वबोधात्प्राक्
निवार्यमित्यभिधानादुत्तरकाले स्वीकार्यता स्यादित्याशंक्याह बोधादूर्ध्वमिति उक्तमर्थं व्यतिरेकमुखेन द्रढयति कामा
दीति कामादिरूपो यः क्लेशः स एव बंधस्तेन युक्तस्य बद्धस्य मुक्तता जीवन्मुक्तत्वं न हि नास्त्येवेत्यर्थः ४७ ननु जन्मादिसंसारा
दुःखितस्यात्यन्तिकपुरुषार्थरूपया विदेहमुक्त्यैवालं किमनया आपातिकया जीवन्मुक्त्येति शंकते जीवन्मुक्तिरिति ऐ

उभयं तत्त्वबोधात्प्राक्निवार्यं बोधसिद्धये शमः समाहितत्वं च साधनेषूक्तं ततः ४६ बोधा
दूर्ध्वं च तद्धेयं जीवन्मुक्तिप्रसिद्धये कामादिक्लेशबन्धेन युक्तस्य न हि मुक्तता ४७ जीवन्मु
क्तिरियं माभूज्जन्माभावे त्वहं कृती तर्हि जन्मापि तेऽस्त्वेव स्वर्गमात्रात्कृती भवान् ४८ क्षया
तिशयदोषेण स्वर्गो हेयो मनो यदि तदा दोषतमात्मायं कामादिः किं न हीयते ४९ तत्त्वं बु
द्ध्वापि कामादीन्निःशेषं न जहासि चेत् यथेष्टाचरणं ते स्यात्कर्मशास्त्रातिलंघिनः ५० ॥

हिकभोगनिवृत्तिभयाज्जीवन्मुक्तित्यागे आमुष्मिकभोगनिवृत्तिभयाद्विदेहमुक्तिरपि त्याज्या स्यादिति प्रतिबन्द्या परिहरति तर्ही
ति ४८ प्रतिबन्दीमोचनं शंकते ४९ क्षयातिशयेति दोषयुक्तत्वेन स्वर्गादेस्त्याज्यत्वे सकलपुरुषार्थविघातकत्वेनातीवदो
षरूपस्य कामादेस्त्यक्तत्वादैहिकभोगमात्रोपयोगिकामाद्यभ्युपगमे को दोषः इत्याशंक्याह तत्त्वमिति तत्त्वविज्ञाभिमा
नेन विधिनिषेधशास्त्रमतिक्रम्य कामाद्यधीनतया वर्तमानस्य तव यथेष्टाचरणं स्यादित्यर्थः ५० ॥

अस्तु को दोष इत्याशंक्य तद्वति स्वत्वप्रतिपादनपरं सुरेश्वराचार्यवचनमुदाहरति बुद्धेति बुद्धमद्वैतसत्तत्त्वमद्वैतस्वरूपं ब्रह्मतत्त्वं येन स बुद्धाद्वैतसत्तत्त्वस्तस्य विषयस्य यथेष्टाचरणं यदि स्यात्तर्हि अशुचिभक्षणादिकमपि स्यात्तथा सति शुनां तत्त्वदृशां चैव न कोऽपि विशेषः स्यादित्यर्थः ५१ एतावता किमनिष्टमापादितमित्याशंक्य सोपहासमुत्तरमाह बोधादिति तत्त्वज्ञानोदयात्पूर्वं कामक्रोधादिजनितदोषैस्त्वं क्लेशोऽभूदिदानीं तु सर्वलोकनिन्दामपि सहस्वेति क्लेशाद्विशेषमिति भावः ५२ तर्हि किं कर्तव्यमित्यत आह विड्वराहादीति सर्वलोकस्पर्शे हेतुत्वान्नवांस्त्वं कामादित्यागाशक्तत्वेन सर्वथा मविड्वराहादिसाम्यं माकांक्षीः किन्तु कामादि

बुद्धाद्वैतसतत्त्वस्य यथेष्टचरणं यदि । शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ॥ ५१ ॥ बोधात्पुरा मनोमात्रदोषैः क्लिष्टोऽस्यथाधुना । अशेषलोकनिन्दा चेत्यहो ते बोधवैभवं ॥ ५२ ॥ विड्वराहादितुल्यत्वं माकांक्षीस्तत्त्वविद्भवान् । सर्वधीदोषसन्त्यागाल्लोकैः पूज्यस्व देववत् ॥ ५३ ॥ काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः । प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव ॥ ५४ ॥ त्यज्यतामेष कामादिर्मनोराज्ये तु का क्षतिः । अशेषदोषबीजत्वात्क्षतिर्भगवतेरिता ॥ ५५ ॥

लक्षणसकलमनोदोषहानेन सर्वजनैर्देववत्पूज्यस्त्वं पूज्यो भवेत्यर्थः ५३ तत्त्यागोपायमाह काम्यादीति काम्याः कामनाविषयाः स्रगादयस्त आद्या येषां काम्यादीनां तेषां काम्यादयस्तेषां ये दोषा अनित्यत्वसातिशयत्वादयस्तेषां दृष्टिरवलोकनमाद्यं येषां कोपस्वरूपविचारादीनां ते न योक्तास्तेषां कामादित्यागहेतुत्वे प्रमाणमाह प्रसिद्धा इति भवतु ततः किमायातमित्यत आह तानन्विष्येति ५४ ननु कामादीनामनर्थहेतुत्वात्त्याज्यत्वमस्तु मनोराज्यस्य तु न तथात्वात्तत्त्यागो नापेक्षित इत्याशंक्य तेन त्याज्यतामिति साक्षादनर्थहेतुत्वाभावेऽपि परंपरया तद्धेतुत्वात्त्याज्यमेवेत्यभिप्रेत्य परिहरति अशेषेति ५५ ॥

परस्परयाऽनर्थहेतुत्वप्रदर्शनपरं भगवद्वाक्यमुदाहरति ध्यायतो विषयानिति ५६ तर्हि सम्यग्मनोराज्यस्य कः परिहारोपाय इत्य
तत्राह शक्यमिति सोऽपि कुतः सिध्यतीत्यत आह सुसम्पाद इति ५७ ननु सांगयोगयुक्तस्य तथात्वं तद्रहितस्य का गतिरित्यत आ
ह बुद्धतत्त्वेनेति बुद्धमवगतं तत्त्वं ब्रह्मात्मैक्यलक्षणं येन स बुद्धतत्त्वस्तेन कामक्रोधादिबुद्धिदोषरहितेन एकान्तवासिना वि
जनदेशनिवासशीलेन पुरुषेण दीर्घं षट्द्वादशादिमात्रोपनीतप्रणवमोंकारमुच्चार्य मनोराज्यं विजीयत निवार्यत इत्य

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोऽभिजायते ५६
शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः सुसम्पादः क्रमात्सोऽपि सविकल्पसमाधिना ५७
बुद्धतत्त्वेन धीदोषशून्येनैकान्तवासिना दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते ५८ जिते
तस्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत् एतत्पदं वसिष्ठेन रामाय बहुधेरितं ५९ दृश्यं ना
स्तीति बोधेन मनसो दृश्यमार्जनं सम्पन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ६० ॥

र्थः ५८ मनोराज्यविजये किं भवतीत्यत आह जिते तस्मिन्निति ५९ यथा मूक सकलवाग्व्यापाररहितस्तिष्ठत्येवं म
नोऽपि सर्वव्यापाररहितं भवति तिष्ठत इत्यर्थः स्वहजिकमनोवस्थानस्य पुरुषार्थत्वे प्रमाणमाह एतदिति एतत्पद
मियं देशेत्यर्थः ५९ वासिष्ठश्लोकद्वयमुदाहरति दृश्यमिति ६० नेह नानास्ति किंचनेत्यादिश्रुत्या द्वितीयब्रह्मा
तिरिक्तजगदभावज्ञानेन मनसः सकाशाद्दृश्यनिवारणं सम्पन्नं यदि तर्हि निरतिशयं मोक्षसुखं तदेव तिष्ठत्वमिति
जानीयादित्यर्थः ६० ॥

अद्वैतशास्त्रमत्यर्थं विचारितं तथा परस्परं गुरुशिष्यादिसंवादद्वारा चिरकालं ग्राहितं च एवं कृत्वा किं निश्चितमित्यत आह सन्त्य-
क्तमिति सम्यक्परित्यक्तकामादिवासनान्मननसहितान्मौनभावादृतेऽधिकः पुरुषार्थो नास्तीति निश्चितमित्यर्थः ६१ एवं निश्चितिकस्य
चित्तस्य प्रारब्धकर्मणा विक्षेपे सति तत्प्रतीकारोपायः क इत्याकांक्षायामाह विक्षिप्यत इति भोगप्रदेन प्रारब्धकर्मणा बुद्धिः
कदाचिद्विक्षिप्यते चेत्तर्हि सा बुद्धिरभ्याससदाभ्यात्तदेव पुनरपि समाहिता स्यादित्यर्थः ६२ सदाचित्तविक्षेपराहित्यस्य ब्रह्म-
वित्त्वमौपचारिकमित्याह विक्षेप इति ६३ पारदर्शिनो वेदान्तपारगाः इत्यर्थः ६४ अत्रापि वसिष्ठवाक्यमुदाहरति दर्शना

विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः सन्त्यक्तवासनान्मौनादृते नास्त्युत्तमं पदं ६१ विक्षिप्यते
कदाचिद्धीः कर्मणा भोगदायिना पुनः समाहिता सा स्यात्तदेवाभ्यासपाटवात् ६२ विक्षेपो यस्य
नास्त्यस्य ब्रह्मवित्त्वं न मन्यते ब्रह्मैवायमिति प्राहुर्मुनयः पारदर्शिनः ६३ जीवन्मुक्तेः परा काष्ठा
जीवद्वैतविवर्जनात् लभ्यतेऽसावतोऽत्रेदमीशाद्वैताद्विवेचितं ६४ दर्शनादर्शने हित्वा स्वयं के-
वलरूपतः यस्तिष्ठति स तु ब्रह्मन्ब्रह्म न ब्रह्मवित्स्वयं ६५ इति श्री परमहंसपरिव्राजकाचार्य
श्रीभारतीतीर्थविद्यारण्यमुनिकिंकरेण रामकृष्णविदुषा विरचिता द्वैतविवेकपदयोजना

दर्शनेति यो ब्रह्म जानामि न जानामि इति व्यवहारद्वयं परित्यज्य स्वयमद्वितीयचैतन्यमात्ररूपेणावतिष्ठते स स्वयं ब्रह्मै-
व न ब्रह्मविदित्यर्थः ६४ सफलं द्वैतविवेचनमुपसंहरति जीवन्मुक्तेरिति ६५ असावुक्तप्रकारा जीवन्मुक्तेः परा का-
ष्ठा निरतिशया पर्यवसानभूमिः जीवद्वैतस्य मनोमयप्रपंचस्य विवर्जनात्परित्यागाल्लभ्यते प्राप्यते अतः कारणादिदं जी-
वद्वैतं ईशद्वैतादीश्वरसृष्टद्वैताद्विविच्य विविच्य प्रदर्शितमित्यर्थः ६५ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभा-
रतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रचिता ४ ॥ ६५ ॥

ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः मुमुक्षोर्मोक्षसाधनतत्त्वमस्येकत्वावगतिसिद्धये प्रसि
द्धानां चतुर्णां महावाक्यानामर्थं क्रमेण निरूपयन्परमकृपालुराचार्य आदौ तावदैतरेयारण्यकगतवाक्ये प्रज्ञानं ब्रह्मेति महावाक्ये प्र
ज्ञानशब्दस्यार्थमाह येनेति १ येन चक्षुर्द्वारा निर्गतान्तःकरणवृत्त्युपहितचैतन्येनेदं दर्शनयोग्यं रूपादिकमीक्षते पश्यति शृणुह व
स्तथा श्रोत्रद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन येन शब्दजातं शृणोति तथैव घ्राणद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन येन गंध
जातं जिघ्रति येन वागिन्द्रियावच्छिन्नेन व्याकरोति शब्दजातं व्याहरति येन रसनेन्द्रियद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वा
द्वरसौ विजानाति अनुक्तसमुच्चयार्थश्चशब्दः तथा चोक्तानुक्तैः सकलेन्द्रियैरन्तःकरणवृत्तिभेदैश्चोपलक्षितेन यच्चैतन्यम

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितं १ चतुर्मु
खेन्द्रदेवेषु मनुष्याश्वगवादिषु चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि २ ॥

स्ति तदेवात्र प्रज्ञानमित्युच्यत इत्यर्थः अनेन येन वा पश्यतीत्यादेः सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानीत्यन्तस्यावान्तर
वाक्यसन्दर्भस्यार्थः संक्षिप्य दर्शितः एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दार्थमाह चतुर्मुखेन्द्र इति उत्तमेषु देवादिषु म
ध्यमेषु मनुष्येषु अधमेष्वश्वादिषु देहेषु यान्यरिष्ठाकाशादिभूतेषु जराजन्मादिहेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः अनेन
च एष ब्रह्मैष इन्द्र इत्यादेः प्रज्ञानप्रतिष्ठित्यन्तस्यावान्तरवाक्यस्यार्थतः संक्षिप्य दर्शितः इत्थं पदार्थमभिधाय वाक्यार्थमाह अत
इति यतः सर्वत्रावस्थितं प्रज्ञानं ब्रह्मातो मय्यपि स्थितं प्रज्ञानं ब्रह्मैव प्रज्ञानत्वाविशेषादित्यर्थः २ एवमृक्शाखागतं महावाक्या
र्थं निरूप्य यजुःशाखास्थमध्ये बृहदारण्यकोपगतस्याहं ब्रह्मास्मीति महावाक्यस्यार्थाविष्करणायाहंशब्दस्यार्थमाह परिपूर्ण इति

37

परिपूर्णः स्वभावतो देशकालवस्तुभिरपरिच्छिन्नः परमात्मास्मिन्मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसम्पन्न
त्वेन विद्यासम्पादनोपयोग्येऽस्मिन्श्रवणाद्यनुष्ठानवति देहे मनुष्यादिशरीरे बुद्धेर्बुद्ध्युपलक्षितस्य सूक्ष्मशरीरस्य साक्षितया
विकारित्वेनावभासकतया स्थितत्वावस्थायां स्फुरत्स्वप्रकाशमानोऽहमितीर्यते लक्षणयाहंपदेनोच्यत इत्यर्थः ३ ब्रह्मशब्दार्थमाह
स्वतः पूर्ण इति स्वतः परिपूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः सर्वोक्तः परमात्मा अस्मिन्महावाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदे
वर्णितः लक्षणयोच्यत इत्यर्थः एतद्वाक्यगतेनास्मीतिपदेन पदद्वय पदद्वयसमानाधिकरण्यलभ्यं जीवब्रह्मणोरैक्यं परा
मृश्यत इत्याह अस्मीति फलितमाह तेन ब्रह्म भवामीति ४ इदानीं छान्दोग्यश्रुतिगतस्य तत्त्वमसीतिवाक्यस्यार्थप्रकाशना

परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ३ स्वतः
पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहं ४ एकमेवाद्विती
यं सन्नामरूपविवर्जितम् सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते ५ श्रोतुर्देहेन्द्रियातीतं व
स्त्वत्र त्वंपदेरितं एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् ६ ॥

य तत्पदलक्ष्यार्थमाह एकमेवाद्वितीयमिति ५ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेति वाक्ये सृष्टेः पुरा स्वगतादि
भेदशून्यं नामरूपरहितं यद्वस्तु प्रतिपादितमस्ति अस्य सृष्टस्य नोऽधुनापि सृष्टेरुत्तरकालेऽपि तादृक्त्वं विचारदृष्ट्या तथात्वं तदि
तिपदेनेर्यते इत्यर्थः त्वंपदलक्ष्यतामाह श्रोतुरिति श्रोतुः श्रवणाद्यनुष्ठानेन वाक्यार्थं प्रतिपत्तुः देहीन्द्रियातीतं देहेन्द्रि
योपलक्षितस्थूलादिशरीरसाक्षितया तद्विलक्षणं सद्वस्तु तदेव त्वंपदेरितं वाक्यगतेन त्वमिति पदेन लक्षितमित्यर्थः
एतद्वाक्यस्थेनासीतिपदेन तत्त्वंपदसमानाधिकरण्यलभ्यं पदार्थद्वयैक्यं प्रतिपाद्यत इत्याह एकतेति सिद्धम
र्थमाह तदैक्यमिति तयोस्तत्त्वंपदार्थयोरैक्यं प्रमाणसिद्धमेकत्वमनुभूयतां मुमुक्षुभिरित्यर्थः ६ ॥

क्रमशोऽस्यार्थं वर्णयन्नेवेदं तत्तस्यायमात्मा ब्रह्मेति वाक्यस्यार्थं व्याचिकीर्षुरादावयमात्मेति पदद्वयेन विवक्षितमर्थं क्रमेण दर्शयति स्व
प्रकाशेति अयमित्युक्तोऽयमिति शब्देन स्वप्रकाशापरोक्षत्वं स्वयंप्रकाशत्वेनापरोक्षत्वं मतं अभिमतं अत्र घटादिवत्त्वपरोक्षत्वं
घटादिवद्दृश्यत्वेन च व्यावर्तयितुं विशेषणमयमिति बोद्धव्यं देहादिष्वप्यात्मशब्दप्रयोगदर्शनादत्रात्मशब्देन किं विवक्षितमि
त्याकांक्षायामाह अहंकारादीति अहंकार आदिर्यस्याहंकारप्राणमनइंद्रियदेहसंघातस्य सोऽहंकारादिस्तथा देहोऽन्तो यस्योक्तसं
घातस्य स देहान्तोऽहंकारादिश्चासौ देहान्तश्चेति तथा तस्मात्प्रत्यक्तया अधिष्ठानतया साक्षितया चान्तर आत्मेति गीयते ब्रह्मवाक्य
इत्यर्थः ७ इति महावाक्यविवेकः समाप्तः ब्राह्मणत्वादिष्वपि ब्रह्मशब्दप्रयोगदर्शनात्तद्व्यावर्तनायात्र विवक्षितमर्थमाह
दृश्यमानस्येति दृश्यत्वेन मिथ्याभूतस्य सर्वस्याकाशादेर्जगतः तत्त्वमधिष्ठानतया तद्बाधावधित्वेन पारमार्थिकं सच्चिदानन्दल

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतं अहंकारादिदेहान्तात्प्रत्यगात्मेति गीयते ७ दृश्य
मानस्य सर्वस्य जगतस्तत्त्वमीर्यते ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् इति श्रीमहावा
क्यार्थविवेकः समाप्तः यथा चित्रपटे दृष्टमवस्थानां चतुष्टयम् परमात्मनि विज्ञेयं तथा
वस्थाचतुष्टयम् १ ॥

क्षणं यद्रूपमस्ति तद्ब्रह्मशब्देनेर्यते कथ्यत इत्यर्थः वाक्यार्थमाह तद्ब्रह्मेति तदुक्तलक्षणं ब्रह्म स्वप्रकाशात्मरूपकं स एवेत्यर्थः ॐ
नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी १ चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिहरणाय
परमात्मनीति पदेनेष्टदेवतातत्त्वानुसंधानलक्षणं मंगलमाचरन्नस्य ग्रन्थस्य वेदान्तप्रकरणत्वात्तदीयैरेव विषयादिभिस्तद्वत्ता
सिद्धं मनसि निधायाध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते इति न्यायमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थितिप्रकारं सदृ
ष्टान्तं प्रतिजानीते यथेति चित्रपटे वर्तमानानामवस्थानां चतुष्टयं यथा तथैव परमात्मनि विवर्तमानानामवस्थाचतुष्टयं ज्ञेयमि
ति किं तदित्याकांक्षायां दृष्टान्तदार्ष्टान्तिकयोरुभयोरप्यवस्थाचतुष्टयं क्रमेणोद्दिशति यथेति ॥

धौतो घट्टितो लाञ्छितो रंजितश्चेत्येवंप्रकाराश्चतस्रोवस्था यथा चित्रपटे उपलभ्यन्ते तथा परमात्मन्यपि चिदन्तर्यामि सूत्रात्मा विराट् चेत्येवमवस्थाचतुष्टयं बोद्धव्यमित्यर्थः १ दृष्टान्तस्थितानामवस्थानां स्वरूपं क्रमेण उत्पादयति स्वतः शुभ्र इति २ अत्रावस्थाचतुष्टयमध्ये स्वतो द्रव्यान्तरसंबन्धं विना शुभ्रो धौत इत्युच्यते अन्नेन लिप्तो घट्टितः मषीमयैराकारैर्युक्तो लाञ्छितः यथायोग्यवर्णैः पूरितो रंजितः स्यात् ३ दार्ष्टान्तिके तानुत्पादयति स्वतश्चिदिति परः परमात्मा मायातत्कार्यरहितश्चिदित्युच्यते मायायोगादन्तर्यामी अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति ४

यथा धौतो घट्टितश्च लाञ्छितो रंजितः पटः चिदन्तर्यामी सूत्रात्मा विराडात्मा तथेर्यते २ स्वतः शुभ्रोऽत्र धौतः स्याद्घट्टितोऽन्नविलेपनात् मष्याकारैर्लाञ्छितः स्याद्रंजितो वर्णपूरणात् ३ स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः ४ ब्रह्माद्याः स्तम्बपर्यन्ताः प्राणिनोऽत्र जडा अपि उत्तमाधमभावेन वर्तन्ते पटचित्रवत् ५ चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक्पृथक् चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः ६

ननु परमात्मनश्चित्रपटस्थानीयत्वेन तदाश्रितानि चित्राणि वक्तव्यानि इत्यत आह ब्रह्माद्या इति अत्र परमात्मनि उत्तमाधमभावेन वर्तमाना ब्रह्मादिस्तम्बपर्यन्ताश्चेतनात्मकाः गिरिनद्यादिजडजातं च चित्रस्थानीयमित्यर्थः ५ ब्रह्मादिजगतश्चेतनत्वे कारणं वक्तुं दृष्टान्तमाह चित्रार्पितमनुष्याणामिति यथा चित्रे लिखितानां मनुष्यादिशरीराणामेव नानावर्णोपेता वस्त्रविशेषा लिख्यन्ते नैव शीतादिनिवारकत्वाद्वस्त्राभासा एव ६ दार्ष्टान्तिकमाह पृथगिति ॥

एवं परमात्मनि आरोपितानां देहिनां शरीरिणामेव जीवानामानः चिदाभासाः प्रत्येकं कल्प्यन्ते न पर्वतादीनां तेषां तत्कल्पने कारण
माह बह्वय इति अमी जीवा देवतिर्यङ्मनुष्यादिशरीरप्राप्त्या बहुधा संसरन्ति न परमात्मा तस्य निर्विकारत्वादित्यभिप्रायः ७ ननु
सर्ववादिनो लौकिकाश्चात्मन एव संसार इति वदन्ति तत्र किं कारणमित्याशंक्य अज्ञानमेव कारणमिति सदृष्टान्तमाह वस्त्रेति ८
गिरिनद्यादीनां तु चिदाभासकल्पनाभावं दृष्टान्तपुरस्सरमाह चित्रस्थपर्वतादीनामिति प्रयोजनाभावादिति भावः ९ एवमात्मन्या
रोपितसंसारस्य ज्ञाननिवर्त्यत्वसिद्ध्ये तन्मूलभूतामविद्यामाह संसार इति १० केयं विद्या तल्लाभोपायश्च क इत्याकाङ्क्षायां वि

पृथक् पृथक्चिदाभासाश्चैतन्याध्यस्तदेहिनाम् कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी ७
वस्त्राभासस्थितान्वर्णान्यद्वदाधारवस्त्रगान् वदन्त्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः ८ चित्र
स्थपर्वतादीनां वस्त्राभासो न लिख्यते सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा न हि ९ संसारः
परमार्थोऽयं संलग्नः स्वात्मवस्तुनि इति भ्रान्तिरविद्या स्याद्विद्ययैषा निवर्तते १० आत्माभास
स्य संसारो नात्मवस्तुनः इति बोधो भवेद्विद्या लभ्यतेसौ विचारणात् ११ सदा विचारयेत्त
स्माज्जगज्जीवपरात्मनः जीवभावजगद्भावबाधे स्वात्मैव शिष्यते १२

द्यास्वरूपं तल्लाभोपायं च दर्शयति आत्माभासस्येति ११ आत्माभासस्य चिदाभासस्येत्यर्थः विचाराल्लभ्यते विद्या इत्युक्तं कस्य
विचारादित्याशंक्याह सदा विचारयेदिति १२ ननु परमात्मा विचार्यतां मोक्षावस्थायां फलरूपेणावस्थानात् जीवजगतोर्विचारः
कोपयुज्यत इत्याशंक्य तयोरपवादेन परमात्मावशेषेणोपयुज्यत इत्याह जीवेति ननु विचारेण जीवजगतोर्बाधे तदप्रती
त्या व्यवहारलोपः प्रसज्येतेत्याशंक्य वायशाह विवदन्ति न मर्त्यविपक्षे दोषं चाह ॥

39

नाप्नोतीतीति निद्रासुषुप्तिमूर्छादौ सत एव द्वैतप्रतीत्यभावात्तत्त्वज्ञानं विनैव मुक्तिः स्यादित्यर्थः १३ आत्मैवावशिष्यत इत्यनेनापि प
रमात्मनः सत्यत्वज्ञानमेव विवक्ष्यते न तदतिरिक्तजगद्विस्मृतिर्जीवन्मुक्त्यभावप्रसंगादित्याह परमात्मेति १४ सदा विचारये
दित्युक्त्या देहपातपर्यन्तं विचारप्रसक्तौ सत्यां तस्यावधिमाह परोक्षेति १५ विचारजन्या विद्या परोक्षत्वापरोक्षत्वभेदेन द्वि
धेत्युक्तं तयोरुभयोः स्वरूपं क्रमेण दर्शयति अस्तीति १६ एवं विद्यायाः साक्षात्काराख्यासाधारणकारणमात्मतत्त्वविवेचनं प्रति
जानीते तत्साक्षात्कारेति येन साक्षात्कारेण मुमुक्षुः सद्य एव विमुच्यते तस्य साक्षात्कारस्य सिद्ध्यर्थमिति पूर्वेणान्वयः १७ चिदा

नाप्नोतीति स्वयोर्बोधः किं तु मिथ्यात्वनिश्चयः नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः १३ प
रमात्मावशेषोऽपि तत्सत्यत्वविनिश्चयः न जगद्विस्मृतिर्नो चेज्जीवन्मुक्तिर्न संभवेत् १४ परोक्षा
चापरोक्षेति विद्या द्वेधा विचारजा तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यते १५ अस्ति ब्रह्मेति चेद्वे
द परोक्षज्ञानमेव तत् अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते १६ तत्साक्षात्कारसिद्ध्यर्थमात्मत
त्त्वं विविच्यते येनायं सर्वसंसारात्सद्य एव विमुच्यते १७ कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्वि
धा घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा १८ घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिम्बितः
साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते १९ ॥

त्मनः पारमार्थिकत्वं निश्चेतुं व्यवहारदशायां प्रतीयमानं चैतन्यभेदमुद्दिशति कूटस्थ इति एकस्यापि चितश्चातुर्विध्ये
दृष्टान्तमाह घटाकाशेति १८ घटावच्छिन्नस्य घटाकाशस्य तदनवच्छिन्नस्य महाकाशस्य च प्रसिद्धत्वात्तौ विहायाप्रसि
द्धं जलाकाशं व्युत्पादयति घटावच्छिन्नेति घटावच्छिन्न आकाशे यदुदकमस्ति तत्र जले प्रतिबिम्बितः साभ्रनक्षत्रसहित
आकाशो जलाकाश इत्युच्यते १९ अभ्राकाशं व्युत्पादयति महाकाशस्येति तत्र मेघमण्डले यज्जलं तस्मिन्नित्यर्थः २० ॥

पंच. टी. ६.

ननु मेघजलस्याप्रतीयमानत्वात्तत्र कथं प्रतिबिम्बितत्वज्ञानमित्याशंक्याह मेघांश इति मेघस्थस्य जलस्य प्रत्यक्षेणानुप-
लम्भेऽपि वृष्टिलक्षणकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनुमीयते उदकत्वेनैव लिंगेन विमतं जलमाका-
शप्रतिबिम्बवद्भवितुमर्हति जलत्वाद्घटजलवदित्यनुमानेन मेघांशरूपजलेप्याकाशप्रतिबिम्बसद्भावोवगम्यत इत्यर्थः
२१ एवं दृष्टान्तभूतमाकाशचतुष्टयं व्युत्पाद्य दार्ष्टान्तिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादयति अधिष्ठानतयेति पंचीकृतापंची-
कृतभूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्याधारतया वर्तमानत्वेन तनाभ्यामवच्छिन्नः आत्मा कूटस्थ

महाकाशस्य मध्ये यन्मेघमंडलमीक्ष्यते प्रतिबिम्बतया तत्र मेघाकाशो जले स्थितः २०
मेघांशरूपमुदकं तुषाराकारसंस्थितं तत्र खप्रतिबिम्बोयं नीरत्वादनुमीयते २१ अ-
धिष्ठानतया देहद्वयावच्छिन्नचेतनः कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते २२ कूट-
स्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बकः प्राणानां धारणाज्जीवः संसारेण स युज्यते २३ ज-
लव्योम्ना घटाकाशो यथा सर्वः तिरोहितः तथा जीवेन कूटस्थः सोन्योन्याध्यास उच्यते
२३ ॥

इत्युच्यते तत्र कूटस्थशब्दप्रवृत्तौ निमित्तमाह कूटवन्निर्विकारेणेति २२ एवं कूटस्थं व्युत्पाद्य जीवस्य कूटस्थे कल्पितबुद्धिप्रति-
बिम्बत्वेन तत्स्वरूपातिवाजं व्युत्पादयति कूटस्थ इति तस्य जीवशब्दाभिधेयत्वे निमित्तमाह प्राणानामिति कूटस्थातिरिक्तजी-
वकल्पनमप्रयोजकमित्याशंक्याविकारिणः कूटस्थस्य संसारासंभवात्तन्निर्वाहार्थं सोंगीकर्तव्य इत्याह संसारेणेति २३ ननु जी-
वातिरिक्तः कूटस्थोस्ति चेत्किं इति न प्रतिभासत इत्याशंक्य जीवेनेति तिरोहितत्वादिति सदृष्टान्तमाह नन्वेतन्निरोधानेन क्वापि शा-
स्त्रे प्रतिपादितं इत्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानात् नैवमित्याह सोन्योन्याध्यास इति भाष्यादिष्विति शेषः २३ ॥

नन्वयमेवाध्यासश्चेदस्य कारणरूपाविद्यावक्तव्येत्याशंक्य जीवकूटस्थयोः संसारदशायां भेदाप्रतीतिरेवाविद्येत्याह अय
मिति २५ एवमुक्तस्य जीवस्याविद्याकल्पितत्वस्य स्पष्टीकरणायाविद्यां विभजते विक्षेपेति विक्षेपेति विक्षेपहेतुत्वेनाभ्य
र्हितत्वादावृतिः प्रथमं लक्ष्यते कूटस्थो न भाति न प्रकाशते नास्ति चेति व्यवहारहेतुरावरणमिति २७ नन्वविद्यायास्त
त्कृतावरणस्य च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव एवेत्याह अज्ञानीति विदुषा कूटस्थं जानासीति पृष्टोऽज्ञा
नी तं न जानामीति अज्ञानमनुभूय वदति अयमविद्यानुभवः न केवलमज्ञानानुभवमेव वक्ति अपि तु नास्ति न भाति कूटस्थ इति
कूटस्थाभावाभानेऽपि चानुभूय वक्ति अयमावरणानुभवः अत उभयत्रानुभवः प्रमाणमिति भावः २८ ननु भवन्मतेऽस्या

अयं जीवो न कूटस्थं विविनक्ति कदाचन अनादिरविवेकोऽयं मूलाविद्येति गम्यताम् २५ विक्षेपा
वृतिरूपाभ्यां द्विधाविद्याप्रकल्पिता न भाति नास्ति कूटस्थ इत्यापादनमावृतिः २६ अज्ञानी
विदुषा पृष्टः कूटस्थं न प्रबुध्यते न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि २७ स्वप्रकाशे कुतो
विद्या तां विना कथमावृतिः इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ २८ स्वानुभूताववि
श्वासे तर्कस्याप्यनवस्थितेः कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् २९ ॥

त्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या नोपपद्यते तेजस्तिमिरयोरिव विरुद्धस्वभावत्वेन तयोः सम्बन्धानुपपत्तेः अविद्याभावे तत्कृ
तमावरणं दुर्निरूपं स्यात् तदभावे च तन्मूलकस्य विक्षेपस्यासम्भवः विक्षेपाभावे च ज्ञाननिवर्त्यस्यानर्थस्याभावात् ज्ञा
नवैयर्थ्यं न तत्त्वमसीत्यादेः शास्त्रस्य प्रमाणं स्यादित्याशंक्य तत्सर्वं पूर्वोक्तानुभवबाधितमित्याह स्वप्रकाश इति तर्हि
दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः २८ नन्वनुभवस्योक्ततर्कविरोधेनाभासत्वात्तेन तत्त्वनिश्चय इत्याशंक्यानुभवप्रा
माण्यानभ्युपगमे केवलतर्कस्यानिश्चायकस्य स्वेनैवाभ्युपगतत्वात्तार्किकस्य तत्त्वनिश्चयः क्वापि स्यादित्यत आह स्वानुभू

नन्वनुभवस्तत्त्वनिश्चायक एव तथाप्यनुभूयमानस्यार्थस्य सम्भावितत्वज्ञानाय तर्कोऽप्यपेक्षितव्य इत्याशंक्याभ्यनुज्ञाय तर्कस्यानुभवानु-
सारेण तर्को वर्णनीयो न तद्विरोधेनेत्याह ऊहापोहायेति ३० कोसावनुभवो यदनुसारेण तर्को वर्णनीय इत्याकांक्षायां पूर्वोक्तम-
विद्यादिगोचरमनुभवं स्मारयति स्वानुभूतिरिति फलितमाह अत इति ३१ तमेव तर्कमभिनीय दर्शयति न चेदिति अविद्याव-
रणस्थापकत्वेनास्यैव तद्विरोधित्वे विद्याप्रतीतिरेव न स्यादिति भावः तर्ह्यविद्यायाः को विरोधीत्यत आह विवेकस्त्विति विवे-
क उपनिषद्विचारजन्यं ज्ञानं विवेकस्याविद्याविरोधित्वं क्व दृष्टमित्यत आह तत्त्वज्ञानिनीति ३२ एवमविद्यावरणं दर्शयित्वा

ऊहापोहाय तर्कश्चेदपेक्षेत तथा सति स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यताम् ३० स्वा-
नुभूतिरविद्यायां माहात्म्ये च प्रदर्शिता अतः कूटस्थचैतन्यमविरोधीति तर्क्यताम् ३१ न चेद्वि-
रोधि केनेयमावृतिर्ह्यनुभूयताम् विवेकस्तु विरोध्यस्यास्तत्त्वज्ञानिनि दृश्यताम् ३२ अवि-
द्यावृतकूटस्थे देहद्वययुता चितिः शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि ३३ इदमं-
शस्य सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते स्वयंत्वं वस्तुता चैवं विक्षेपे वीक्ष्यतेऽन्यगम् ३४ नीलपृष्ठ-
त्रिकोणत्वं यथा शुक्तौ तिरोहितम् असंगानन्दताद्येवं कूटस्थेऽपि तिरोहितम् ३५

विक्षेपाध्यासमाह अविद्यावृतेति पूर्वोक्ताविद्यावरणवति कूटस्थे अन्यगामन्यारोपितस्थूलसूक्ष्मशरीरसहिता चिदाभासो
विक्षेपाध्यास इत्यर्थः ३३ अस्य विक्षेपस्याध्यासत्वसिद्धये शुक्तिरजताध्याससाम्यं दर्शयति इदमंशस्येति शुक्तिकायां स्थितं
पुरोदेशादिसम्बन्धित्वमबाधितत्वं च यथारोपिते रजतेऽवभासते एवं स्वयंत्वं वस्तुत्वं कूटस्थनिष्ठमारोपिते चिदाभासेऽवभा-
सत इत्यर्थः ३४ एवं सामान्यांशप्रतीतिमुभयत्र प्रदर्श्य विशेषाप्रतीतिसाम्यं दर्शयति नीलपृष्ठत्रिकोणत्वमिति ३५ ॥

५१

सामान्यांशं दर्शयति आरोपितस्येति दृष्टान्ते शुक्तिस्थले आरोपितपदार्थस्य रूप्यं नाम रूप्यमिति नाम यथा एवं कूटस्थे कल्पितचिदा भासरूपविक्षेपस्याहंकारस्याहमिति नामेत्यर्थः ३६ ननु दृष्टान्ते पुरोवर्तिनि शुक्तिशकले इन्द्रियसन्निकर्षे जाते सति रूप्यमिदमिति तदतिरिक्तरजताभिमान उपपद्यते नैवं दार्ष्टान्तिके स्वात्मातिरिक्तवस्त्वभिमान इत्याशंक्य तत्रापि स्वप्रकाशतया चिदात्मन्यव भासमानेन तदतिरिक्ताभिमान उपलभ्यते अतो न वैषम्यं इत्यभिप्रायेणाह इदमिति ३७ ननु स्वयमहंशब्दयोः एकार्थत्वात्कथं दृष्टान्तदार्ष्टान्तिकयोः साम्यमित्याशंक्येदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्योभयत्र साम्यान्नैव

आरोपितस्य दृष्टान्ते रूप्यं नाम यथा तथा कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः ३६ इदमंशः स्वतः पश्यन् रूप्यमित्यभिमन्यते तथा स्वत्वं स्वतः पश्यन्नहमित्यभिमन्यते ३७ इदंत्वरूपते भिन्ने स्वत्वाहन्ते तथेष्यताम् सामान्यं च विशेषश्च उभयत्रापि गम्यते ३८ देवदत्तः स्वयं गच्छेत्त्वं वीक्षस्व स्वयं तथा अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते ३९ इदं रूप्यमिदं वस्त्रमिति यद्वदिदं तथा असौ त्वमहमित्येषु स्वयमित्यभिमन्यते ४० अहंत्वाद्भिद्यतां स्वत्वं कूटस्थे तेन किं तव स्वयंशब्दार्थ एवैष कूटस्थ इति मे भवेत् ४१ ॥

मित्याह इदंत्वेति तेन स्वयमहंशब्दयोर्नैकार्थत्वमित्यर्थः ३८ स्वयंशब्दार्थस्य सामान्यरूपत्वं स्पष्टीकर्तुं लौकिकप्रयोगं तावद्दर्शयति देवदत्त स्वयमिति ३९ भवेत्वेवं प्रयोगो लोके कथमेतावता स्वयंशब्दार्थस्य सामान्यरूपत्वमित्याशंक्येदंशब्दार्थवदित्याह इदं रूप्यमिति यथा रूप्यवस्त्रादौ सर्वत्रेदंशब्दस्य प्रयुज्यमानत्वात्तदर्थस्य सामान्यरूपत्वं तथाऽसौ त्वमहमित्यादौ सर्वत्र स्वयंशब्दप्रयोगात्तदर्थस्यापि सामान्यरूपत्वमभिमन्यते इत्यर्थः ४० ॥ ४१ ॥

भवतु स्वयमहंशब्दार्थयो लोके भेदः एतावता कूटस्थे आत्मनि किमायातमिति पृच्छति अहमिति सामान्यरूपः स्वयंशब्दार्थ एव कूटस्थ इतीदमायातमित्याह स्वयमिति ५१ ननु स्वशब्दोऽयमात्मनोऽन्यत्वं निवारयति न कूटस्थत्वं बोधयतीति शङ्कते अन्यत्ववारकमिति स्वयंशब्दार्थस्य कूटस्थस्यैवात्मत्वात्स्वत्वेनान्यवारणमिष्टमेवेति परिहरति अन्यवारणं कूटस्थस्येति ५२ ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिवैकार्थत्वाभावात्कथं स्वयंशब्दार्थस्य कूटस्थस्यात्मत्वमित्याशङ्क्य हस्तकरादिशब्दवदेकार्थत्वोपपत्तेर्मैवमिति परिहरति स्वयमात्मेति पर्यायत्वे सहप्रयोगाभावं हेतुमाह तेन लोक इति फलितमाह अतः स्व

अन्यत्ववारकं स्वत्वमिति चेदन्यवारणम् कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत् ५२ स्वयमात्मेति पर्यायौ तेन लोके तयोः सह प्रयोगो नास्त्यतः स्वत्वमात्मत्वं चान्यवारकम् ५३ घटः स्वयं न जानातीत्येवं स्वत्वं घटादिषु अचेतनेष्वपि दृष्टं चेद्दृश्यतामात्मतत्त्वतः ५४ चेतनाचेतनभिदा कूटस्थात्मकृता न हि किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम् ५५ यथा चेतन आभासः कूटस्थे भ्रान्तिकल्पितः अचेतनो घटादिश्च तथा तत्रैव कल्पितः ५६ ॥

त्वमिति ५३ ननु घटादिष्वचेतनेष्वपि स्वयंशब्दस्य प्रयोगदर्शनात्स्वयंत्वात्मत्वयोरेकत्वं न घटत इति शङ्कते घट इति घटादिष्वपि स्फुरणरूपेणात्मचैतन्यस्य सत्त्वात्तेष्वपि स्वयंशब्दप्रयोगो न विरुध्यत इत्याह दृश्यतामिति ५४ ननु घटादिष्वप्यात्मचैतन्यस्य सत्त्वे चेतनाचेतनविभागो निर्निमित्तकः स्यादित्याशङ्क्य चेतनाचेतनविभागस्य चिदाभाससत्त्वासत्त्वलक्षणकारणसद्भावान्नैवमिति परिहरति चेतनाचेतनेति ५५ चेतनाचेतनविभागस्य चिदाभाससत्त्वासत्त्वप्रयुक्तत्वाभ्युपगमे चेतनेष्वात्मसत्त्वाभ्युपगमो निष्प्रयोजनः स्यादित्याशङ्क्य चेतनाचेतनविभागहेतुत्वेन कूटस्थानभ्युपगमत्वेऽपि अचेतनकल्पनाधिष्ठानत्वेन कूटस्थोऽभ्युपगन्तव्य इत्यभिप्रा

स्वात्मत्वयोरेकत्वेति प्रसंगं शंकते तत्तेदंते इति त्वमहमादिषु सर्वत्रानुगतस्य त्वत्वस्येव सर्वत्रानुगतयोस्तत्तेदन्तयोरप्यात्मत्वरूप
तां किं न स्यादिति भावः ४७ तत्तेदन्तयोरात्मत्वाधिकवृत्तित्वादात्मत्वं न सम्भवतीत्याह नेइति तत्तेदन्ते त्वत्वमिव यद्यपि त्वमहमादि
ष्वनुगते तथापि त्वमहमादिष्वनुवर्तमाने आत्मत्वेप्यनुगमे तदात्मत्वमिदमात्मत्वमित्यादिव्यवहारासम्भवादतस्तयोरात्मत्वाधि
कवृत्तित्वादात्मरूपता न सम्भाव्यते तत्र दृष्टान्तः सम्यक्त्वादेरिति आत्मत्वं सम्यगात्मत्वमसम्यगिति व्यवहारवश्यादात्मत्वेप्यनु
वर्तमानयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः ४८ एवं प्रासंगिकं परिसमाप्य फलितप्रदर्शनाय लोकव्यवहारसिद्धमर्थमनुवद

तत्तेदंते अपि त्वत्वमिव त्वमहमादिषु सर्वत्रानुगते ते न तयोरप्यात्मतेति चेत् ४७ ते आ
त्मत्वेप्यनुगते तत्तेदन्ते न ततस्तयोः आत्मत्वं नैव सम्भाव्यं सम्यक्त्वादेर्यथा तथा ४८ तत्तेद
न्ते स्वतात्मत्वे त्वत्ताहन्ते परस्परं प्रतिद्वन्द्वितया लोके प्रसिद्धे नास्ति संशयः ४९ अन्यतायाः
प्रतिद्वन्द्वी स्वयं कूटस्थ इष्यते त्वत्तायाः प्रतियोग्येषोऽहमित्यात्मनि कल्पितः ५० अहन्तास्व
त्वयोर्भेदेऽप्यतेदन्तयोरिव स्पष्टेपि मोहमापन्ना एकत्वं प्रतिपेदिरे ५१ ॥

ति तत्तेदमिति तत्ताप्रतियोगित्वमिदन्तायास्तदिदमिति स्वत्वाप्रतियोगित्वमन्यत्वस्य स्वयमन्य इति त्वत्ताप्रतियोगित्वमहन्तायाः
त्वमहमिति लोके प्रतिद्वन्द्वित्वेन प्रयोगदर्शनात्प्रसिद्धमिति भावः ४९ भवत्वेवं लोके प्रकृते किमायातमित्यत आह अन्यताया
इति अन्यत्वप्रतियोगी स्वयंशब्दार्थः त्वत्ताप्रतियोग्यहंशब्दार्थश्चिदाभासः कूटस्थे कल्पित इत्यर्थः ५० तदुक्तप्रकारेण जी
वकूटस्थयोर्भेदे सत्यपि सर्वे इत्थं किमिति न जानन्तीत्याशंक्याह अहन्तेति बुद्धिसाक्षिणः कूटस्थस्य बुद्ध्या प्रत्यक्षीकर्तु
मशक्यत्वादहं स्वयमिति प्रतिभासमानयोर्जीवकूटस्थयोर्भ्रान्त्यैकत्वं प्रतिपन्ना इत्यर्थः ५१ ॥

नन्वस्य जीवकूटस्थयोरेकत्वभ्रमस्य किं कारणमित्यपेक्षायामाह तादात्म्याध्यास इति अस्मिन् ग्रन्थेनादिश्लोके विवेकोयमित्यत्रोक्तयाविद्ययेत्य
र्थः यतोविद्याकार्यत्वमस्यातोविद्यानिवर्त्तकज्ञानेनैव तन्निवृत्तिरित्याह अविद्यायामिति ५२ नन्वध्यासस्याविद्याकार्यत्वात्तन्निवृ
त्तौ निवृत्तिरित्येतदनुपपन्नं ब्रह्मात्मैकत्वविद्यायामुत्पन्नायामप्यविद्याकार्यस्य देहादेरुपलभ्यमानत्वादित्यत आह अविद्येति
अविद्यैककारणयोरावृतितादात्म्ययोर्विद्ययैव विनिवृत्तिः कर्मसहिताविद्याजन्यस्य तु विक्षेपस्वरूपस्य कर्मावसानपर्यन्तमव
स्थानमित्यविरोध इति भावः ५३ ननु प्रारब्धकर्मणो निमित्तमात्रत्वात्तत्क्षयमात्रेणोपादाने विनष्टेपि कथं कार्यानुवृत्तिरि

तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः अविद्यायां निवृत्तायां तत्कार्यं विनिवर्त्तते ५२
अविद्यावृतितादात्म्ये विद्ययैव विनश्यतः विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ५३ उपा
दाने विनष्टेपि क्षणं कार्यं प्रतीक्षते इत्याहुस्तार्किकास्तद्वदस्माकं किं न सम्भवेत् ५४ त
न्तूनां दिनसंख्यानां तैस्तादृक्क्षण ईरितः भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यतां ५५
विना क्षोदक्षमं मानं तैर्वृथा परिकल्प्यते श्रुतियुक्त्यनुभूतिभ्यो वदतां किं नु दुःशकम् ५६

त्याशंक्य शास्त्रान्तरसिद्धदृष्टान्तेन तदनुवृत्तिं सम्भावयति उपादान इति ५४ ननु तार्किकैः कार्यस्य क्षणमात्रमवस्थानमंगी
कृतं न चिरकालमित्याशंक्याह तन्तूनामिति संसारस्यानादिकालमारभ्यानुवृत्तत्वात्तत्संस्कारवशेन कुलालचक्रभ्रमवच्चि
रकालानुवृत्तिर्न विरुध्यत इति भावः ५५ ननु तार्किकैर्यथायुक्तमभिहितं न तद्भवतापीत्याशंक्य तोक्तौ तयोर्वैषम्यं दर्शयति
विनाक्षोदक्षममिति क्षोदक्षमं विचारसहं मानं विना प्रमाणमन्तरेणेत्यर्थः तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति
इतिश्रुतिः स्रक्भ्रमादिदृष्टान्तो युक्तिरनुभूतिर्विद्वदनुभव एव एतेभ्यः प्रमाणेभ्यः किं वक्तुमशक्यमित्यभिप्रायः ५६ ॥

प्रकृतमनुसरति आस्तामिति दुस्तार्किकैरिति स्वयमहंशब्दार्थयोः कूटस्थपरिणामिनोरेकत्वं भ्रान्त्या सिद्धम् ५७ ननु कूटस्थजीवयोरेकत्वं भ्रा-
न्तिसिद्धं चेदिदं भ्रान्तमिति केऽपि कुतो न जानन्तीत्याशंक्य श्रुतितात्पर्यालोचनशून्यत्वादित्याह भ्राम्यन्त इति ५८ ननु श्रुत्यर्थप्रवक्तारोऽपि
केचिदित्थं कुतो न जानन्तीत्याशंक्य तेषां साकल्येन श्रुत्यर्थपर्यालोचनाभावादित्याह पूर्वापरेति ५९ तत्र तावत्प्रत्यक्षैकप्रमाणाभ्यु-
पगमेनातिस्थूलत्वाल्लोकायतादिपक्षं प्रथमतोऽनुभावयन्ते कूटस्थादीति प्रत्यक्षसिद्धत्वेन देहादेरात्मत्वं पारमार्थिकं स्यादित्याशं-
क्याह प्रत्यक्षाभासमिति ६० तेषु प्रत्यक्षैकवादिनोऽपि परव्यामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमुदाहरन्तीत्याह श्रौती-

आस्तां दुस्तार्किकैः साकं विवादः प्रकृतं ब्रुवे स्वाहमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ५७ भ्राम्य-
न्ते पण्डितंमन्याः सर्वे लौकिकतार्किकाः अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमाश्रिताः ५८ पूर्वाप-
रपरामर्शविकलास्तत्र केचन वाक्याभासान्स्वस्वपक्षे योजयन्त्यप्यलज्जया ५९ कूटस्थादिश-
रीरान्तसंघातस्यात्मतां जगुः लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः ६० श्रौतीकर्तृत्वस्व-
पक्षेऽनेकाः कोशमन्नमयं तथा विरोचनस्य सिद्धान्तं प्रमाणं प्रतिजज्ञिरे ६१ जीवात्मनिर्गमे देहमर-
णस्यात्र दर्शनात् देहातिरिक्त एवात्मेत्याहुर्लौकायताः परे ६२ प्रत्यक्षत्वेनाभिमताहंधीर्देहा-
तिरेकिणं गमयेदिन्द्रियात्मानं वच्मीत्यादिप्रयोगतः ६३ ॥

कर्तृत्वमिति कोशमन्नमयमिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोऽन्नरसमय इत्यादिवाक्यं लक्ष्यते विरोचनस्य सिद्धान्तमिति
तत्सिद्धान्तप्रतिपादकमात्मैवेत्यादिवाक्यं लक्ष्यते एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानन्त एवमन्तूपपादयितुं क्षमाः प्रकरणविरोधा-
दिति भावः ६१ अस्मिन्मते दोषप्रदर्शनपुरस्सरं मतान्तरमुत्थापयति जीवात्मेति कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत
इत्याकांक्षायामाह प्रत्यक्षत्वेनेति अहं वच्मि अहं पश्यामीत्यादिप्रयोगदर्शनाद्देहातिरिक्ताहं बुद्धिगम्यानीन्द्रियाण्यात्मेत्यर्थः ६३

न त्विंद्रियाणामचेतनानां कथमात्मत्वमित्याशंक्य श्रुतिषु इंद्रियसंवादश्रवणाच्चेतनत्वमसिद्धमित्याह वागादीनामिति चेतनत्वस्यै वात्मलक्षणत्वाच्चेतनानामिंद्रियाणामात्मत्वमुचितमित्याह आत्मत्वमिति ६४ मतान्तरमुत्थापयति हैरण्यगर्भा इति ६५ प्राणस्या त्मत्वे प्रोक्तलिंगानि निदर्शयति प्राण इति ६६ प्राणाग्नय एतस्मिन्पुरे जाग्रतीत्यादिना प्राणजागरणं श्रूयते तस्मात्प्राणे प्रपन्ने उदति ष्ठत्तदु कस्य मभवत्तदेतदु कस्यमिति प्राणश्रैष्ठ्यादिकं श्रूयते अन्योऽन्तर आत्मा प्राणमय इत्यादिना प्राणमयकोशः प्रपंचितः

वागादीनामिंद्रियाणां कलहः श्रुतिषु श्रुतः तेन चैतन्यमेतेषामात्मत्वं तत एव हि ६४ हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे हि जीवति ६५ प्राणो जागर्ति सुप्तेऽपि प्राणश्रैष्ठ्यादिकं श्रुतं कोशः प्राणमयः सम्यग्विस्तरेण प्रपंचितः ६६ मन आत्मेति मन्यन्त उपासनपरा जनाः प्राणस्याभोक्तृतास्पष्टा भोक्तृत्वं मनसः श्रुतं ६७ मन एव मनुष्याणां कारणं बन्धमोक्षयोः श्रुतो मनोमयः कोशस्तेनात्मेतीरितं मनः ६८ विज्ञानमात्मेति परे आहुः क्षणिकवादिनः यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटं ६९ अहंवृत्तिरिदंवृत्तिरित्यन्तःकरणं द्विधा विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत् ७० ॥

आदिशब्देन प्राणसंवादे श्रैष्ठ्यादिकं ग्राह्यम् ६६ प्राणादप्यान्तरस्य मनस आत्मत्ववादिनो मतं दर्शयति मन आत्मेति प्राणस्यानात्मत्वे युक्तिमाह प्राणस्येति ६७ मनस आत्मत्वे युक्तिप्रतिपादिकां श्रुतिमाह मन एवेति तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमय इति श्रुत्यन्तरं दर्शयति श्रुत इति फलितमाह तेनेति ६८ मनसोऽप्यान्तरस्य विज्ञानस्यात्मत्ववादिनो बौद्धस्य मतं दर्शयति विज्ञानमिति विज्ञानस्यान्तरत्वे फलितमाह यत इति ६९ विज्ञानमनःशब्दवाच्यस्यान्तःकरणस्यैकत्वात्कथं मनोविज्ञानयोः कार्यकारणभाव इत्याशंक्य तमुपपादयितुं तयोर्भेदं तावद्दर्शयति अहंवृत्तिरिति ७० ॥

तयोः कार्यकारणभावमाह अहंप्रत्ययेति तदेवोपपादयति अविदित्वेति अहंवृत्त्युदयाभावे इदंवृत्त्युदयादनयोः कार्यकारणभाव इत्यर्थः ७१ तस्य विज्ञानस्य क्षणिकत्वेनुभवं प्रमाणयति क्षणे क्षण इति क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति स्वप्रकाशमिति स्वेनैव प्रमितत्वादित्यर्थः ७२ विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह विज्ञानमयेति तस्माद्वा एतस्मादात्मनोन्योन्तर आत्मा विज्ञानमयः विज्ञानं यज्ञं तनुत इत्यादिवाक्यं विज्ञानस्यात्मत्वप्रतिपादकमिति भावः ७३ बौद्धावान्तरभेदस्य शून्यवादिनो मतं दर्शयति विज्ञानमिति ७४ तत्र युक्तिमाह असदेवेदमिति शून्यस्यैव तद्रूपत्वेन प्रतीयमानस्य जगतः कारणतेरित्यत

अहंप्रत्ययबीजत्वमिदंवृत्तेरपि स्फुटम् अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित् ७१ क्षणे क्षणे जन्मनाशावहंवृत्तेर्मितौ यतः विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः ७२ विज्ञानमयकोशोयं जीव इत्यागमा जगुः सर्वः संसार एतस्य जन्मनाशसुखात्मकः ७३ विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत् अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः ७४ असदेवेदमित्यादाविदमेव श्रुतं ततः ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रान्तिप्रकल्पितं ७५ निरधिष्ठानविभ्रान्तेरभावादात्मनोस्तिता शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ७६ अन्यो विज्ञानमयत आनन्दमय आन्तरः अस्तीत्येवोप-
लब्धव्य इति वैदिकदर्शने ७७ ॥

आह ज्ञानेति ७५ तदेतन्मतं दूषयति निरधिष्ठानेति निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेर्जगत्कल्पनाधिष्ठानस्यात्मनः सत्ताभ्युपगन्तव्या किंच शून्यवादिनापि शून्यसाक्षित्वेनावश्यमात्माभ्युपगन्तव्यः अन्यथा तस्यानभ्युपगमे स्वशून्यस्योक्तिः शून्यमित्यभिधानेनैवोपस्यतवमतेन सिद्धेरिति भावः ७६ कस्तर्ह्यात्मेत्यत आह अन्य इति तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर आत्मानन्दमयः अस्तीत्येवोपलब्धव्यस्तत्त्वभावेनेति च श्रुतिसद्भावादानन्दमयः आत्माभ्युपगन्तव्य इति वै

एवमात्मस्वरूपे विप्रतिपत्तिं प्रदर्श्य तत्परिमाणविशेषेऽपि वादिविप्रतिपत्तिं दर्शयति अणुरिति ७८ अणुत्ववादिनस्तावद्दर्शयति अणु-
मिति अणुत्वाभिधाने हेतुमाह सूक्ष्मेति तदुपपादयति रोम्ण इति नाडीष्विति शेषः सूक्ष्मासु नाडीषु संचारोऽणुत्वमन्तरेण न घटत
इत्यभिप्रायः ७९ अणुत्वे किं प्रमाणमित्यत आह अणोरिति अणोरणीयान्महतो महीयानित्येषोऽणुरात्मा चेतसा वेदितव्यः सूक्ष्मात्सूक्ष्म-
तरं नित्यमित्यादिश्रुतय इत्यर्थः ८० श्रुत्यन्तरमुदाहरति बालाग्रेति ८१ मध्यमपरिमाणवादिनो दर्शयति दिगम्बरा इति तत्रो-

अणुर्महान्मध्यमो वेत्येवं तत्रापि वादिनः बहुधा विवदन्ते हि श्रुतियुक्तिसमाश्रयात् ७८ अ-
णुं वदन्त्यान्तरालाः सूक्ष्मनाडीप्रचारतः रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययं ७९ अणो-
रणीयानेषोऽणुः सूक्ष्मात्सूक्ष्मतरं त्विति अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः ८० बाला-
ग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेय इति चाह परा श्रुतिः ८१ दिगम्ब-
रा मध्यमत्वमाहुरापादमस्तकं चैतन्यव्याप्तिसन्दृष्टेरानखाग्रश्रुतेरपि ८२ सूक्ष्मनाडीप्रचा-
रस्तु सूक्ष्मैरवयवैर्भवेत् स्थूलदेहस्य हस्ताभ्यां कञ्चुकप्रतिवेशवत् ८३ न्यूनाधिकशरीरे-
षु प्रवेशोऽपि गमागमैः आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं ८४ ॥

पपत्तिमाह आपादेति स एष इह प्रविष्ट आनखाग्रेभ्य इति श्रुतिरत्र प्रमाणमित्याह आनखाग्रेति ८२ ननु मध्यमपरिमा-
णत्वे श्रुतिसिद्धो नाडीप्रचारो न घटत इत्याशङ्क्याह सूक्ष्मनाडीति यथा देहावयवयोर्हस्तयोः कञ्चुकप्रतिवेशेन देहस्य कं-
चुकप्रवेशस्तद्वदात्मावयवानां सूक्ष्माणां नाडीषु प्रचारेणात्मनोऽपि प्रचार उपचर्यत इत्यर्थः ८३ नन्वात्मनो नियतमध्यमप-
रिमाणत्वे कथमेवं न्यूनाधिकशरीरप्रवेशोऽपि न घटत इत्याशङ्क्यावयवागमापायाभ्यामात्मनो नियतमध्यमपरि-
माणत्वाद्देहवदुभयं न विरुध्यत इत्याह न्यूनाधिकेति फलितमाह तेनेति ८४ ॥

आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगे नैनं दूषयति सांशश्चेदिति भवतु को दोषस्तत्राह तथा सतीति कृतयोः पुण्यपापयोर्भोगम
न्तरेण नाशः अकृतयोः कस्मात्फलदातृत्वमकृताभ्यागमः एतद्दोषद्वयमात्मनोऽनित्यत्वाभ्युपगमे भवेदिति भावः ८५ अतः पारिशे
ष्यादात्मनो विभुत्वं सिद्धमित्याह तस्मादिति तत्र प्रमाणमाह आकाशवदिति आकाशवत्सर्वगतश्च नित्यः निष्कलं निष्क्रियं मि
त्याद्यागमप्रमाणमित्यर्थः ८६ एवमात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्शयति इत्युक्तेति ८७
अचिद्रूपत्ववादिनो दर्शयति प्राभाकरा इति तत्प्रक्रियामनुभाषते आकाशवद्द्रव्यमिति आत्मा द्रव्यं भवितुमर्हति गुणवत्त्वादा

सांशश्चेद्घटवन्नाशो भवत्येव तथा सति कृतनाशाकृताभ्यागमयोः को वारको भवेत् ८५ तस्मा
दात्मा महानेव नैवाणुर्नापि मध्यमः आकाशवत्सर्वगतो निरंशः श्रुतिसम्मतः ८६ इत्युक्त्वा त
द्विशेषे तु बहुधा कलहं ययुः अचिद्रूपोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि ८७ प्राभाकरास्तार्किका
श्च प्राहुरस्याचिदात्मताम् आकाशवद्द्रव्यमात्मा शब्दवत्तद्गुणश्चितिः ८८ इच्छाद्वेषप्रयत्नाश्च
धर्माधर्मौ सुखासुखे तत्संस्काराश्च तस्यैते गुणाश्चितिवदीरिताः ८९ आत्मनो मनसा योगे स्वा
दृष्टवशतो गुणाः जायन्तेऽथ प्रलीयन्ते सुषुप्तेऽदृष्टसंक्षयात् ९० चितिमत्त्वाच्चेतनोऽयमि
च्छाद्वेषप्रयत्नवान् स्याद्धर्माधर्मयोः कर्ता भोक्ता दुःखादिमत्त्वतः ९१ ॥

काशवदित्यनुमानं सूचितं आत्मनः पृथिव्यादिभ्यो भेदस्य साधकं विशेषगुणं दर्शयति शब्दवदिति आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञा
नगुणत्वात् यत्पृथिव्यादिभ्यो न भिद्यते तज्ज्ञानगुणकमपि न भवति यथा पृथिव्यादीत्यनुमानं द्रष्टव्यम् ८८ तस्यैव विशेषगुणान्तरा
ण्याह इच्छेति तत्संस्कारा भावनाः ८९ एषां गुणानामुत्पत्तिविनाशकारणमाह आत्मन इति स्वादृष्टवशत आत्मनो मनसा योग इत्य
न्वयः ९० आत्मनोऽचिद्रूपत्वे कथं चेतनत्वाभ्युपगम इत्याशंक्य चितिमत्त्वादित्याह चितिमत्त्वादिति आत्मनश्चेतनत्वे हेत्वन्तरमाह इ

च्छेति तस्येश्वराद्वैलक्षण्यमाह स्यादिति ९१ ॥

नन्वात्मनोविभुत्वेलोकान्तरगमनादिकंकथंघटतेइत्याशंक्याहस्मिन्देहेकर्मवशादिछाद्युत्पत्तौसत्यामत्रात्मनोवस्थानादिव्यवहार
इवकर्मवशाल्लोकान्तरेदेहान्तरोत्पत्तौतदवच्छिन्नात्मप्रदेशेसुखाद्युत्पत्तिवशात्तत्रात्मनोगमनादिव्यवहार इत्यौपचारिकमा
त्मनोगमनादिकमित्यभिप्रेत्याह यथात्रकर्मवशतइति ५२ आत्मनःकर्तृत्वादिधर्मवत्वे किंप्रमाणमित्यत आह कर्मकाण्डइ
ति ५३ नन्वन्योविज्ञानमयतआनन्दमय आन्तरइत्यत्रानन्दमयस्यात्मत्वमुक्तमिदानीमिछादिमान्यःप्रतिपाद्यतेततःपू
र्वोत्तरविरोधइत्याशंक्याह आनन्दमयइति सुषुप्तावस्पष्टचिद्यआनन्दमयकोशःपरिशिष्यते सपूर्वकोशःस्रौतेभपंचको

यथात्रकर्मवशतःकादाचित्कंसुखादिकं तथालोकान्तरेदेहेकर्मणेछादिजन्यते ५२ एवं
चसर्वगस्यापिसंभवेतांगमागमौ कर्मकाण्डःसमग्रोत्रप्रमाणमितितेवदन् ५३ आन
न्दमयकोशोयःसुषुप्तौपरिशिष्यते अस्पष्टचित्सआत्मैषांपूर्वकोशोस्यतेगुणाः ५४ गू
ढंचैतन्यमुत्प्रेक्ष्यजडबोधस्वरूपतां आत्मनोब्रुवतेभाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः ५५ ज
डोभूत्वातदास्वाप्समितिजाड्यस्मृतिस्तदा विनाजाड्यानुभूतिंनकथंचिदुपपद्यते ५६ ॥

शोस्यप्रथमपक्षेषांप्राभाकरादीनामात्माअस्यात्मनस्तेपूर्वोक्ताज्ञानादयोगुणाइत्यर्थः ५४ अस्यैवात्मनश्चिदचिद्रूपत्वंभाट्टावर्ण
यन्तीत्याह गूढमितिभाट्टाआत्मनोगूढमस्पष्टंचैतन्यमुत्प्रेक्ष्यऊहित्वाचिज्जडोभयात्मकत्वंवर्णयन्ति चैतन्योत्प्रेक्षायांका
रणमाह चिदुत्प्रेक्षेति उत्थितस्मृतेश्चिदुत्प्रेक्षाभवतीतियोजनासुप्तेरुत्थितस्यजायमानात्स्मरणात्सोपिचैतन्योत्प्रेक्षाभव
तीत्यर्थः ५५ चिदुत्प्रेक्षाप्रकारमेवस्पष्टयति जडोभूत्वेतितदासुषुप्तिकालेजडोभूत्वास्वाप्समित्येवंरूपाजाड्यस्मृतिरुत्थितस्यपुरु
षस्यजायमानासुषुप्तिकालीनजाड्यानुभवमन्तरेणानुपपद्यमाना तदानीन्तनजाड्यानुभवंकल्पयतीतिभावः ५६ ॥

स्तधर्मौ चैतन्यलोपाभावे प्रमाणमाह दृष्टेरिति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादित्यादिश्रुतेस्तद्धर्मौ चैतन्यलोपाभावः श्रू
यते ततोऽपि कारणादयमात्माऽद्वयोऽनवद्यः स्फुरणास्फुरणाभ्यां युक्तो भवतीत्यर्थः ५७ अस्मिन्नात्मनि तद्बाधाभिधानपुरःसरं सांख्यमतमुत्था
पयति तिरश्चास्येति ५८ ज्ञानस्य नित्यत्वे हि कामनादि किमित्याशंक्याह ज्ञाज्ञांशा इति तत्प्रकृतिरूपं सत्त्वरजस्तमोगुणात्मकं प्रकृतिकल्पनायां प्रयोज
नमाह चित इति चितः पुरुषस्येति यावत् ५९ ननु चितोऽसंगत्वे न प्रकृतिपुरुषयोरत्यन्तविविक्तत्वात्प्रकृतिप्रवृत्त्या कथं भोगापवर्गौ वि
त्याशंक्य तयोरविवेकस्याग्रहणात्पुरुषे भोगापवर्गौ व्यवह्रियेते इत्याह असंगाया इति तार्किकादिभिरिव सांख्यैरात्मभेदोऽङ्गीक्रियत

दृष्टेर्द्रष्टेर्न लोपश्च श्रुतः स्वधर्मौ ततस्त्वयं प्रकाशाप्रकाशाभ्यामात्माऽद्वयोऽनवद्युतः ५७ ति
रश्चास्योभयात्मत्वं न कथं विहृद्दिष्यते तेन चिद्रूप एवात्मेत्याहुः सांख्या विवेकिनः ५८ ज्ञा
ज्ञांशाः प्रकृते रूपं विकारि त्रिगुणं च तत् चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्तते ५९ असं
गायाश्चितेर्बन्धमोक्षौ भेदाग्रहान्मतौ बन्धमोक्षव्यवस्थार्थं पूर्वेषामिव चिद्भिदा ६० महतः
परमव्यक्तमिति प्रकृतिरुच्यते श्रुतावसंगतानां तदसंगो हीत्यतः श्रुता ६१ चित्सान्निध्यात्प्रवृ
त्तायाः प्रकृतेर्हि नियामकं ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः श्रुतः ६२ प्रधानक्षेत्रज्ञपति
र्गुणेश इति हि श्रुतिः आरण्यके सम्भ्रमेण ह्यन्तर्यामी उपपादितः ६३ ॥

इत्याह बन्धमुक्तीति ६० प्रकृतिसद्भावे पुरुषस्यासंगत्वे च श्रुतिमुदाहरति महत इति ६१ एवं जीवविषयां वादिविप्रतिपत्तिं प्रदर्श्येश्व
रविषयां तां प्रदर्शयितुमीश्वरस्वरूपं तावत्स्थापयति चित्सान्निध्यादिति ननु प्रकृतिपुरुषातिरिक्ते ईश्वरकल्पने प्रमाणमित्याशंक्याह
स जीवेभ्य इति ६२ तामेवेश्वरप्रतिपादिकां श्रुतिं पठति प्रधानेति प्रधानं गुणसाम्यावस्थारूपं क्षेत्रज्ञा जीवास्तेषां पतिः गुणाः सत्त्वा
दयस्तेषामीशो नियामक इत्यर्थः न केवलमियमेव श्रुतिरीश्वरप्रतिपादिका अन्तर्यामिब्राह्मणमपीत्याह आरण्यक इति ६३ ॥

47

तामेव वादिविप्रतिपत्तिं प्रतिजानीते अत्रापीति प्रज्ञामनतिक्रम्य यथाप्रज्ञं १४ इदानीं पतंजलिनोक्तमीश्वरप्रतिपादकं क्लेशकर्मवि
पाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतत्सूत्रमर्थतः पठति क्लेशेति क्लेशा अविद्यादयः कर्माणि कर्माशुक्लाकृष्णं योगिनस्त्रि
विधमितरेषामिति सूत्रितानि सति मूले तद्विपाको जात्यायुर्भोगा इत्युक्ताः कर्मविपाकाः फलविशेषास्तदाशयास्तेषां संस्कारास्तैः
क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवति सोऽपि जीववदसंगचिद्रूप एवेत्यर्थः ५ नन्वसंगचिद्रूपत्वे कथं नियन्तृत्वमित्यत आ
ह तथापीति ईश्वरस्य नियन्तृत्वानभ्युपगमे दोषमाह अव्यवस्थाविति १६ असंगस्येश्वरस्य नियन्तृत्वे निष्प्रमाणकमित्याशंक्या

अत्रापि कलहायन्ते वादिनः स्वस्वयुक्तिभिः वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरन्ति हि १४
क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः पुंविशेषो भवेदीशो जीववत्सोऽप्यसंगचित् ५ तथापि
पुंविशेषत्वाद्घटतेऽस्य नियन्तृता अव्यवस्थौ बन्धमोक्षावापतेतामिहान्यथा ६ भीषाऽस्मादित्ये
वमादावसंगस्य परात्मनः श्रुतं तद्युक्तमप्यस्य क्लेशकर्माद्यसंगमात् ७ जीवानामप्यसंग
त्वात्क्लेशादिर्नेस्यथापि च विवेकाग्रहतः क्लेशकर्मादि प्रागुदीरितम् १८ नित्यज्ञानप्रय
त्नेच्छागुणानीशस्य मन्वते असंगस्य नियन्तृत्वमयुक्तमिति तार्किकाः ९ पुंविशेषत्वमप्य
स्य गुणैरेव न चान्यथा सत्यकामः सत्यसंकल्प इत्यादिभिः श्रुतिर्जगौ २० ॥

ह भीषेति तन्नियन्तृत्वे श्रुतं ननु श्रुतमप्ययुक्तं कथमंगीक्रियते इत्यत आह युक्तमपीति जीवधर्मस्य क्लेशादेरभावादुपपन्नं
चेत्यर्थः १७ ननु जीवा अपि असंगचिद्रूपाः क्लेशादिरहिता एव तथा चेश्वरे को विशेष इत्याशंक्य जीवानां स्वतः क्लेशादिरहि
तत्वेऽपि बुद्ध्या सह विवेकाग्रहात्क्लेशादिरस्तीति पूर्वोक्तं स्मारयति जीवानामिति १८ तार्किकास्त्वसंगस्य नियामकत्वमसह
माना जीवाद्विलक्षणतया ज्ञानादिगुणत्रयं नित्यमंगीकुर्वन्ति इत्याह नित्यज्ञानेति नन्विच्छादिगुणकस्य कथं जीवाद्वैल
क्षण्यमित्याशंक्य गुणानां नित्यत्वादेवेति परिहरति पुंविशेषत्वमिति गुणानां नित्यत्वे प्रमाणमाह सत्येति २० ॥

तत्रापिदोषसङ्घावान्यत्वान्तरमाह नित्येति तस्य हिरण्यगर्भस्य किंरूपमित्यत आह लिंगदेहेनेति मायोपाधिकः परमात्मा लिंगशरी
रसमष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यत इत्यर्थः १११ हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह उक्तीरयइतिनतु लिंगशरीरस्योगेजी
वः स्यादित्याशंक्याविद्याकामकर्माभावान्न जीव इत्याह लिंगमत्वेपीति ११२ केवललिंगशरीरस्य स्थूलशरीरं विहायानुपलभ्य
मानत्वात्स्थूलशरीरसमष्ट्यभिमानी विराडेवेश्वर इत्याह स्थूलदेहेविनेति ११३ तेन्सङ्घावे प्रमाणमाह सहस्रशीर्षेति श्रुतेर्वा

नित्यज्ञानादिमत्वे स्यसृष्टिरेव सदा भवेत् हिरण्यगर्भ ईशो ना लिंगदेहेन संयुतः १११ उक्ती
थद्भा लक्षणेनस्य माहात्म्यमतिविस्तरम् लिंगमत्वेपि जीवत्वं नास्य कर्माद्यभावतः ११२ स्थू
लदेहं विना लिंगदेहो न क्वापि दृश्यते वैराजदेह ईशोनः सर्वतो मस्तकादिमान् ११३ स
हस्रशीर्षेत्येवं च विश्वतश्चक्षुरित्यपि श्रुतमित्याहुरनिशं विश्वरूपस्य चिन्तकाः ११४ स
र्वतः पाणिपादत्वात्क्रिम्यादेरपि चेशता ततश्चतन्तुखोदेह एवेशा नेतरः पुमान् ११५ प्रजा
पतिं नपासीना एवमाहुः प्रजापतिः प्रजा असृजतेत्यादिश्रुतीश्चोदाहरन्त्यमी ११६ विष्णोर्ना
भेस्समुद्भूतो वेधाः कमलजस्ततः विष्णुरेवेश इत्याहुर्लोके भागवता जनाः ११७ शिवस्य पा
दावन्वेष्टुं शार्ङ्गी शक्तस्ततः शिवः ईशो न विष्णुरित्याहुः शैवा आगममानिनः ११८ पुरत्रयं साद
यितुं विघ्नेशोप्यसृजयत् विनायकं प्राहुरीशं गाणपत्यमते रताः ११९ ॥

क्यमिति शेषः विश्वरूपस्य चिन्तकाः विराड्रूपोपासकाः ११४ अत्रापि दोषं दृष्ट्वा देवतान्तरमालम्बत इत्याह सर्वत इति ११५ एवं के
चन इत्यत आह प्रजार्थमिति प्रजापतिः प्रजा असृजतेत्यादिवाक्यं तत्र प्रमाणमित्याहुः प्रजापतिरिति ११६ भागवतमतमाह
विष्णोरिति ११७ शैवानां मतमाह शिवस्येति ११८ गाणपत्यमतमाह पुरत्रयमिति ११९ उक्तन्यायमन्यत्राप्यतिदिशति एवमिति ११९

अन्ये भैरवमैरालाद्युपासकाः अन्यथान्यथा वर्णने कारणमाह स्वस्वपक्षेति तत्र प्रमाणानि सन्तीति दर्शयति मन्त्रेति २० एवं कति म-
तानीत्याशंक्यासंख्यानीत्याह अन्तर्यामिनमिति स्थावरेशवादेन कापि दृष्टचर इत्याशंक्याह अश्वत्थार्केति २१ नन्वेवं मतभेदे क-
स्योपादेयत्वं कस्य वा हेयत्वमित्याकांक्षायामाह तत्त्वनिश्चयेति तत्त्वनिश्चयकामेन तत्त्वनिश्चयेच्छया न्यायागमयोर्विचारणशी-
लानां पुरुषाणां प्रतिपत्तिरेकैव स्यात् साकीदृशीत्यत आह साप्यत्रेति २२ तामेव प्रतिपत्तिं दर्शयितुं तदनुकूलां श्रुतिं पठति मा-
यामेव प्रकृतिं जगदुपादानकारणं विद्याज्जानीयात् मायिनं मायोपाधिकमन्तर्यामिणमेव महेश्वरं मायाधिष्ठातारं निमि-

48

एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्यथा मन्त्रार्थवादकल्पादीनाश्रित्य प्रतिपेदिरे २०
अन्तर्यामिणमारभ्य स्थावरान्तेशवादिनः सन्त्यश्वत्थार्कवंशादेः कुलदैवतदर्शनात् २१
तत्त्वनिश्चयकामेन न्यायागमविचारिणाम् एकैव प्रतिपत्तिः स्यात्साप्यत्र स्फुटमुच्यते २२
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् २३ इ-
ति श्रुत्यनुसारेण न्यायो निर्णय ईश्वरे तथा सत्यविरोधः स्यात्स्थावरान्तेशवादिनाम् २४
माया चेयं तमोरूपा तापनीये तदीरणात् अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयं २५ ॥

त्तकारणं जानीयात् अस्य मायिनो महेश्वरस्यावयवभूतैरंशरूपैश्चराचरात्मकैर्जीवैः कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रुतेरर्थः
२३ एतच्छ्रुत्यनुसारेणेश्वरविषयो निर्णयो युक्त इत्याह इतीति कुतो युक्त इत्याशंक्य सर्वथाविरुद्धत्वादित्याह तथेति
सर्वस्यापीश्वरत्वाभ्युपगमात्केनापि विरोध इति भावः २४ ननु जगत्प्रकृतिभूताया मायायाः किंरूपमित्यत आह माया चे-
यमिति कुत इत्यत आह तापनीय इति माया च तमोरूपेति तापनीयोपनिषदि तमोरूपत्वस्याभिधानादित्यर्थः मायायास्त-
मोरूपत्वे किं प्रमाणमित्याकांक्षायां श्रुतिरेवात्र प्रमाणमिति प्रतिजानीत इत्याह अनुभूतिमिति २५ ॥

तत्र मायाया स्तमोरूपत्वे को साक्षदनुभव इत्याकांक्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवात्रानुभवं स्पष्टयतीत्याशयेनाह जडं मोहात्मक
मिति आनन्त्यमिति श्रुत्या सर्वानुभवसिद्धत्वमुच्यत इत्याह आबालेति २६ जडशब्दस्यार्थमाह अचिदात्मेति मोहशब्दस्यार्थमाह
यत्रेति २७ उक्तप्रकारेण सर्वानुभवसिद्धत्वलक्षणमानन्त्यमित्याह इत्थमिति एतज्जाड्यमोहलक्षणं तमोरूपत्वं ननु एवं मायाया
याः सर्वानुभवसिद्धत्वे घटादिवज्ज्ञानेनानिवर्त्यत्वं स्यादित्याशंक्याह युक्तीति तुशब्दः शंकाव्यावृत्त्यर्थः प्रतिवाच्यं सत्त्वेनासत्त्वेन
सदसत्त्वेन वानिर्वक्तुमशक्यं तत्र किं प्रमाणमित्यत आह नासदिति २८ अस्याः श्रुतेरभिप्रायमाह नासदिति बाधनात् इहनाना

जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः आबालगोपं स्पष्टत्वादानन्त्यं तस्य साब्रवीत् २६ अचि
दात्मघटादीनां यत्स्वरूपं जडं हि तत् यत्र कुण्ठीभवेद्बुद्धिः स मोह इति लौकिकाः २७ इत्थं लौ
किकदृष्ट्यैतत्सर्वैरप्यनुभूयते युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतिः २८ नासदासी
द्विभातत्वान्नो सदासीच्च बाधनात् विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः २९ तुच्छानिर्व
चनीया च वास्तवी चेत्यसौ त्रिधा ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ३० अस्य सत्त्व
मसत्त्वं च जगतो दर्शयत्यसौ प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा ३१ ॥

त्मिकिंचनेति निषेधनादित्यर्थः सदसद्रूपत्वं तु विरुद्धत्वादयुक्तमिति श्रुत्योपेक्षितं एवं युक्तिदृष्ट्या निर्वचनीयत्वं प्रदर्श्य तु
च्छमिदं रूपमस्येति श्रुतिर्विद्वदनुभवेन तस्यास्तुच्छत्वं दर्शयति इत्याह विद्येति तुच्छत्वे हेतुमाह तस्येति २९ उपपादितमर्थमु
पसंहरति तुच्छेति श्रौतबोधेन तुच्छा कालत्रयेप्यसत्त्वात् यौक्तिकबोधेनानिर्वचनीया लौकिकबोधेन वास्तवी चेत्येवं त्रिधा मायाज्ञेये
त्यर्थः ३० अस्य सत्त्वमसत्त्वं च दर्शयतीति श्रुतेरर्थमस्याः कृत्यं चाह अस्येति एकस्या एव मायाया जगत्सत्त्वासत्त्वप्रदर्शकत्वे दृष्टान्तमा

स्वतन्त्रास्वतन्त्रत्वेनेति कृत्स्नामायायाः स्वातन्त्र्यास्वातन्त्र्ये दर्शिते तत्रोभयत्रोपपत्तिमाह अस्वतन्त्रेति स्वभासकचैतन्यं विहाय न प्रकाशत इत्यस्व
तन्त्राऽसंगस्यात्मनोऽन्यथाकारणात्स्वतन्त्रा यीत्यर्थः ३२ अन्यथाकरणमेव स्पष्टयति कूटस्थासंगमिति जीवेशावाभासेन करोतीति कृत्स्नु
कृजीवेश्वरविभागं च करोतीत्याह चिदाभासेति ३३ नन्वेवमात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह कूटस्थमिति ननु कू
टस्थत्वाविघातेन जगदादिस्वरूपत्वापादानं दुर्घटमित्याशंक्य मायाया दुर्घटैकविधायित्वान्नेदमाश्चर्यकारणमित्याह दुर्घटेति अन्य

अस्वतन्त्रा हि माया स्यादप्रतीतेर्विना चितिम् स्वतन्त्रापि तथैव स्यादसंगस्यान्यथाकृतेः ३२ कूट
स्थासंगमात्मानं जगत्त्वेन करोति च चिदाभासस्वरूपेण जीवेशावपि निर्ममे ३३ कूटस्थमनुपा
द्रुत्य करोति जगदादिकं दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ३४ द्रवत्वमुदके वह्नावौष्ण्यं
काठिन्यमश्मनि मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः ३५ न वेत्ति लोको यावत्तं साक्षात्तावच्च
मत्कृतिं यत्ने मनसि पश्चात्तु मायैषेत्युपशाम्यति ३६ प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु न
चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ३७ चोद्येऽपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया परिहार्यं ततश्
चोद्यं न पुनः प्रतिचोद्यतां ३८ विस्मयैकशरीराया मायायाश्चोद्यरूपतः अन्वेष्यः परिहारोऽस्या बुद्धिम
द्भिः प्रयत्नतः ३९ ॥

या मायायामेवं भज्येनेति भावः ३४ मायाया दुर्घटकारित्वस्वभावत्वे दृष्टान्तमाह द्रवत्वमिति उदकादीनां द्रवत्वादि यथा स्वाभाविकं
तद्वन्मायाया दुर्घटकारित्वमित्यर्थः ३५ मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं लोके मायाया आश्चर्यकारित्व
दर्शनादित्याशंक्य मायाप्रयोक्तृसाक्षात्कारपर्यन्तमेवास्या आश्चर्यकारणत्वं नोपरिष्टादित्याह न वेत्तीति ३६ किं च जगतस्तत्त्ववादि
नां नैयायिकादीनां प्रत्येवं विधानि चोद्यानि कर्तव्यानि न मायावादिनं प्रतीत्याह प्रसरन्तीति ३७ मायावादिनं प्रतिचोद्यकरणेऽति
प्रसंगमाह चोद्येऽपीति हि किं कर्तव्यमित्यत आह परिहार्यमिति ३८ उक्तमेवार्थं प्रपंचयति विस्मयेति ३९ ॥

मायात्वनिश्चये न तत्परिहारान्वेषणमुचितं स एव नेदानीं सिद्धं इति शंकते मायात्वमिति मायालक्षणसद्भावान्मायात्वं निश्चीयतामि-
त्यभिप्रायेणाह तर्हीति तर्हि किं लक्षणमित्यत आह लोक इति ४० तस्याप्रसिद्धं किं लक्षणमित्यत आह न निरूपयितुमिति ४१ दृष्टा-
न्ते सिद्धं लक्षणं दार्ष्टान्तिके योजयति स्पष्टमिति ४२ जगतोऽशक्यनिरूपणत्वं कथमित्याशंक्य तद्दर्शयति निरूपयितुमिति ४३

मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु लोके प्रसिद्धं मायाया लक्षणं यत्तदीदृशम् ४० न नि-
रूपयितुं शक्या विस्पष्टं भासते च या सा मायेतीन्द्रजालादौ लोकाः संप्रतिपेदिरे ४१ स्पष्टं
भाति जगच्चेदमशक्यं तन्निरूपणं मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ४२ निरूपयितु-
मारब्धे निखिलैरपि पण्डितैः अज्ञानं पुरतस्तेषां भाति कक्ष्यासु कासुचित् ४३ देहेन्द्रियादयो
भावा वीर्येणोत्पादिताः कथम् कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरम् ४४ वीर्यस्यैव स्वभा-
वश्चेत्कथं तद्विदितं त्वया अन्वयव्यतिरेकौ यौ भग्नौ तौ वन्ध्यवीर्यतः ४५ न जानामि किमप्ये-
तदित्यन्ते शरणं तव अत एव महान्तोऽस्य प्रवदन्तीन्द्रजालताम् ४६ एतस्मात्किमिवेन्द्रजालम-
परं यद्गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरं पर्यायेण शिशुत्वयौवनजरावे-
षैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति ४७ देहवद्वटधानादौ सुविचार्य वि-
लोक्यताम् क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु ४८ ॥

अशक्यनिरूपणत्वमेवोदाहरणेन स्पष्टयति देहेन्द्रियेति ४४ स्वभाववादी शंकते वीर्यस्येति सिद्धान्ती पृच्छति कथं तदिति अन्वयव्य-
तिरेकाभ्यां जानामीत्याशंक्य व्याप्त्यभावान्नैवमित्याह अन्वयेति ४५ एवं पुनः पुनः पृष्टे सति किमपि न जानामीत्येवोत्तरं देयमिति फ-
लितमाह न जानामीति ४६ उक्तानिर्वचनीयत्वे वृद्धसंमतिं दर्शयति एतस्मादिति ४७ न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किं तु वट

नन्वस्माभिर्निर्वक्तुमशक्यत्वेपि उदयनादिभिराचार्यैर्निरूप्यते इत्याशंक्याह निरुक्ताविति ४९ उक्तार्थे साम्प्रदायिकानां वचनं संवादयति अचिन्त्या इति ५० ननु भवत्वेवं जगतोचिन्त्यरचनात्वं मायायां किमायातमित्यत आह अचिन्त्यरचनेति अचिन्त्यरचनाशक्तिमद्बीजं कारणं सैव मायेत्यर्थः नन्वेवंविधं कारणं क्व दृष्टमित्यत आह मायेति ५१ कथं तस्य जगद्बीजत्वमित्यत आह जाग्रदिति ततः किमित्यत आह तस्मादिति यतो जगत्कारणं माया ततोऽशेषजगद्वासनास्तत्र मायायां गता इतीत्यर्थः ५२ ततोपि किं तत्राह या बुद्धिवासना इति ननु तासु प्रतिबिम्बोस्ति चेत्कुतो नानुभूयत इत्याशंक्यास्पष्टत्वादित्याह मेघेति तर्हि कुतस्तत्सिद्धिरित्यत आह अनुमीयता

निरुक्तावभिमानं ये दधते तार्किकादयः हर्षमिश्रादिभिस्ते तु खण्डनादौ सुशिक्षिताः ४९ अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् अचिन्त्यरचनारूपं मनसापि जगत्खलु ५० अचिन्त्यरचनाशक्तिबीजं मायेति निश्चिनु मायाबीजं तदेवैकं सुषुप्तावनुभूयते ५१ जाग्रत्स्वप्नजगत्तत्र लीनं बीजइव द्रुमः तस्मादशेषजगतो वासनास्तत्र संस्थिताः ५२ या बुद्धिवासनास्तासु चैतन्यं प्रतिबिम्बति मेघाकाशवदस्पष्टचिदाभासोनुमीयतां ५३ साभासमेव तद्बीजं धीरूपेण प्ररोहति अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते ५४ मायाभासेन जीवेशौ करोतीति श्रुतौ श्रुते मेघाकाशजलाकाशाविव तौ सुव्यवस्थितौ ५५ ॥

मिति ५३ ननु मेघांशोदकस्यास्पष्टाकाशप्रतिबिम्बत्वेपि तज्जातीयस्य घटोदकस्य स्पष्टाकाशप्रतिबिम्बदनः सद्भावान्मेघाकाशानुमानं घटते इह तथाविधदृष्टान्ताभावात्कथमनुमानोदय इत्याशंक्याज्ञापितथाविधदृष्टान्ताभावासम्पादनायाह साभासमिति चिदाभासविशिष्टं तदेवाज्ञानं बुद्धिरूपेण परिणम्यमानं विस्पष्टं चिदाभासवद्भवतीति भावः एवं चेदनुमानमत्र सुघटितं भवति विमता बुद्धिवासनाश्चित्प्रतिबिम्बवत्यो भवितुमर्हन्ति बुद्ध्यवस्थाविशेषत्वाद् बुद्धिवदिति ५४ एवं जीवेश्वरयोर्मायिकत्वं श्रुतमुपसंहरति मायाभासेनेति ननु जीवेशयोर्मायित्वे समाने कथमवान्तरभेदसिद्धिरित्याशंक्यास्पष्टस्पष्टोपाधिमत्त्वेन मेघाकाशजलाकाशयोरिव तत्सिद्धिरित्याह मेघाकाशेति ५५ ॥

ईशस्य मेघाकाशसाम्यं स्फुटीकरोति मेघवदिति ५६ मायाप्रतिबिम्बस्येश्वरत्वे किं प्रमाणमित्याशंक्य श्रुतिरेवेत्याह मायाधीन इति न के
वलमीश्वरत्वमस्य श्रुतं अपि त्वन्तर्यामित्वादिकमपीत्यर्थः जातं श्रुतमस्तीत्याह अन्तर्यामीति ५७ ननु धीवासनाप्रतिबिम्बस्येश्वरत्वादि
कं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति सौषुप्तमिति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति
तत् सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः एष सर्वेश्वरः एष सर्वज्ञः
एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानामित्यादिका श्रुतिर्धीवासनाप्रतिबिंबरूपस्यानन्दस्येश्वरत्वादिकं प्रतिपाद

मेघवद्वर्त्तते माया मेघस्थिततुषारवत् धीवासनश्चिदाभासस्तुषारस्थखवत्स्थितिः ५६
मायाधीनश्चिदाभासः श्रुतो मायी महेश्वरः अन्तर्यामी च सर्वज्ञो जगद्योनिः स एव हि ५७ सौ
षुप्तमानन्दमयं प्रक्रम्यैवं श्रुतिर्जगौ एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ५८ सर्वज्ञत्वा
दिके तस्य नैव विप्रतिपद्यताम् श्रौतार्थस्याविर्तक्यत्वान्मायायां सर्वसम्भवात् ५९ अयं
यत्सृजते विश्वं तदन्यथायितुं पुमान् न कोऽपि शक्तस्तेनायं सर्वेश्वर इतीरितः ६० अशे
षप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः ६१ ॥

यतीत्यर्थः ५८ ननु आनन्दमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह सर्वज्ञत्वेति कुत इत्यत आह श्रौतेति श्रुतोऽपि न विप्र
तिपत्तिः कार्येत्याह मायेति ५९ नन्वनुकूलप्रमाभावे श्रुतिरपि ग्रावप्लववाक्यवदर्थवादः स्यादित्याशंक्य श्रुतिप्रामाण्यसिद्धये
सर्वेश्वरत्वादिकमुपपादयति अयमिति अयमानन्दमयो यज्जाग्रदादिविश्वं सृजति तदन्येनान्यथाकर्तुं न शक्यते तोऽयं सर्वे
श्वर इत्यर्थः ६० इदानीं सर्वज्ञत्वमुपपादयति अशेषेति तत्र सौषुप्ते अज्ञाने कारणभूते कार्यभूतानां सर्वप्राणिबुद्धीनां वासना
निवसन्ति ताभिश्च वासनाभिः सर्वं जगत्क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवासनावदज्ञानोपाधिकत्वेन सर्वज्ञ उच्यत इत्यर्थः ६१

ननु यदि सर्वज्ञत्वमस्ति तर्हि तत्कुतो नानुभूयत इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह वासनानामिति ९२ कथं तर्हि तदवगम इ
त्याशंक्याह सर्वबुद्धिष्विति सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणभूतवासनागतसर्वज्ञत्वपूर्वकं संभवितुमर्हति कार्यनिष्ठधर्मविशेषत्वात्पटग
तरूपादिवदित्यर्थः ९२ एवं सर्वज्ञत्वमुपपाद्येश्वरोऽन्तर्यामीति श्रुत्युक्तमन्तर्यामित्वमुपपादयति विज्ञानमयेति अन्यत्र पृथिव्यादौ तिष्ठन्यमय
ति यतस्तेनेत्यन्वयः ९३ अन्तर्यामिब्राह्मणं कृत्स्नं प्रमाणमिति दर्शयितुं तदेकदेशश्रुतेर्यो विज्ञाने तिष्ठन्नित्यादिवाक्यमर्थतोनुक्रा
मति बुद्धाविति इदानीमन्तर्यामिब्राह्मणस्थप्रतिपर्यायं व्याख्याने ग्रन्थबाहुल्यभयाद्व्याख्यानस्य सर्वपर्यायसंचारित्वसिद्धये यः सर्वेषु

वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीक्ष्यते सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीयताम् ९२ वि
ज्ञानमयमुख्येषु कोशेष्वन्यत्र चैव हि अंतस्तिष्ठन्यमयति तेनान्तर्यामितां व्रजेत् ९३ बु
द्धौ तिष्ठन्नान्तरोऽस्या धिया नीक्ष्यश्च धीवपुः धियमन्तर्यमयतीत्येवं वेदेन घोषितम् ९४
तन्तुः पटे स्थितो यद्वदुपादानतया तथा सर्वोपादानरूपत्वात्सर्वत्रायमवस्थितः ९५ पट
रवप्यान्तरस्तन्तुस्तन्तोरप्यंशुरान्तरः आन्तरत्वस्य विश्रान्तिर्यत्रासावनुमीयतां ९६ द्वित्र्यान्तरत्वक
थनेऽदर्शनेप्ययमान्तरः न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ९७ पटरूपेण संस्थानात्पट
स्तन्तोर्वपुर्यथा सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ९८ ॥

भूतेष्विति पर्यायं व्याचक्षाणो यः सर्वेषु भूतेषु तिष्ठन्नित्यस्यार्थं सदृष्टान्तमाह तन्तुः पटे इति तन्तूपादानतया सर्वत्रायमवस्थितश्चे
त्किमिति सर्वत्र नोपलभ्यत इत्याशंक्य सर्वान्तरत्वादित्याह पटादपीति अत्रेदमनुमानं तत्त्वान्तरत्वेप्यण्वादिवदन्तर्यामिणो दर्श
नं किं न स्यादित्याशंक्य तेषामिव वास्तवाभावान्न दृश्यत इत्यभिप्रायेणाह द्वित्र्यान्तरत्वेति ९७ कुतस्तर्हि तन्निर्णय इत्यत आह
नत इति अचेतनस्य चेतनाधिष्ठानमन्तरेण प्रवृत्त्यनुपपत्तिर्युक्तिः श्रुतिस्तूदाहृतैव ९७ यस्य सर्वाणि भूतानि शरीरमित्यस्या
र्थमाह पटरूपेणेति पटरूपेणावस्थितस्य तन्तोः पटः शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः ९८ ॥

51

यः सर्वाणि भूतान्यन्तरो यमयतीति वाक्यस्य तात्पर्यं सदृष्टान्तमाह श्लोकद्वयेन तन्तोरिति तन्तुसंकोचादिना पटस्य संकोचादिर्यथा भवति १९ एवं पृथिव्यादिरूपादन्तत्वेन स्थितोऽन्तर्यामी यया वासनया वासनया यथा यथा घटादिकार्यरूपेण विक्रियते तथा तथा तत्तत्कार्यजातम् अवश्यं भवतीति भावः २० एवमन्तर्यामिप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिं ईश्वर इति सर्वभूतानामिति पदार्थस्यार्थमाह सर्वभूतानीति ते च हृदयपुण्डरीके स्थिताः ननु तेषां कुतो हृदयवस्थानमित्याशङ्क्य हृद्यन्तर्यामिणो विज्ञानमयाकारेण परिणामादित्याह तदुपादानेति २२ यन्त्रारूढानीत्यत्र यन्त्रारोहशब्दयोरर्थमाह देहादीति भ्रामयन्निति पदे प्रकृत्यर्थमाह विज्ञानमयेति श्रौतस्य यमय

तन्तोः संकोचविस्तारचलनादौ यथा पटस्तथा अवश्यमेव भवति तस्मात्ते स्वपदे मनाक् १९ तथान्तर्यामी यद्यद्यया वासनया यथा विक्रीयेत तत्तथावश्यं भवत्येवेत्यभिप्रायः २० ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया २१ सर्वभूतानि विज्ञानमयात्मा हृदये स्थिताः तदुपादानभूतेष्वात्मा त्वविक्रियेव खलु २२ देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् २३ विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः स्वशक्त्यैव विक्रियते मायया भ्रमणं हि तत् २४ अन्तर्यमयतीत्युक्त्यायमेवार्थः श्रुतौ श्रुतः पृथिव्यादिषु सर्वत्र त्वया योज्यतां धिया २५ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि २६ नार्थः पुरुषकारेणेत्येवमाशङ्क्यतां यतः ईशः पुरुषकारस्य रूपेणापि विवर्तते २७ ॥

तीति पदस्याप्ययमेवार्थ इत्याह अन्तर्यमयतीति २४ उक्तव्याख्यानं पर्यायान्तरेष्वतिदिशति पृथिव्यादिष्विति २५ प्रवृत्तिजातस्य सर्वस्येश्वराधीनत्वे वचनान्तरमुदाहरति जानामि धर्ममिति ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशङ्क्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति परिहरति नार्थ इति अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः २७ ॥

पंच॰
टी॰
५२

ननु प्रवृत्तिप्रयत्नस्यापि ईश्वरत्वपत्वेयमयति भ्रामयतीति प्रतिपादितमन्तर्यामिप्रेरणं हयास्यादित्याशंक्य नहोयेन स्वात्मासंगत्वज्ञानलक्षण
फलस्य सत्वान्मैवमिति परिहरति ईक्षेति ईक्षाबोधेनेशस्य पुरुषाकारादिरूपेणाप्यवस्थानात्तेन प्रवृत्तिः अन्तर्यामिरूपेण प्रेरणा ७८
आत्मनोऽसंगत्वज्ञानेनापि किं प्रयोजनमित्यत आह तावतेति ७९ श्रुतिस्मृत्युदितस्यानतिलंघनीयत्वे स्मृतिं दर्शयति श्रुतिस्मृती इति श्रु
त्यापीश्वरस्य भीतिहेतुत्वमुक्तमित्याह ईश्वरस्य भीतिहेतुत्वं किमर्थमुक्तमित्याशंक्य सर्वेश्वरत्वस्यान्तर्यामित्वतः पार्थक्यसिद्धय इति म
त्वा सर्वेश्वरत्वमिति ८० बहिरन्तश्चेश्वर एव नियामक इत्यत्र श्रुतिद्वयमाह एतस्यैवेति ८१ क्रमप्राप्तस्यैव योनिरित्यस्यार्थमाह जगद्यो

52

ईक्षाबोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यताम् तथापीशस्य बोधेन स्वात्मासंगत्वधीजनिः ७८ तावता मु
क्तिरित्याहुः श्रुतयः स्मृतयस्तथा श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितम् ७९ आज्ञया भीतिहेतुत्वं
भीषास्मादिति हि श्रुतम् सर्वेश्वरत्वमेतत्स्यादन्तर्यामित्वतः पृथक् ८० एतस्यैवाक्षरस्यैव प्रशासन
इति श्रुतिः अन्तः प्रविष्टः शास्तायं जनानामिति च श्रुतिः ८१ जगद्योनिर्भवेदेष प्रभवाप्ययकृत्वतः
आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ ८२ आविर्भावयति स्वस्मिन्विलीनं सकलं जगत् प्राणि
कर्मवशादेष पटो यद्वत्प्रसारितः ८३ पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत् प्राणिकर्मक्ष
यवशात्संवेष्टितपटो यथा ८४ रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने तूष्णींभावमनोरा
ज्ये इव सृष्टिलयाविमौ ८५ ॥

निरिति प्रतिज्ञातार्थे प्रभवाप्ययौ भूतानामिति वाक्यं हेतुत्वेन योजयति प्रभवेति प्रभवाप्ययावुत्पत्तिप्रलयावाविर्भावतिरोभावौ मता
विति योजना ८२ आविर्भावकारित्वे सदृष्टान्तमुपपादयति आविर्भावयतीति यथा संकुचितः चित्रपटः स्वस्य प्रसारणेन स्वनिष्ठानि
चित्राण्याविर्भावयति एवमीशोऽपीत्यर्थः ८३ तस्यैव प्रलयकारणत्वं दर्शयति पुनरिति स एव पटः संकुचितश्चित्राणि यथा तिरो
भावयति तद्वदित्यर्थः ८४ आविर्भावतिरोभावयोर्दृष्टान्तराणि दर्शयति रात्रिघस्राविति घस्रो अहः ॥

नन्वीश्वरस्य जगद्योनित्वं किमारम्भकत्वेन किं वा तदाकारपरिणामित्वेन नाद्यः अद्वितीयस्यारम्भकत्वायोगात् न द्वितीयः निरवयवस्य परिणामासम्भवादित्याशंक्य विवर्तवादाश्रयणान्नायं दोष इति परिहरति आविर्भावेति ८६ नन्वेकदेवेश्वरः कथं चेतनोपादानं भविष्यतीत्याशंक्याह स्वप्राधान्येनोपाधिप्राधान्येन च चेतनाचेतनोपादानं भवतीत्याह अचेतनानामिति ननु मायाविन ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव तदभिधानादिति शंकते तमःप्रधानेति तमःप्रधानस्तमोगुणप्रधानो मायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्कारः ज्ञानं देवताध्यानादि कर्म पुण्यापुण्यलक्षणं तन्निमित्तभूतैरित्यर्थः ८८ तत्पदार्थ इव तत्पदार्थे

आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना आरम्भपरिणामादिचोद्यानां नात्र संभवः ८६ अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा चिदाभासांशतस्त्वेष जीवानां कारणं भवेत् ८७ तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनाम् परः कारणतामेति भावनाज्ञानकर्मभिः ८८ इति वार्तिककारेण जडचेतनहेतुता परमात्मन एवोक्ता नेश्वरस्येति चेच्छृणु ८९ अन्योन्याध्यासमात्रापि जीवकूटस्थयोरिव ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ९० सत्यं ज्ञानमनन्तं यद्ब्रह्म तस्मात्समुत्थिताः खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ९१ आपातदृष्टितस्तत्र ब्रह्मणो भाति हेतुता हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते ९२ ॥

अधिष्ठानारोप्ययोरन्योन्याध्यासस्याविवक्षितत्वान्नैवमिति परिहरति अन्योन्याध्यासमिति नतु सुरेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्याध्यासः सिद्धवत्कृत्य व्यवह्रियत इति कुतोऽवगम्यत इत्याशंक्य श्रुत्यर्थपर्यालोचनवशादिति दर्शयितुं श्रुतिमर्थतः पठति सत्यमिति भवेच्च याः श्रुतिः तया कथमन्योन्याध्यासावगतिरित्यत आह आपातेति ९१ तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनत्वे चिदाभासस्य च सत्यत्वमायातम् अतः प्रतीयमानमन्योन्याध्यासमन्तरेण न घटत इति भावः ९२ ॥

एवमन्योन्याध्यासस्सिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वोक्तोदाहृतघट्टितपटदृष्टान्तस्मरणेन द्रढयति अन्योन्येति भ्रान्त्यैकत्वापत्तौ दृष्टान्त
मभिधायापातदर्शिनां भेदाप्रतीतौ पूर्वोक्तमेव दृष्टान्तान्तरं दर्शयति मेघाकाशेति ऐक्यं पश्यन्ति न भेदमित्यर्थः ५४ कुतस्तर्हि ब्र
ह्मेशयोर्भेदावगतिरित्यत आह उपक्रमादिभिरिति टीकाउपक्रमोपसंहारावभ्यासोऽपूर्वताफलं अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्ण
य इत्युक्तैः षड्भिर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायावी त्वेषोऽयमवगम्यत इति शेषः ५५ सत्यमिति अतोऽसंगत्व

अन्योन्याध्यासरूपोसावन्नलिप्तःपटोयथा घट्टितेनैकतामेतितद्वद्भ्रान्त्यैकतांगतः ५३ मेघा
काशमहाकाशौविविच्येतेनपामरैः तद्वद्ब्रह्मेशयोरैक्यंपश्यन्त्यापातदर्शिनः ५४ उपक्रमा
दिभिर्लिंगैस्तात्पर्यस्यविचारणात् असंगंब्रह्ममायावीसृजत्येषमहेश्वरः ५५ सत्यंज्ञानम
नन्तंचेत्युपक्रमोपसंहृतम् यतोवाचोनिवर्तन्तइत्यसंगत्वनिर्णयः ५६ मायीसृजतिवि
श्वंसन्निरुद्धस्तत्रमायया अन्यइत्यपराब्रूतेश्रुतिस्तेनेश्वरःसृजेत् ५७ आनंदमयईशोयं
बहुस्यामित्यवैक्षत हिरण्यगर्भरूपोभूत्सुप्तिःस्वप्नोयथाभवेत् ५८ ॥

निर्णयो भवतीति शेषः ५६ मायाविन ईश्वरस्य स्रष्टृत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति मायेति अस्मान्मायी सृजते वि
श्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं दर्शयति ५७ एवमानन्दमयस्येश्वरस्य
जगत्कारणत्वं प्रतिपाद्य तस्माडगाडत्यन्निप्रकारमाह आनंदमय इति ईक्षितत्वाच्च हिरण्यगर्भरूपो भूदित्यन्वयः तत्र दृष्टान्तमाह स

तस्माद्वा एतस्मादाकाशः सम्भूत इत्यादौ क्रमेण सृष्टिश्रवणादिदं सर्वमसृजतेति युगपच्छ्रवणाच्च कस्योपादेयत्वं कस्य वा हेयत्वमित्याकां
क्षायां श्रुतियुगपदुपदेशाद्वा उभयग्राह्यमित्याह क्रमेणेति एषा जगतः सृष्टिर्द्विविधश्रुतिसद्भावात्क्रमेण युगपद्वा यथाश्रुति ज्ञेयेति योजना तत्रो
पपत्तिं द्विविधस्वप्नदर्शनादिति लोके क्रमयुक्तस्य चाक्रमयुक्तस्य च स्वप्नपदार्थजातस्य दर्शनादिति भावः १९ हिरण्यगर्भस्य स्वरूपं नि
रूपयति सूत्रात्मेति सूत्रात्मा पटे सूत्रमिव जगत्यनुस्यूत आत्मा स्वरूपं यस्य सः सूक्ष्मदेह इत्याख्या यस्य स तथाविधः सर्वजीवघना
त्मकः सर्वेषां जीवानां लिङ्गशरीरोपाधिकानां च घनात्मकः समष्टिस्वरूपः तत्र हेतुः सर्वाहंमानेति सर्वेषु व्यष्टिलिङ्गशरीरेष्वहम

क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति द्विविधश्रुतिसद्भावाद्द्विविधस्वप्नदर्शनात् १९ सूत्रात्मा सू
क्ष्मदेहाख्यः सर्वजीवघनात्मकः सर्वाहंमानधारित्वात्क्रियाज्ञानादिशक्तिमान् २० प्रत्यूषो वा
प्रदोषो वा मग्नो मन्दे तमस्ययम् लोको यथा भाति तद्वदस्पष्टं जगदीक्ष्यते २१ सर्वतो लाञ्छितो
मष्या यथा स्याद्घट्टितः पटः सूक्ष्माकारैस्तथैवेशस्य वपुः सर्वत्र लाञ्छितं २२ सस्यं वा शाकजा
तं वा सर्वतोऽङ्कुरितं यथा कोमलं तद्वदेवैष पेलवो जगदङ्कुरः २३ आतपाभातलोको वा पटो
वा वर्णपूरितः सस्यं वा फलितं यद्वत्तथा स्पष्टवपुर्विराट् २४

भिमानवत्त्वादिति भावः इच्छाज्ञानक्रियाशक्तिमांश्च २० हिरण्यगर्भावस्थायां जगतः स्थितिं दृष्टान्तमाह प्रत्यूष इति प्रत्यूषः उषःकालः
२१ एवं लोकप्रसिद्धं दृष्टान्तमभिधाय यथा पीत इति सर्वोक्तश्लोके अभिहितं लाञ्छितपटं दृष्टान्तयति सर्वत इति यथा च घट्टितपटो म
षीमयैराकारविशेषैः लाञ्छितो भवति तथा मायिन ईश्वरस्य वपुः अपञ्चीकृतभूतकार्यैर्लिङ्गशरीरैर्लाञ्छितमित्यर्थः २२ बुद्ध्या
रोहावस्थायां दृष्टान्तमाह सस्यं वेति एवं सूत्रात्मस्वरूपं विशदीकृत्य तस्यैवावस्थाभेदं पञ्चीकृत्य भूतकार्योपाधिकं विराजं दृ
ष्टान्तत्रयेण विशदयति आतपेति सूर्योदयादनन्तरमातपेन प्रकाशितो लोक आतपाभातलोकः २४ ॥

तत्सद्भावे प्रमाणमाह विश्वरूपेति विश्वरूपाध्यायादौ कीदृग्रूपमुदितमित्याकांक्षायां धात्रादिस्तम्बपर्यन्तं जगद्रूपमुदितमित्याह धा
त्रादीति २०५ एतावता प्रकृते किमायातमित्याशंक्यान्तर्यामिप्रभृति कुद्दालकादिपर्यन्तं वस्तुजातं प्रत्येकमीश्वरत्वेन पूजितमित्याह
ईशेत्यादिना श्लोकत्रयेण ६।७।८ तद्यथा यथोपासते तदेव भवतीति श्रुतिः तत्तत्पूजातत्तत्फलसद्भावे प्रमाणमित्याह यथाय
थेति यथा यथोपासते तं फलमीयुस्तथा तथा फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः ४ मूले ननु सर्वेषामीश्वरत्वे फलवैषम्यं
कुत इत्याशंक्य पूज्यानामपि पिशाचानां पूजामर्चादीनां सात्त्विकादिभेदेन वैषम्यमित्याह फलोत्कर्षेति २०९ संसारिकफलसिद्धिरे

विश्वरूपाध्याय एषः उक्तः सूक्तेऽपि पौरुषे। धात्रादिस्तम्बपर्यन्तानेतस्यावयवान्विदुः २०५ ईश
सूत्रविराड्वेधो विष्णुरुद्रेन्द्रवह्नयः विघ्नभैरवमैरालमारिकायक्षराक्षसाः २०६ विप्रक्ष
त्रियविट्शूद्रा गवाश्वमृगपक्षिणः अश्वत्थवटचूताद्या यवव्रीहितृणादयः २०७ जल
पाषाणमृत्काष्ठवास्याकुद्दालकादयः ईश्वराः सर्व एवैते पूजिताः फलदायिनः २०८ मुक्ति
स्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा स्वप्रबोधं विना नैव स्वस्वप्नो हीयते यथा २१० अद्विती
ये ब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत् ईशजीवादिरूपेण चेतनाचेतनात्मकं २११ ॥

वं भवतु मुक्तिः वा सोपासनातो भवतीत्याशंक्य ज्ञाननिष्ठाव्यतिरेकेण न केनापि भवतीत्याह मुक्तिरिति तत्र दृष्टान्तमाह स्वप्रबोध
मिति स्वजागरणमन्तरेण स्वनिद्राकल्पितस्वप्नो यथा न निवर्तते तथा ब्रह्मतत्त्वज्ञानमन्तरेण तदज्ञानकल्पितस्य संसारो न निव
र्तते इति भावः २१० ननु द्वैतनिहद्विलक्षणया मुक्तेः स्वप्नदृष्टान्तेन तत्त्वोपसाध्यता मिथ्यात्वमनुपपन्नेति द्वयस्य द्वैतस्य स्वप्नतुल्य
त्वाभावादित्याशंक्यान्यथाग्रहणरूपत्वेन स्वप्नतुल्यत्वमस्त्येव त्वयमेतज्जाग्रत्स्वप्नं स्वप्नं मायामात्रमिति श्रुत्याभिहितत्वान्नैव
मित्याह अद्वितीयमिति ईशजीवादिरूपेण वर्तमानं चेतनाचेतनात्मकं यदखिलं जगदस्य यमद्वितीयब्रह्मतत्त्वे स्वप्न इति योजना २११

नन्वीशजीवयोर्ब्रह्माभिन्नयोः कथं जगदन्तःपातित्वमित्याशंक्य तयोर्मायाकल्पितत्वेन जगदन्तःपातित्वमित्याह आनंदमयेति ताभ्यां सर्वं प्रकल्पितमित्युक्तं तत्र केन कियत्कल्पितमित्याकांक्षायामाह ईक्षणादीति स ऐक्षत लोकान्नु सृजा इत्यादिकयाहारा प्रपद्यतेत्यन्तया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृका तस्य त्रय आवसथा इत्यादिकया स एतमेव पुरुषं ब्रह्म ततमपश्यदित्यन्तया प्रतिपादितः संसारो जीवकर्तृक इत्यर्थः ननु ईशजीवादिरूपेण चेतनाचेतनात्मकब्रह्मण एव पारमार्थिकेवादिनां जीवेश्वरतत्त्वविषया विप्रतिप

आनंदमयविज्ञानमयावीश्वरजीवकौ मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं १२ ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः १३ अद्वितीयब्रह्मतत्त्वमसंगं तन्न जानते जीवेशयोर्मायिकयोर्वृथैव कलहं ययुः १४ ज्ञात्वा सदा तत्त्वनिष्ठा ननु मोदामहे वयं अनुशोचाम एवान्यान्न भ्रान्तैर्विवदामहे १५ तृणार्चकादियोगान्ता ईश्वरे भ्रान्तिमाश्रिताः लोकायतादिसांख्यान्ता जीवे विभ्रान्तिमाश्रिताः १६ अद्वितीयब्रह्मतत्त्वं न जानन्ति यदा तदा भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखं १७ ॥

त्तिः कुत इत्याशंक्य भ्रान्तिसिद्धत्वतत्त्वज्ञानशून्यत्वादित्याह अद्वितीयमिति १४ जीवेश्वरविषयायवादिविप्रतिपत्तेरज्ञानमूलत्वेन यथाविषयं तत्त्वे तेवोपनीया इत्याशंक्य उपायाभावात्त्वित्याह ज्ञात्वेति १५ ईश्वरे जीवे भ्रान्त्या विप्रतिपन्ना एवादिनो विभज्य दर्शयति तृणार्चकादीति कुतो भ्रान्तित्वं तेषामित्यत आह अद्वितीयमिति ततः किं तत्राह तेषामिति परिगृहीतपक्षप्रतिपादनाभिनिवेशेन चित्तविक्षेपाभावा न्नैहिकसुखं तेषामित्याह क्वेह वा सुखं ७ ॥

ननु तेषां ब्रह्मविद्याभावेऽपि इतरविद्याप्रयुक्तमुक्तमायसमभावो दृश्यते अतउक्तमतत्प्रयुक्तं स्वविवेकेषां चित्स्यादित्याशंक्य तस्य मुमुक्षुभिरनादरणी
यत्वं दृष्टान्तेनाह उक्तमायमेति जीवेश्वरादयो मुमुक्षिः ईदृक्तत्त्वाभावान्मुमुक्षुभिर्ब्रह्ममतिर्निवेशनीयेत्युपसंहरति तस्मादिति तर्हि किं कर्तव्यमित्या
शंक्य तत्त्वविचारेण ब्रह्मबोध एव कर्तव्य इत्याह किंत्विति ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं हीयते न ज्ञातव्यमित्याशंक्य तत्त्वविचारेण ब्र
ह्मबोध एव कर्तव्य इत्याह किंत्वब्रह्मेति १९ ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं हीयते न ज्ञातव्यमित्याशंक्य तथात्वे जीवेशवादयोरेव बुद्धि
र्न समापनीयेत्याह पूर्वपक्षेति एतावता पूर्वपक्षतया तत्त्वनिश्चयहेतुत्वं संभवेन तयो जीवेशवादयोरवशो विवेकज्ञानसूक्ष्मो न निम
ज्जस्वेति योजना २० ननु सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन भवद्भिरप्युपादेयत्वात्तयोः पूर्वपक्षत्वमिति शंकते अ

उक्तमायसमभावश्चेत्तेषां स्यादस्ति तेन किं स्वमसाम्राज्यमिश्नाभ्यां न बुधः स्पृशते खलु १८ तस्मा
न्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः कार्या किंतु ब्रह्मतत्त्वं विचार्य बुध्यतां च तत् १९ पूर्वपक्ष
तया तौ चेत्तत्त्वनिश्चयहेतुताम् प्राप्नुतोऽस्तु निमज्जस्व तयोर्नैवावतावशः २० असंगचिद्वि
भुर्जीवः सांख्योक्तस्तादृगीश्वरः योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति चेन्न तत् २१ न तत्त्वमस्य संभा
वर्यावस्यास्तिहान्ततां गतौ अद्वैतबोधनायैव सा कक्षा काचिदिष्यते २२ अनादिमायया भ्रा
न्तौ जीवेशौ सुविलक्षणौ मन्यन्ते तद्व्युदासाय केवलं शोधनं तयोः २३ ॥

संगचिदिति सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेऽपि तयोर्वास्तवभेदस्यांगीकृतत्वात्तायमस्मास्ति हान्तं इत्याह न तत
त्त्वमोरिति तत्त्वंपदयोरुभावर्थावस्मत्सिद्धान्तत्वं न गतावितियोजना ननु कूटस्थब्रह्मशब्दाभ्यां शुद्धौ तत्त्वंपदार्थौ भिन्नौ भवद्भि
रपि निरूपितावित्याशंक्याह अद्वैतबोधनायैवेति लोकप्रसिद्धभेदनिराकरणद्वारा तदैक्यप्रतिपादनायैव तौ भेदानूदितौ न तत्त
योर्भेदः प्रतिपाद्यत इति भावः २२ तर्हि पदार्थशोधनं किमर्थमित्याह अनादीति अत्र मायाशब्देन स्वाश्रयव्यामोहिकाविद्या लक्ष्यते तया
विपरीतज्ञानप्राप्ताः कर्तृत्वादिमत्त्वं जीवस्य सर्वज्ञत्वादिगुणयोगित्वं चेश्वरस्य परमार्थिकं मन्यन्ते अतस्तन्निरासार्थं शोधनं क्रियत इति भा

॥ ५५ ॥

पदार्थशोधनप्रकारमेव दिदर्शयिषुस्तदुपायत्वेन स्वीकृतं दृष्टान्तं स्मारयति अत एवेति यतः पदार्थशोधनं कर्तव्यमत एवेत्यर्थः २४ पदा
र्थशोधनप्रकारमाह जलाभ्रेति जलाकाशाभ्रत्वेन जलाभ्रे उपाध्यधीनत्वादपारमार्थिके तयोराधारभूतौ घटाकाशमहाकाशौ तु निर्मलौ
जलाभ्रोपाधिनिरपेक्षाकाशमात्ररूपावित्यर्थः २५ दार्ष्टान्तिकमाह एवमिति ननु पदार्थद्वयशोधनकत्वोपयोगित्वेनापि सांख्ययोग
मतद्वयमंगीकार्यमिति चेदत्यल्पमिदमुच्यते इतरेषामपि शास्त्राणां तत्त्वकत्वोपयोगित्वेनास्माभिरभ्युपेयत्वादित्याह यत्तदिति जडत्व

अत एवात्र दृष्टान्तो योग्यः शाखामृगीरितः घटाकाशमहाकाशजलाकाशाभ्ररूपात्मकः २४ ज
लाभ्रे औपाध्यधीने ते जलाकाशाभ्रत्वेन तयोः आधारौ तु घटाकाशमहाकाशौ तु निर्मलौ २५ एव
मानन्दविज्ञानमयौ मायाधियोर्वशौ तदधिष्ठानकूटस्थब्रह्मणी तु सुनिर्मले २६ यत्तत्त्वकत्वो
पयोगि तेन सांख्ययोगमतौ यदि देहात्मयकत्वादात्मत्वेनाभ्युपेयताम् २७ आत्मभेदो ज
गत्सत्यमीशोऽन्य इति चेत्त्रयं त्यज्यते तैस्तदा सांख्ययोगवेदान्तसंमतिः २८ जीवोऽसंगत्वमात्रेण
कृतार्थ इति चेत्तदा स्रक्चन्दनादिनित्यत्वमात्रेणापि कृतार्थता २९ यथा स्रगादिनित्यत्वं दुःखदं त
द्वदात्मनः असंगत्वं न सम्भाव्यं जीवतो जगदीशयोः ३० अवश्यं प्रकृतिः संगं पुरेवापाद
येत्तथा नियच्छत्येनमीशोऽपि कोऽस्य मोक्षस्तथा सति ३१ ॥

हि सांख्ययोगपार्श्वैर्वेदान्तविरोधित्वमित्याशंक्य जीवभेदजगत्सत्यत्वेश्वरतटस्थलक्षणांशत्रयेत्याह आत्मभेद इति ननु जीवस्यासंग
त्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधेनेत्याशंक्याद्वैतज्ञानमन्तरेणासंगत्वादिकं न सम्भाव्यत इत्यभिसन्धिं हृदि निधायोत्तर
माह जीव इति अभिप्रायमाविष्करोति यथेति असम्भवमेव स्पष्टयति अवश्यमिति ३१ ॥

एवं सत्यपसिद्धान्तापात इति परिहरति बलादिति अयं भावः अविवेको नाम किं विवेकाभावः किं वा तदन्यः उत तद्विरोधी नाद्यः अभावमात्रस्य भा
वकार्यजनकत्वायोगात् न द्वितीयः विवेकादन्यस्य घटादेः संगहेतुत्वादर्शनात् तृतीये तत्स्वभावरूपाज्ञानमेवेति मायावादप्रसंग इति ३२
अद्वैतात्माभ्युपगमे बन्धमोक्षव्यवस्थानुपपत्तेरात्मभेदोंगीकर्तव्य इति चोदयति बन्धमोक्षेति एकस्यात्मनो मायया बन्धमोक्षव्यवस्थोप
पत्तेर्नैवमिति परिहरति नेति यत इति ३३ मायापि कथं व्यवस्थापयेदित्याशंक्य तस्या दुर्घटकारित्वस्वभावादित्याह दुर्घटमिति बन्धस्या
विद्यकत्वेऽपि मोक्षो वास्तवोऽभ्युपेतव्यः इत्याशंक्य श्रुतिविरोधान्नैवमित्याह वास्तवाविति न सहते तराम् अतितरां न सहते इत्यर्थः बन्ध
वन्मोक्षमपि वास्तवं न सहत इति भावः ३४ मोक्षादेर्वास्तवत्वप्रतिषेधिकां श्रुतिं पठति नेति निरोध इति निरोधो नाशः उत्पत्तिर्

अविवेककृतः संगो नियमश्चेति चेत्तदा बलादापतितो मायावादः सांख्यस्य दुर्मतेः ३२ बन्ध
मोक्षव्यवस्थार्थमात्मनानात्वमिष्यतां इति चेन्न यतो माया व्यवस्थापयितुं क्षमा ३३ दुर्घटं
घटयामीति विरुद्धं किं न पश्यसि वास्तवौ बन्धमोक्षौ तु श्रुतिर्न सहते तरां ३४ न निरोधो न
चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ३५ मायाख्यायाः कामधे
नोर्वत्सौ जीवेश्वरावुभौ यथेष्टं पिबतां द्वैतं तत्त्वमद्वैतमेव हि ३६ कूटस्थब्रह्मणोर्भेदो नाम
मात्रादृते न हि घटाकाशमहाकाशौ वियुज्येते न हि क्वचित् ३७ ॥

र्जन्म बद्धः लब्धबद्धत्वादिधर्मवान् साधकः श्रवणाद्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसंपन्नः ब्रह्मज्ञः मुक्तः निवृत्ताविद्यः इत्येवं सर्वं
वास्तवतो नास्तीत्यर्थः ३५ एवं जीवेश्वरादिभेदस्य मायामयत्वमुपपादितमुपसंहरति मायाख्याया इति ननु जीवेश्वरयोर्मायि
कत्वे न तद्भेदोऽपि पारमार्थिकः स्यादित्याशंक्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्नैवमिति परिहरति ३६ कूटस्थेति ना
ममात्रात् भेदप्रतीतावपि वस्तुतो भेदाभावे दृष्टान्तपूर्वार्धोक्तं स्मारयति घटाकाशेति एवं भेदस्य मिथ्यात्वसमर्थनेन किं फलमि
त्यत आह । ३७ ॥

तृप्तिप्रमादयइति किं मच्छुह्वाचोऽहंकारे दृश्यते उत मच्छब्दोपलक्षिते चिदात्मनीति विकल्प्याद्यमंगीकरोति मच्छुह्वाचइति नहितीयस्त्वस्य सं
गत्वाद्विषयत्वाच्चेति बाहिरेव दृश्यं ४९ वस्तुतस्तु तत्प्रतीत्यभावेऽपि भ्रान्त्या तत्प्रसक्तिः स्यादिति शंकते चिद्रूपेऽपीति एवं तर्हि तन्निवृत्त्यै हेतोरध्या
सस्य निवृत्तये सदा विवेकः क्रियतामित्याह मायासमिति ५० अनादिवासनावशात्पुनः पुनरध्यासागमे तन्निवृत्तये विवेकएवावर्त
नीयो नोपायान्तरमित्याह कूटेति ननु विचारेण द्वैतस्य मायामयत्वं प्रसक्त्येव सिद्ध्यति नानुभव इत्याशंक्या चिन्त्यरचनात्वलक्षणमिथ्या
त्वानुभवस्य स्वसाक्षिकत्वान्नैवमिति परिहरति विवेक इति ननु अचिन्त्यत्वे सत्यचिन्त्यरचनात्वं मिथ्यात्वलक्षणमिति विवक्षसि चिन्त्यरच
नात्वमात्मनोऽङ्गीकरोति न स्याद्विति एवमंगीकारे पक्षसिद्धान्तइत्याशंक्यापरिहरति नो वयमिति तत्र हेतुमाह हनित्यत्वेति ह्यचिन्त्यरचनांतो हम

तृप्तिप्रमादयोर्दृष्ट्या पूर्वं मयेति चेत् मच्छुह्वाचोऽहंकारे दृश्यमानेति को वदेत् ४९ चिद्रूपेऽपि
प्रसज्येरंस्तादात्म्याध्यासतो यदि मायासंज्ञः किं नु त्वं विवेके ज्ञः स सदा ५० कूटस्थिप्यासमाया
निवृत्त्यै वासनयेति चेत् आवर्तयेद्विवेकं च दृढवासनया नित्यं सदा ५१ विवेके द्वैतमिथ्यात्वं प्रसक्त्येव
तिन भण्यतां अचिन्त्यरचनात्वस्यानुभूतिर्हि स्वसाक्षिकी ५२ चिदप्यचिन्त्यरचना यदि तर्हि अस्तु नो
वयम् चितिं हि चिन्त्यरचनां ब्रूमो नित्यत्वकारणात् ५३ प्रागभावो नानुभूतश्चितेर्नित्यानतश्चि
तिः द्वैतस्य प्रागभावस्तु चैतन्येनानुभूयते ५४ ॥

इति द्वैमयोजना ५३ चितेर्नित्यत्वं ज्ञेयमित्याशंक्या यतश्चितेः प्रागभावो नानुभूतस्ततो नित्येति योजना इदमत्राकूतं चितेः प्रागभावोऽस्तिइतिवदन्तु
ष्टव्यः चित्प्रागभावः किं चितानुभूयते उतान्येन नान्येन तस्य जडत्वेनानुभवत्वानुपपत्तेः चितानुभूयते इत्यपि पक्षे किं चिदन्तरेण उत स्वेनैव
नाद्यः अद्वैतवादे चिदन्तरस्यैवाभावात् तत्स्वीकारेऽपि चित्प्रतियोगिकस्याभावस्य चिद्ग्रहणमन्तरेण ग्रहीतुमशक्यत्वात् तस्याप्युपपत्तेस्तस्माण
त्वेचरादिवदचित्त्वापत्तेः नापि द्वितीयः स्वभावस्य स्वेन ग्रहीतुमशक्यत्वादिति ननु द्वैतस्य प्रमात्रादिभेदरूपत्वात्तदभावस्य चैतन्येनैवानुभवित
मशक्यत्वादनुभवितुं नान्तराभावाच्चैतन्यवद्द्वैतस्यापि नित्यत्वापत्तिरित्याशंक्यानुभवितुं नान्तराभावोऽसिद्ध इति परिहरति द्वैतस्येति जाग्रदादि

द्वैताभावस्य हेतुभूतो साक्षिणो गम्यमानत्वात्तमसः साक्षी सर्वस्य साक्षीति श्रुतेश्चेति भावः ५४ एवं प्रागभावयुतत्वे सति अचिन्त्यरचनात्वस्य मिथ्या-
त्वलक्षणस्य सद्भावाद्द्वैतं मिथ्यात्वेन सिद्धमित्याह प्रागभावेति ५५ प्रागभावयुतमिति हेतुगर्भितं विशेषणं द्वैतं प्रागभावयुतत्वाद्घटादिवद्रज्यते
तथापि रज्यमानत्वेऽपि तस्य द्वैतस्य रचनाचिन्त्या तेन रज्यमानत्वे सत्यचिन्त्यरचनात्वेनेन्द्रजालवदैन्द्रजालिकप्रासादवन्मिथ्येत्यर्थः ५५ चितिस्ता
त्मनः प्रकाशत्वेन नित्यापरोक्षत्वाच्च भासते चिद्व्यतिरिक्तस्य च मिथ्यात्वं तयैव चितानुभूयते इति दर्शितं एवं च सत्यद्वैतस्यापरोक्षत्वं नास्तीति वदतो वा-
दिनः प्रसादित्याह चित्प्रत्यक्षेति चिद्रूपेण भासनादित्यभिहितयुक्तिसद्भावार्थः अपरोक्षो ऽद्वैतमपरोक्षं चेत्तत्कथं न व्याहतं चेति योजना ५६ एवं
वेदान्तार्थज्ञानवतामपि पुरुषाणां केषांचिद्द्वैतविश्वासः कुतो न जायत इति पृच्छति इत्थमिति सम्यग्विचारशून्यत्वादिति चिद्वत्तु प्रतिबन्दीग्रहणं

प्रागभावयुतं द्वैतं रज्यते हि घटादिवत् तथापि रचनाचिन्त्या मिथ्या तेनेन्द्रजालवत् ५५ चित्प्रत्यक्षा ततो
ऽस्य मिथ्यात्वं चानुभूयते नाद्वैतमपरोक्षं चेत्र चित्त्वान्न व्याहतं कथं ५६ इत्थं ज्ञात्वाप्यसंतुष्टः केचित्कुत इती-
र्यतां चार्वाकादेः प्रबुद्धस्याप्यात्मा देहः कुतो वद ५७ सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा प्रस-
न्तुष्टाश्च शिष्टार्थं तत्त्वदन्तविशेषतः ५८ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः इति श्रौतफलं दृष्टं
नेति चेद्दृष्टमेव तत् ५९ ॥

ति चार्वाकादेरिति आदिशब्देनापरापरग्रहणं ते ५७ प्रबुद्धस्योहापोहकुशलस्य प्रतिबन्दीमोचनं शं-
कते सम्यगपीति साम्येनं समाधत्ते तथेति धीदोषादित्यनुषज्यते तस्मादस्य प्रवृत्तार्थः ५८ इत्थं तत्त्वं विचार्य तज्जन्यतत्त्वज्ञानफलं विचारयितुं त-
त्प्रतिपादिकां श्रुतिं पठति यदेति अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य मन्त्रस्योत्तरार्धं अस्य मुमुक्षोर्हृदि स्थिताः ये कामास्तादात्म्याध्या-
समूला इच्छादयः सन्ति ते सर्वे यदा यस्मिन्काले प्रमुच्यन्ते तत्त्वज्ञानेन तथा सन्निहन्तो अथ तदानीमेव मर्त्यः पूर्वं देहतादात्म्याध्यासेन मरणशीलः
पुरुषः अमृतः अध्यासाभावेन तद्रहितो भवति तत्र हेतुमाह अत्र ब्रह्म समश्नुत इति अत्रास्मिन्नेव देहे ब्रह्मसम्पादिलक्षणं समश्नुते
सम्यगाप्नोतीत्यस्याः श्रुतेरर्थः कृत्याप्रतिपादितं फलं कामनिवृत्त्यादिलक्षणं नानुभवसिद्धं किंतु शाब्दमेव श्रूयत इति श्रौतमिति स-
म्मतेऽस्मिन् श्रुतिवाक्यतात्पर्यालोचनया तस्य दृष्टत्वसिद्धत्वमित्यभिप्रायेण परिहरति दृष्टमेवतदिति ५९ ॥

यदद्वैतमिति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेति श्रुतौ यदद्वितीयं ब्रह्म प्रतिपादितं तदेव कालत्रयेऽप्यबाध्यत्वेन वास्तवं
न भेद इति भावः उत तस्माद्धि सर्वैर्भेदेऽभिनिवेशः क्रियत इत्यत आह वृथा मायेति तत्त्वज्ञानरहितत्वादभिनिवेशं कुर्वन्तीति भावः ३८
ननु प्रपंचस्य मायामयत्वं तत्त्वस्याद्वितीयत्वं च ये वर्णयन्ति तेऽपि संसारान्नोद्धृयन्ते तस्मात् ज्ञानेन किं प्रयोजनमित्याशंक्य ते ये वदन्ती
ति कर्मवशात्केषांचिद्व्यवहारे सत्यपि सर्ववदभिनिवेशाभावान्मैवमिति परिहरति नयथेति ३९ ज्ञानिनां भ्रान्त्यभावं दर्शयित्वा म
ज्ञानिनां निश्चयं तावदाह इहलोके भवं ऐहिकः पुत्रकलत्रादिपोषणरूपः अमुष्मिन्परलोके भवमामुष्मिकः स्वर्गसुखादिप्राप्तिभव
रूपः ४० तत्त्वज्ञानविषयस्य तत्त्वलक्षणं प्रदर्शयति अद्वैतं पारमार्थिकं भाति च संसारस्त्वपारमार्थिक इति निश्चय इत्यर्थः ततः कि

यदद्वैतं श्रुतं सृष्टेः प्राक्तदेवाद्य चोपरि मुक्तावपि वृथा माया भ्रामयत्यखिलाञ्जनान् ३८ ये वदन्ती
त्थमेतेऽपि भ्राम्यन्तेऽविद्ययात्र किं न यथापूर्वमेतेषामत्र भ्रान्तेरदर्शनात् ३९ ऐहिकामुष्मिकः सर्वः
संसारो वास्तवस्तथा न भाति नास्ति चाद्वैतमित्यज्ञाने विनिश्चयः ४० नाद्वैतमपरोक्षं चेन्न चिद्रूपेण
भासनात् अशेषेण न भानं चेद्द्वैतं किं भासतेऽखिलं ४१ दिङ्मात्रेण विभानं तु द्वयोरपि समं खलु
द्वैतसिद्धिवदद्वैतसिद्धिस्तावता न किं ४२ ॥

मित्याशंक्य तस्य निश्चयानुसारेण फलं भवतीत्याह तस्यैवेति ४१ अद्वैतं भातीत्युक्तिः शास्त्रत एव न त्वनुभवतो न निश्चय इत्याशंक्यते नाद्वै
तमिति अनुभवागोचरत्वमसिद्धमिति परिहरति न चिद्रूपेणेति घटः स्फुरति पटः स्फुरतीति घटादिष्वनुस्यूतस्फुरणरूपेण भानादि
त्यर्थः ननु चिद्रूपस्य भानेऽपि तत्कार्त्स्न्येन न प्रतीयत इत्याशंक्यते अशेषेणेति साकल्येन भानाभावो द्वैतेऽपि समान इत्याह द्वैतं किं ४२
एवं दोषसाम्यमभिधाय परिहारसाम्यमाह दिङ्मात्रेणेति दिङ्मात्रेणैकदेशेन द्वैताद्वैतयोरित्यर्थः एतावता कथं परिहारसाम्यमित्या
शंक्याह द्वैतसिद्धिवदिति तेन त्वत्पक्षे तावन्मात्रैकदेशप्रतीतिसद्भावेन द्वैतसिद्धिवद्द्वैतनिश्चयवदद्वैतसिद्धिरद्वैतनिश्चयोऽपि किं न भव

पूर्ववादी प्रकारान्तरेणाद्वैतसिद्धिं शंकते द्वैतेनहीनमिति अद्वैतं द्वैतरहितं तयोः परस्परविरोधात्तथा सति द्वैतप्रतीतावद्वैतं न संभवतीत्यर्थः ननु तर्हि द्वैतस्याप्यद्वैतविरोधाद्द्वैतप्रतिभासमाने द्वैतस्यासिद्धिरिति चोद्यं समानमित्याशंक्याह पूर्ववादी चिद्ज्ञाने चिति भवन्मते चिद्रूपप्रतीते रेवाद्वैतप्रतीतित्वान्न स्याच्च द्वैतविरोधित्वाभावान्नोभयोः साम्यमिति भावः ५४ प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावाद्वास्तवाद्वैतविघातित्वमिति परिहरति सिद्धान्ती एवमिति असत्प्रतिषेधेऽन्यत्राप्रसंगाद्विष्यमाणोऽसंप्रत्ययः परिशेषः ५५ परिशेषप्रकारमेव दर्शयति अचिन्त्येति न चिन्त्या अचिन्त्यारचनारूपं यस्य तत्तथाविधं सकलजगन्मायैवमिष्टवेत्यनेन प्रकारेणानिर्वचनीयत्वान्निश्चित्य द्वैतस्य

द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदं चिद्ज्ञानं त्वविरोध्यस्य द्वैतस्यातो समञ्जसे ५४ एवं तर्हि शृणु द्वैतमसन्मायामयत्वतः तेन वास्तवमद्वैतं परिशेषाद्विभासते ५५ अचिन्त्यरचनारूपं मायैव सकलं जगत् इति निश्चित्य वस्तुत्वमद्वैते परिशिष्यताम् ५६ पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं तथा पुनः परिशीलय को वात्र प्रयासस्तेन ते वद ५७ कियन्तं कालमिति चेत्खेदो यं द्वैत इष्यतां अद्वैतेन न युक्तोऽयं सर्वानर्थविचारणात् ५८ ॥

निश्चित्य वास्तवमद्वैतं परिशिष्यतामित्यर्थः ५६ नन्वेवमद्वैतनिश्चयेऽकृतेऽपि पुनः पुनर्द्वैतसत्यत्वं सर्ववासनया भातीत्याशंक्य तन्निवृत्तये पुनः पुनरभिध्यानं विचारयेदित्याह पुनर्द्वैतस्येति आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये प्रथमपादारम्भे आत्मनो वा सेन श्रवणाद्यावर्तनस्य विहितत्वादिति भावः ५७ कियन्तं कालमित्थं विचारणीयमित्याशंक्य तत्रापरोक्षविद्यामो विचारोयं समाप्यत इति विचारकालावधेरुक्तत्वाद्द्वैतविचारोऽयं खेदो युक्तः किं तु द्वैतप्रतिभास एव सम्प्रयुक्त इत्याह कियन्तमिति नन्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवत्यपि मय्यपि क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादनर्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति शंकते ५८

तस्य स्पष्टत्वस्पष्टीकरणाय तद्वाक्यमुदाहृत्य तदर्थमाह यदा सर्वे इति अनेन वाक्यशेषेण कामप्रमोचकस्य ग्रन्थिभेदत्वेन व्याख्यानत्वाद्ग्रन्थिभेदस्य चा
हंकारचिदात्मनोस्तादात्म्याध्यासं इति हृत्तिलक्षणस्यानुभवसिद्धत्वान्नात्रस्पष्टत्वेतिभावः वाक्यशेषतः इत्यनेन वाक्येनेत्यर्थः ८० ननु लोके कामशब्देने
च्छाभेदस्य बोध्यते तत्कथं तस्य ग्रन्थित्वेन व्याख्यानमित्याशंक्य व्याध्यासमूलस्यैवेच्छाविशेषस्य कामशब्दवाच्यत्वं नेच्छामात्रस्येत्याह अहंकारेति ८१
तद्व्याध्यासमूलस्यैव कामस्य त्याज्यत्वे सतीतरोऽभ्युपेतव्यः स्यादित्याशंक्याबाधकत्वादभ्युपेयत्वमेवेत्याह अप्रवेश्येति अहंकारचिदात्मानम
प्रवेश्य तादात्म्याध्यासेनाननुभाव्येत्यर्थः ८२ तत्त्वध्यासाभावे कामानामनुदय एव स्यादित्याशंक्याहंकर्मवशान्नेषामुत्पत्तिः संभवतीत्या

यदा सर्वे प्रभिद्यन्ते हृदयग्रन्थयस्त्विति कामा ग्रन्थिस्वरूपेण व्याख्याता वाक्यशेषतः ८० अ
हंकारचिदात्मानावेकीकृत्याविवेकजः इदं मे स्यादिदं मे स्यादितीच्छा कामशब्दिता ८१ अप्रवेश्य
चिदात्मानं पृथक्पश्यन्नहंकृतिं इच्छंस्तु कोटिवस्तूनि न बाधो ग्रन्थिभेदतः ८२ ग्रन्थिभेदेऽपि संभा
व्या इच्छाः प्रारब्धदोषतः बुद्ध्वापि पापबाहुल्यादसन्तोषो यथा तव ८३ अहंकारगतेच्छाद्यैर्देह
व्याध्यादिभिस्तथा वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत् ८४ ग्रन्थिभेदात्पुराप्येवमिति चे
त्तन्न विस्मर अयमेव ग्रन्थिभेदस्तव तेन कृती भवान् नैवं जानन्ति मूढाश्चेत्सोऽयं ग्रन्थिर्न चापरः ग्र
न्थितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः ८६ ॥

ह ग्रन्थिभेदेपीति तत्र दृष्टान्तमाह बुद्ध्वापीति ८३ अध्यासाभावे हंकारगतेच्छादेरबाधकत्वे दृष्टान्तद्वयप्रदर्शनेन विशदयति अहंकारेति ८४ य
थादेहगतव्याध्यादिभिरहंकारासाक्षिणो बाधो नास्ति देहस्य स्वत्वदहितत्वात् यथा वृक्षादिगतजन्मादिभिरेवमध्यासनिवृत्तावहंकारगतेच्छा
दिभिरपीतिभावः ८४ चिदात्मनोसंगत्वस्यैकरूपत्वात्पूर्वमपि कामादिबाधो नास्तीति शंकते ग्रन्थिभेदादिति एवं विधस्यैव ग्रन्थिभेदत्वेना
स्माभिरभिधीयमानत्वादिदं बोधस्य मस्मदनुकूलमित्याह तन्न विस्मरेति ८५ एवं विधज्ञानाभाव एव ग्रन्थिरित्याह नैवमिति ननु ज्ञानिनो
पीच्छाभ्युपगमे ज्ञान्यज्ञानिनोः उभयोरपि लक्षणमित्याशंक्य ग्रन्थिभेदाभेदातिरेकेण न उभयोरपीत्याह ग्रन्थितद्भेदेति ८६ ॥

कारणान्तराभावमेव विशदयति प्रवृत्ताविति उक्तार्थे दृष्टान्तमाह भ्रान्तेति ज्ञानिनो ग्रंथिभित्त्वं गीतावाक्यं प्रमाणयति न द्वेष्टीति संप्रवृत्तानि ज्ञात्वा निःदुःखानि न द्वेष्टि निवृत्तानि सुखानि न कांक्षति उदासीनवदवर्तनत इत्यर्थः ग्रंथिभिदा ग्रंथिभेदः ८९ इदं वाक्यमौदासीन्यविधिपरं न तु ग्रंथिभेदप्रमाणमिति शंकते औदासीन्यमिति विधिपरत्वे वच्छब्दो व्यर्थः स्यादिति परिहरति वच्छब्देति ज्ञानिदेहादेरकार्यक्षमत्वात् प्रवृत्तिर्न तु ग्रंथिभेदादित्याशंक्योपहसति न शक्ता इति ९० भवतु को दोषस्तत्राह तत्त्वबोधमिति दुःशाकमसाध्यमित्यर्थः ९१ नन्वस्या नेयपरिहारो यो ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादिति शंकते भरतादेरिति श्रुतिमजानानस्यो दयमिति परिहरति जक्षन्निति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा

प्रवृत्तौ वा निवृत्तौ वा देहेन्द्रियमनोधियां न किंचिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः ८७ भ्रान्त श्रोत्रिययोर्वेदपाठापाठकृता भिदा नाहारादावस्ति भेदः सोऽन्यायो त्र योज्यताम् ८८ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति उदासीनवदासीन इति ग्रंथिभिदोच्यते ८९ औदासीन्यं वि धेयं चेद्वच्छब्दव्यर्थता तदा न शक्ता अस्य देहाद्या इति चेद्रोग एव सः ९० तत्त्वबोधं महाव्या धिमन्यन्ते ये महाधियः तेषां प्रज्ञातिविशदा किं तेषां दुःशकं वद ९१ भरतादेरप्रवृत्तिः पुरा णोक्तेति चेन्ननु जक्षन् क्रीडन् रतिं विन्दन्नित्यश्रौषीर्न किं श्रुतिम् ९२ न ह्याहारादि संत्यज्य भ रतादेः स्थितिः क्वचित् काष्ठपाषाणवत्किन्तु संगभीता उदासते ९३ संगी हि बाध्यते लोके निःसं गः सुखमश्नुते तेन संगः परित्याज्यः सर्वदा सुखमिच्छता ९४

यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति श्रौतं वाक्यं नाश्रौषीरित्यर्थः जक्षन् भक्षयन् जक्षन् हसन् योषिद्भिः क्रीडन्नेच्छया विहरन् रममाणः स्त्र्यादिभिर्नोपजनं स्मरन्निदं शरीरमिति जनानां समीपे वर्तमानमिदं शरीरं न स्मरन् नानुसन्धान इत्यर्थः श्लोके रतिं विन्दन्नि तिश्रौतस्य रममाण इति पदस्य व्याख्यानं ९२ ननु तर्हि पुराणस्य का गतिरित्याशंक्य पुराणं वैौदासीन्यबोधपरं न प्रवृत्त्यभावपरमित्यभिप्रेत्या ह नह्याहारादीति संगोपि जत स्यात्तत्राह संगी हीति ननु तर्हि मानससंगस्यैव त्याज्यत्वेन्नः संगशून्यानां बहिर्व्यवहारं नाम ज्ञात्वादिकं जनैः क

अज्ञात्वेति अतो मूढव्यवहारो नात्र विचारणीय इत्याह मूर्खाणामिति तर्हि किमनुसंधेयमित्याकांक्षायां शास्त्रहृदयमित्याह अस्मत्सिद्धान्त इति को
ऽसावित्यत आह वैराग्येति वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनादभेदाशंकायां तद्धेत्वादीनां भेदाद्भेदो वक्तव्य इत्याह हेतुरूपेति ७६
तत्र वैराग्यस्य हेत्वादि त्रयं दर्शयति दोषदृष्टिरिति इदानीं तत्त्वबोधस्य कारणादीनि दर्शयति श्रवणादीति आदिशब्देन मनननिदिध्यासने
दृष्टेते आत्मा वारे दृष्टव्यः श्रोतव्यो निदिध्यासितव्यः इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधानाच्छ्रवणादेस्तत्त्वहेतुत्वं तत्त्वमिथ्याविवे
चनम् कूटस्थस्याहंकारेण अभेदज्ञानं ग्रन्थेरनुदयोऽन्योन्याध्यासानुत्पत्तिः ७९ उपरतेस्तानि दर्शयति यमादिरिति आदिशब्देन निय

अज्ञात्वा शास्त्रहृदयं मूढो वक्त्यन्यथान्यथा मूर्खाणां निर्णयस्त्वास्तामस्मत्सिद्धान्त उच्यते ७५ वैराग्य
बोधोपरमाः सहायास्ते परस्परं प्रायेण सह वर्तन्ते वियुज्यन्ते क्वचित्क्वचित् ७६ हेतुस्वरूपकार्याणि
भिन्नान्येषामसंकरः यथावदवगन्तव्यः शास्त्रार्थं प्रविविच्यता ७७ दोषदृष्टिर्जिहासा च पुनर्भोगे
ष्वदीनता असाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी ७८ श्रवणादित्रयं तद्वत्तत्त्वमिथ्याविवेचनं पुन
र्ग्रन्थेरनुदयो बोधस्यैते त्रयो मताः ७९ यमादिर्धीनिरोधश्च व्यवहारस्य संक्षयः स्युर्हेत्वाद्या उपरतेरि
त्यसंकर ईरितः ८० तत्त्वबोधः प्रधानः स्यात्साक्षान्मोक्षप्रदत्वतः बोधोपकारिणावेतौ वैराग्योपर
मावुभौ ८१ प्रायेण सह वर्तन्ते वियुज्यन्ते क्वचित्क्वचित् त्रयोऽप्यत्यन्तपक्वाश्चेन्महतस्तपसः फलं दुरि

मादयो गृह्यन्ते धीनिरोधश्चित्तवृत्तिनिरोधलक्षणो योगः ८० किमेतेषां समप्राधान्यमुत नेत्याशंक्याह तत्त्वबोध इति तमेव विदित्वातिमृत्युमेति
नान्यः पन्था विद्यतेऽयनायेति श्रुतेरित्यर्थः इतरयोस्तदुपकारित्वं ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिभ्यामवगम्यते ८१ तत्र कारणमाह त्रयोऽपीति अनेकजन्मार्जि
तपुण्यपुंजपरिपाके त्रयाणां सहभावो भवति अन्यथा तत्प्रतिबन्धकपापानुसारेण पुरुषविशेषकालविशेषेण कस्यचित्क्वचिदेवं योऽभव
तीति भावः ८२ तत्रापि तत्त्वज्ञानप्रतिबन्धो मोक्षो नास्तीत्याह वैराग्येति तर्हि वैराग्यादिसम्पादनं निष्फलमित्याशंक्य ॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इति भगवद्वचनात्पुण्यलोकप्राप्तिर्भवतीत्याह पुण्यलोकस्तपोबला
दिति ८३ वैराग्योपरमयोरुत्कर्षे सति बोधे जीवन्मुक्तिसुखं न सिद्ध्यतीत्याह पूर्णे बोध इति इदानीं वैराग्यादीनामवधिं दर्शयति ब्रह्मलोकेति सुप्तिवद्विस्मृतिः
सीमा भवेदुपरमस्य हि दिशानया विनिश्चेयं तारतम्यमवान्तरं स्थूलमिति ८६ अवान्तरतारतम्यं स्वस्वबुद्ध्या विनिश्चेयमित्याह दिशेति ८६ ननु तत्त्वबो
धवतामपि रागादिमत्त्वेन वैषम्योपलम्भात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यत इत्याशङ्क्य रागादेर्भ्यासादिवदारब्धकर्मफलत्वान्मुक्तिप्रतिबंधक

वैराग्योपरमे पूर्णो बोधस्तु प्रतिबध्यते यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् ८३ पूर्णे
बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ८४ ब्रह्मलोकतृ
णीकारो वैराग्यस्यावधिर्मतः देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते ८५ सुप्तिवद्विस्मृतिः
सीमा भवेदुपरमस्य हि दिशानया विनिश्चेयं तारतम्यमवान्तरं ८६ आरब्धकर्मनानात्वाद्बुद्धा
नामन्यथान्यथा वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पण्डितैः ८७ स्वस्वकर्मानुसारेण वर्तन्तां ते यथा
तथा अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः ८८ जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पि
तं मायया तदुपेक्ष्यैव चैतन्यं परिशिष्यते ८९ चित्रदीपमिमं नित्यं येऽनुसन्दधते बुधाः पश्य
न्तोऽपि जगच्चित्रं ते न मुह्यन्ति पूर्ववत् ९० इति श्रीमत्परमहंसपरिव्राजकाचार्यविरचिते चित्रदी
पप्रकरणं षष्ठम् ६ ॥

त्वमसिद्धमतो न शास्त्रार्थे विप्रतिपत्तव्यमित्याह आरब्धकर्मनानात्वादिति किं तर्हि प्रतिपत्तव्यमित्यत आह स्वस्वेति सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाका
रं निरवद्यब्रह्मरूपेणावस्थानं च समानमिति भावः ८८ प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति जगदिति ग्रंथाभ्यासफलमाह चित्रदीपमिति ९० इति
मत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यशिष्येण रामकृष्णाख्येन विदुषा विरचितं तात्पर्यबोधिनीनामकं चित्रदीपव्याख्यानं षष्ठं

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः १ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते तृप्तिदी
पस्य व्याख्यानं गुर्वनुग्रहात् २ तृप्तिदीपाख्यं प्रकरणमारभमाणः श्रीभारतीतीर्थगुरुस्तस्य श्रुतिव्याख्यानरूपत्वाद्व्याख्येयां श्रुतिमादौ
पठति आत्मानं चेद्विजानीयादिति १ इदानीं चिकीर्षितस्य ग्रंथस्य विचारं तत्फलं विवरं लवदर्शयति अस्या इति अत्र तृप्तिदीपाख्ये ग्रं
थे अस्या आत्मानं चेद्विजानीयादित्यादिकायाः श्रुतेरभिप्रायस्तात्पर्यं सम्यग्विचार्यते तेनाभिप्रायविचारेण जीवन्मुक्तस्य तृप्तिः प्रसिद्धा
या तृप्तिः सा विशदायते स्पष्टीभवतीति २ पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणमि
ति व्याख्यानलक्षणस्योक्तत्वात् पुरुष इति पदार्थमभिधातुं तदुपोद्घातत्वेन स्पष्टसंगतिं प्रदर्शयति मायाभासेनेति प्रतिपाद्यमर्थं

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् १
अस्याः श्रुतेरभिप्रायः सम्यगत्र विचार्यते जीवन्मुक्तस्य या तृप्तिः सा तेन विशदायते २ माया
भासेन जीवेशौ करोतीति श्रुतत्वतः कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितं ३ ॥

उद्देशसंगत्यन्तदर्थमर्थांतरवर्णनमुपोद्घातः अत्र मायाशब्देन चिदानंदमयब्रह्मप्रतिबिंबसंमन्विता सत्त्वरजस्तमोगुणात्मिका जगदुपा
दानभूता प्रकृतिरुच्यते सा च सत्त्वगुणस्य शुद्ध्यशुद्धिभ्यां द्विधा विद्यमाना क्रमेण माया चाविद्या च भवति तयोर्मायाविद्ययोः प्रतिबि
बितं ब्रह्म चैतन्यमेवेश्वरो जीवश्चोच्यते तदिदं तत्त्वविवेकाख्ये ग्रंथे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं चिदानंदमयब्रह्मप्रतिबिंबस
मन्विता तमोरजः सत्त्वगुणा प्रकृतिर्द्विविधा च सा सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ई
श्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवानिति इदमेवार्थं मनसि निधाय जीवेशा
वाभासेन करोतीति माया चाविद्या च स्वयमेव भवतीति श्रुतिरपि प्रवृत्ता अजो जीवेश्वरयोर्मायाकल्पितत्वं मन्यमानस्तज्जगताभ्यां

पंचदशी ७ ॥

तत्रकेनकिंपरुकल्पितमित्यतआह ईक्षणादीति तदैक्षतबहुस्यांप्रजायेयेतिश्रुतं ईक्षणमादिर्यस्याःसाईक्षणादिः अनेनजीवेनात्मनानु
प्रविश्येतिश्रुतःप्रवेशोंतोयस्याःसाप्रवेशांताईक्षणादिश्चासौप्रवेशांताचेतिपश्चात्कर्मधारयःसेयंसृष्टिरीशेनकल्पिताजाग्रदादिर्यस्य
संसारस्यासौजाग्रदादिः विमोक्षोमुक्तिरंतोयस्यसविमोक्षांतः संसारोजीवेनकल्पितः तदभिमानित्वाज्जीवस्येत्यर्थः तेचजाग्रदादयश्च
त्यंश्रूयंते सएवमायापरिमोहितात्माशरीरमास्थायकरोतिसर्वं स्त्र्यन्नपानादिविचित्रभोगैः सएवजाग्रत्परितृप्तिमेति स्वप्नेसजीवः
सुखदुःखभोक्तास्वमाययाकल्पितविश्वलोकेसुषुप्तिकालेसकलेविलीनेतमोऽभिभूतःसुखरूपमेति पुनश्चजन्मांतरकर्मयोगात्सएव
जीवःस्वपितिप्रबुद्धःपुरत्रयेक्रीडतियश्चजीवस्ततस्तुजातंसकलंविचित्रम् जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचंयत्प्रकाशते तद्ब्रह्माह

ईक्षणादिप्रवेशांतासृष्टिरीशेनकल्पिता जाग्रदादिविमोक्षांतःसंसारोजीवकल्पितः ४
भ्रमाधिष्ठानभूतात्माकूटस्थासंगचिद्वपुः अन्योन्याध्यासतोऽसंगधीस्थजीवोऽत्रपूरुषः ५

मितिज्ञात्वासर्वबंधैःप्रमुच्यते ४ एवंपुरुषशब्दार्थावबोधोपयोगिनींसृष्टिमभिधायेदानींपुरुषशब्दार्थमाह भ्रमाधिष्ठाने
ति यःकूटस्थासंगचिद्वपुः अविकार्यसंगचित्स्वरूपःभ्रमाधिष्ठानभूतात्माभ्रमस्यदेहेंद्रियाद्यध्यासस्याधिष्ठानभूतःअधिष्ठा
नत्वेनवर्तमानःपरमात्मास्तिसोऽसंगएव अन्योन्याध्यासतः अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चेत्याचार्यैर्निरूपि
तेनतादात्म्याध्यासेनासंगधीस्थजीवःस्वेनपारमार्थिकसंबंधशून्यायांबुद्धौवर्तमानोजीवःसन् अत्रास्मिञ्छास्त्रेपुरुषइत्युच्यते स
वाअयंपुरुषः सर्वासुपूर्षुशयतेइतिश्रुत्यापुरुषशब्दस्यव्युत्पादितत्वात्पुरुषस्यैवचपुरुषत्वात्पुरुषएवपुरुषःबुद्ध्यादिकल्प
नाधिष्ठानंकूटस्थचैतन्यमेवबुद्धौप्रतिबिंबितत्वेनप्राप्तजीवभावंसत्पुरुषशब्देनोच्यतइत्यभिप्रायः ५ ॥

61

नत्वत्रपुरुषशब्देनकेवलचिदाभासरूपोजीवःप्रोच्यते॥ किमनेनकूटस्थचैतन्येनाधिष्ठानभूतेनैकतांप्राप्तः तस्यमोक्षाऽपत्तपितृत्वसिद्धयेतदपि स्वीकर्तव्यमित्याह साधिष्ठानइति साधिष्ठानेनकूटस्थचैतन्येनसहितोजीवोविमोक्षादौमोक्षस्वर्गादिसाधनानुष्ठानेऽधिक्रियते अधिकारीभवति नतुकेवलश्चिदाभासः कुतः अत्राह निरधिष्ठानेति अधिष्ठानरहितस्यारोप्यस्यलोकेऽदृष्टत्वादितिभावः ४ इदानींसाधिष्ठानस्यैवतस्यसंसारासंसारित्वेश्लोकद्वयेनविभज्यदर्शयति अधिष्ठानांशेति जीवोयदाअधिष्ठानांशसंयुक्तंकूटस्थसहितंभ्रमांशंचिदाभासोपेतं शरीरद्वयमवलंबतेस्वस्वरूपत्वेनस्वीकरोति तदाहंसंसारीत्येवमभिमन्यते ५ यदापुनर्भ्रमांशस्यदेहद्वयस

साधिष्ठानोविमोक्षादौजीवोऽधिक्रियतेनतु केवलोनिरधिष्ठानविभ्रान्तेःक्वाप्यसिद्धितः ४ अ
धिष्ठानांशसंयुक्तंभ्रमांशमवलंबते यदातदाहंसंसारीत्येवंजीवोऽभिमन्यते ५ भ्रमांशस्य
तिरस्कारादधिष्ठानप्रधानता यदातदाचिदात्माहमसंगोऽस्मीतिबुध्यते ६ नासंगेऽहंकृ
तिर्युक्ताकथमस्मीतिचेच्छृणु एकोमुख्योद्वावमुख्यावित्यर्थस्त्रिविधोऽहमः ७ ॥

हितस्यचिदाभासस्यतिरस्कारान्मिथ्यात्वज्ञानेनानादरणात् अधिष्ठानप्रधानता अधिष्ठानभूतस्यैवकूटस्थस्यस्वरूपत्वेजीवेनस्वी क्रियते यदातदाहंचिदात्माअसंगश्चास्मीतिबुध्यतेजानाति ६ नत्वधिष्ठानचैतन्यस्यजीवस्वरूपत्वस्वीकारेचिदात्माहमसंगोऽस्मी तिबुध्यतइति यदुक्तं तदनुपपन्नंस्यादसंगत्विरूपस्यकूटस्थस्याहंप्रत्ययविषयत्वाभावादितिशंकते नासंगेऽहमिति असं गेचिदात्मनि अविषयेऽहंप्रत्ययोनयुज्यतेयतोऽतस्तत्कथमस्मीतिजातीयात्तत्कथमयीत्यर्थः प्रत्ययाहंत्वाहंप्रत्ययावि षयत्वाभावेऽपिलक्षणयातदंगीतिविवक्षरहंशब्दार्थंत्रैतावद्विभजते शृण्विति अहंशब्दस्य ७ ॥

कीदृशो मुख्यार्थ इत्याकांक्षायां तं दर्शयति अन्योन्याध्यासेति कूटस्थचिदाभासयोः स्वरूपमन्योन्याध्यासेनैकं प्राप्तमहंशब्दस्य वाच्यत्वेन मु
ख्यार्थो भवति अस्य कुतो मुख्यत्वमित्यत आह तत्र मूढैरिति यत इत्यध्याहारः तत्र तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतो विवेक
ज्ञानशून्यैः सर्वैरप्यहंशब्दः प्रयुज्यतेऽतोऽस्य मुख्यत्वमित्यर्थः १० इदानीममुख्यौ द्वौ दर्शयति पृथगाभासे[illegible]ति आभासकूटस्थौ प्रत्येक
महंशब्दार्थत्वेन यदा विवक्षितौ तदाऽमुख्यार्थौ भवतः अनयोरमुख्यत्वे कारणमाह तत्र तत्त्वविदिति अत्रापि यत इत्यध्याहारः तत्र
विविक्ते तयोः कूटस्थचिदाभासयोरहंशब्दं लोके लौकिके वैदिके च व्यवहारे पर्यायेण प्रयुङ्क्त इति योजना अयं भावः चिदाभास

अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः एकीभूय भवेन्मुख्यस्तत्र मूढैः प्रयुज्यते १० पृथ
गाभासकूटस्थावमुख्यौ तत्र तत्त्ववित् पर्यायेण प्रयुङ्क्तेऽहंशब्दं लोके च वैदिके ११ लौकिके
व्यवहारेऽहं गच्छामीत्यादिके बुधः विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति १२ असंगोऽहं
चिदात्माहमिति शास्त्रीयदृष्टितः अहंशब्दं प्रयुङ्क्तेऽयं कूटस्थे केवले बुधः १३ ॥

कूटस्थयोरविविक्तरूपस्य सर्वजनीनव्यवहारविषयत्वात् मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयजनैः कदाचिदेव व्यवह्रियमाणत्वा
त् अमुख्यार्थत्वमिति ११ पर्यायेण प्रयुङ्क्त इत्युक्तमेवार्थं प्रपंचयति प्रतिपत्तिसौकर्याय श्लोकद्वयेन लौकिके व्यवहार इति बुधो
विद्वानहं गच्छामीत्यादिके लौकिकव्यवहारे कूटस्थाच्चिदाभासं विविच्य तमेवाहंशब्देन विवक्षति वक्तुमिच्छति १२ अयमेव बुधः
शास्त्रीयदृष्टितो वेदान्तश्रवणजनिततत्त्वज्ञानेन केवले चिदाभासाद्विविक्ते कूटस्थे असंगोऽहं चिदात्माहमिति लक्षणयाऽहंशब्दं प्रयुङ्क्ते
अतो लक्षणयाऽहंशब्दार्थत्वेनाहंप्रत्ययविषयत्वसंभवादसंगोऽहमस्मीति ज्ञानमुपपद्यत इत्यभिप्रायः १३ ॥

ननु पृथगाभासकूटस्थावहंशब्दस्यार्थौ विभक्तौ तयोर्मध्ये कूटस्थः किमज्ञाननिवृत्तयेऽसंगोस्मीति जानाति किं वा चिदाभासः तत्रा
वत्कूटस्थस्य तस्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः अतश्चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा च सति कूटस्थादन्यश्चिदा
भासोहं कूटस्थोस्मीति न ज्ञातुमर्हतीति शंकते ज्ञानिताज्ञानिते इति १४ तस्य कूटस्थादन्यत्वमेवासिद्धमिति परिहरति नायं दोषश्चि
दाभास इति दोषाभावे १ तत्रोपपत्तिमाह आभासत्वस्येति यथा दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेव तत्त्वं तद्व
दिति भावः १५ ननु चिदाभासस्य मिथ्यात्वे चिदाभासाश्रितं कूटस्थोस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते कूटस्थोस्मीती

ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः तथा च कथमाभासः कूटस्थोस्मीति बुध्यते १४
नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान् आभासत्वस्य मिथ्यात्वात्कूटस्थत्वावशेषणात् १५
कूटस्थोस्मीति बोधोपि मिथ्या चेन्नेति को वदेत् नहि सत्यतयाभीष्टं रज्जुसर्पविसर्पणम् १६
तादृशेनापि बोधेन संसारो विनिवर्तते यक्षानुरूपो हि बलिरित्याहुर्लौकिका जनाः १७ ॥

ति कूटस्थस्वरूपादतिरिक्तस्य कृत्स्नस्यापि मिथ्यात्वाभ्युपगमाज्ज्ञानमिथ्यात्वमस्माकमिष्टमेवेति परिहरति नेति को वदेदिति
उक्तार्थे दृष्टान्तेन स्पष्टयति नहि सत्यतयेति रज्जौ कल्पितस्य सर्पस्य गमनादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा त
द्वदिति भावः १६ ज्ञानस्य मिथ्यात्वे तेन संसारस्य निवृत्तिर्न स्यादित्याशंक्य तन्निवर्त्यस्य संसारस्यापि तन्मिथ्यात्वात्तथात्वात्तन्नि
वृत्तिरुपपद्यते स्वप्नव्याघ्रदर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह तादृशेनेति तत्र यादृशो यक्षस्तादृशो बलिरिति
लौकिकगाथां संवादयति यक्षानुरूप इति १७ ॥

उपपादितमर्थमुपसंहरति तस्मादाभासइति यस्मात्कूटस्थ एव चिदाभासस्य निजं स्वरूपं तस्मात्पुरुषशब्दवाच्यः कूटस्थसहितश्चिदाभासस्तं कूटस्थं मिथ्याभूतात्स्वस्माद्विविच्य लक्षणया कूटस्थोहमस्मीत्यवगन्तुं शक्नोतीत्यभिप्रायेण श्रुतिरस्मीत्युक्तवतीत्यर्थः १८ एवं ब्रह्मास्मीति पदद्वयप्रयोगाभिप्रायमभिधायायमिति पदप्रयोगाभिप्रायमाह असन्दिग्धेति लौकिकानां प्रसिद्धदेहरूप आत्मनि संशयविपर्ययरहितो यमस्मीति बोधो यद्वदुपलभ्यते अत्र प्रत्यगात्मनि विषये तद्वत् तथाविधं ज्ञानं मुक्तिसिद्धये संपाद्यमिति निर्णीतमयमित्यभिधीयते श्रुत्येति शेषः १९ ईदृशस्यैव बोधस्य मोक्षसाधनत्वे आचार्यवाक्यं संवादयति देहात्मज्ञानेति यथाहं मनुष्य इति देहात्म

तस्मादाभासपुरुषः सकूटस्थो विविच्यते कूटस्थोस्मीति विज्ञानमर्हतीत्यभ्यधाच्छ्रुतिः १८ असन्दिग्धाऽविपर्यस्तबोधो देहात्मनीष्यते तद्वदत्रेति निर्णीतमयमित्यभिधीयते १९ देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते २० अयमित्यपरोक्षत्वमुच्यते चेत्तदुच्यतां स्वयंप्रकाशचैतन्यमपरोक्षं सदा यतः २१ ॥

विषयो दृढप्रत्ययो यथायवं प्रत्यगात्मन्येव देह एवात्मेत्येवं देहात्मज्ञानापवाधनेन ब्रह्माहमस्मीति ज्ञानं यस्य जायते स विद्वान् इच्छत्यपि मोक्षेच्छारहितोपि मुच्यते संसारहेतोरज्ञानस्य ज्ञानेन बाधितत्वादिति भावः २० अयमिति पदप्रयोगस्याभिप्रायान्तरं शङ्कते अयमितीति यथायं घट इत्यादिप्रयोगेष्विदमा निर्दिष्टस्य वस्तुन अपरोक्षत्वं दृष्टं तथायमस्मीत्यत्रापीति भावः तदप्यस्माकमिष्टमेवेत्याह तदुच्यतामिति कुत इत्यत आह स्वयमिति साधनान्तरनिरपेक्षतयाऽवभासमानचैतन्यं व्यवधायकाभावात् आत्मन अपरोक्षत्वमपि स्वापरोक्षमित्यस्माभिरभ्युपेतत्वादित्यर्थः २१ ॥

नन्वात्मनः स्वप्रकाशचिद्रूपत्वेन नित्यापरोक्षत्वाभ्युपगमेऽप्यस्मीति पदप्रयोगस्याभिप्रायवर्णितांगीकारबलादागतमात्मनः परोक्षविषयत्वमप
रोक्षविषयत्वं सर्वांकं ज्ञानाज्ञानाश्रयविषयत्वं चानुपपन्नं स्यादित्याशंक्य दशमस्येव सर्वमुपपद्यत इत्याह परोक्षमिति परोक्षविष
यत्वमपरोक्षविषयत्वं चेत्येकं युगलं ज्ञानमज्ञानमित्यपरं इदं द्वयं नित्यापरोक्षरूपेप्यात्मनि दशमस्येव स्यादित्यर्थः २२ दृष्टान्तं व्यु
त्पादयति नवसंख्येति परिगणनीयपुरुषान्दृष्ट्या नवसंख्ययापहृतविवेकज्ञानो दशमस्तदा तान्परिगणनीयान्नवसंख्या
कान् वीक्षमाणोपि सम्यक्पश्यन्नपि भ्रान्त्या गणनाकर्तारं स्वात्मानं दशमोहमस्मीति न वेत्तीत्यर्थः २३ एवं दशमेऽज्ञानं प्रदर्श्य

परोक्षमपरोक्षं च ज्ञानमज्ञानमित्यदः नित्यापरोक्षरूपेपि द्वयं स्याद्दशमे यथा २२ नवसं
ख्याहृतज्ञानो दशमो विभ्रमात्तदा न वेत्ति दशमोस्मीति वीक्षमाणोपि तान्नव २३ न भाति
नास्ति दशम इति स्वं दशमं तदा मत्वा वक्ति तदज्ञानकृतमावरणं विदुः २४ नद्यां ममार द
शम इति शोचन्प्ररोदिति अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः २५ न मृतो दशमोस्तीति
श्रुत्वाप्तवचनं तदा परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् २६ त्वमेव दशमोसीति गण
यित्वा प्रदर्शितः अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति २७ ॥

तत्कार्यमावरणं दर्शयति न भातीति तदा दशमः स्वं दशमं सन्तं दशमो न भाति नास्तीति मत्वा वक्ति अस्य व्यवहारस्य यत्कारणं त
दज्ञानकृतमज्ञानकार्यमावरणं विदुर्बुधा इति शेषः २४ अज्ञानस्यैव कार्यविशेषं विक्षेपं दर्शयति नद्यामिति २५ दशमस्या
सत्वांशनिवर्तकं परोक्षज्ञानमाह न मृतो दशम इति २६ तस्यैवाभासत्वांशनिवर्तकमपरोक्षज्ञानं दर्शयति त्वमेवेति स्व
नपरिगणितैर्नवभिः सह स्वात्मानं गणयित्वा त्वमेव दशमोसीति प्रदर्शितः अहं दशमोस्मीति अपरोक्षतया ज्ञात्वा हर्षं
प्राप्नोति रोदनं च त्यजति २७ ॥

एवं दृष्टान्तभूते दशमे प्रदर्शितमवस्थासप्तकमनूद्य दार्ष्टान्तिके आत्मन्यपि तत्‌योजनीयमित्याह अज्ञानमावृतीति अज्ञानं चावृतिश्च
विक्षेपश्च द्विविधं ज्ञानं च तृप्तिश्चेति द्वन्द्वसमासः २८ तत्रात्मन्यज्ञानादिकं क्रमेण दर्शयति संसारासक्तेत्यादिना अयं चिदाभासो विष
यसंपादनायासक्तचित्तः सन्कदाचन श्रुतिविचारात्पूर्वं कदापि स्वतत्त्वं स्वस्य निजं रूपं स्वप्रकाशचिद्रूपं कूटस्थं प्रत्यगात्मानं नैव वेत्ति
न जानातीत्ययमज्ञानं २९ चिदात्मविषये प्रसंगे जाते कूटस्थो नास्ति न भातीति मत्वा ब्रूते इदमज्ञानकार्यमावरणं कूटस्थासत्वा
भानाभिधानवत्कर्तृत्वादिकमात्मन्यारोपयति अस्यारोपस्य हेतुर्देहद्वयप्रयुक्तश्चिदाभासो विक्षेपः ३० परोक्षबोधितः कूटस्थोऽस्ती

अज्ञानमावृतिर्विक्षेपद्विविधं ज्ञानमप्यथः शोकापगम इत्येते योजनीयाश्चिदात्मनि २८ सं
सारासक्तचित्तः सन् चिदाभासः कदाचन स्वयंप्रकाशकूटस्थं स्वतत्त्वं नैव वेत्त्ययं २९ न भाति
नास्ति कूटस्थ इति वक्ति प्रसंगतः कर्ता भोक्ताहमस्मीति विक्षेपं प्रतिपद्यते ३० अस्ति कूटस्थ
इत्यादौ परोक्षं वेत्ति वार्तया पश्चात्कूटस्थ एवास्मीत्येवं वेत्ति विचारतः ३१ कर्ता भोक्तेत्येवमा
दि शोकजातं प्रमुञ्चति कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तुष्यति अज्ञानमावृतिस्तद्वद्विक्षे
पश्च परोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशा ३३ ॥

ति जानातीदं परोक्षज्ञानं श्रवणादिपरिपाकवशात्कूटस्थोऽहमेवास्मीति जानाति इदमपरोक्षज्ञानं ३१ कूटस्थासंगात्म
ज्ञानानन्तरं कर्तृत्वादिकं शोकजातं त्यजति यदयं शोकापगमः कृत्यं कर्तव्यजातं कृतं निष्पादितं प्रापणीयं फलजातं प्रा
मलब्धमिति तुष्यतीयं तृप्तिरित्यर्थः ३२ दार्ष्टान्तिके उक्तमवस्थासप्तकमन्ववदति अज्ञानमावृतीति ३३ ॥

64

नन्वुक्तावस्थासप्तकस्यात्मधर्मत्वांगीकारेऽस्य कूटस्थत्वं व्याहन्येतेत्याशंक्य ताः सप्तावस्थाश्चिदाभासस्यैव न कूटस्थस्येत्याह सप्ताव
स्था इति सर्ववाक्यं सावधारणमिति न्यायेन चिदाभासस्यैव न कूटस्थस्येत्यवगम्यते आसामसंगे द्वौ प्रत्यासोह्येत्याशंक्य न ह्यावंधमो
क्षकारित्वयोर्न फलत्वादुपन्यासस्येत्यभिप्रायेणाह तास्विमाविति किमासां सप्तानामप्यविशेषेण बंधमोक्षकारित्वेनेत्याह तत्रे
ति अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः आसां बंधकारित्वदर्शनाय तिसृणामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टीचिकीर्षुर
ज्ञानस्य स्वरूपं तावद्दर्शयति न जानामीति आत्मतत्वविचारप्रागभावसहितमुदासीनव्यवहारस्य कारणं न जानामीत्यनुभूय
मानमज्ञानमीरितमित्यर्थः ३५ आवृतिकार्यं दर्शयति अमार्गेणेति शास्त्रोक्तप्रकारमतिलंघ्य केवलतर्केण विचार्यानंतरं कूट

सप्तावस्था इमाः संति चिदाभासस्य तास्विमौ बंधमोक्षौ स्थितौ तत्र तिस्रो बंधकृतः स्मृताः ३४
न जानामीत्युदासीनव्यवहारस्य कारणं विचारप्रागभावेन युक्तमज्ञानमीरितं ३५ अमा
र्गेण विचार्याथ नास्ति नो भाति चेत्यसौ विपरीतव्यवहृतिरावृतेः कार्यमिष्यते ३६ देहद्व
यचिदाभासरूपो विक्षेप ईरितः कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बंधकः ३७ अज्ञा
नमावृतिश्चैते विक्षेपात्प्राक्प्रसिद्धितः यद्यप्यथाप्यवस्थैते विक्षेपस्यैव नात्मनः ३८ ॥

सो नास्ति न भातीत्येवंरूपो विपरीतव्यवहारश्चावरणकार्यमित्यर्थः ३६ विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति देहद्वयेति स्थूलसूक्ष्मा
ख्यशरीरद्वयसहितश्चिदाभास एव विक्षेपो बंधको बंधहेतुः संसाराख्यः कर्तृत्वाद्यखिलः शोकः अस्य चिदाभासस्य कार्यमिति शे
षः कर्तृत्वादि इत्यादिशब्देन प्रमातृत्वादयो गृह्यन्ते ३७ ननु सप्तावस्थाश्चिदाभासस्येत्युक्तमनुपपन्नं अज्ञानावरणयोर्विक्षेपोत्प
त्तेः पुरा स्थितत्वाच्चिदाभासस्य च विक्षेपांतःपातित्वात्तदवस्थात्वानुपपत्तेरित्याशंक्याह अज्ञानमिति अनयोर्विक्षेपात्प्राक् पुरा स्थित
त्वेपि नात्मावस्थात्वं तस्यासंगत्वेनावस्थावत्त्वानुपपत्तेः अतः पारिशेष्याच्चिदाभासावस्थात्वमेव तयोर्वक्तव्यमिति भावः ३८ ॥

पं॰ टी॰
त॰ त्रि॰
६५

अवस्थावतो विक्षेपस्य तदानीमभावात् तदवस्थात्वाभिधानमनुपपन्नमित्याशंक्य विक्षेपाभावेऽपि तत्संस्कारस्य तदानीं
सत्त्वाद्विक्षेपावस्थात्वाभिधानं न विरुध्यत इत्याह विक्षेपोत्पत्तित इति ततः कारणात् अनयोस्तदवस्थात्ववर्णनमविरु
द्धमिति योजना ४९ नन्वप्रसिद्धसंस्काराभ्युपगमद्वारा विक्षेपावस्थात्ववर्णनाद्वरमधिष्ठानतयाप्रसिद्धब्रह्माव
स्थात्ववर्णनमित्याशंक्यातिप्रसंगान्मैवमिति परिहरति ब्रह्मणीति ५० ननु ब्रह्मण्यारोपितत्वाविशेषेऽपि विक्षेपो
त्पत्त्युत्तरकालभाविनीनां संसारित्वाद्यवस्थानां जीवाश्रितत्वेनानुभूयमानत्वात् ब्रह्मावस्थात्वमिति शंकते संसारीति सं

65

विक्षेपोत्पत्तितः पूर्वमपि विक्षेपसंस्कृतिः अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ४९ ब्र
ह्मण्यारोपितत्वेन ब्रह्मावस्थे इमे इति न शंकनीयं सर्वासां ब्रह्मण्येवाधिरोपणात् ५०
संसार्यहं विबुद्धोऽहं निःशोकस्तुष्ट इत्यपि जीवगा उत्तरावस्था भान्ति न ब्रह्मगा यदि ५१
तर्ह्यज्ञोऽहं ब्रह्मसत्त्वभाने मद्दृष्टितो न हि इति पूर्वे अवस्थे च भासेते जीवगे खलु ५२ अज्ञा
नस्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुः जीवावस्थात्वमज्ञानाभिमानित्वादवादिषं ५३

सारीकर्तृत्वादिधर्मवान् विबुद्धः स्वस्वरूपसाक्षात्कारवान् निःशोकः शोकरहितः तुष्टो वक्ष्यमाणकृतकृत्यत्वादिजनितसन्तोषवा
नहमस्मीति उत्तरावस्था जीवगा जीवाश्रिता भान्ति न ब्रह्माश्रिता इत्यर्थः ५१ उत्तरावस्थानां जीवाश्रितत्वे पूर्वतत्त्वज्ञानावर
णयोरपि जीवाश्रितत्वेनानुभूयमानत्वात् जीवावस्थात्वमेवेति परिहरति तर्हीति मद्दृष्टितो ममानुभवेनेत्यर्थः ५२ ननु त
दज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्य तद्विवक्षां दर्शयति अज्ञानस्येति ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षया
तदाश्रयत्वमुक्तमित्यर्थः भवद्भिस्तर्हि किंविवक्षया जीवावस्थात्वमुक्तमित्याशंक्य स्वविवक्षां दर्शयति जीवाव.... स्थेति

एवं बंधहेतुमवस्थात्रयं प्रदर्श्याथ शिष्टावस्थाद्वयमध्ये पूर्वां ज्ञानाज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शयति ज्ञानद्वयेने ति परोक्षापरोक्षलक्षणेन ज्ञानद्वयेनावरणकारणेऽज्ञाने नष्टे सति तत्कृता हृति तेनाज्ञानेनोत्पादिते न भाति नास्तीति व्यवहारका रणं द्विविधमप्यावरणं कारणाभावादपसरति ४४ कस्मात्कस्य केन निवृत्तिरित्यपेक्षायामुभयं विभज्य दर्शयति परोक्षेति कूटस्थो नास्तीत्येवंरूपात्परोक्षज्ञानाद् ज्ञानस्यासत्त्वावरणकारणत्वं निवर्तते कूटस्थो भासते इत्यपरोक्षज्ञानेन कूटस्थो न भातीत्येवंरूपावरण कारणत्वं निवर्तते ४५ इदानीं ज्ञानस्य फलरूपावस्थाद्वये प्रथमावस्थाफलमाह अभानेति अभानावरणे निवृत्ते शोकापगमो द्वितीयमा

ज्ञानद्वयेन नष्टेऽस्मिन् भ्रान्ते तत्कृतासृतिः न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ४४ परोक्ष ज्ञानतो नश्येदसत्त्वावृतिहेतुता अपरोक्षज्ञाननाश्या ह्यभानावृतिहेतुता ४५ अभानावरणे नष्टे जीवत्वारोपसंक्षयात् कर्तृत्वाद्यखिलः शोकः संसाराख्यो निवर्तते ४६ निवृत्ते सर्वसंसा रे नित्यमुक्तत्वभासनात् निरंकुशा भवेत्तृप्तिः पुनः शोकासमुद्भवात् ४७ अपरोक्षज्ञानशो कनिवृत्त्याख्ये उभे इमे अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिः ४८ ॥

नस्य जीवत्वस्यापि निवृत्तत्वात् तन्निमित्तकः कर्तृत्वादिलक्षणः संसाराख्यः शोकः सर्वोऽपि निवर्तत इत्यर्थः ४६ एवं शोकापगम रूपामवस्थां प्रदर्श्य निरंकुशतृप्तिलक्षणां द्वितीयां दर्शयति निवृत्त इति ४७ नन्वात्मानं चेद्विजानीयादिति मंत्रव्याख्याने प्रवृ त्तत्वात् द्विहायमध्ये ज्ञानाद्यवस्थासप्तकनिरूपणं प्रकृतासंगतमित्याशंक्यात्मानं चेदित्यस्याः श्रुतेः तात्पर्यमिति रूपणशेष त्वेनाभिहितत्वान्न प्रकृतासंगतमित्यभिप्रेत्य श्रुतितात्पर्यमाह अपरोक्षेति चिदाभासनिष्ठं यदवस्थासप्तकमस्ति तत्रापरो क्षज्ञानशोकनिवृत्तिलक्षणमवस्थाद्वयं प्रतिपादयितुमयं मंत्रः प्रवृत्त इत्यभिप्रायः ४८ ॥

पं॰टी॰
तृ॰दी॰
६६

नन्वयमित्यपरोक्षत्वमित्यत्रायमितिपदेनात्मनोऽपरोक्षत्वमुच्यत इत्युक्तं तथा सति अपरोक्षज्ञानविषयत्वमेव स्यान्न परोक्षज्ञानविषयत्वमित्याशङ्क्य तदुपपादनाया परोक्षज्ञानं विभज्यते अयमितीति द्वैविध्यकारणमाह विषयस्वप्रकाशत्वादिति विषयस्य चिद्रूपस्यात्मनः स्वप्रकाशत्वात्तद्व्यवहारे साधनान्तरनिरपेक्षत्वाद्धिया बुद्ध्याप्येवं स्वप्रकाशत्वेन तदीक्षणात्तस्य विषयस्यात्मनोऽवलोकनाच्चेत्यर्थः ४९ भवतु द्वैविध्यमेतावता परोक्षज्ञानविषयत्वे किमायातमित्याशङ्क्य विषयस्वप्रकाशत्वे परोक्षज्ञानविषयत्वविरोधी न भवतीत्याह परोक्षज्ञानकाल इति अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेऽपि विषयस्वप्र

66

अयमित्यपरोक्षत्वमुक्तं तद्द्विविधं भवेत् विषयस्वप्रकाशत्वाद्धियाप्येवं तदीक्षणात् ४९
परोक्षज्ञानकालेऽपि विषयस्वप्रकाशता समा ब्रह्म स्वप्रकाशमस्तीत्येवं विबोधनात् ५०
अहं ब्रह्मेत्यनुल्लिख्य ब्रह्मास्तीत्येवमुल्लिखेत् परोक्षज्ञानमेतन्न भ्रान्तं बाधानिरूपणात् ५१
ब्रह्म नास्तीति मानं चेत्स्याद्बाध्येत तदा ध्रुवं न चैवं प्रबलं मानं पश्यामोऽतो न बाध्यते ५२
व्यक्त्यनुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि भ्रान्तिः स्याद्व्यक्त्यनुल्लेखात्सामान्योल्लेखदर्शनात्
५३ ॥

क्षणः स्वप्रकाशतास्त्येव तत्रोपपत्तिमाह ब्रह्म स्वप्रकाशमस्तीति ५० प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कुतः परोक्षत्वमित्याशङ्क्य ब्रह्मांशस्याऽग्रहणादित्याह अहमिति नन्विदं भ्रान्तमित्याशङ्क्यास्य भ्रान्तत्वं किं बाध्यत्वादुत व्यक्त्यनुल्लेखादथवाऽपरोक्षेणाग्रहणयोग्यस्यापारोक्षेणाग्रहणात् यद्वांऽशस्याऽग्रहणादिति च तत्राद्यं विकल्पं प्रथमं प्रत्याह एतन्न भ्रान्तमिति ५१ हेतुं विवृणोति ब्रह्म नास्तीति ५१ हेतुं विवृणोति ब्रह्म नास्तीति ५२ द्वितीयमतिप्रसङ्गेन दूषयति व्यक्त्यनुल्लेखेति अयं स्वर्ग इत्येवमाकारेण ग्रहणाभावात् किन्तु स्वर्गोऽस्तीत्येवं सामान्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसङ्ग इत्यर्थः ५३ ॥

त्तीयं निराकरोति अपरोक्षत्वेति अपरोक्षत्वेन ग्रहणयोग्यस्य प्रत्यगभिन्नब्रह्मविषयस्य परोक्षज्ञानस्य भ्रमत्वं न संभवति कुत इत्यत
आह परोक्षमिति ब्रह्म परोक्षमित्येवमाकारेण ग्रहणाभावात् कुतस्तस्य परोक्षत्वमित्याशंक्याह अर्थादिति पारोक्ष्येति इदं ब्रह्मेत्येवंव
त्युल्लेखाभावसामर्थ्यात्परोक्षत्वसिद्धिरिति भावः अथ चरममाशंकते अंशेति ब्रह्मांशाग्रहणेऽपि प्रत्यगंशाग्रहणाद्भ्रमत्वमित्य
र्थः एवं तर्हि घटादिज्ञानस्यापि भ्रमत्वप्रसंग इति परिहरति घटज्ञानमिति आन्तरावयवानामग्रहणादिति भावः ननु घटस्य
सावयवत्वादंशाग्रहणेऽपि ब्रह्मणो निरंशत्वात्कथमंशाग्रहणसंभवः इत्याशंक्य व्यावर्त्यांशोपाधिनिमि
त्तकं सांशकत्वं तस्य संभवतीत्याह निरंशेति ५५ कौतो व्यावर्त्यांशा इत्याकांक्षायामाह असत्त्वांश इति ५६ अपरोक्षत्वेन

अपरोक्षत्वयोग्यस्य न परोक्षमतिर्भ्रमः परोक्षमित्यनुल्लेखादर्थात्पारोक्ष्यसंभवात् ५४
अंशाऽग्रहीतेर्भ्रान्तिश्चेद्घटज्ञाने भ्रमो भवेत् निरंशस्यापि सांशत्वं व्यावर्त्यांशविभेदतः ५५ अ
सत्त्वांशो निवर्तेत परोक्षज्ञानतस्तथा अभानांशनिवृत्तिः स्यादपरोक्षधिया कृता ५६ दशमो
ऽस्तीत्यविभ्रान्तं परोक्षज्ञानमीक्ष्यते ब्रह्मास्तीत्यपि तद्वत्स्यादज्ञानावरणं समम् ५७ आत्मा ब्र
ह्मेति वाक्यार्थे निःशेषेण विचारिते व्यक्तिरुल्लिख्यते यद्वद्दशमस्त्वमसीत्यतः ५८ ॥

ग्रहणयोग्यविषयं परोक्षज्ञानं भ्रमो न भवतीत्येतत् दृष्टान्तप्रदर्शनेनापि द्रढयति दशम इति दशमोऽस्तीत्याप्तवाक्यजन्यपरो
क्षज्ञानमभ्रान्तं यथा ब्रह्मास्तीति वाक्यजन्यज्ञानमपि तद्वदभ्रान्तं स्यादज्ञानकृतस्यासत्त्वावरणांशस्य समत्वादिति भावः ५७
ननु वाक्यात्परोक्षज्ञानमुत्पद्यते चेदपरोक्षज्ञानं कुतो जायत इत्याशंक्य विचारसहिताद्वाक्यादेवेत्याह आत्मेति अयमात्मा
ब्रह्मेति महावाक्यार्थे सम्यग्विचार्यमाणे हर्वमस्मीति परोक्षतयाऽवगतस्य ब्रह्मणः प्रत्यगभिन्नत्वे साक्षात्क्रियते तत्र दृष्टान्तः
यद्वद्दशम इति दशमस्त्वमसीत्यतो वाक्यात्स्वात्मनि दशमत्वं यथा साक्षात्क्रियते तद्वदित्यर्थः ५८ ॥

पंच॰
टी॰
६७

विचारसहकृतेन वाक्येनापरोक्षज्ञानोत्पत्तिप्रकारं सदृष्टान्तमाह दशम इति त्वयासीतिनिरूपितो दशमः क इति प्रश्ने कृते तेन त्वमेवेति परिहारेऽभिहिते स्वात्मना सह तेन गणयित्वाहं दशमोऽस्मीति स्वमेव दशमं स्मरेदित्यर्थः ५९ अस्य दशमोऽस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वात् विपर्ययादि रूपतेत्याह दशमोऽस्मीति अस्य दशमस्य त्वमेव दशमोऽसीति वाक्यात्परिगणनादिलक्षणविचारसहितादुत्पन्नाहं दशमोऽस्मीति बुद्धिर्न विहन्यते न केनापि ज्ञानेन बाध्यते परिगणनक्रियायां च नवानामादिमध्यावसानेषु परिगणनेऽपि अहं दशमो न वेति संशयश्च न भवेदतः साक्षाद्दशमापरोक्षरूपेत्यर्थः ६० एतं दार्ष्टान्तिके योजयति सदेवेत्यादीति द्वाभ्याम् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिवाक्येन ब्रह्मसद्भावं प्रथमं नि

दशमः क इति प्रश्ने त्वमेवेति निराकृते गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत् ५९ दशमोऽस्मीति वाक्योत्था न धीरस्य विहन्यते आदिमध्यावसानेषु न नवत्वस्य संशयः ६० सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः गृहीत्वा तत्त्वमस्यादिवाक्याद्व्यक्तिं समुल्लिखेत् ६१ आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियम् नैव व्यभिचरेत्तस्मादपरोक्षं प्रतिष्ठितं ६२ जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा पारोक्ष्येण गृहीत्वाथ विचाराद्व्यक्तिमैक्षत ६३ ॥

श्चित्य तस्य जीवरूपेण स्वप्रवेशादियुक्तिपर्यालोचनया प्रत्यग्रूपत्वं संभाव्य तत्त्वमसीत्यादिवाक्येनाद्वितीयब्रह्मरूपमात्मानमहं ब्रह्मास्मीति साक्षात्कुर्यात् ६१ अनेन इयमात्मनो ब्रह्मत्वबुद्धिः पञ्चानां कोशानामादिमध्यावसानेष्वात्मनो व्यवहारेऽपि नैवान्यथा भवति अतोऽस्या बुद्धेरपरोक्षज्ञानत्वं सुस्थितमित्यर्थः ६२ नन्वेवं प्रथमतः केवलवाक्यात्परोक्षज्ञानमुत्पद्यते पश्चाद्विचारसहितादपरोक्षज्ञानमित्येतत्कुतोऽवगम्यत इत्याशङ्क्य तैत्तरीयकादिश्रुत्यर्थपर्यालोचनयेत्याह जन्मादीति भृगुर्नामापि कश्चिदृषिः पुरा यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्योक्तेन जगज्जन्मादिकारणत्वाख्यलक्षणेन जगत्कारणं ब्रह्म परोक्षतयावगम्यान्नमयादिपञ्चकोशविचाराद्व्यक्तिं प्रत्यगात्मनो रूपं ब्रह्म दृष्टवानित्यर्थः

॥ ७ ॥

ननु अस्मिन् प्रकरणे ब्रह्मासीत्येवमाद्युपदेशकवाक्याभावात् कथं भृगोरात्मतत्त्वसाक्षात्कार इत्याशंक्यात्मसाक्षात्कारहेतुविचार
योग्यस्थलदर्शनादित्याह यद्यपीति ९४ नन्वन्नमयादिकोशेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मणस्तु कथमित्याशंक्य
प्रतीच एव ब्रह्मत्वात्पंचकोशविचारेणानन्दात्मप्रत्यक्साक्षात्कस्य आनंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति
आनंदं प्रयंत्यभिसंविशंतीत्येवं ब्रह्मलक्षणमपि प्रतीच्येव योजितवानित्याह अन्नप्राणादिकोशेष्विति ९५ ननु ब्रह्मलक्ष
णस्यानंदात्मकरूपेण प्रतीचि योजनं न घटते ब्रह्मणस्तद्रूपत्वेन प्रतीचो भिन्नत्वादित्याशंक्य न भेदः सत्यादिलक्षणस्य ब्रह्मणः
प्रत्यग्रूपेणावस्थानश्रवणादित्याह सत्यं ज्ञानमनंतमिति सत्यं ज्ञानमनंतं ब्रह्मेत्येवं ब्रह्मस्वलक्षणं ब्रह्मणः स्वरूपलक्ष

यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता तथाप्यन्नं प्राणमिति विचार्यस्थलमुक्तवान् ९४
अन्नप्राणादिकोशेषु सुविचार्य पुनः पुनः आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्ष्ममयूयुजत् ९५
सत्यं ज्ञानमनंतं चेत्येवं ब्रह्मस्वलक्षणं उक्त्वा गुहाहितत्वेन कोशेष्वेतत्प्रदर्शितं ९६ पारो
क्ष्येण विबुध्येंद्रो य आत्मेत्यादिलक्षणात् अपरोक्षीकर्तुमिच्छंश्चतुर्वारं गुरुं ययौ ९७ ॥

णमभिधाय यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन वाक्येन पंचकोशगुहायामवस्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः
९६ एवं तैत्तिरीयश्रुतिपर्यालोचनया भृगोः परोक्षज्ञानपूर्वकविचारजन्यत्वं साक्षात्कारस्य दर्शयित्वा छांदोग्यश्रुतिपर्यायालोच
नेनापि तद्दर्शयति पारोक्ष्येणेति य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्य
संकल्प इत्यादिवाक्यप्रतिपादितेन लक्षणेनात्मानं परोक्षतयावगम्य विचाराच्छरीरत्रयनिराकरणेन तत्त्वसाक्षात्कर
णाय गुरुं ब्रह्माणं चतुर्वारमुपसन्न इति छांदोग्योपनिषद्यष्टमाध्याये श्रूयते ९७ ॥

इदानीमैतरेयकश्रुतावपि तद्दर्शयति आत्मा वा इदमिति आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषदित्यनेन वाक्येन ब्रह्मणो
लक्षणमभिधाय स ईक्षत लोकान्नु सृजा इत्युपक्रम्य तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथोऽयमावसथ इत्यनेन परमात्मनि ज
गदध्यारोपणप्रकारमभिधाय स जातो भूतान्यभिव्यैख्यत्किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय स एतमे
व पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति हि इदं प्रत्यगात्मनो ब्रह्मस्वरूपत्वमभिहितं पुनश्च पुरुषोह वै इत्यादिना ज्ञानसाधन
वैराग्यजननाय गर्भवासादिदोषं प्रदर्श्य कोऽयमात्मेति वयमुपास्महे इत्यादिना विचारेण तत्त्वंपदार्थपरिशोधनपुरस्सरं प्रज्ञा
नं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं दर्शितमित्यर्थः ६८ उक्तन्यायमितरासु श्रुतिष्वतिदिशति अवान्तरेणेति सर्वत्र स

आत्मा वा इदमित्यादौ परोक्षं ब्रह्म लक्षितं अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितं ६८ अ
वान्तरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत् सर्वत्रैव महावाक्यविचारेणापरोक्षधीः ६९ ब्र
ह्मापरोक्ष्यसिद्ध्यर्थं महावाक्यमितीरितं वाक्यवृत्तावतो ब्रह्मापरोक्ष्ये विमतिर्न हि ७०
आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः अन्तःकरणसंभिन्नबोधः स त्वंपदाभिधः ७१ ॥

र्वासु श्रुतिष्वित्यर्थः ६९ ननु महावाक्यविचारस्यापरोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशंक्य वाक्यवृत्तावाचार्यैस्तथा
प्रतिपादितत्वान्मैवमित्याह ब्रह्मापरोक्ष्येति अतो वाक्याद्ब्रह्मापरोक्षज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः ७० वाक्यवृत्त्युप
पादितप्रकारं दर्शयति आलंबनतयेति योऽन्तःकरणसंभिन्नबोधः अन्तःकरणोपाधिकश्चिदात्मा अस्मत्प्रत्ययशब्दस्य
आलंबनतया विषयत्वेन भाति स तथाविधो बोधस्त्वंपदाभिधस्त्वमिति पदमभिधायकं यस्य स त्वंपदाभिधस्त्वंपद
वाच्य इत्यर्थः ॥ ७१ ॥

68

एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्यार्थमाह मायोपाधिरिति पारोक्ष्यशबलः परोक्षत्वधर्मविशिष्ट इत्यर्थः एवं तटस्थलक्षणमभिधाय
स्वरूपलक्षणमाह सत्याद्यात्मक इति सत्यमादिर्येषां ज्ञानादीनां ते सत्यादयः आत्मा स्वरूपं यस्य स तथा एवंविधस्तत्पदाभिधस्तत्पदमभिधा वाच
कं यस्य स तत्पदाभिधस्तत्पदवाच्य इत्यर्थः १२ एवं पदार्थावभिधाय वाक्यार्थावबोधनाय लक्षणावृत्तिराश्रयणीयेत्याह प्रत्यगिति प्रत्यक्परो
क्षत्वे सद्वितीयत्वेन सहिता पूर्णता तेन मध्यमपदलोपी समासः साद्वितीयत्वपूर्णता चैकस्य वस्तुनो यतो विरुध्येते अतो लक्षणावृत्तिराश्रयणीये
त्यर्थः १३ सा च कीदृशीत्यत आह तत्त्वमस्यादीति भागलक्षणा भागत्यागेन लक्षणेत्यर्थः तत्र दृष्टान्तः सोऽयमिति सोऽयं देवदत्त इति वाक्यस्थयोः
सोऽयमिति पदयोर्यथा जहदजहल्लक्षणावृत्तिराश्रिता नापरा न जहल्लक्षणा नाप्यजहल्लक्षणा तद्वदत्रापीत्यर्थः १४ ननु गामानयेत्यादिवाक्ये

मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः १२ प्रत्यक्
परोक्षतैकस्य सद्वितीयत्वपूर्णता विरुध्येते यतस्तस्माल्लक्षणा संप्रवर्तते १३ तत्त्वमस्या
दिवाक्येषु लक्षणा भागलक्षणा सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा १४ संसर्गो वा
विशिष्टो वा वाक्यार्थो नात्र संमतः अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः १५ प्रत्यग्बो
धो य आभाति सोऽद्वयानन्दलक्षणः अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः १६ ॥

षु लक्षणावृत्त्या विनापि वाक्यार्थबोधो दृष्टस्तद्वदत्रापि किं न स्यादित्याशंक्याह संसर्गो वेति यथा लोके गामानयेत्यादिपदैः स्मारितानामाकांक्षासं
निध्यादिमतां गवादिपदार्थानामन्वयो वाक्यार्थत्वेन स्वीकृतः यथा वा नीलमुत्पलमित्यादौ नीलत्वादिविशिष्टस्योत्पलस्य वाक्यार्थ
त्वं स्वीकृतं नैवमत्र महावाक्येषु संसर्गविशिष्टयोरन्यतरस्य वाक्यार्थत्वमभ्युपगम्यते किं तु अखण्डैकरसत्वेन स्वगतादिभेदशून्यवस्तुमात्ररूपेण
वाक्यार्थो विद्वद्भिरभ्युपेयतेऽतो लक्षणाश्रयणीयेत्यर्थः १५ अखण्डैकरसं वाक्यार्थं दर्शयति प्रत्यग्बोधो य इति यः प्रत्यग्बोधः सर्वान्तरश्चिदा
त्मा आभाति बुद्ध्यादिसाक्षित्वेन स्फुरति सोऽद्वयानन्दलक्षणोऽद्वितीयानन्दरूपः परमात्मेत्यर्थः अद्वयानन्दरूपश्च तथाविधः परमा
त्मा प्रत्यग्बोधैकलक्षणश्चिदेकरसः प्रत्यगात्मेत्यर्थः १६ ॥

एवमखंडार्थबोधने किं स्यादित्यत आह अयमित्यादि त्वमर्थस्य प्रत्यगात्मनोऽब्रह्मत्वभ्रांतिसिद्धाः ब्रह्मत्वरूपता तदर्थस्य ब्रह्मणश्चापारोक्ष्यं परोक्षज्ञानैकविषयत्वं च निवर्तेत ततोऽपि किमिति पृच्छति यद्येवं किमिति उत्तरमाह शृण्विति ७७ ॥ ७८ ननु समयबलेन सम्यक्परोक्षानुभवसाधनमागम इत्यागमलक्षणम् अतो वाक्यस्यापरोक्षज्ञानजनकत्वं कथमुच्यत इत्याशंक्य सिद्धांतपरिज्ञानशून्योऽयमिति मनसि निधायोपहसति एवं सतीति एवं वदंतः सिद्धांतरहस्यं नैव जानंतीत्यर्थः ७९ ननु सिद्धांतस्तावत्तिष्ठतु वाक्यस्य परोक्षज्ञानकत्वं त्वनुमानसिद्धमिति शंकते आस्तामिति विमतं वाक्यं परोक्षज्ञानजनकं भवितुमर्हति वाक्यत्वात्स्वर्गादिप्रतिपादकवाक्यवदित्यनुमानेन परोक्षज्ञानसंकेतकत्वसिद्धमित्यर्थः अनेका

अयमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्याहन्येत तदैव हि ७७ तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ७८ एवं सति महावाक्यात्परोक्षज्ञानमीर्यते यैस्तेषां शास्त्रसिद्धांतविज्ञानं शोभनेतरत् ७९ आस्तां शास्त्रस्य सिद्धांतो युक्त्या वाक्यात्परोक्षधीः स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः ८० स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ८१ वृद्धिमिष्टवतो मूलमपि नष्टमितीदृशं लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः ८२ अंतःकरणसंभिन्नबोधो जीवोऽपरोक्षताम् अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः ८३ नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः यावद्विदेहकैवल्यमुपाधेरनिवारणात् ८४ ॥

न्तिकोऽयं हेतुरिति परिहरति नैवमिति दशमस्त्वमसीति वाक्ये वाक्यत्वेऽपरोक्षज्ञानजनकत्वस्योपलंभादिति भावः ८० किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगादपि न महावाक्यं परोक्षज्ञानजनकमित्यंगीकार्यमित्याह स्वत इति ८१ इष्टापत्तिरित्याशंक्याह वृद्धिमिष्टवत इति ८२ ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिकस्य तन्न युज्यत इति शंकते अंतःकरणेति ८३ ब्रह्मणो निरुपाधिकत्वमसिद्धमिति परिहरति नैवमिति जीवस्य ब्रह्मरूपताज्ञानं यदस्ति तस्य सोपाधिकवस्तुविषयत्वान्न हि विषयस्य ब्रह्मणोऽपि सोपाधिकत्वं ज्ञानस्य सोपाधिकविषयत्वं च ज्ञेयस्य सोपाधिकत्वमंतरेण न घटत इति भावः तदेव कुत इत्यत आह यावदिति ८४ ॥

ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्यमित्याशंक्याह अन्तःकरणेति जीवभावब्रह्मभावयोरन्तःकरणसाहित्यराहित्ये एव उपाधिरित्यर्थः ८५ नन्वन्तःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु नाभावरूपस्य तद्राहित्यस्य तदुचितमित्याशंक्य यावत्कार्यमवस्थायि भेदहेतोरुपाधिता इत्युक्तोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि सत्त्वादुचितमेवोपाधित्वमित्यभिप्रायेण परिहरति यथेति विधिर्भावरूपोऽन्तःकरणसंबंधो यथोपाधिः स्यात्तथा प्रतिषेधोऽभावरूपोऽन्तःकरणवियोगः किमुपाधिर्न स्यात् किं तस्मादेवेत्यर्थः तथापि भावरूपत्वलक्षणमवान्तरवैलक्षण्यं दृश्यत एवेत्याशंक्य तस्याकिंचित्करत्वेनानादरणीयत्वमित्यभिप्रेत्य दृष्टान्तमाह सुवर्णेति पुरुषप्रचारनिरोधकत्वाऽनुगतस्यैकस्य सुवर्णत्वलोहत्वादिवैलक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ८६ विधेरिव निषेधस्यापि ब्रह्मबोधोपायत्वेन ब्रह्मोपाधित्वमिति मतं तद्

अन्तःकरणसाहित्यराहित्याभ्यां विशिष्यते । उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ॥ ८५ ॥ यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किं । सुवर्णलोहभेदेन शृङ्खलात्वं न भिद्यते ॥ ८६ ॥ अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च । वेदान्तानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितं ॥ ८७ ॥ अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः । नैवमंशस्य हि त्यागो भागलक्षणयोदितः ॥ ८८ ॥

दृढयितुं विधिनिषेधयोरुभयोरपि ब्रह्मबोधोपायत्वमाचार्यैर्निरूपितमिति दर्शयति अतद्व्यावृत्तिरूपेणेति तच्छब्देन ब्रह्माभिधीयते अतच्छब्देन तदतिरिक्तमज्ञानादि व्यावृत्तिर्निरसनं तदेवं रूपमुपायस्तेन साक्षाद्विधिमुखेन च विधिर्विधानं [illegible] सत्यं ज्ञानमनन्तमित्येवमादिरूपस्तेन च विधिमुखेन तद्द्वारेणापीत्यर्थः वेदान्तानामुपनिषदां प्रवृत्तिः प्रवर्तनं प्रतिपादनं ब्रह्मणीति शेषः ८७ ननु वेदान्तानामतद्व्यावृत्त्या ब्रह्मबोधकत्वाङ्गीकारेऽहंशब्दार्थस्य कूटस्थस्यापि त्यागप्रसंगादहं ब्रह्मास्मीति सामानाधिकरण्येन ज्ञानं नोदेतुमर्हतीति शंकते अहमर्थपरित्यागादिति अहंशब्दार्थस्य सर्वस्य त्यक्तत्वान्नैवमिति परिहरति नैवमिति हि यस्मात्कारणाद्भागलक्षणया जहदजहल्लक्षणयांशस्याहंशब्दार्थैकदेशस्य जडांशस्य त्याग ईरितः न कूटस्थस्यातोऽहं ब्रह्मास्मीति ज्ञानमुपपद्यत इत्यर्थः ८८ ॥

अध्यात्मयोगेन बोधनप्रकारमभिनीय दर्शयति अंतःकरणेति ८९ ननु केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद्बुद्धिवृत्तिविषयत्वं न घटत इत्याशंक्या-
ह स्वप्रकाशोपीति अन्यवद्घटवदित्यर्थः स्वप्रकाशोहमित्येवं बुद्धिसंभवादिति भावः तर्ह्यपसिद्धांत इत्याशंक्य पूर्वाचार्यैरपि वृत्तिव्याप्यत्वस्याभी-
ष्टत्वात् अयमपसिद्धांत इति परिहरति फलेति फलं वृत्तिप्रतिबिंबितश्चिदाभासः तद्व्याप्यत्वमेवास्य प्रत्यगात्मनो निराकृतं स्वस्यैव स्फुरणरूपत्वादिति
भावः ९० आत्मनि फलव्याप्त्यभावं दर्शयितुमनात्मनो वृत्त्या फलेन च व्याप्यत्वं दर्शयति बुद्धितत्स्थेति उभयव्याप्तेः प्रयोजनमाह तत्रेति तत्र तयो-
र्बुद्धिचिदाभासयोर्मध्ये धिया बुद्धिवृत्त्या प्रमाणभूतया अज्ञानं नश्यति ज्ञानाज्ञानयोर्विरोधात् आभासेन चिदाभासेन घटः स्फुरेत् जडत्वेन स्वतःस्फु-
रणायोगादिति भावः ९१ इदानीमात्मनि तद्वैलक्षण्यं दर्शयति ब्रह्मण्यपीति प्रत्यग्ब्रह्मणोरेकत्वस्याज्ञानेनावृतत्वात्तस्याज्ञानस्य निवृत्तये वा

अंतःकरणसंत्यागादविशिष्टे चिदात्मनि अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते ८९ स्वप्रकाशो
पि साक्ष्येव धीवृत्त्या व्याप्यतेऽन्यवत् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ९० बुद्धितत्स्थचिदाभा
सौ द्वावपि व्याप्नुतो घटं तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ९१ ब्रह्मण्यज्ञाननाशाय वृत्तिव्या
प्तिरपेक्षिता स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते ९२ चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा न दी
पदर्शने किंतु चक्षुरेकमपेक्ष्यते ९३ स्थितोप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परं न तु ब्रह्मण्यतिश
यं फलं कुर्याद्घटादिवत् ९४ ॥

अज्ञानस्याहं ब्रह्मास्मीत्येवंरूपाकारया धीवृत्त्या व्याप्तिरपेक्ष्यते स्वस्यैव स्फुरणरूपत्वात्तस्य स्फुरणाय चिदाभासो नापेक्ष्यते अतो युज्यमानोपि चि-
दाभासो नोपयुज्यत इत्यर्थः ९२ उक्तमर्थं दृष्टांतप्रदर्शनेन विशदयति चक्षुर्दीपेति अयं प्रकारः यद्घटादिदर्शने चक्षुर्दीपावुभावप्यपे-
क्ष्येते दीपदर्शने तु तथा न किं त्वेकं चक्षुरेवापेक्ष्यते यथा तथा ब्रह्मण्यज्ञाननाशायेति पूर्वेण संबंधः ९३ ननु बुद्धितद्वृत्तीनां चिदाभासवै-
शिष्ट्यस्वाभाव्याद्घटादिष्विव ब्रह्मण्यपि फलप्राप्तिर्बलाद्भवेदित्याशंक्याह स्थितोप्यसाविति यद्यपि घटाद्याकारवृत्तिवद्ब्रह्मगोचरवृ-
त्तावपि चिदाभासोस्ति तथापि नासौ ब्रह्मणो भेदेन भासते किंतु प्रचंडातपमध्यवर्तिप्रदीपप्रभावत्तेनैकीभूत इव भवति अतो न स्फुरणलक्ष-
णातिशयजनको ब्रह्मणीत्यर्थः ९४ ॥

ननु ब्रह्मणि फलव्याप्तिर्नास्ति वृत्तिव्याप्तिस्तु विद्यत इत्युक्तं तत्र किं प्रमाणमित्याशंक्यागमः प्रमाणमित्याह अप्रमेयमिति निर्विकल्पमनन्तं च हे
तुदृष्टान्तवर्जितं अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुध इत्यत्रास्मिन्मन्त्रे श्रुत्याऽस्मत्तद्विरूपनिषदा अप्रमेयशब्देनेदं फलव्याप्तिराहित्यमुक्तं मनसैवे
दमाप्तव्यं नेह नानास्ति किंचनेति कठवल्ल्यां धीव्याप्यतास्फुटा हि वृत्तिव्याप्यत्वं श्रुतमित्यर्थः आत्मानं चेद्विजानीयादिति मन्त्रेणापरोक्षज्ञानं शोकनिवृत्त्या
ख्यं जीवगतमवस्थाद्वयमभिधीयत इत्युक्तं अपरोक्षज्ञानशोकनिवृत्त्याख्येऽवभे इमे अवस्थे जीवगे श्रुत आत्मानं चेदिति श्रुतिरित्यनेन तत्र कियता
शेनापरोक्षज्ञानमुच्यत इत्याकांक्षायामाह आत्मानमिति ब्रह्मात्मव्यक्तिं सत्यादिलक्षणब्रह्माभिन्नप्रत्यगात्मस्वरूपमुल्लिख्य विषयीकृत्य यो बोधो
जायते ब्रह्माहमस्मीति सोऽभिधीयते अनेन वाक्येनेत्यर्थः ९६ ननु तर्हि पूर्वोक्तरीत्या सकृद्वाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसकृदुपदेशा

अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितं मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता ९५ आत्मानं चेद्वि
जानीयादयमस्मीति वाक्यतः ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोऽभिधीयते ९६ अस्तु बोधोऽपरो
क्षोऽत्र महावाक्यात्तथाप्यसौ न दृढः श्रवणादीनामाचार्यैः पुनरीरणात् ९७ अहं ब्रह्मेति वाक्या
र्थबोधो यावद्दृढीभवेत् शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ९८ बाढं सन्ति ह्यदार्ढ्यस्य हे
तवः श्रुत्यनेकता असंभाव्यत्वमर्थस्य विपरीता च भावना ९९ ॥

दित्यादौ विहितं श्रवणाद्यावर्तनमनुष्ठेयं स्यादित्याशंक्य ज्ञानदार्ढ्याय तदावर्तनानुष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह अस्तु बोध इति
अत्र ब्रह्मात्मनि विषये महावाक्यात्सकृच्छ्रुतात्तद्विचारसहितादपरोक्षबोधोऽस्तु भवत्वेवं तथापि नासौ दृढः अतः श्रवणाद्यावर्तनीयं श्रीमच्छं
कराचार्यैः पुनर्वाक्यार्थज्ञानोत्पत्त्यनन्तरमपि श्रवणाद्यावर्तनाभिधानादित्यर्थः ज्ञानदार्ढ्यायेत्येतदर्थाल्लभ्यते ९७ आचार्यैः केन वाक्येनाभिहि
तमित्याशंक्य तद्वाक्यं पठति अहं ब्रह्मेति ९८ ननु वाक्यप्रमाणजनितज्ञानस्यादार्ढ्यं कुत इत्याशंक्याह बाढमिति हि यस्मात्कारणाच्छ्रुत्यनेक
ता श्रुतीनां नानात्वमेको हेतुः अर्थस्याखण्डैकरसस्याद्वितीयब्रह्मरूपस्यालौकिकत्वेनासंभावितत्वमपरो विपरीता भावना चात्मनः क
र्तृत्वाभिमानरूपा तृतीय इत्येवंविधादार्ढ्यस्य हेतवो बाढं सन्ति सर्वथा विद्यन्तेऽतोऽपरोक्षानुभवदार्ढ्याय श्रवणादिकमावर्तनीयमिति भावः ९९

एवंविविधानदार्ढ्यहेतुत्वमुपन्यस्य श्रुतिनानात्वप्रयुक्तादार्ढ्यनिवृत्तये श्रवणावृत्तिः कर्तव्येत्याह शाखाभेदादिति यथा शाखाभेदात्कर्मभेदः श्रूयते बह्वृचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथमिति यथा वा कामभेदात्कारीर्यादिष्टिकामो यजेत पशुकाम इत्यादिकामभेदः श्रुत एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशंकायां तन्निवारणाय श्रवणं पुनः पुनः कर्तव्यमित्यर्थः १॰ किं तच्छ्रवणमित्याकांक्षायां तल्लक्षणमाह वेदान्तानामिति सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यं नेतरत्रेत्येवं पर्यवसानमित्येवंरूपो निश्चयः श्रवणमित्यर्थः १ एवंविधं श्रवणं कुत्र निरूपितमित्यत आह समन्वयेति एतच्छ्रवणं समन्वयाध्याये सूत्रैर्व्यासादिभि

शाखाभेदात्कामभेदाच्छ्रुतं कर्मान्यथान्यथा एवमत्रापि माशंकीत्यतः श्रवणमाचरेत् १॰ वेदान्तानामशेषाणामादिमध्यावसानतः ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत् १ समन्वयाध्याय एतत्सूक्तं धीस्वास्थ्यकारिभिः तर्कैः संभावनार्थस्य द्वितीयाध्याय ईरितः २ बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ३ विपरीता भावनेयमैकाग्र्यात्सा निवर्तते तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात् ४ उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिन्तिताः प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ५ तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ६ ॥

रिति शेषः अर्थासंभावनानिवृत्तिहेतुर्मननं तत्तु द्वितीयाध्याये निरूपितमित्याह धीस्वास्थ्येति प्रमेयगतानुपपत्तिपरिहारद्वारा बुद्धिस्वास्थ्यकारिभिस्तर्कैर्युक्तिशब्दाभिधेयैरर्थस्य संभावना संभावितत्वं तु यथा तद्द्वितीयाध्याये मनने निरूपितमित्यर्थः इदानीं विपरीतभावनां तन्निवृत्त्युपायं च दर्शयति बहुजन्मदृढाभ्यासादिति सार्धेन ३ विपरीतभावनानिवर्तकं यदैकाग्र्यं तत्कुतो जायत इत्याशंक्याह तत्त्वोपदेशादिति एतदैकाग्र्यं ब्रह्मोपदेशात्प्रागेव सगुणब्रह्मोपासनाद्भवत्तु भवेदित्यर्थः ४ नन्वेतत्कुतोऽवगतमित्याशंक्योपासनाविचारस्य वेदान्तशास्त्रे कृतत्वादित्याह उपास्तय इति अस्त्वेवोपास्तिकस्य कृतजन्मेत्यत आह प्रागनभ्यासिन इति ५ ब्रह्माभ्यासश्च कीदृश इत्याकांक्षायामाह त

एतदेकपरत्वं विशदयितुं श्रुतिमाह तमेवेति धीरो ब्रह्मचर्यादिसाधनसंपन्नो ब्राह्मणो ब्रह्मभवितुमिच्छुर्मुमुक्षुस्तमेव प्रत्यग्रूपं परमात्मानमे
व विज्ञाय संशयाद्यभावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानसंततिरूपमैकाग्र्यं कुर्वीत संपादयेत् अनात्मगोचरान्बहूञ्छब्दान्ना
नुध्यायेन्नानुस्मरेत् ध्यानेनाभिधानमप्युपलक्ष्यते नाभिदध्याच्च अन्यथा शब्दध्यानेन वाग्विग्लापनानुपपत्तेः कुत इत्यत आह वाच इति हि य
स्मात्तदभिध्यानमनेन स्मरणमप्युपलक्ष्यत इति वाच इति मनसोऽप्युपलक्षणं विग्लापयतीति विग्लापनं श्रमहेतुः अयमभिप्रायः इतरशब्दानु
संधाने मनसः श्रमो भवति तदभिधाने तु वाच इति १७ एवमैकाग्र्यप्रतिपादिकां श्रुतिमभिधाय स्मृतिमप्याह अनन्या इति ये जना अनन्या अहं ब्र
ह्मास्मीति ज्ञानेन मदभिन्नाः सन्तश्चिन्तयन्तो मां विचिन्तयन्तः पर्युपासते परितः सर्वेष्वपि कालेषूपासते मद्रूपा एव चरन्ति ते नित्याभियुक्तानां सदा मच्चिन्तानां तेषा

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् १७
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं १८ एते
श्रुतिस्मृती नित्यमात्मन्येकाग्रताधिपः विधत्ते विपरीताया भावनायाः क्षयाय हि १९ यद्यथा
वर्तते तस्य तत्त्वं हित्वान्यथात्वधीः विपरीता भावना स्यात्पित्रादावरिधीर्यथा ११० आत्मा देहा
दिभिन्नोयं मिथ्या चेदं जगत्तयोः देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना १११ ॥

महं तदात्मत्वेनानुसंधीयमानोऽहं योगक्षेममलब्धलाभलब्धपरिरक्षणरूपौ योगक्षेमौ वहामि संपादयामीत्यर्थः १८ उदाहृतयोः श्रुतिस्मृत्यो
स्तात्पर्यमाह एत इति एते श्रुतिस्मृती विपरीतभावनानिवृत्तये आत्मनि सदा विधत्ते ऐकाग्र्यं प्रतिपादयत इत्यर्थः १९ ननु देहाद्यात्मत्वबुद्धेर्ज
गत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वमित्याशंक्य तल्लक्षणयोगादिति दर्शयितुं तस्या लक्षणमाह यद्यथेति यद्वस्तु शुक्त्यादि यथा ये
न शुक्त्यादिरूपेण वर्तते तस्य तत्त्वं शुक्त्यादिरूपत्वं परित्यज्यान्यथात्वधीः अन्यथात्वस्य रजतादिरूपत्वस्य धीर्ज्ञानं विपरीतभावना स्या
त् अतस्मिंस्तद्बुद्धिरिति यावत् तामुपपादयति पित्रादाविति ११० उक्तलक्षणं प्रकृते योजयति आत्मेति अयमात्मा वस्तुतो देहादिभि
न्न इदं जगच्च मिथ्या एवं सत्यपि तयोरात्मजगतोर्यथाक्रमं देहादिरूपत्वबुद्धिः सत्यत्वबुद्धिश्च या सा विपरीतभावनेत्यर्थः १११ ॥

सर्वमेवात्मानिवर्ततइति सामान्येनोक्तमर्थं विशेषाकारेणाह तत्त्वभावनयेति सादेहाद्यात्मत्वजगत्सत्यत्वधीरूपाविपरीताभावना
तत्त्वभावनयाऽऽत्मनोदेहातिरिक्तत्वजगतोमिथ्यात्वरूपभावनयानिरन्तरंध्यानेनक्षपेत् अतआत्मनोदेहाद्यतिरिक्तत्वे देहादेर्जगतो
मिथ्यात्वंचसदाभावयेदित्युक्तं १२ तत्रजपादाविवनियमापेक्षास्तिवानवेतिपृच्छति किंमंत्रेति आत्मभेदधीरात्मनोदेहादिभ्यःविभिन्नत्वज्ञा
नंजगतोमिथ्यात्वानुसंधानंचमंत्रजपवद्देवताध्यानादिवत् किंनियमेनानुष्ठानमुतलौकिकव्यवहारवदनियमतन्त्रेणापिकर्त्तुंश
क्यतइति १३ दृष्टफलकत्वान्नात्रनियमःकश्चिदस्तीत्याह अन्यथेति अन्यथैवनियमंविनेत्यर्थः तत्रहेतुमाह दृष्टार्थत्वेति तत्रदृष्टान्त
माह भुक्तिवदिति दृष्टार्थेपिभोजनेनियमः श्रुतिस्मृत्योरुपलभ्यतइत्याशंक्याह बुभुक्षुरितिक्षुदपनयनायभोक्तुमिच्छन्पुरुषो

तत्त्वभावनयानश्येत्साऽतोदेहातिरिक्ततां आत्मनोभावयेत्तद्वन्मिथ्यात्वंजगतोऽनिशं १२ किं
मंत्रजपवन्मूर्तिध्यानवद्वात्मभेदधीः जगन्मिथ्यात्वधीश्चात्रव्यावर्त्यासाऽहुताऽन्यथा १३ अ
न्यथेतिविजानीहिदृष्टार्थत्वेनभुक्तिवत् बुभुक्षुर्जपवद्भुङ्क्तेनकश्चिन्नियमात्क्वचित् १४ अ
श्नातिवानवाश्नातिभुंक्तेवास्वेच्छयान्यथा येनकेनप्रकारेणक्षुधामपनिनीषति १५ निय
मेनजपंकुर्यादकृतौप्रत्यवायतः अन्यथाकरणेऽनर्थःस्वरवर्णविपर्ययात् १६ ॥

जपंकुर्वाणइवननियमेनभुंक्ते अपितुयथाक्षुधायोपशांतिःस्यात्तथाभोजनंकरोतीत्यर्थः १४ एतदेवप्रपंचयतिअश्नातीति अश्नातिवाऽ
श्नातिकदाचिद्भुंक्तेनवाश्नातितस्मिन्नसतिक्षुधायाविस्मारकवृत्तादिचेष्टया अनश्नन्नेवकालनयतिअन्यथावानिष्ठनगच्छन्शयानो
वास्वेच्छयाभुंक्ते एवंयेनकेनप्रकारेणतात्कालिकींक्षुधामपनेतुमिच्छति अयमभिसन्धिःक्षुधानिवृत्तिलक्षणदृष्टफलायभोजनं
कार्यंनियमास्तुपरलोकहेतवइति १५ जपादौभोजनादौवैलक्षण्यंदर्शयति नियमेनेति तत्रहेतुमाह अकृताविति भवत्वेवमक
रणेप्रत्यवायअन्यथाकरणेतुसनास्तीत्याशंक्याह अन्यथाकरणइति मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह सवाग्व
ज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधादित्युक्तत्वादितिभावः १६ ॥

ननु तथापि यादृष्टवायोर्हेतुत्वात् तन्निग्रहे ज्ञये ऽ नियमेनापि मोक्षः स्यादेव विपरीतभावनायास्तु तदृष्टहेतुत्वाभावात् तथात्वाभावात् त्रिवर्तकं ध्यानम दृष्टफलाय मेनानुष्ठेयमित्याशंक्याह तथैवेति विपरीतभावनायादृष्टद्वारेण हेतुत्वस्यानुभवसिद्धत्वादिति भावः १७ तर्हि स उपायः दर्शनीय इत्याशंक्य पूर्वमेव दर्शित इत्याह उपाय इति ननु जपवत्प्राक्प्रत्यवायादिनियमो माभूद्ध्यानवदेतदेकपरत्वलक्षणे काग्रतायां निर्वेधो ऽस्तीत्याशंक्याह एतदेकेति १८ ननु ध्यानस्य ध्येयचिंतामात्रात्मकत्वात्तत्र को निर्वेध इत्याशंक्य ध्याने निर्वेधं दर्शयितुं ध्यानस्वरूपं तावदाह मूर्तिप्रत्ययेति पियोवुद्धेः संबंधिनां मूर्तिप्रत्ययानां देवतादिमूर्तिगोचराणां प्रत्ययानां प्रत्ययानां यत्सातत्यमनवच्छिन्नतयावर्तमानत्वं तदन्यानंतरितमन्येन विजातीयप्रत्ययेनाव्यवहितं तद्ध्यानमुच्यते एवं ध्यानस्वरूपमभिधाय तत्र निर्वेधं दर्शयति तत्रेति सदाप्रवर्तनशीलस्य करितुरगादेरेकत्र स्तंभादौ वंधनं यथा परोपस्त

तथैव दृष्टवायाः कृद्विपरीता च भावना ज्ञेयाकेनाप्युपायेन नात्यत्रानुष्ठिनेः क्रमः १७ उपायः पूर्वमेवोक्तश्चिंताकर्तनादिकः एतदेकपरत्वे ऽपि निर्वंधो ध्यानवन्नहि १८ मूर्तिप्रत्ययसातत्यमन्यानंतरितं धियः ध्यानं तत्रास्ति निर्वंधो मनसश्चंचलात्मनः १९ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं २० अप्यब्धिपानान्महतः सुमेरून्मूलनादपि अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः २१ कथनादौ न निर्वंधः शृंखलाबद्धदेहवत् किंत्वनंतेतिहासाभ्यां विनोदो नात्र वधियः १२२ ॥

हृदिति भावः १९ मनसश्चांचल्यादौ गीतावाक्यं प्रमाणयति चंचलमिति प्रमाथि प्रमथनशीलं पुरुषस्य व्याकुलत्वकारणं बलवत्समर्थं मनिग्राह्यमित्यर्थः दृढं सत्यमतिवाविषयेलग्नं तत्त्वज्ञमस्याक्यमित्यर्थः अतस्तस्य मनसो निग्रहो वायोर्निग्रहवत्सुदुष्करः २० मनसो दुर्निग्रहत्वे वसिष्ठवाक्यमपि प्रमाणयति अप्यब्धिपानादिति २१ प्रकृतेतत्तो वैषम्यं दर्शयति कथनादाविति शृंखलाबद्धदेहस्य यथा निर्वंधो न तथा कथनादावित्यर्थः आदिशब्देन तच्चिंतनादिकं गृह्यते तत्केवलं निर्वंधाभावः प्रत्युत प्रियो विनोद इत्याह किंत्वनंतेति इतिहासः पूर्ववृत्तकथाश्रायायेषु लौकिककथानुकूलप्रकितदृष्टांतदर्शनादीनां तेनंतास्त्रसंख्याताश्चेतिहासाश्चाइत्यनंतेतिहासस्तयालोधियः बुद्धेर्विनोदो क्रीडाविशेषो भवति तत्र दृष्टांतः नाट्यवदिति नाट्यक्रियानिरीक्षणमिवेत्यर्थः १२२ ॥

ननु कथादिभिरप्येतदेकपरत्वविघातः स्यादित्याशंक्याह विदेवात्मेति इतिहासादीनामात्मा चिन्मात्रत्वयो न देहादिरूपः जगच्च मिथ्येत्येतस्मिन्नर्थे प
र्यवसानात् न तैरेतदेकपरत्वशास्त्राभिधेयस्य निदिध्यासनस्य विक्षेप इत्यर्थः २३ नन्वितिहासादीनामंगीकारे कृष्यादेरपि प्रसक्तिः स्यादित्याशंक्याह
कृषीति २४ कृष्यादीनां तत्त्वानुध्यानविघातित्वेन त्याज्यत्वे भोजनादेरपि तथात्वात् तदपि त्याज्यमेवेत्याशंक्याह अनुसंदधतेति कुत इत्यत आह अत्यंतेति
विक्षेपाभावो विकृत इत्यत आह आशु पुनरिति २५ ननु तदानीं विक्षेपाभावेऽपि तत्त्वविस्मृतिसद्भावात् पुरुषार्थहानिः स्यादित्याशंक्याह तत्त्वेति कुत
स्तर्ह्यनर्थ इत्यत आह किंत्विति विस्मरणे सति विपर्ययोऽपि स्यादित्याशंक्याह विपर्येतुमिति २६ ननु भोजनादिप्रवृत्तस्येव तर्काद्यभ्यासप्रवृत्तस्यापि त

विदेवात्मा जगन्मिथ्येत्यत्र पर्यवसानतः निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत् २३ कृषिवाणि
ज्यसेवादौ काव्यतर्कादिकेषु च विक्षिप्यते प्रवृत्ता धीस्तैस्तत्त्वस्मृत्यसंभवात् २४ अनुसंदधतैवात्र भो
जनादौ प्रवर्तितुं शक्यतेऽत्यन्तविक्षेपाभावादाशु पुनः स्मृतेः २५ तत्त्वविस्मृतिमात्रान्नानर्थः किंतु विप
र्ययात् विपर्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित् २६ तत्त्वस्मृतेरवसरो नास्त्यन्याभ्यासशालिनः
प्रत्युताभ्यासघातित्वाद्बलात्तत्त्वमुपेक्ष्यते २७ तमेवैकं विजानीथ ह्यन्या वाचो विमुंचथ इति श्रुतं तथा
न्यत्र वाचो विग्लापनं त्विति २८ आहारादि त्यजन्नैव जीवेच्छास्त्रांतरं त्यजन् किं न जीवसि येनैवं करो
ष्यत्र दुराग्रहम् २९ ॥

तत्स्मरणं किं न स्यादित्याशंक्याह तत्त्वस्मृतेरिति न केवलं तत्त्वानुसंधानावसराभाव एव किंतु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्यासविरोधित्वात्त
दानीं स्मृतमपि तत्त्वं बलादुपेक्ष्यत इत्याह प्रत्युतेति २७ तत्त्वानुसंधानविरोधिवाग्व्यवहारस्य त्याज्यत्वे प्रमाणत्वेन तमेवैकं विजानीथ
आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति श्रुतिवाक्यमर्थतः पठति तमेवैकमिति नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लाप
नं हि तदित्येतद्वाक्यं स्मृपत इत्याह तथान्यत्रेति २८ ननु तत्त्वानुसंधानातिरिक्तमाहारादि यथा न त्यज्यते एवमितरशास्त्राभ्यासो
ऽपि क्रियतामित्याग्रहं कुर्वाणं प्रत्याह आहारादि त्यजन्नैवेति २९ ॥

ननु तर्हि जनकादीनां तत्त्वविदां कथं राज्यपरिपालनादौ प्रवृत्तिरिति शंकते जनकादेरिति दृढापरोक्षज्ञानित्वात्तेषां सा न वाधिकेत्यभिप्राये
ण परिहरति दृढेति न हि ममापि दृढबोधोऽस्तीति वदंतं प्रत्याह तथात्तवेति ३० ननु तत्त्वविदः संसारासारतां जानतः कुतस्तत्र प्रवर्तिष्ये
तइत्याशंक्य प्रारब्धस्यावश्यंभाविफलत्वात्तद्योगेन तत्क्षयाय प्रवृत्तिरित्याह मिथ्यात्वेति ३१ तर्ह्यनाचारेऽपि प्रवृत्तिः स्यादित्याशंक्याह अतिप्र
संग इति प्रारब्धवशादेवातिप्रसंगोऽपि स्यादित्याशंक्यांगीकरोति अस्त्वेवेति ३२ ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्म्म एव वर्षभोक्तृत्वं तयास
मानेतयोः कुतो वैलक्षण्यसिद्धिरित्याशंक्याह ज्ञानिन इति ३३ तत्र दृष्टांतमाह मार्गेगंत्रोरिति ३४ इत्थमुपपादितमात्मानं वेदितिमंत्र

जनकादेः कथं राज्यमिति चेद्दृढबोधतः तथात्तवापि चेत्तर्हि किं पठ्यद्वाक्षणिंकुरु ३० मिथ्यात्ववासना
दार्ढ्यं प्रारब्धक्षयकांक्षया अक्लिश्यंतः प्रवर्तंते स्वस्वकर्मानुसारतः ३१ अतिप्रसंगो मा शंक्यः स्व
कर्मवशवर्त्तिना अस्त्वेवा केन शक्येत कर्मवारयितुं वद ३२ ज्ञानिनोऽज्ञानिनश्चात्र समेऽप्यारब्ध
कर्म्मणि न क्लेशो ज्ञानिनो धैर्यान्मूढः क्लिश्यत्यधैर्यतः ३३ मार्गे गंत्रोर्द्वयोः श्रांतौ समायाममप्यहू
रतो जानन्धैर्याद्द्रुतं गच्छेदन्यस्तिष्ठति दीनधीः ३४ साक्षात्कृतात्मधीः सम्यगविपर्ययवाधितः किं
मिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ३५ जगन्मिथ्यात्वधीभावादाक्षिप्तौ काम्यकामुकौ त
योरभावे संतापः शाम्येत्तैः स्नेहदीपवत् १३६ ॥

स्यपूर्वार्द्धार्थमनुवदत्फलप्रदर्शनपरमुत्तरार्द्धमवतारयति साक्षादिति सम्यक्साक्षात्कृतात्मधीः साक्षात्कृत आत्मा यया सा साक्षा
त्कृतात्मा तादृशी धीर्यस्य सः साक्षात्कृतात्मधीः अविपर्ययवाधितः विपर्ययेण देहाद्यात्मत्वबुद्ध्या वाधितो न भवतीत्यविपर्यय
वाधितः उभयं हेतुगर्भितं विशेषणं ३५ अस्य मंत्रार्द्धस्य तात्पर्यमाह जगन्मिथ्येति काम्यं च कामुकश्च काम्यकामुकौ तावाक्षि
प्तौ तन्निराकरणे कारणमाह जगन्मिथ्येति ततः किमित्यत आह तयोः काम्यकामुकयोरभावे संतापः कामुनानिमित्तकः का
रणाभावात् स्नेहदीपवच्छम्येदित्यर्थः १३६ ॥

पंच॰ टी॰ ७५

काम्याभावात्कामनाभावः कुत इत्यपेक्षायामाह गंधर्वेति मायाविनिर्मिते पत्तने स्थितं वस्तु किंचिदपीदमैन्द्रजालिकनिर्मितमिति जानन्न कामय
तेन केवलं कामनाभावः एतेनेदमसत्यमिति हसन् जिहासति परित्यक्तुमिच्छति ४७ दार्ष्टान्तिके योजयति आपातेति एवमापातरमणीयेषु
प्रतीतिमात्ररम्येषु भोगेषु भुज्यन्त इति भोगा विषयाः स्रक्चन्दनवनितादयः तेषु एवं विचारवान् आपातरमणीयत्वानुसंधानवान् नानुरज्यति
नासक्तिं करोति किंतु दोषदर्शनेनैतान्परित्यक्तुमिच्छति ४८ के ते विषयदोषा इत्यत आह अर्थानामिति ४९ एवं विषयाणां दुःखहेतुत्वं प्र
दर्श्य अशोभनत्वं वक्तुं चिद्दर्शयति मांसपांचालिकाया इति स्नायवः शिराः अस्थीनि प्रसिद्धानि ग्रन्थयो मांसनिचयरूपाणि तं बस्तना

75

गंधर्वपत्तने किंचिन्नेन्द्रजालिकनिर्मिते जानन्कामयते किंतु जिहासति हसन्निदं ४७ आपातरम
णीयेषु भोगेष्वेवं विचारवान् नानुरज्यति किंत्वेतान्दोषदृष्ट्या जिहासति ४८ अर्थानामर्जने
क्लेशस्तथैव परिपालने नाशे दुःखं व्यये दुःखं धिगर्थान्क्लेशकारिणः ४९ मांसपांचालिका
यास्तु यन्त्रलोलेऽङ्गपञ्जरे स्नाय्वस्थिग्रन्थिशालिन्याः स्त्रियाः किमिव शोभनं ५० एवमादिषु शा
स्त्रेषु दोषाः सम्यक्प्रपंचिताः विमृशन्ननिशं तानि कथं दुःखेषु मज्जति ५१ क्षुधया पीड्यमानो
ऽपि न विषं ह्यत्तुमिच्छति मिष्टान्नध्वस्ततृड्जानन्नामूढस्तज्जिघत्सति १५२ ॥

दयः एतैश्च सहितायाः मांसपांचालिकायाः पुत्तलिकाया योषितो यन्त्रलोले यन्त्रवच्चञ्चलशीले अङ्गपञ्जरे अङ्गान्येव पञ्जरं नीडं तस्मि
न् शरीरे किं शोभनमिव न किमपीत्यर्थः ५० एवमिति एवमादिष्वित्यादि प्राहेन त्वमांसरक्तबाष्पाम्बुपृथक्कृत्वा विलोचने मम मा
लोकय रम्यं चेत् किं मुधा परिमुह्यसीत्येवमादयो गृह्यन्ते ५१ विषयदोषदर्शने सति भोगेच्छाऽभावे युक्तिसहितं दृष्टान्तमाह
क्षुधयेति स्वयममूढः विवेकी मिष्टान्नभोजनेन ध्वस्ता विनष्टा तृट् तृष्णा आकाङ्क्षा यस्य स तथोक्तः इदं विषमित्येव जानन् तत् इ
विषं न जिघत्सति नात्तुमिच्छतीत्यर्थः १५२ ॥

ननु प्रारब्धकर्मणः प्राबल्यात्तत्त्वविदोपीच्छा भवेदित्याशंक्य सत्यामपीच्छायां प्रीतिपुरःसरं न भुंक्त इत्याह प्रारब्धकर्मेति ५३ कुत एतदवगम्य
त इत्याशंक्य लोके दर्शनादित्याह भुंजाना इति ५४ ननु तत्त्वविदः संसारनिमित्तकस्तापोऽनुपपन्नः ज्ञानवैयर्थ्यापातादित्याशंक्याह नायं
क्लेश इति अयं क्लेशो नाद्यापि कर्म न छिन्नमित्येवमनुतापात्मकः संसारतापो न भवति किन्तु संसारे विरक्तता असक्तिः हि तत्तापत्वाभावे
युक्तिमाह भ्रान्तिज्ञानेति हि यस्मात्कारणात्सांसारिकस्तापो भ्रान्तिज्ञाननिदानः भ्रान्तिज्ञानकारणकः स्मृतः पूर्वाचार्यैः [illegible] यत्तु विवेक
ज्ञानमूलत्वान्न तापः तथाविध इत्यर्थः ५५ अयं क्लेशो विवेकमूलोऽविवेकमूलो वेति कुतोवगम्यत इत्याशंक्य कामनिवर्तकत्वाद्विवेकस्य

प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छा भवेद्यदि क्लिश्यन्नेव तदाप्येष भुंक्ते विष्टिगृहीतवत् ५३ भुंजा
नात्वानपि बुधाः श्रद्धावन्तः कुटुंबिनः नाद्यापि कर्म नच्छिन्नमिति क्लिश्यन्ति संततम् ५४ नायं
क्लेशोत्र संसारतापः किन्तु विरक्तता भ्रान्तिज्ञाननिदानो हि तापः सांसारिकः स्मृतः ५५ विवेके
न परिक्लिश्यन्नल्पभोगेन तृप्यति अन्यथानन्तभोगेपि नैव तृप्यति कर्हिचित् ५६ न जातु कामः
कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ५७ परिज्ञायोपभुक्तो हि
भोगो भवति तुष्टये विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरताम् २५८ ॥

लक्ष इत्याह विवेकेनेति ५६ विवेकिन इवाविवेकिनोपि भोगैर्नैव तृप्तिः स्यादतो विवेकोऽप्रयोजक इत्याशंक्य भोगस्य तृप्तिहेतुत्वाभावप्रतिपादिकां श्रुतिं
पठति न जातु कामादिति ५७ विवेकिमूलस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमित्याह परिज्ञायेति अयं भोगः एतावानेव प्रयासेन साध्य इत्येवम
नुभवपूर्वकस्त्वेदलेशु हि हैं तुष्टि शपत इत्यर्थः ननु तस्माद्धेतोर्भोगस्य विवेकसाहचर्यमात्रेण कथं तुष्टिकरत्वमित्याशंक्य सहकारिविशेषवशा
द्विपरीतकरत्वं लोके दृष्टमित्याह विज्ञायेति अयं चोर इति ज्ञात्वा तेन सह वर्तमानस्य पुरुषस्य न चोरो भवति किन्तु मित्रतामेतीत्यर्थः २५८ ॥

ननु कामं मनसः स्वभावत्वान्मनसः कथं स्वल्पभोगेन तृप्तिः स्यादित्याशंक्य निदिध्यासनेन निगृहीतस्य तथात्वाद्भवत्येव तृप्तिरित्याह मनस इति नि-
गृहीतस्य योगाभ्यासेन वशीकृतस्य मनसोऽल्पकोऽपि स्वल्पोऽपि लीलाभोगः लीलानुभवो योऽस्ति अलब्धविस्तारमप्राप्तवाहुल्यं तमेव भोगं
क्लिष्टत्वाद्दोषयुक्तत्वाद्बहु मन्यते अधिकत्वेन जानातीत्यर्थः ४९ निगृहीतस्य मनसः स्वल्पेनापि भोगेन तृप्तिर्भवतीत्यत्र दृष्टान्तमाह
बद्धमुक्त इति ५० ननु प्रारब्धकर्मप्राबल्याद्भोगेषु इच्छा भवेद्यदीत्यत्र कर्मवशादिच्छा भवेदित्युक्तं तदनुपपन्नमिच्छाविघातिनि विवेक
ज्ञाने सति तदुत्पत्त्यसंभवादिति शंकते विवेक इति ५१ दोषदर्शिनः सत्यपीच्छाजन्मसंभवि प्रारब्धस्य नानाप्रकारत्वादिति परिहर-

मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः तमेवाऽलब्धविस्तारं क्लिष्टत्वाद्बहु मन्यते ४९ बद्धमुक्तो
महीपालो ग्राममात्रेण तुष्यति परैर्न बद्धो नाक्रान्तो न राष्ट्रं बहु मन्यते ५० विवेके जाग्रति सति दोषदर्शन
लक्षणे कथमारब्धकर्मापि भोगेच्छां जनयिष्यति ५१ नैष दोषो यतोऽनेकविधं प्रारब्धमीक्ष्यते इच्छाऽनि
च्छा परेच्छा च प्रारब्धं त्रिविधं स्मृतम् ५२ अपथ्यसेविनश्चोरा राजदाररता अपि जानन्त एव स्वानर्थ
मिच्छन्त्यारब्धकर्मतः ५३ न चात्रैतद्वारयितुमीश्वरेणापि शक्यते यत ईश्वर एवाह गीतायामर्जुनं प्र
ति ५४ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ५५

ति नैष दोष इति नानाप्रकारत्वमेव दर्शयति इच्छानिच्छेति इच्छाजनकमनिच्छया भोगप्रदं परेच्छया भोगप्रदं च त्रिविधमित्यर्थः ५२ इच्छाप्रा-
रब्धं दर्शयति अपथ्येति ५३ अपथ्यसेवादीच्छायाः प्रारब्धफलत्वं ज्ञातो वगम्यत इत्याशंक्याप्रतिहार्यत्वादित्यभिप्रेत्याह नचात्रेति अत्रास्मि-
न्लोके पथ्यादीच्छन्तीत्येतत्कुत इत्यत आह यत ईश्वर इति ५४ गीतावाक्यं पठति सदृशमिति विवेकज्ञानवानपि पुरुषः स्वस्याः स्वकीयायाः
प्रकृतेः सदृशमनुरूपं चेष्टते प्रकृतिर्नाम पूर्वकृतधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः किं पुनर्मूर्खस्तस्मात्प्रकृतिं यान्ति भूता-
नि निग्रहः प्रवृत्तिनिवृत्त्योर्निरोधो मयान्येन वा कृतः किं करिष्यति न किमपीत्यर्थः १५५ ॥

तीव्रप्रारब्धस्यापरिहार्यत्वे वचनान्तरसंमतिमाह अवश्यमिति अवश्यंभाविभावाविभावानां दुःखादीनामित्यर्थः ५६ प्रारब्धस्यापि परिहा
र्यत्वे तत्परिहारासमर्थस्येश्वरस्यानीश्वरत्वप्रसंगइत्याशंक्याह नचेश्वरत्वमिति कुतइत्यतआह यतइति यतः कारणादेषां दुःखादीनाम
वश्यंभावितापीश्वरेणैव निर्मिताऽतो नाऽनीश्वरत्वप्रसंगइत्यर्थः ५७ एवं सप्रपंचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं वक्तुमारभ
ते प्रश्नोत्तराभ्यामिति अनिच्छापूर्वकं च प्रारब्धमस्ति एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेव ज्ञायतइति योजना तदेवयानायप्रीष्मम
भिमुखीकरोति तच्छृण्विति ५८ तत्रार्जुनस्यप्रश्नंतावद्दर्शयति अथकेनेति हेवार्ष्णेयहास्मिसंबोधितं अयंपुरुषः केनप्रयुक्तः प्रेरि
तः अनिच्छन्नपीच्छामकुर्वन्नपि राज्ञा बलान्नियोजितइव पापंचरति आचरतीति ५९ कृष्णस्योत्तरमाह काम एष इति एषपुरुषप्रवर्तकः

अवश्यंभावभावानां प्रतीकारो भवेद्यदि तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः ५६ नचेश्वरत्वमीशस्य
हीयतेतावतायतः अवश्यंभाविताप्येषामीश्वरेणैव निर्मिता ५७ प्रश्नोत्तराभ्यामेवैतज्ज्ञायतेऽर्जुन
कृष्णयोः अनिच्छापूर्वकंचास्ति प्रारब्धमिति तच्छृणु ५८ अथकेनप्रयुक्तोयंपापंचरति पूरुषः अ
निच्छन्नपि वार्ष्णेय बलादिव नियोजितः ५९ काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महा
पाप्मा विद्ध्येनमिह वैरिणम् ६० स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छसि यन्मोहात्क
रिष्यस्यवशोऽपि तत् ६१ ॥

रजोगुणसमुद्भवः उत्पत्तिर्यस्य सरजोगुणसमुद्भवः कामएवप्रसिद्धोयं कामः कदाचित्क्रोधरूपेणापि परिणमते ततः क्रोधः स पुनः की
दृशः महाशनः महदशनं विषयजातं यस्य स महाशनः महापाप्मा महत्पापाय हेतुत्वादुपतापात्महापाप्मात्वमस्य अतइहसंसारे एनंका
मक्रोधरूपंवैरिणं विद्धि अयमभिप्रायः प्रारब्धवशादुद्रिक्तरजोगुणकार्ययोः कामक्रोधयोरन्यतरस्यैवपुरुषप्रवर्तकत्वंनत्वनिच्छा
याइति ६० नन्वत्र कामक्रोधयोरेव पुरुषप्रवर्तकत्वमुपलभ्यते नानिच्छाप्रारब्धस्येत्याशंक्यतस्यैवप्रवर्तकत्वप्रतिपादकं तद्वाक्य
पठति स्वभावजेनेति हे कौन्तेय स्वेनैवानुष्ठितेनातएवस्वकीयेनप्रारब्धेनकर्मणानिबद्धः सन्यत्कर्तुंनेच्छसितदपिमोहादविवे
कात् अवशः परवशः करिष्यसीत्यतोऽनिच्छाप्रारब्धमस्तीत्यभ्युपगन्तव्यमितिभावः ६१ ॥

पंच· टी· ७८

इदानीं परेच्छाप्रारब्धमप्यस्तीत्याह नानिच्छन्न इति अनिच्छतोपि न भवंति इच्छतोपि न भवंति किंतु परदाक्षिण्यसंयुताः संतस्तत्सौख्यार्थमेव सु
खदुःखे अनुभवंति अत एव तत्सखादिहेतुभूतं परेच्छापूर्वकं प्रारब्धं प्रसिद्धमित्यर्थः अत एव दोषदर्शने सत्यपि प्रारब्धस्यापरिहार्यत्वात्
स्वेच्छाजनकत्वं न निवारयितुं शक्तो भोगतीति भावः ९२ ननु तत्त्वविदोपीच्छांगीकारे किमिच्छन्निति विरोध इति शंकते कथं तर्हीति किमिच्छ
न्नित्यनेन वाक्येन कथमिच्छाभावो वर्णित इत्यर्थः नानेनेच्छाभावो विधीयते किंतु सत्यामपि तस्याः समर्थप्रवृत्तिजनकत्वं नास्तीति बाध्य
त इति परिहरति नेच्छानिषेध इति स्वरूपेण सत्यामपि तस्याः सामर्थ्यराहित्ये दृष्टांतमाह भर्जितेति ९३ संक्षेपेणोक्तमर्थं प्रपंचयति भ

नानिच्छन्तो न चेच्छन्तः परदाक्षिण्यसंयुताः सुखदुःखे भजन्त्येतत्परेच्छापूर्वकर्म हि ९२ कथं तर्हि
किमिच्छन्नित्येवमिच्छा निषिध्यते नेच्छानिषेधः किंत्विच्छाबाधो भर्जितबीजवत् ९३ भर्जिता
नि तु बीजानि सन्त्यकार्यकराणि च विद्वदिच्छा तथेष्टव्याऽसत्त्वबोधान्न कार्यकृत् ९४ दग्धबी
जमरोहेऽपि भक्षणायोपयुज्यते विद्वदिच्छाप्यल्पभोगं कुर्यान्न व्यसनं बहु ९५ भोगेन चरितार्
थत्वात्प्रारब्धं कर्म हीयते भोक्तव्यसत्यताभ्रान्त्या व्यसनं तत्र जायते १९६ ॥

र्जितानीति यथा भर्जितानि बीजानि स्वरूपेण विद्यमानान्यपि नांकुरादिकार्यकराणि भवंति तथा विद्वदिच्छा स्वयं विद्यमानापीष्यमाणपदार्थ
स्यासत्त्वज्ञानेन बाधितत्वात् व्यसनादिकार्यं जनेत्यर्थः ९४ ननु तर्हि विदुष इच्छैव नांगीकर्तव्या फलाभावादित्याशंक्य फलाभावोऽसिद्धो भोग
लक्षणफलसद्भावादिति सदृष्टांतमाह दग्धबीजमिति दग्धं भर्जितमिति यावत् व्यसनं विपदादिरूपं बहु विपुलं व्यसनं विपदि भ्रंशो दोषे का
मज कोपज इत्यभिधानात् ९५ ननु कर्मैव भोगद्वारा व्यसनमपि जनयेदित्याशंक्याह भोगेनेति प्रारब्धकर्मणो भोगमात्रहेतुत्वा
न्न व्यसनजनकत्वमित्यर्थः कुतस्तर्हि व्यसनजन्मेत्यत आह भोक्तव्यसत्यताभ्रांत्येति तत्र तस्मिन्विषये १९६ ॥

व्यसनहेतुं भ्रमं दर्शयति माविनश्यत्विति अयं भोगो माविनश्यतु एवमुत्तरोत्तरं वर्द्धतां विघ्नाश्चैनं माप्रतिबध्नन्तु एतेन गतस्य प्रतिबंधं माकुर्वन्तु अस्मादे
व भोगादहं धन्यः कृतार्थोस्मीत्येवंरूपो भ्रमो भवति तत्तु व्यसनमित्यर्थः ९७ प्रसंगादस्य परिहारोपायमाह यदभावीति यत्तु वित्तमयोग्या
नत्तु भवेदेव भवितुं योग्यं चेत्तदन्यथा न भवेदेत्येवंरूपः चिन्ताविषघ्नः इदं मे श्रेयः कदा भविष्यतीदमनिष्टं कदा निवर्तिष्यत इत्येवमादिचिन्ते
व विषमिव स्वसंसृष्टपुरुषस्य नाशहेतुत्वाद्विषमिदं चिन्ताविषं हन्तीति चिन्ताविषघ्नः एवंभूतो यो बोधः सोयं भ्रमनिवर्तकः पूर्वोक्तस्य भ्रम
स्य निवर्तक इत्यर्थः ९८ ननु विद्वदविदुषोरुभयोरपि भोगित्वाविशेषे एकस्य व्यसनमपरस्य तन्नेत्येतत्कुत इत्याशंक्य विपरीतज्ञानस

मा विनश्यत्वयं भोगो वर्द्धतामुत्तरोत्तरम् मा विघ्नाः प्रतिबध्नन्तु धन्योस्म्यस्मादिति भ्रमः ९७ यदभावि
न तद्भावि भावि चेन्न तदन्यथा इति चिन्ताविषघ्नोयं बोधो भ्रमनिवर्तकः ९८ समेपि भोगे व्यसनं भ्रा
न्तो गच्छेन्न बुद्धिमान् अशक्यार्थस्य संकल्पाद्भ्रान्तस्य व्यसनं बहु ९९ मायामयत्वं भोगस्य बुद्ध्वास्था
मुपसंहरन् भुञ्जानोपि न संकल्पं कुरुते व्यसनं कुतः १०० स्वप्नेन्द्रजालसदृशमचिन्त्यरचनात्मकं
दृष्टनष्टं जगत्पश्यन्कथं तत्रानुरज्यति १०१ स्वस्वप्नमपरोक्षेण दृष्ट्वा पश्यन्स्वजागरम् चिन्तये
दप्रमत्तः सन्नुभावनुदिनं मुहुः १०२ ॥

त्वासत्त्वाभ्यां तत्सिद्धिरित्याह समेपि भोगे इति बुद्धिमान् ज्ञानवान् ज्ञानीत्यर्थः भ्रान्तेः कथं व्यसनहेतुत्वमित्यत आह अशक्यार्थस्येति ९९ वि
वेकिनस्तदभावं दर्शयति मायामयत्वमिति १०० ननु मायामयत्वबोधे सत्यपि भोग्यस्य तदानीन्तनसुखहेतुत्वात्कुत आस्थोपसंहार इत्या
शंक्य बहुविधदोषदर्शनादित्याह स्वप्नेन्द्रजालेति १०१ ननूक्तस्वप्नेन्द्रजालसादृश्यादिज्ञाने सत्यासक्तिभावो नवेत्तदेवमिन्द्रजालादिसा
दृश्यज्ञानं तु दृढतो जायत इत्याशंक्य तज्जन्मोपायमाह स्वस्वप्नमिति द्वाभ्यां स्वकीयं स्वप्नमपरोक्षतया दृष्ट्वा स्वकीयं जागरमनुभवन्ननुभव
न् स्वप्नजागरावुभावपि अप्रमत्तः सन्मुहुश्चिन्तयेत् स्वप्नतुल्योयं जागर इति १०२ ॥

एवं तयोः सर्वसाम्यं तात्कालिकभोगहेतुपरिणतिविरसत्वविनाशित्वादिलक्षणं चिरमनुसंधाय जागरेपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्वस्तुष्वपि पूर्ववज्जगत्सत्यत्वज्ञानदशायामिव नानुरज्यति अनुरक्तो न भवतीत्यर्थः ७३ ननु प्रपंचगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्यत्वबोधोपजीविनो भोगस्य च परस्परविरोधात् मिथ्यात्वज्ञाने सति कथं भोगसिद्धिरित्याशंक्य भोगस्य विषयसत्यत्वापेक्षाभावान्न विरोध इति परिहरति इंद्रजालमिति इदं द्वैतं भोग्यजातमचिंत्यरचनात्वादिन्द्रजालवन्मिथ्येति प्रज्ञयानुसंधायाऽविस्मरतो विदुषः प्रारब्धभोगतः प्रारब्धकर्मफलयोः सुखदुःखयोरनुभवेन मिथ्यात्वानुसंधानस्य का हानिः वाप्राद्वा मिथ्यात्वानुसंधानेन वा भोगस्य का हानिः विभिन्नविषयत्वादिति भावः ७४

77

चिरं तयोः सर्वसाम्यमनुसंधाय जागरे सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत् ७३ इंद्रजालमिदं द्वैतमचिंत्यरचनात्वतः इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः ७४ निर्बंध्यस्तत्त्वविद्याया इंद्रजालत्वसंस्मृतो प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ७५ विद्यारब्धे विरुद्ध्येते न भिन्नविषयत्वतः जानद्भिरप्यैंद्रजालविनोदो दृश्यते खलु ७६ ॥

विभिन्नविषयत्वमेव दर्शयति निर्बंध इति तत्त्वविद्याया जगतस्तत्त्वगोचरस्य ज्ञानस्य इंद्रजालवज्जगतो मिथ्यात्वानुसंधाने निर्बंधो न तु भोगापलापे प्रारब्धकर्मणस्तु जीवस्य सुखदुःखयोः प्रदाने आग्रहः न तु भोग्यसत्यत्वापादन इति भावः ७५ एवं विभिन्नविषयत्वप्रदर्शपूर्वयोः समाह विद्याप्रारब्धकर्मणी परस्परं न विरुद्ध्येते विभिन्नविषयत्वात् संप्रतिपन्नरूपरसस्पर्शज्ञानवदित्यर्थः भोग्यमिथ्यात्वज्ञानं भोगबाधकं न भवतीत्येतत्त्व दृष्टमित्याशंक्याह जानद्भिरिति ऐंद्रजालविनोद इन्द्रजालसंबंधि चमत्कारविशेषः जानद्भिरप्यवलोक्यत इति प्रसिद्धमित्यर्थः ७६ ॥

किंच विद्याप्रारब्धकर्मणोर्विरोधोऽस्तीति वदन् प्रष्टव्यः किं प्रारब्धकर्म विद्याविरोधीत्युच्यते उत विद्या प्रारब्धकर्मविरोधिनीति नाद्य इत्याह जगत्सत्यत्वमिति प्रारब्धकर्म जगतो भोग्यजातस्य सत्यत्वमबाध्यत्वमापाद्य संपाद्य यदि भोजयेज्जीवस्य सुखदुःखे दद्यात्तदा विद्याविषय मिथ्यात्वस्यापह्नवद्वारा हि विद्याया विरोधी स्यान्न त्वेतज्जगतः सत्यत्वमापाद्य भोगं ददाति यथाकरोति किंतु भोगमेव प्रयच्छति अतो न विद्याविरोधि प्रारब्धमिति भावः भोगबलादेव भोग्यस्य सत्यत्वमपि किं न स्यादित्याशंक्याह भोगमात्रेति विमतं जगत्सत्यं भोग्यत्वादित्यत्र दृष्टांताभाव इति भावः ७७ ननु मिथ्यापदार्थैर्भोगो भवतीत्यत्रापि दृष्टांतो नास्तीत्याशंक्याह अनृतैरिति ७८ नापि द्वितीय इत्याह यदीति विद्या यदि जगद्भोग्यजातमपह्नुवीत नेदं रजतमितिनिषेधकज्ञानवन्निरस्यमानस्य भोग्यस्य स्वरूपं विलापयेत् तदा प्रारब्धकर्मभो

जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद्यदि तदास्ये विरोधि विद्याया भोगमात्रान्न सत्यता ७७ अनृतै
र्जायते भोगः कल्पितैः स्वप्नवस्तुभिः जाग्रद्वस्तुभिरप्येवमसत्यैर्भोग इष्यताम् ७८ यदि विद्या
पह्नुवीत जगत्प्रारब्धघातिनी तदा स्यान्न तु मायात्वबोधेन जगतः तदपह्नवः ७९ अनप
ह्नुत्य लोकास्तदिन्द्रजालमिदं त्विति जानन्त्येवानपह्नुत्य भोगं मायात्वधीस्तथा ८० ॥

गस्य सुखदुःखानुभवस्य साधनभोग्यविषयस्वरूपस्यनापहारेण प्रारब्धकर्मविघातिनी स्यान्न चैतत् भोग्यस्वरूपं नाशयतीत्याकरोति किंतु मिथ्यात्वमेव बोधयति अतो न प्रारब्धकर्मविरोधिनीति भावः ननु मिथ्यात्वबोधनादेव प्रपंचस्वरूपमपि विलापयेदित्याशंक्याह नत्विति इंद्रजालादौ स्वरूपविलापनमंतरेणापि मिथ्यात्वज्ञानदर्शनादिति भावः ७९ एतदेव विद्यायाः स्वरूपोपमर्दकत्वाभावमेव दृष्टांतप्रपंचयति अनपह्नुत्येति लोका जनास्तदिंद्रजालस्वरूपमनपह्नुत्यानिरस्य इदमिन्द्रजालमिति जानन्त्येव यथा तथा भोगं भोग्यमनपह्नुत्याविलाप्य मायात्वधीः जगन्मिथ्यात्वज्ञानं भवतीत्यर्थः ८० ॥

यत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिर्द्वैतदर्शनदृष्ट्याभावं बोधयन्त्यतो विद्योत्पद्यमाना जगद्विलापयत्येव एवं सति विद्वद्भोगश्च कथं स्यादिति श्रुत्यवष्टम्भेन शङ्कते श्लोकद्वयेन यत्रत्वस्येति यत्र यस्यां विद्यावस्थायां कृत्स्नं जगदस्य विदुषः स्वात्मैवाभूदिदं सर्वं यदयमात्मेति ज्ञाने नस्वरूपमेव भवति तत्र तस्यां दशायां को द्रष्टा केन साधनेन च कं घटादिकं दृश्यं पश्येत् न कोपि पश्येदेवं घ्राणरसनत्वगादीन्द्रियैः केन किं जिघ्रेत् किं वाक्येन वा गिरिन्द्रियेण वा वदेदेवमितरेन्द्रियव्यापाराभावयोजनाय वाशब्द इत्येवं प्रकारेण श्रुतौ बहुवारमभिहितमित्यर्थः ८२ ततः किमित्यत्राह तेन द्वैतमिति स्वाप्ययसंपत्त्योरन्यतरायेन्मा विद्वत्तं हीत्यस्मिन् सूत्रे यत्रत्वस्येत्युदाहृतायाः श्रुतेः स्वाप्ने मोक्षयोरन्यतरविषयत्वेन व्याख्यातत्वात् विद्याया जगदपह्नवहेतुत्वं परिहरति सुषुप्तीति ८२ स्वाप्ययः सुषुप्तिः संपत्तिर्मुक्तिरित्यर्थः ८३ अस्याः श्रुतेः सुषुप्त्यादिविषयत्वानङ्गीकारे बाधकमाह अन्यथेति तन्नोपपत्तिमाह द्वैतदृष्टाविति याज्ञवल्क्यादिर्यदि द्वैतं पश्येत्तर्हि तद्द्वैतज्ञानाभावात्स आचार्यो भवेत् अथ द्वैतं न पश्यति तर्हि बोधयितव्यशिष्याद्यनुपलम्भादाचार्यवाक्शिष्यप्रतिबोधनाय न प्रवर्तेत अतो विद्यासंप्रदायोच्छेदप्रसङ्ग इति भावः ८४ ननु याज्ञवल्क्यादीनामाचार्यत्वदशायां विद्यमानस्य तत्त्वस्य वित्त्वमस्त्येव तथापि तस्य नापरोक्षविद्यात्वं द्वैतप्रतीतिसद्भावान्निर्विकल्पकसमाधौ तु द्वैतदर्शनाभावात्सैवापरोक्षविद्येति शङ्कते निर्विकल्पेति द्वैतास्फूर्तेरनिर्मोक्षप्रसङ्गापादकत्वात्सैवमिति परिहरति सुषु

यत्रत्वस्य जगत्स्वात्मा पश्येत्कस्तत्र केन किम् किं जिघ्रेत्किं वदेद्वेति श्रुतौ तु बहु घोषितम् ८२ ते न द्वैतमपह्नुत्य विद्योदेति न चान्यथा तथा च विदुषो भोगः कथं स्यादिति चेच्छृणु ८३ सुषुप्तिविषया मुक्तिविषया वेति सा श्रुतिः उक्तं स्वाप्ययसंपत्त्योरिति सूत्रे ह्यतिस्फुटम् ८४ अन्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत् द्वैतदृष्टावविद्वत्ता द्वैतादृष्टौ न वाग्भवेत् निर्विकल्पसमाधौ तु द्वैतादर्शनहेतुतः सैवापरोक्षविद्येति चेत्सुषुप्तिस्तथा न किम् ८५

अतिप्रसंगपरिहारं शंकते आत्मतत्त्वमिति सम्भाव्यो द्वैतदर्शनाभावेपि आत्मगोचरज्ञानाभावान्न विद्यात्वं तस्या इत्यर्थः तर्हि प्राप्तं विवेके
न ज्ञानस्यैव विद्यात्वं न द्वैतदर्शनाभावस्येत्याह तदात्वयेति ५८ ननु द्वैतादर्शनात्मज्ञानयोर्मिलितयोरेव विद्यात्वं नैकैकस्येति शंकते
उभयमिति द्वैतविस्मृतेरपि विद्यांशत्वांगीकारे जडस्याप्यंशे विद्यावत्त्वप्रसंग इति परिहरति तर्हि घटादय इति अत्रोपपत्तिमाह स
कलेति ५९ अस्मिन्नेव पक्षे समाधिमतां पुरुषाणामंशे विद्यावत्त्वमपि न स्यादिति सोपहासमाह मशकपतनीति घटादीनां यथा द्वैतवि
स्मरणं दृष्टं तथा न च समाधौ द्वैतविस्मरणं न संभवति मशकपत्न्यादीनामनेकेषां विक्षेपाणां सद्भावादित्यर्थः ६० नन्वात्मज्ञानस्यैव

आत्मतत्त्वं न जानाति सम्भाव्यो यदि तदात्वया आत्मधीरेव विद्येति वाच्यं न द्वैतविस्मृतिः ५८ उभ
येमिलिते विद्या यदि तर्हि घटादयः अपि विद्याभाजिनः स्युः सकस्मै द्वैतविस्मृतेः ५९ मश
कपतिमुख्यानां विक्षेपाणां बहुत्वतः न च विद्या तथा न स्याद् घटादीनां यथा हठात् ६० आ
त्मधीरेव विद्येति यदि तर्हि सुखी भव दुष्टचित्तनिरोधाद्वै विहितं यत्नं यथासुखम् ६१ न
दिष्टमेष्टव्यमायामयत्वस्य समीक्षणात् इच्छन्नप्यज्ञवन्नेच्छा किमिच्छन्निति हि श्रुतम् ६२

विद्यात्वं न द्वैतविस्मृतेरिति शंकते आत्मधीरिति तदस्माकमिष्टमित्यभिप्रायेण श्रीवीदयति तर्हि सुखीति नन्वात्मधीरेव विद्या स्थान
दुष्टचित्ते संभवत्यपि द्वेषपरिहाराय चित्तवृत्तिनिरोधः कार्य इति शंकामनुभाषते दुष्टचित्तमिति तदंगीकरोति निरुन्धि इत्व
मिति ६१ तदिष्टमिति अस्माकमपीति शेषः कुत इत्यत आह एष्टव्येति चिदोषापगमे सति अद्वितीयात्मज्ञानाय येष्टमाणज
गन्मायामयत्वसम्यगीक्षते युक्त अत इष्टमित्यर्थः एवं किमिच्छन्निति मंत्रांशेनाभिप्रेतमर्थमुपपादितमुपसंहरति इच्छ
न्नपीति इच्छन्नप्ययमज्ञवन्नेच्छेदतः किमिच्छन्निति श्रुतमिति योजना ६२ ॥

एवमभिप्रायवर्णने कारणमाह रागइति रागो लिंगमबोधस्य चित्तव्यायामभूमिषु कुतः शाद्वलता तस्य यस्याग्निः कोटरे तरोः इति तत्त्वविदो
रागनिषेधपरं शास्त्रं शास्त्रार्थस्य सम्यग्ज्ञानवत्त्वान्मुक्तिः स्याज्ज्ञानवतां मुनेः रागादयः संतु कामं न तद्भावोऽपराध्यत इति तस्यैव रागांगीकारपरं च शा
स्त्रम् एवं सति तत्त्वविदो दृढरागाभावे सति शास्त्रद्वयं सार्थं भवति अविरोधतः रागनिषेधपरस्य शास्त्रस्य दृढरागविषयत्वात्तदभ्युपगम
परस्य शास्त्रस्य रागाभासविषयत्वादिति भावः ५१ एवं किमिच्छन्नित्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यंशस्याभिप्रायमाह जगन्मि
थ्यात्वेति यथा जगन्मिथ्यात्वबोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तं एवमात्मनोऽसंगत्वबोधेन वास्तवभोक्त्रभावविव
क्षयात्राभिहितमित्यर्थः ५२ नन्वात्मनो भोक्तृत्वप्रतिषेधस्तद्भोगत्वप्रसक्तिपूर्वकोऽवक्तव्यः सा तु न विद्यतेऽसंगत्वादात्मन इत्याशंक्यातक

रागो लिंगमबोधस्य संतु रागादयो बुधे इति शास्त्रद्वयं सार्थमेवं सत्यविरोधतः ५१
जगन्मिथ्यात्ववत्स्वात्मासंगत्वस्य समीक्षणात् कस्य कामायेति वचो भोक्त्रभावविवक्षया ५२ पतिजायादिकं सर्वं तद्भोगायैव नेच्छति किं त्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ५३ किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्तृतां व्रजेत् ५४ सुखदुःखाभिमानाख्यो विकारो भोग उच्यते कूटस्थश्चविकारी चेत्येतन्नव्याहतं कथम् ५५ ॥

स्यः स्वानुभवसिद्धत्वान्नैवमित्यभिप्रेत्य तदनुवादिकां श्रुतिमर्थतोऽनुक्रामति पतिजायादीति न वा अरे पत्युः कामाय पतिः
प्रियो भवतीत्यारभ्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतेन वाक्यसंदर्भेण पतिजायादिकस्य प्रपंचस्यात्मनो भोगसाधनत्वं प्रतिपा
द्यते तत्रात्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ५३ एवमात्मनो भोक्तृत्वं प्रदर्श्य तदपवादाय भोक्तारं विकल्पयति किं कूटस्थ इति किं कूट
स्थ इति किं कूटस्थस्य भोक्तृत्वमुत चिदाभासस्य किं वोभयात्मकस्येति विकल्पार्थः तत्र प्रथमं प्रत्याह नेति ५४ असंगत्वमस्तु भोक्तृ
त्वमप्यस्तु को दोष इत्याशंक्याह सुखेति सुखित्वदुःखित्वाभिमानलक्षणो विकारो भोगः सोऽसंगस्य कूटस्थस्य न युज्यते कूटस्थत्व

विकारित्वयोरेकत्रसमावेशायोगात् इत्यर्थः ५५ ॥

ननु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्याविकारित्वेऽपि निरधिष्ठानस्य तस्यैवासिद्धेर्मैवमिति परिहरति विकारीति
चिदाभासस्य विकारिबुद्ध्याद्युपाध्यधीनत्वात्स्वस्मिन्विकारे संभवत्यपि तस्यारोपितस्वरूपत्वेनाधिष्ठानभूतं कूटस्थं विहाय स्वातन्त्र्येणाव
स्थानासंभवात्केवलचिदाभासस्यापि भोक्तृत्वं न संभवतीति भावः ९८ तस्मात्तृतीयः पक्षः शिष्यत इत्याह उभयात्मक इति यत एके
कस्य भोक्तृत्वं न संभवति अत उभयात्मकः साधिष्ठानश्चिदाभास एव लोके व्यवहारदशायां भोक्तेत्यभिधीयते परमार्थस्तूभयात्म
कत्वमेव न घटत इति भावः ननु असंगो ह्ययं पुरुष इत्यादावसंगस्यैव योऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिसाक्षित्वस्यापि श्रवणा
दुभयात्मकं भोक्तृस्वरूपमपि पारमार्थिकमेव स्यान्न लोकव्यवहारमात्रसिद्धमित्याशंक्याह श्रुतेस्तत्रतात्पर्याभावान्मैवमित्याह

विकारिबुद्ध्यधीनत्वादाभासे विकृतावपि । निरधिष्ठानविभ्रान्तिः केवला नहि तिष्ठति ॥ ९८
उभयात्मक एवातो लोके भोक्तेति गीयते । तादृगात्मानमारभ्य कूटस्थः शोधितः श्रुतौ ॥ ९९
आत्मा कतम इत्युक्ते याज्ञवल्क्योऽपि बोधयन् । विज्ञानमयमारभ्यासंगं तं पर्यशोधयत् ॥ २००
कोऽयमात्मेत्येवमादौ सर्वत्रात्मविचारतः । उभयात्मकमारभ्य कूटस्थः शोध्यते श्रुतौ ॥ २०१

तादृगिति तादृगात्मानं बुद्ध्युपाधिकं भोक्तारमात्मानमारभ्यानूद्य कूटस्थः बुद्ध्यादिकल्पनाधिष्ठानभूतश्चिदात्मा शोधितः बुद्ध्या
द्यनात्मन्यात्मत्वनिरसनेन परिशोधितः श्रुतौ बृहदारण्यकादावित्यर्थः ९९ तत्र बृहदारण्यकवाक्यार्थं तावत्संक्षिप्य दर्शयति आ
त्मेति जनकेन कतम आत्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयन् योऽयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमु
पक्रम्यासंगो ह्ययं पुरुष इत्यसंगं कूटस्थं परिशोधितवानित्यर्थः २०० एवं बृहदारण्यके संगात्मपरिशोधप्रकारं प्रदर्श्यैतरेयादिष्वप्यु
पनिषत्स्वपि तद्दर्शयति कोऽयमात्मेति वयमुपास्महे कतमः स आत्मेत्येवमादावात्मविचारेणान्तःकरणोपाधिकमात्मानमारभ्य प्रज्ञानमा
त्रात्मकः कूटस्थः परिशोधितः एवमन्यत्रापि द्रष्टव्यं एवं युक्तिश्रुतिपर्यालोचनायामुभयात्मकस्य भोक्तुर्मिथ्यात्वं पारमार्थिकस्यासंग

ननूक्तरीत्या भोक्तृत्वमिथ्यात्वे प्राणिनां तस्मिन्सत्यत्वबुद्धिः कुतो जायत इत्याशंक्याह कूटस्थेति आत्मा लोकप्रसिद्धो भोक्ताऽविवेकतः स्वस्य कूटस्थाद्भेदज्ञानाभावेन कूटस्थनिष्ठसत्यत्वमात्मन्यध्यस्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न हातुमिच्छति २ ननु तर्ह्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यात्मशेषत्वं भोग्यस्य कथं प्रतिपाद्यत इत्याशंक्य न कूटस्थात्मशेषत्वं प्रतिपाद्यते किंतु लोकप्रसिद्धो भुयात्मकभोक्तृशेषत्वमेव श्रुत्यानूद्यत इत्याह भोक्तेति लोके यो भोक्ता सः स्वस्यैव भोगाय पतिजायादिभोगोपकरणमिच्छतीत्ययं लौकिकवृत्तान्तः श्रुत्या सम्यगनूद्यते नार्थान्तरं प्रतिपाद्यत इत्यर्थः ३ अनुवादः किमर्थमित्याशंक्य भोक्तर्येव प्रेम्णो विधानायेत्याह भोग्यानामिति भोग्यानां पतिजायादीनां भोक्तुः स्वस्य भोगोपकरणत्वाद्भोग्येष्वनुरागो न

कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माविवेकतः तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति २
भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति एष लौकिकवृत्तान्तः श्रुत्या सम्यगनूद्यते ३
भोग्यानां भोक्तृशेषत्वान्मा भोग्येष्वनुरज्यताम् भोक्तर्येव प्रधानेतोऽनुरागं तं विधित्सति ४ या
प्रीतिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु २·५ ॥

कर्तव्यः किंतु प्रधानभूते भोक्तर्येवानुरागः कर्तव्य इति विधानायेत्यर्थः ४ भोग्येषु प्रेमत्यागपुरःसरमात्मप्रेमकर्तव्यतायां दृष्टान्तत्वेनेश्वरे प्रेमप्रार्थनापुरःसरं पुराणवचनमुदाहरति या प्रीतिरिति अविवेकानामात्मज्ञानशून्यानां विषयेष्वनपायिनी दृढतया प्रीतिरस्ति हे मापलक्ष्मीपते सा प्रीतिस्त्वामनुस्मरतस्त्वां सदा चिन्तयतो मे हृदयान्मनसः सर्पतु गच्छतु मम मनो विषयेष्वासक्तिं परित्यज्य त्वय्येव सदा तिष्ठत्वित्यर्थः यद्वा अविवेकानां विषयेषु दृढतया यादृशी प्रीतिरस्ति सा तादृशी विषयेषु विद्यमाना प्रीतिस्त्वामनुस्मरतो मे हृदयान्मापसर्पतु मापगच्छतु सदा तिष्ठत्वित्यर्थः २·५ ॥

भवत्येवं पुराणेषु नौकिमायातमित्यत आह इतीति अनेन पुराणोक्तन्यायेन सर्वस्माद्भोग्यजातात् पतिजायादिलक्षणाद्विरक्तधीः
विरक्ताधीर्यस्य सो विरक्तधीः पुरुषस्याभोग्यगोचरां प्रीतिं भोक्तर्यात्मस्वरूपे संस्थाप्य एवमात्मानं बुभुत्सते बोद्धुमिच्छति ६ एवमात्मन्येव
प्रेम्णोपसंहारे फलितं सदृष्टान्तमाह स्वच्छन्देति पामरः पृथग्जनः स्वर्गादिविषये यथा प्रमत्तः सावधानो भवति एवं मुमुक्षुरप्या
त्मनि विषये न प्रमाद्यन्यः न वधानं न करोति किं त्वत्र चिन्तयैव तिष्ठतीत्यर्थः ७ अनवधानाभावमेव बहुभिर्दृष्टान्तैः स्पष्टयति काव्य
नाटकेति यथा विजिगीषुः प्रतिवादिजयकाम इह लोके प्रधानतः पुरुषो निरंतरं काव्यादीनभ्यस्यति एवं मुमुक्षुरपि सदा स्वात्मान

इति न्यायेन सर्वस्माद्भोग्यजाताद्विरक्तधीः उपसंहृत्य तां प्रीतिं भोक्तर्येवं बुभुत्सते ६ स्रक्चंदन
वधूवस्त्रसुवर्णादिषु पामरः अप्रमत्तो यथा तद्वन्न प्रमाद्यति भोक्तरि ७ काव्यनाटकतर्कादी
नभ्यस्यति निरंतरम् विजिगीषुर्यथा तद्वन्मुमुक्षुः स्वं विचारयेत् ८ जपयागोपासनादि
कुरुते श्रद्धया यथा स्वर्गादिवाञ्छया तद्वच्छ्रद्दध्यात्स्वे मुमुक्षया ९ चित्तैकाग्र्यं यथा योगी म
हायासेन साधयेत् अणिमादिप्रेप्सयैवं विविच्यात्स्वं मुमुक्षया १० कौशलानि विवर्द्धन्ते तेषाम
भ्यासपाटवात् यथा तद्वद्विवेकोऽस्याप्यभ्यासाद्वैशदायते २११ ॥

विचारयेत् ८ जपेति यथा वैदिकः स्वर्गार्थी तत्साधनानि जपादीनि श्रद्धापुरःसरमनुतिष्ठति तथा मुमुक्षुरपि मोक्षेच्छया स्वे
श्रौते आत्मनि विश्वासं कुर्यात् ९ चित्तैकाग्र्यमिति योगी योगाभ्यासवानणिमाद्यैश्वर्यलाभेच्छया महायासेन चित्तैकाग्र्यं यथा
संपादयेत्तद्वदयमप्यात्मानं सदा विविच्याद्देहादिभ्यो विविच्य जानीयादित्यर्थः १० नन्वेवमेतेषां सदाभ्यासेन किं फलमित्य
त आह कौशलानीति यथा तेषां काव्याद्यभ्यासवतामभ्यासपाटवेन तस्मिंस्तस्मिन्विषये कौशलानि विवर्द्धन्ते एवमस्यापि मु
मुक्षोरभ्यासाद्विवेको देहादिभ्य आत्मन्यभेदज्ञानं विशदायते स्पष्टं भवति २११ ॥

विवेकवैशद्यस्य फलमाह विविक्ततेति अन्वयव्यतिरेकाभ्यां भोक्तृत्वं भोक्तुः पारमार्थिकस्वरूपं विविक्तता भोगेभ्यो जडजातेभ्यो भेदेन ज्ञा
नतापुरुषेण जाग्रदादिषु जाग्रत्स्वप्नसुषुप्तिष्ववस्थासु साक्षिण्यपि संगतावसीयते निश्चीयत इत्यर्थः १२ अन्वयव्यतिरेकौ दर्शयति यत्रे
ति जाग्रदादिषु मध्ये यत्र यस्मिन्नस्य नेजाग्रति स्वप्ने सुषुप्तौ च यत्स्थूलं सूक्ष्ममानंदश्चेति त्रिविधं भोग्यं द्रष्टा साक्षिणा दृश्यते अनुभूयते त
द्रूपं तत्रैव तस्यामेवावस्थायां तिष्ठतीतरत्र न त्वितरस्यामवस्थायां नास्ति द्रष्टा सर्वत्रानुगततया वर्तत इत्यनुभूतिरनुभवः सर्वसंमतः
हि प्रसिद्धमेतदित्यर्थः १३ न केवलमनुभवः किं त्वागमोपीत्यभिप्रायेण स्वयं तत्रेति किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पु
रुषः स्वाप्यतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवतीत्यादिवाक्यद्वयमर्थतः पठति स
यत्रेति सम्यगात्मा तत्र तस्यामवस्थायां यत्किंचिद्भोग्यमीक्षते पश्यति तेन दृश्येनानन्वागतो भवेदनुस्यूतो न भवेत्

विविक्तता भोक्तृत्वं जाग्रदादिषु संगता अन्वयव्यतिरेकाभ्यां साक्षिण्यप्यवसीयते १२ य
त्र यद्दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु नैवैतत्तत्र तेष्वनुभूतिर्हि संमता १३ स्वयं तत्रै
व तेन किंचित्तेनानन्वागतो भवेत् दृष्टैव पुण्यपापाभ्यां वेत्येवं श्रुतिडिंडिमः १४ जाग्रत्स्वप्न
सुषुप्त्यादिप्रपंचं यत्प्रकाशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते १५ एक एवा
त्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते १६ ॥

किं तु स्वयमेवावस्थांतरं गच्छतीत्यर्थः पुण्येन तत्फलेन सुखेन पापेन तत्फलेन दुःखेन च दृष्टैवानादाय इत्यर्थः १४ भोक्तृतत्त्वविवेचनप्र
याणिफलं तत्र ताणि दर्शयति जाग्रदित्यादिना यत्सत्यादिज्ञानानंदलक्षणं ब्रह्म साक्षिरूपेणावस्थितं तज्जाग्रदादिप्रपंचं प्र
काशते प्रकाशयति तद्ब्रह्माहमस्मि न तु बुद्धिचिदाभासोऽहमस्मीति ज्ञात्वानुभवाभ्यां निश्चित्य सर्वैः प्रतिबंधैः प्र
मातृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते १५ जाग्रदादिष्ववस्थासु एक एवात्मा मंतव्यः एवं विवेकज्ञानेन स्था
नत्रयव्यतीतस्यावस्थात्रयाद्विविक्तस्यात्मनः पुनर्जन्म न विद्यते एतच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः २१६

त्रिपुट्यामस्तु त्रिष्ववस्थानेषु यज्ज्ञेयं स्थूलप्रविविक्तानंदरूपं यश्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति
येत्रियं तेभ्यः स्थानादिभ्यो विलक्षणो यश्चिन्मात्ररूपः साक्षी सदाशिवो निरतिशयानंदरूपत्वेन सर्वदा शोभमानः परमात्मास्ति
सोहमस्मीत्यर्थः १७ एवं विवेकेनात्मतत्त्वे संगे निश्चिते सति भोक्तृत्वं कस्येत्यत आह एवमिति यो विज्ञानमयशब्देनाभि
धीयमानश्चिदाभासस्तस्याविकारित्वाद्भोक्तृत्वमित्यर्थः १८ ननु चिदाभासस्य भोक्तृत्वांगीकारे कस्य कामायेति वचो भोक्तृभावाविव
क्षयेति पूर्वोक्तं व्याहन्येतेत्याशंक्य तस्य वचनस्य पारमार्थिकभोक्तृभावपरत्वमभिप्रेत्य भोक्तुश्चिदाभासस्य मिथ्यात्वं साधय
ति मायिकोयमिति अयं चिदाभासो मायिको मृषात्मकः श्रुतेः जीवेशावाभासेन करोतीति श्रुतेः अनुभवादपि इदमादि

त्रिपुट्यामस्तु यज्ज्ञेयं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः १७
एवं विवेचिते तत्त्वे विज्ञानमयशब्दितः चिदाभासो विकारी यो भोक्तृत्वं तस्य शिष्यते १८
मायिकोयं चिदाभासः श्रुतेरनुभवादपि इंद्रजालं जगत्प्रोक्तं तदंतःपात्ययं यतः १९ वि
लयोप्यस्य सुप्त्यादौ साक्षिणा ह्यनुभूयते एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः २०
विविच्य नाशं निश्चित्य पुनर्भोगं न वांछति मुमूर्षुः शायितो भूमौ विवाहं कोभिवांछति २१

त्रितयमप्यव्यवर्ज्जितत्वेनानुभूयमानत्वादपीत्यर्थः तदेवोपपादयति इंद्रजालमिति इंद्रजालवन्मिथ्याभूते जगत्यंतर्भूतत्वादस्या
पि मिथ्यात्वं तद्वदनुभूयते विद्वद्भिरिति शेषः यस्माज्जगदंतःपातीति अतो मृषेति योजना १९ अस्य जगत इव विनाशित्वानु
भावादपि मृषात्वमित्याह विलयइति मूर्छादिरादिशब्दार्थः भवतु मृषात्वं ततः किमित्यत आह एतादृशमिति यदा कूटस्था
द्विवेचितश्चिदाभासो मायिको जानतस्तदा स्वस्वभावं स्वतत्त्वमेतादृशं मृषात्मकं पुनःपुनर्विविनक्ति कूटस्थाद्विविच्य जानाति
२० ततोपि किमित्यत आह विविच्येति स्वविनाशं निश्चित्य भोगेच्छाभावे दृष्टांतमाह मुमूर्षुरिति २२१ ।।

किंचपूर्ववदहंभोक्तेतिव्यवहर्तुमपिलज्जतइत्याह जिह्रेतीति तर्हिज्ञानोत्पत्त्यनंतरंप्रारब्धावसानपर्यंतंव्यवहरतीत्यतआहछिन्ननास इतिज्ञा
नोत्पत्तितःक्लिश्यन्नेवेदानीमपिकर्मक्षीयतइतिक्लेशमनुभवन्प्रारब्धमश्नुतेप्रारब्धकर्मफलंभुंक्तइत्यर्थः २२ इदानींज्ञानानंतरंसाक्षिणोभो
क्तृत्वाभावःकैमुतिकन्यायसिद्धइत्याह यदेति अयंचिदाभासःस्वस्यापिभोक्तृत्वंमंतुमहंभोक्तेतिमंतुंजिह्रेतिविलज्जतेयदातदैतत्स्वगतं
भोक्तृत्वंसाक्षिण्यसंगेआरोपयेदितिवृथाकथार्थशून्याकैवनकापीत्यर्थः २३ उक्तमर्थंश्रुत्यासंवादयति इतीति कस्यकामायेतिश्रुतिरि
त्यर्थः कूटस्थस्यचिदाभासस्यवापारमार्थिकभोक्तृत्वाभावमभिप्रेत्याविशंकयाशंकाराहित्येनभोक्तारमाक्षिपतिनिराकरोति भवत्वेवं

जिह्रेतिव्यवहर्तुंचभोक्ताहमितिपूर्ववत् छिन्ननासइवह्रीतःक्लिश्यन्प्रारब्धमश्नुते २२ यदास्वस्या
पिभोक्तृत्वंमंतुंजिह्रेत्ययंतदासाक्षिण्यारोपयेदेतदितिकैवकथावृथा २३ इत्यभिप्रेत्यभोक्तारमा
क्षिपत्यविशंकया कस्यकामायेत्यतः···· शरीरानुज्वरेन्नहि २४ स्थूलंसूक्ष्मंकारणंचशरीरंत्रि
विधंस्मृतम् अवश्यंत्रिविधोस्त्येवतत्रतत्रोचितोज्वरः २५ वातपित्तश्लेष्मजन्यव्याधयःकोटिशस्तनौ
दुर्गंधित्वकुरूपत्वदाहभंगादयस्तनः २६ कामक्रोधादयःशांतिदांत्याद्यालिंगदेहगाः ज्वराद्वयेपि
बाधेतेप्राप्त्याप्राप्त्यानरंक्रमात् २७ स्वंपरंचनवेत्त्यात्माविनष्टइवकारणे आगामिदुःखबीजंचेत्येतदिन्द्रेण
दर्शितम् २२८ ॥

भोक्ताक्षेपस्ततःकिमित्यतआह अतइति ज्वरोज्वरणंसंतापः २४ तत्त्वविदःशरीरानुज्वराभावंदर्शयितुंशरीर
भेदंतत्रतत्रज्वरसद्भावंचदर्शयति स्थूलमिति २५ तत्रस्थूलशरीरेज्वरांस्तावदाह वातेति २६ सूक्ष्मशरीरज्वरान्दर्शयति कामक्रोधा
दयइति कामादीनांशांत्यादीनांचज्वरत्वमुपपादयति द्वयेपीति द्वयेपिद्विधापिक्रमेणप्राप्त्याप्राप्तिभ्यांनरंबाधंतेऽतोज्वरसाम्याज्ज्वरा
इत्युच्यंतइत्यर्थः २७ कारणशरीरगतोज्वरश्छांदोग्यश्रुत्योक्तइत्याह स्वमिति नाहखल्वयमेवंसंप्रत्यात्मानंजानात्ययमहमस्मी
ति नोएवेमानिभूतानिनाशमेवापीतोभवति नाहमत्रभोग्यंपश्यामीतिवाक्येनस्वपरज्ञानशून्यत्वमज्ञानेननष्टप्रायत्वंपरेद्यु
रागामिदुःखबीजवासनासद्भावंचेन्द्रेणशिष्येणगुरोःप्रजापतेःपुरतोनिवेदितमित्यर्थः २२८ ॥

एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह एते ज्वरा इति त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वा
भाविकाः संमताः स्वाभाविकत्वं व्यतिरेकमुखेन द्रढयति वियोगेत्विति यतः कारणादेभिर्ज्वरैस्तेषां शरीराणां वियोगे तानि शरीराणि
नासते एव नैव भवन्ति अतः स्वाभाविका इत्यर्थः २९ तत्र दृष्टान्तमाह तन्तोरिति ३॰ इदानीं कूटस्थे ज्वराभावं केमुतिकन्यायेन दिद
र्शयिषुश्चिदाभासेनापि ज्वराभावं दर्शयति चिदाभास इति चिदाभासे स्वतः शरीरत्रयसंबन्धमन्तरेण न कोपि ज्वरो विद्यते कुत इ
त्यत आह यतश्चित इति चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात्तत्प्रतिबिंबस्यापि चिदाभासस्य तथात्वमेव द्रष्टव्य

एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः । वियोगे न ज्वरैस्तानि शरीराण्येव नासते ३९ तन्तोर्विश्लेषेन पटो वा लभ्यः कंबलो यथा । स्वेदो वटस्तथा देहो ज्वरेभ्योपीति दृश्यताम् ३॰ चिदाभासे स्वतः कोपि ज्वरो नास्ति यतश्चितः । प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत् ३१ चिदाभासेप्यसंभाव्या ज्वराः साक्षिणि का कथा । एवमप्येकतामेनेन चिदाभासोत्र विद्यया ३२ साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्रये । तत्सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते ३३ एतस्मिन्भ्रान्तिकालेयं शरीरेषु ज्वरत्स्वथ । स्वयमेव ज्वरामीति मन्यते हि कुटुंबिवत् ३४ ॥

त्रिति भावः ३१ यदर्थं चिदाभासे ज्वराभाव उपपादितस्तदिदानीं दर्शयति चिदाभास इति यदा चिदाभासेपि ज्वरा न संभाव्यन्ते तदा न
साक्षिणि संभवन्तीति किमु वक्तव्यमिति भावः ननु तर्हि अहं तप्यामीत्यनुभवस्य का गतिरित्यत आह एवमिति ३२ एकतामेनेति
इति संक्षेपेणोक्तमर्थं प्रपंचयति साक्षीति चिदाभासः स्वेन सहिते शरीरत्रये साक्षिगतं सत्यत्वमध्यस्य तत्सर्वं ज्वरवच्छरीरत्रयं
स्वस्य वास्तवं रूपमिति मन्यत इत्यर्थः ३३ एवं भ्रान्तिज्ञाने सति किं भवतीत्याह एतस्मिन्निति अयं चिदाभासः अस्यां भ्रान्तिवे
लायां शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः तत्र दृष्टान्तमाह कुटुंबिवदिति ३४ ॥

दृष्टान्तं विशदयति पुत्रेति ३५ एवमविवेकदशायां चिदाभासस्य भ्रान्त्या ज्वरं प्रदर्श्य विवेकदशायां तदभावं दर्शयति विविच्येति चिदाभासः कूटस्थं स्वात्मानं शरीरादीनि च विविच्य भेदेन ज्ञात्वा इदं सर्वं ममैवास्तित्वं रूपमिति मन्यत इत्युक्तां भ्रान्तिं परित्यज्य स्वस्याभासरूपत्वज्ञानेन स्वस्मिन्नप्यादरमकुर्वन् स्वस्य निजं रूपं ज्वरादिरहितं साक्षिणं सदा चिन्तयन् कस्माच्छरीरमनुसंज्वरेदिति ज्वरवच्छरीरमनुसृत्य स्वयं कस्मात्संज्वरेत् न संज्वरेदेवेत्यर्थः ३६ भ्रान्तिज्ञानतज्जन्यज्ञानयोर्ज्वरतदभावकारणत्वं दृष्टान्तप्रदर्शनेन स्पष्टयति अयथेति रज्ज्वादौ कल्पितस्य सर्पादेर्ज्ञानं पलायने कारणं भवति आदिशब्देन स्थाणौ कल्पितश्चोरो गृह्यते रज्ज्वादिज्ञानेन सर्पादिबुद्धिनिवृत्तौ तदपि

पुत्रदारेषु तप्यत्सु तप्यामीति यथा तथा मन्यते पुरुषस्तद्वद् चिदाभासोऽप्यभिमन्यते ३५ विविच्य भ्रान्तिमुत्सृज्य स्वमप्यगणयन्सदा चिन्तयन्साक्षिणं कस्माच्छरीरमनुसंज्वरेत् ३६ अयथावस्तुसर्पादिज्ञानं हेतुः पलायने रज्जुज्ञानेऽहिधीर्ध्वस्ता कृतमप्यनुशोचति ३७ मिथ्याभियोगदोषस्य प्रायश्चित्तस्य सिद्धये क्षमापयन्निवात्मानं साक्षिणं शरणं गतः ३८ आवृत्तपापनुत्त्यर्थं स्नानाद्यावर्त्यते यथा आवर्तयन्निव ध्यानं सदा साक्षिपरायणः २३९

पलायनमनुशोचयति वृथा कृतं मयेत्यनुतप्यत इत्यर्थः ३७ साक्षिणं सदा चिन्तयन्नित्युक्तमर्थं दृष्टान्तेन स्पष्टयति मिथ्येति यथा लोके मिथ्याभियोगकर्ता जनः दोषस्य प्रायश्चित्तसिद्ध्यर्थं मिथ्याभियोगयुक्तं पुनः पुनः क्षमापयति एवमयं चिदाभासोऽपि साक्षिण्यसंगात्मनि भोक्तृत्वाद्यारोपलक्षणं मिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षिणमात्मानं क्षमापयन्निव शरणं गतः तत्रैव दृष्टान्तान्तरमाह आवृत्तेति यथा पापकारिपुरुषेण आवृत्तपापनुत्त्यर्थमभ्यस्तपापापनोदाय विहितं स्नानादिकं प्रायश्चित्तमावर्त्यते पुनः पुनरनुष्ठीयते तथायमपि चिदं साक्षिणि संसारित्वारोपणदोषपरिहाराय ध्यानं परिवर्तयन्निव सदा साक्षिपरायणो भवति २३९ ॥

एवं साक्षिपरत्वं दृष्टान्तेन रूपवर्णपिस्वगुणप्रख्यापनेन लज्जालुत्वं सदृष्टान्तमाह उपस्थेति ४९ इदानीं शरीरत्रयाद्विवेचितस्य चिदाभासस्य पुनस्तैः शरीरैः सहतादात्म्यभ्रमाभावे दृष्टान्तमाह गृहीत इति ५० न केवलं स्वापराधनिवृत्तये साक्ष्यनुसरणं किंतु महत्प्रयोजनसिद्ध्यर्थमपीति सिंहावलोकनन्यायेन सदृष्टान्तमाह यौवराज्य इति राजानुकारी भवति राजेव प्रजारंजनादिगुणवान्भवतीत्यर्थः ५१ ननु युवराजस्य राजानुसरणे साम्राज्यफलं दृश्यते नैवं साक्ष्यनुसरणेऽनन्तदनुसरणे कथं प्रवर्तत इत्याशंक्याह यो ब्रह्मेति स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति तरति शोकं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवतीति श्रुतौ ब्रह्मभावादि

उपस्थकुष्ठिनी वेश्या विलासेषु विलज्जते जानतोऽग्रे तथाभासः स्वप्रख्यातौ विलज्जते ४९ गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः म्लेच्छैः संकीर्यते नैवं तथाभासः शरीरकैः ५० यौवराज्ये स्थितो राजपुत्रः साम्राज्यवाञ्छया राजानुकारी भवति तथा साक्ष्यनुकार्ययम् ५१ यो ब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिम् श्रुत्वा तदेकचित्तः सन्ब्रह्म वेत्ति न चेतरत् ५२ देवत्वकामा ह्यग्न्यादौ प्रविशन्ति यथा तथा साक्षित्वेनावशेषाय स्वविनाशं स वाञ्छति ५३ यावत्स्वदेहदाहं स नरत्वं नैव मुञ्चति यावदारब्धदेहः स्यान्नाभासत्वविमोचनम् ५४ ॥

फलस्य श्रूयमाणत्वात्तत्फलवाञ्छया साक्ष्यनुसरणे प्रवर्तनं युक्तमित्यर्थः ५२ ननु ब्रह्मज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव विनश्येदतः स्वनाशाय कथं प्रवर्तेतेत्याशंक्याह देवत्वेति यथा लोके देवत्वप्राप्तिकामाः मनुष्याः स्वर्गाग्निप्रयागगंगाप्रवेशादौ प्रवर्तन्ते एवं साक्षिरूपेणावस्थानलक्षणस्यापि कफलस्य विद्यमानत्वाच्चिदाभासत्वापगमहेतौ ब्रह्मज्ञानेऽपि प्रवृत्तिर्घटत एवेत्यर्थः ५३ ननु तत्त्वज्ञानेनाभासत्वमेव गच्छति चेत्कथं तत्त्वविदां जीवत्वव्यवहार इत्याशंक्य प्रारब्धकर्मक्षयपर्यंतं तदुपपत्तिं सदृष्टान्तमाह यावदिति यथाग्न्यादौ प्रविष्टः पुरुषो दाहादिना स्वदेहनाशपर्यन्तं नरत्वनरव्यवहारयोग्यत्वं नैव मुञ्चति एवं प्रारब्धकर्मक्षयपर्यन्तं चिदाभासत्वव्यवहारो न निवर्तत इत्यर्थः ५४ ॥

पं॰ टी॰
त्र॰
८४

ननु भोक्तृत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात्तु ततः कथं भोगानुवृत्तिः कथं वा मर्त्योऽहमिति विपरीतप्रतीतिरित्याशंक्य दृष्टांतप्रदर्शनेनैतत्संभावयति रज्जुज्ञानेपीति ४८ दार्ष्टान्तिके योजयति एवमिति ४७ पुनर्मर्त्यत्वबुद्ध्युदये तेन तत्त्वज्ञानं बाध्यत इत्याशंक्याह नैतावतेति कदाचिदहं मर्त्य इत्येवं विज्ञानोदयमात्रेणागमप्रमाणजनितं तत्त्वज्ञानं न बाध्यते कुत इत्यत आह जीवन्मुक्तिव्रतमिति इदं मर्त्यत्वबुद्ध्यपाकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं न भवति किंतु सम्यग्ज्ञानेन भ्रांतिज्ञाननिवृत्तिरित्ययं वस्तुस्वभावः अतः कदाचिन्मर्त्यत्वबुद्ध्युदयेपि पुनस्तत्त्वज्ञानांतरेण तस्यापवाध्यत्वमिति भावः ४८ भव

रज्जुज्ञानेपि कंपादिः शनैरेवोपशाम्यति पुनर्मंदांधकारे सा रज्जुः क्षिप्तोरगी भवेत् ४८ एवमारब्धभोगोपि शनैः शाम्यति नो हठात् भोगकाले कदाचित्तु मर्त्योहमिति भासते ४७ नैतावतापराधेन तत्त्वज्ञानं विनश्यति जीवन्मुक्तिव्रतं नेदं किंतु वस्तुस्थितिः खलु ४८ दशमोपि शिरस्ताडं रुदन्बुद्ध्वा न रोदिति शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा ४९ दशमाप्तिलाभेन जातो हर्षो व्रणव्यथाम् तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखिताम् ५० व्रताभावाद्यदा भूयो विविच्यतां रससेवी दिने भुंक्ते भूयो भूयो यथा तथा २५१ ॥

न रज्जुसर्पादिस्थाने विपरीतज्ञाननिवृत्तावपि तत्कार्यकंपाद्यनुवृत्तिः प्रकृतदृष्टांते दशमे दशमस्त्वमसीति वाक्यविचारजन्यज्ञाने न भ्रमनिवृत्तौ तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशंक्याह दशम इति दशमोस्मीति ज्ञानोदये सति शिरस्ताडनपूर्वकं रोदनमात्रं निवर्तते ताडनजन्यव्रणस्त्वनुवर्तत एवेत्यर्थः ४९ ननु ज्ञानोत्तरकालेपि संसारानुवृत्तौ जीवन्मुक्तेः कुतः पुरुषार्थतेत्याशंक्याम मुक्तिलाभजन्यहर्षस्य तद्दुःखाच्छादकस्य सत्त्वात्पुरुषार्थतेति दृष्टांतपूर्वकमाह दशमेति ५० जीवन्मुक्तिव्रतं नेदमित्युक्तं तत्र व्रतत्वाभावे किमायातमित्यत आह व्रताभावादिति पुनः पुनर्विचारकरणे दृष्टांतमाह रससेवीति यथा रससेवी नर एकस्मिन्नेव दिने तद्बाधापरिहाराय पुनः पुनर्भुंक्ते तद्वदध्यासनिवृत्तये पुनः पुनर्विवेकः क्रियतामित्यर्थः २५१

84

ज्ञानेनानिवर्त्यस्य प्रारब्धकर्मफलस्य केन तर्हि निवृत्तिरित्याशंक्य नातु तज्जन्यव्रणस्यौषधेनेव भोगेनैव निवृत्तिरित्याह शमयतीति ५२
अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीवगे तत्र आत्मानं चेदिति श्रुतिरित्यनेन श्लोकेन आत्मानं चेद्विजानीयादयमस्मीति पूरु
षः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदित्यस्मिन्मन्त्रेऽपरोक्षज्ञानशोकनिवृत्त्याख्ये जीवावस्थे द्वेऽभिहिते इत्युक्तं इदानीं तदभि
धानमूर्च्छितो जीवस्य सप्तमीं तृप्तिलक्षणामवस्थां दृष्ट्वानुकीर्तनपूर्वकं वक्तुमारभते किमिच्छन्निति किमिच्छन्नित्युत्तरार्धेनाभिहितो
यः शोकमोक्षः स एतावता ग्रन्थसंदर्भेणोदीरितोऽभिहितः एषा अज्ञानमावृत्तिस्तद्वद्विक्षेपश्च परोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृ
प्तिर्निरङ्कुशेत्यनेन श्लोकेनाभिहितास्तु सप्तसु जीवावस्थासु षष्ठीत्याह आभासस्येति सप्तमीं व्याख्यायत इति शेषः ५३ अपरोक्षज्ञान

शमयत्यौषधेनायं दृशामः स्ववर्णं यथा भोगेन शमयित्वैनं प्रारब्धं मुच्यते तथा ५२ किमि
च्छन्निति वाक्योक्तः शोकमोक्षस्तदुदीरितः आभासस्य त्ववस्थेयं बाधहीनाऽस्मिंस्तु सप्तमी ५३ सां
कुशा विषयैस्तृप्तिरियं तृप्तिर्निरङ्कुशा कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तृप्यति ५४ ऐ
हिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये बहु कृत्यं पुरास्याभूत्तत्सर्वमधुना कृतम् ५५
तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरम् अनुसंदधदेवायमेवं तृप्यति नित्यशः ५६ ॥

जन्यायास्तृप्तेर्निरङ्कुशत्वं प्रतियोगिदर्शनपुरःसरं प्रतिजानीते सांकुशेति विषयलाभजन्यायास्तृप्तेर्विषयान्तरकामनयांकुशितत्वा
त्सांकुशत्वं अस्यास्तु तदभावान्निरङ्कुशत्वं तदेव दर्शयति कृतं कृत्यमिति ५४ कृतकृत्यत्वमेवोपपादयति ऐहिकेति अस्य विदुषस्तत्त्व
ज्ञानात्पूर्वमिहलोके इष्टप्राप्तये अनिष्टनिवृत्तये कृषिवाणिज्यादिकं स्वर्गादिसिद्धये यागोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रव
णादिकं चेति बहुविधं कर्तव्यमासीदिदानीं तु सांसारिकफलेच्छाभावाद्ब्रह्मानन्दसाक्षात्कारस्य सिद्धत्वाच्च तत्सर्वं कृषियागश्रवणादि
कं कृतं कृत्यप्रायमभूदित्यतः परमनुष्ठेयताभावादित्यर्थः ५५ एवं कृतकृत्यत्वमुपपाद्य तत्फलभूतां तृप्तिं दर्शयति तदेतदिति प्र

तियोगिपुरः संप्रतियोगानुसंधानपूर्वकं यथाप्रवृत्ति तथैवं वर्तमानः प्रकरोति
सर्वदा तृप्यति ५६ ॥

त्तदेवानुसंधानं प्रपंचयति दुःखिनोऽज्ञा इत्यादिना कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनरित्यंतेन ग्रंथेन तत्र तावद्दैहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति दुःखिन इति ५७ स्वर्गाद्यर्थं कर्मानुष्ठातृभ्यो वैलक्षण्यमाह अनुतिष्ठन्त्विति ५८ ननु स्वार्थप्रवृत्त्यभावेऽपि परार्थ्या प्रवृत्तिः किं न स्यादित्याशंक्याधिकाराभावात्सापि नास्तीत्याह व्याचक्षतामिति ५९ ननु स्वदेहनिर्वाहार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यतेऽतोऽक्रियत्वमसिद्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किं त्वन्यैरेव कल्पितमित्याह निद्रा

दुःखिनोऽज्ञाः संसरंतु कामं पुत्राद्यपेक्षया परमानन्दपूर्णोऽहं संसरामि किमिच्छया ५७ अनुतिष्ठंतु कर्माणि परलोकयियासवः सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् ५८ व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ५९ निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ६० गुंजापुंजादि दह्येत नान्यारोपितवह्निना नान्यारोपितसंसारधर्मानेवमहं भजे ६१ शृण्वंत्वज्ञाततत्त्वास्ते जानन्कस्माच्छृणोम्यहम् मन्यंतां संशयापन्ना न मन्येऽहमसंशयः ६२ विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम् ६३

भिक्ष इति ६० अन्यकल्पनयापि बाधोऽस्तीत्याशंक्य तदभावे दृष्टान्तमाह गुंजापुंजादीति ६१ ननु फलांतरेच्छाभावे कर्मानुष्ठानं माभूत्तत्त्वसाक्षात्काराय श्रवणादिकं कर्तव्यमेवेत्याशंक्याज्ञानाद्यभावाच्छ्रवणादिकर्तृत्वमपि नास्तीत्याह शृण्वन्त्विति अज्ञाततत्त्वा अज्ञातब्रह्मात्मैकत्वलक्षणं तत्त्वं यैस्ते तथाभूताः श्रवणं कुर्वन्तु तत्त्वमित्थमन्यथा वेति संशयवन्तो मननं कुर्वन्तु मम तु तदुभयाभावान्नोभयत्र प्रवृत्तिरित्यर्थः ६२ माभूतां श्रवणमनने विपर्ययनिरासार्थं निदिध्यासनं कर्तव्यमित्याशंक्य देहादावात्मबुद्धिलक्षणस्य विपर्ययस्याभावात्तदपि नानुष्ठेयमित्याह विपर्यस्त इति २६३ ॥

ननु विपर्ययाभावेऽहं मनुष्य इति व्यवहारः कथं घटत इत्याशंक्य वासनावशाद्भवतीत्याह अहं मनुष्य इत्यादीति ८४ तर्हि तस्य व्यवहारस्य निवृ
त्तिसिद्धये ध्यानं समाश्रयामीत्याशंक्य प्रारब्धक्षयमन्तरेण तस्य निवृत्तिर्नास्तीत्याह प्रारब्धेति ८५ ननु प्रारब्धनिमित्तकस्य व्यवहारस्य विरलत्वा
य ध्यानं कर्तव्यमेवेत्याशंक्य व्यवहारस्याबाधकत्वदर्शिना तन्निवृत्तये ध्यानं नानुष्ठेयमित्याह विरलत्वमिति ८६ ध्यानस्याकर्तव्यत्वेऽपि विक्षेपपरिहा
राय समाधिः कर्तव्य इत्याशंक्य विक्षेपसमाधानयोर्मनोधर्मत्वान्न विक्षेपनिवारकोऽपि समाधिर्मम धीसमाधिकार इत्याह विक्षेप इति ८७

अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं विपर्यासं चिराभ्यस्तवासनातो विकल्प्यते ८४ प्रारब्धकर्म
णि क्षीणे व्यवहारो निवर्तते कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ८५ विरलत्वं व्यवहृतेरि
ष्टं चेद्ध्यानमस्तु ते अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ८६ विक्षेपो नास्ति यस्मान्मे न स
माधिस्ततो मम विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः नित्यानुभवरूपस्य को मेऽत्रानुभ
वः पृथक् कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ८८ व्यवहारो लौकिको वा शास्त्रीयो वा
न्यथापि वा ममाकर्तुरलेपस्य यथारब्धं प्रवर्तताम् ८९ अथवा कृतकृत्योऽपि लोकानुग्रहका
म्यया शास्त्रीयेणैव मार्गेण वर्तेऽहं का मम क्षतिः ७० ॥

ननु समाधिफलमवश्यं संपादनीयमित्याशंक्य तस्य मत्स्वरूपत्वान्न संपाद्य इत्याह नित्यानुभवेति उपपादितं कृतकृत्यत्वं निगमयति
कृतं कृत्यमिति ८८ एवं सर्वत्र कर्तृत्वानभ्युपगमे नियतव्यहृतिनिवृत्तिः प्रसज्येतेत्याशंक्य प्रारब्धवशात्सा मम नियतव्यहृतिरित्यङ्
गीकरोति व्यवहार इति लौकिको भिक्षाहारादिः शास्त्रीयो जपसमाध्यादिरन्यथापि वा प्रतिषिद्धहिंसादिर्वा व्यवहारः कर्तृत्वा
भिमानरहितस्य मम प्रारब्धकर्मार्जितक्रमप्रवर्ततामित्यर्थः ८९ एवं वस्तुतत्त्वमभिधाय प्रौढिवादेनाह अथवेति लो
कानुग्रहकाम्यया प्राण्यनुग्रहेच्छयेत्यर्थः २७० ॥

पं॰ टी॰
८९

ननु शास्त्रीय एव मार्गे प्रवर्तनांगीकारे तर्हि तदभिमानप्रयुक्तो विकारः स्यादेवेत्याशंक्याह देवार्चनेत्यादिश्लोकद्वयेन तारं प्रणवं आ-
म्नायमस्तकं वेदांतशास्त्रं ८१ । ८२ फलितमाह एवमिति ८३ विभिन्नविषयत्वमेव स्पष्टयति वपुरिति ८४ अथापि यौ ज्ञानिकर्मिणौ कल-
हं कुर्वीते तौ विद्वद्भिः परिहसनीयावित्याह एवं चेति ८५ कुतः परिहास्यत्वमित्याशंक्य निर्विषयकलहकारित्वादित्याह यं कर्मीत्या-
दिना कर्मी यं साक्षिणं कर्मानुष्ठानोपयोगिदेहवाग्बुद्ध्यतिरिक्तं प्रत्यगात्मानं न विजानाति तत्त्वविदात्मस्वरूपत्वे बुद्ध्येत कर्मि-

देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः तारं जपतु वाक् तद्वत् पठत्वाम्नायमस्तकं ८१ विष्णुं ध्या-
यतु धीर्यद्वा ब्रह्मानन्दे विलीयतां साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ८२ एवं च कलहः
कुत्र सम्भवेत्कर्मिणो मम विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् ८३ वपुर्वाग्धीषु निर्ब-
न्धः कर्मिणो न तु साक्षिणि ज्ञानिनः साक्ष्यलेपत्वे निर्बन्धो नेतरत्र हि ८४ एवं चान्योन्यवृ-
त्तान्तानभिज्ञौ बधिराविव विवदेतां बुधो हसत्येव विलोक्य तौ ८५ यं कर्मी न विजानाति
साक्षिणं तस्य तत्त्ववित् ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ८६ देहवाग्बुद्धयस्त्यक्ता
ज्ञानिनाऽनृतबुद्धितः कर्मी प्रवर्तयत्वाभिर्ज्ञानिनो हीयतेऽत्र किं ८७ प्रवृत्तिर्नोपयुक्ता चेन्निवृ-
त्तिः कोपयुज्यते बोधहेतुर्निवृत्तिश्चेद्बुभुत्सायां तथेतरा २८८ ॥

णः कर्मानुष्ठाने किं हीयते ८६ देहेति ज्ञानिना मिथ्यात्वबुद्ध्या परित्यक्ताभिर्देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानिनो वा किं हीयते
अतो निर्विषयकलहकारिणोः परिहसनीयत्वमित्यर्थः ८७ कर्मानुष्ठानप्रयोजनशून्यत्वान्न ज्ञानिनोऽभ्युपगम्यत इति शं-
कते प्रवृत्तिरिति उपयोगाभावो निवृत्तावपि समान इति परिहरति निवृत्तिरिति निवृत्तेर्बोधहेतुत्वान्नोपयोगाभाव इति
शंकते बोधहेतुरिति तर्हि प्रवृत्तिरपि बुभुत्सायां हेतुत्वादुपयोगवतीत्याह बुभुत्सायामिति ८८ ॥

ननु बुद्धस्य बुभुत्साभावात्प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते बुद्धश्चेदिति तर्हि बुद्धस्य पुनर्बोधाभावान्निवृत्तिरपि बुद्धं प्रत्यनुपयोगिनीत्याह नाप्यसाविति सकृज्जातस्य बोधस्यास्थिरत्वाय निवृत्तिरपेक्ष्यत इत्याशंक्यास्थिरत्वबाधकाभावमपेक्ष्यते न साधनान्तरमित्याह अबाधादिति वाक्यप्रमाणजन्यस्य ज्ञानस्य बलवता प्रमाणेन बाधाभावादनुवृत्तिः स्यादेवातो न साधनान्तरं तदर्थमपेक्ष्यमित्यर्थः ७९ ननु प्रमाणान्तरेण बाधाभावेऽप्यविद्यया तत्कार्येण कर्तृत्वाद्यध्यासेन वा बाधः स्यादित्याशंक्याह नाविद्येति तत्र हेतुमाह पुरैवेति ८० तत्त्वविद्यया बाधितत्वेऽपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वासंभवात्तेन बोधस्य बाधो भवेदित्याशंक्योपादाननिवृत्तिवत्तस्यापि बाधितत्वात्तेनापि बाधः शंकितुं न शक्यत इत्याह बाधितमिति तत्र दृष्टान्तमाह जीवन्निति आखुर्मूषकः ८१

बुद्धश्चेत्तर्हि मुक्तेन नाप्यसौ बुध्यते पुनः । अबाधादनुवर्तेत बोधो नत्वन्यसाधनात् ॥ ७९ ॥ नाविद्या नापि तत्कार्यं बोधं बाधितुमर्हति । पुरैव तत्त्वबोधेन बाधिते ते उभे यतः ॥ ८० ॥ बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते । जीवन्नाखुर्न मार्जारं हन्ति हन्यात्कथं मृतः ॥ ८१ ॥ अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः । निष्फलेषुविनिर्भिन्नाङ्गो नेष्यतीत्यत्र का प्रमा ॥ ८२ ॥ आदावविद्यया चित्रैः स्वकार्यैर्जृम्भमाणया । युद्ध्वा बोधोऽजयत्सोऽद्य सुदृढो बाध्यतां कथम् ॥ ८३ ॥

द्वैतदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायप्रदर्शनेन द्रढयितुं तदनुकूलं दृष्टान्तमाह अपीति यः समर्थः पाशुपतास्त्रेण विद्धोऽपि न ममार चेत्किल सन्निःफलेषुविनिर्भिन्नाङ्गः फलरहितेनेषुणा व्यथितदेहः सन्नेष्यतीति नाशं प्राप्स्यतीत्यत्र का प्रमा प्रमाणं नास्तीत्यर्थः ८२ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति आदाविति आदौ विद्याभ्याससमये चित्रैर्बहुविधैस्तत्कार्यैः प्रमातृत्वकर्तृत्वादिभिर्जृम्भमाणया विवर्धमानयाविद्यया बोधो युद्ध्वा प्रबुद्धं कृत्वा तामजयत्स बोधः पुनरभ्यासपाटवेन सुदृढोऽद्येदानीमविद्यानिवृत्तौ सत्यां निर्मूलेन तत्कार्येणाध्यासेन कथं बाध्यतां न कथमपि बाध्यत इत्यर्थः ८३ ॥

उपपादितमर्थं श्रोतृबुभुक्षारोहाय रूपकेणाह तिष्ठन्निति ८४ भवत्वेवं प्रकृते किमायातमित्यत आह एवमिति यः प्रमाणेनैव मुक्तप्रका
रेण विधया तत्कार्यं चानकेन बोधेन ब्रह्मात्मैकत्वज्ञानेन न विमुच्यते न कदापि विमुक्तो भवति तस्य मुमुक्षोर्देहादिनिष्ठया ग्रहण्या वा किं न किमपी
ष्टमनिष्टं चेत्यर्थः ८५ तर्हि ज्ञानिवदज्ञानिनोऽपि ग्रहण्या वाग्रहेण न प्रयुक्तः स्यादित्याशङ्क्याह ग्रहण्या वेति ८६ विदुष आग्रहेण प्रयुक्तः स्युक्तं तर्हि
कर्मिणां मध्ये वर्तमानेन तेन किं कर्तव्यमित्यत आह विद्वानिति विद्वांस्तावच्छ्रोकर्मिणां मध्ये तिष्ठेच्चेत्तदनुरोधतस्तेषामनुसारेण शारीरा

तिष्ठंस्तत्त्वज्ञानतन्त्राख्याः शत्रवो बोधेन मारिताः न भीतिर्बोधसम्राजः कीर्त्तिः प्रसृतनस्पते ८४ यएवमतिसूत्रेण बोधेन न विमुच्यते ग्रहण्या वा निगृह्या वा देहादिगतया स्या किम् ८५ ग्रहण्या वाग्रहोऽस्यायो बोधहीनस्य सर्वथा स्वर्गाय वाऽपवर्गाय यतितव्यं तपोत्सवभिः ८६ विद्वांश्चेत्तावच्छ्रोतृमध्ये तिष्ठेत्तदनुरोधतः कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः ८७ एवमध्ये बुभुक्षूणां यदा तिष्ठेत्तदा पुनः बोधायैषां क्रियाः सर्वा हर्षयंस्त्यजतु स्वयम् ८८ अविहृदनुसारेण हृत्तिर्दृदस्य प्रमुज्यते स्तनंधयानुसारेण वर्तनेन पिता यतः ८९ अपि दिग्धस्ताडितो वा बालेन स्वपिता तदा न क्लिश्नाति न ऊपेक्षेत बालं प्रसृत लालयेत् ९० ॥

दिभिः सर्वाः क्रियाः करोत्येव तासां कर्मिणो न निवारयेदित्यर्थः ८७ अस्यैव तत्त्वबुभुक्षूणां मध्येऽवस्थितस्य कृत्यमाह एवमध्य इति एवं विद्वा
न् बुभुक्षूणां मध्ये यदा तिष्ठेत्तदा एषां बुभुक्षूणां बोधाय तत्त्वज्ञानजननाय ताः क्रियाः हर्षयन् स्वयमपि त्यजतु ऊर्ज एवं कर्तव्यमित्यत आ
ह अविहृदनुसारेणेति अज्ञान्यनुसारेण ज्ञानिनो वर्तनमुचितं कृपालुत्वात्तेषामनुकम्पनीयत्वाच्चेति भावः एवं कुत्र दृष्टमित्यत आह स्तनंध
यानुसारेणेति स्तनंधयाः स्तनपानकर्तारः शिशवस्तदर्थः ८९ पितुः स्तनंधयानुसारित्वमेव दर्शयति अपि दिग्धस्ताडितो वेति ९० ॥

दार्ष्टान्तिके योजयति निंदित इति विद्वानज्ञैर्निंदितः स्तूयमानो वा स्वयं न निंदति न स्तौति किंतु तेषामज्ञानिनां यथा बोध उत्पद्येत तथाचरेत् ९१ एवमाचरणे निमित्तमाह येनायमिति अयमज्ञानी अत्रास्मिँल्लोके विदुषा येन यादृशेन नटनेनाचरणेन बुध्यते तत्त्वमवगच्छति तदाचरणं तेन कर्तव्यमेव तर्हि तद्वदेव कार्यांतरमपि प्रसज्येतेत्यत आह अज्ञप्रबोधादिति यतस्तद्विदस्तत्त्वविदः अत्र लोके अज्ञप्रबोधादन्यत्कर्तव्यं नैवास्त्यतस्तदनुसारेण तत्त्वबोधयत्नेन कर्तव्यमित्यर्थः ९२ इत्थं वर्तिष्यमाणयोस्तात्पर्यमाह कृतकृत्यतयेति असौ विद्वान् पूर्वोक्तप्रकारेण कृतकृत्यतया कृतं कृत्यं जातं येनासौ कृतकृत्यस्तस्य भावस्तत्ता त

निंदितः स्तूयमानो वा विद्वानज्ञैर्न निंदति न स्तौति किंतु तेषां स्याद्यथा बोधस्तथाचरेत् ९१ येनायं नटनेनात्र बुध्यते कार्यमेव तत् अज्ञप्रबोधान्नैवान्यत्कार्यमस्त्यत्र तद्विदः ९२ कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः तृप्यन्नेवं स्वमनसा मन्यतेसौ निरंतरम् ९३ धन्योहं धन्योहं नित्यं स्वात्मानमंजसा वेद्मि धन्योहं धन्योहं ब्रह्मानंदो विभाति मे स्पष्टं २९४ ॥

यातृप्तः सन्वक्ष्यमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं येनासौ प्राप्तप्राप्यस्तस्य भावस्तत्ता तया तृप्यन् तृप्तो भवन् स्वमनसा निरंतरमेवं मन्यते ९३ किमन्यत इत्यत आह धन्योहमित्यादिना धन्यः कृतार्थः आदरार्थे वीप्सा नित्यमनवरतं स्वात्मानं स्वस्य निजं रूपं देशाद्यनवच्छिन्नं प्रत्यगात्मानमंजसा साक्षाद्वेद्मि जानामि अतो धन्य इत्यर्थः एवमात्मज्ञानलाभनिमित्तां तुष्टिमभिधाय तत्फललाभनिमित्तां तुष्टिं दर्शयति धन्योहमिति ब्रह्मानन्दः ब्रह्मभूतानंदः मे स्पष्टं विभाति स्पष्टं यथा भवति तथा स्फुरतीत्यर्थः २९४ ॥

एवमिष्टप्राप्त्या तुष्टिमभिधायानिष्टनिवृत्त्यापि तुष्यतीत्याह धन्योहमिति अथेदानीं दुःखं दुःखस्वरूपं संसारं न वीक्षे नैव पश्याम्यतः कृतार्थ इत्यर्थः दुःखाप्रतीतौ कारणमाह धन्योहमिति अनेकवासनाजालमज्ञानं क्वापि पलायितं नष्टमित्यर्थः ९५ अज्ञाननिवृत्तिफलं कृतकृत्यत्वं प्राप्तप्राप्यत्वं च दर्शयति धन्योहमिति ९६ इदानीं कृतकृत्यत्वमित्यादिना जातायास्तृप्तेर्निरतिशयत्वमाह धन्योहमिति इतः परं वक्तव्यादर्शनात्तुष्टिरेव परिस्फुरतीति दर्शयति धन्योहमिति ९७ अस्य सर्वस्य कारणभूतं पुण्यपुंजं परिपा-

धन्योहं धन्योहं दुःखं सांसारिकं न वीक्षेद्य धन्योहं धन्योहं स्वस्याज्ञानं पलायितं क्वापि ९५ धन्योहं धन्योहं कर्तव्यं मे न विद्यते किंचित् धन्योहं धन्योहं प्राप्तव्यं सर्वमद्य संपन्नम् ९६ धन्योहं धन्योहं तृप्तेर्मे कोपमा भवेल्लोके धन्योहं धन्योहं धन्यो धन्यः पुनः पुनर्धन्यः ९७ अहो पुण्यमहो पुण्यं फलितं फलितं दृढम् अस्य पुण्यस्य संपत्तेरहो वयमहो वयम् ९८ अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम् ९९ तृप्तिदीपमिमं नित्यं येनुसंदधते बुधाः ब्रह्मानंदे निमज्जंतस्ते तृप्यंति निरंतरम् ३०० इति श्रीपरमहंसपरि-

तृप्तिदीपः समाप्तः ॥

कमनुस्मृत्य तुष्यतीत्याह अहो पुण्यमिति एवंविधपुण्यसंपादकमात्मानमनुस्मृत्य तुष्यति अस्येति ९८ इदानीं सम्यग्ज्ञानसाधनं शास्त्रं तदुपदेष्टारमाचार्यं चानुस्मृत्य तुष्यति अहो शास्त्रमिति पुनश्च पूर्णसुखजनकं ज्ञानं तज्जन्यं सुखं चानुस्मृत्य संतुष्यति अहो ज्ञानमिति ९९ ग्रंथाभ्यासफलमाह तृप्तिदीपमिति ३०० इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता तृप्तिदीपव्याख्या समाप्ता ७ ॥

ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ कुर्वे कूटस्थदीपस्य व्याख्यां तात्पर्यबोधिनीम् १ मुमुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैक
त्वज्ञानस्य त्वंपदार्थबोधनपूर्वकत्वात्त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रन्थमारभमाण आचार्यः अस्य ग्रन्थस्य वेदान्तप्रकरणत्वेन
तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिमभिप्रेत्य त्वंपदलक्ष्यवाच्यौ कूटस्थजीवौ सदृष्टान्तं भेदेन निर्दिशति खादित्येति खादित्यदी
पिते खे आदित्यः खादित्यः प्रसिद्धः सूर्य इत्यर्थः तेन च तत्संबन्धात् आलोको लक्ष्यते तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्ति
वत् दर्पणेषु निपत्य पर्यावृत्तैः कुड्यसंबन्धैरादित्यरश्मिभिस्तत्प्रकाशनमिव कूटस्थभासितः कूटस्थेनाविकारिचैतन्येन भा
सितः प्रकाशितो देहो धीस्थजीवेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते अनेन सामान्यतो विशेषतश्च कुड्यावभासकादि

खादित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् कूटस्थभासितो देहो धीस्थजीवेन भास्यते १ अनेकद
र्पणादित्यदीप्तीनां बहुसंधिषु इतरा व्यज्यते तासामभावेऽपि प्रकाशते २ चिदाभासविशिष्टानां
तथानेकधियामसौ संधिं धियामभावं च भासयन् प्रविविच्यताम् ३ ॥

त्यप्रकाशद्वयमिव देहावभासनं चैतन्यद्वयमस्तीति प्रतिज्ञातं भवतीति १ ननु तत्र दर्पणादित्यदीप्तिव्यतिरेकेण खादित्यदीप्ति
र्नोपलभ्यते इत्याशङ्क्य तामभ्यस्तां विभज्य दर्शयति अनेकेति या अनेका बहुदर्पणजन्याः कुड्ये तत्र तत्र मण्डलाकारा विशेषप्रभा
दृश्यन्ते तासां संधिमध्ये इतरा सामान्यप्रकाशरूपा खादित्यप्रभा व्यज्यते अभिव्यक्तोपलभ्यते तासां दर्पणजन्यप्रभाणाम
भावे दर्पणापगमादिना असत्त्वे न स्वयं सर्वत्र प्रकाशते २ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति चिदाभासविशिष्टानामिति
तथानेन प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिम्बयुक्तानामनेकधियामनेकबुद्धिवृत्तीनां घटज्ञानादिरूपाणां वाच्यानां संधि
संतरालं ज्ञाताज्ञातदोषधियां तासामेव बुद्धिवृत्तीनामभावं च सुषुप्त्यादौ भासयन् प्रकाशयन् असौ कूटस्थः प्रविविच्यतां ताभ्यो भेदेन

पंचदशीटीकं ३ ॥

इदानीं देहान्तःस्थकूटस्थचिदाभासयोर्भेदप्रदर्शनाय देहाद्बहिरपि चिदाभासब्रह्मणी विभज्य दर्शयति घटैकाकारेति घटैकाकारधीस्था चिद्घटस्यैकस्या
कारस्तदाकारो यस्याः सा घटैकाकारा तथाविधायां बुद्धौ वर्तमानः चिदाभासो घटमेकमेवावभासयेत् तस्य घटस्य ज्ञातताख्यो धर्मः घटो ज्ञा
त इति व्यवहारहेतुर्यः स च घटकल्पनाधिष्ठानेन ब्रह्मचैतन्येन साधनभूतेनावभास्यते प्रकाश्यत इत्यर्थः ४ ननु ज्ञाततावभासकचैतन्येनै
व घटप्रतीतिसंभवात् बुद्धिः किमर्थेत्याशंक्य घटस्य ज्ञाततादिभेदसिद्ध्यर्थेत्याह अज्ञातत्वेनेति बुद्ध्युदयात्पुराऽयं घटो ब्रह्मणैवाज्ञातत्वे
न प्रकाशितो बुद्ध्युत्पत्तेरूर्ध्वं ज्ञातत्वेन ब्रह्मणैव प्रकाश्यत इतीयानेव भेदो नान्य इत्यर्थः ५ नन्वेकस्यैव घटस्य ज्ञातत्वाज्ञातत्वलक्षणं द्वै
रूप्यं कथं संभवतीत्याशंक्य तदवबोधनाय ज्ञाततानिमित्तयोर्ज्ञानाज्ञानयोः स्वरूपं तावद्दर्शयति चिदाभासेति चिदाभासान्तधीवृत्तिः

घटैकाकारधीस्था चिद्घटमेवावभासयेत् घटस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते ४ अज्ञातत्वेन
ज्ञातोऽयं घटो बुद्ध्युदयात्पुरा ब्रह्मणैवोपरिष्टात्तु ज्ञातत्वेनेत्यसौ भिदा ५ चिदाभासान्तधीवृत्तिर्ज्ञानं लो
हान्तकुन्तवत् जाड्यमज्ञानमेताभ्यां व्याप्तः कुंभो द्विधोच्यते ६ अज्ञातो ब्रह्मणा भास्यो ज्ञातः कुंभस्तथा
न किम् ज्ञातत्वजननेनैव चिदाभासपरिक्षयः ७ ॥

चिदाभासश्चिदाभासः चित्प्रतिबिंबः सोऽन्ते पुरोभागे यस्याः सा धीवृत्तिर्ज्ञानमित्युच्यते बोधेच्छा बुद्धिरित्याचार्यैरभिधानात् तत्र दृष्टान्तो
लोहान्तकुंतवदिति जाड्यं स्वतःस्फूर्तिरहितत्वमज्ञानमित्युच्यते एताभ्यां पर्यायेण व्याप्तः सर्वतः संबद्धः कुंभो ज्ञातश्चाज्ञात इति वोच्यत इ
त्यर्थः ६ नन्वज्ञातस्य कुंभस्याज्ञानव्याप्तत्वादज्ञवत्तु ब्रह्मावभास्यत्वं ज्ञानव्याप्तस्य तु ज्ञातस्य कुंभस्य कुतो ब्रह्मचैतन्यावभास्यत्वमित्याशं
क्याज्ञानस्याज्ञातताजनकत्ववज्ज्ञानस्यापि ज्ञातताजननमात्रोपक्षीणत्वादज्ञातकुंभवज्ज्ञातस्यापि ब्रह्मावभास्यत्वं भवतीत्याह अज्ञा
त इति यथाऽज्ञातकुंभो ब्रह्मणावभास्यस्तथा ज्ञातः कुंभो न किं ब्रह्मणावभास्यो भवति किंतु भवत्येवेत्यर्थः कुत इत्यत आह ज्ञातत्वेति

= ७

नन्वज्ञातताजननतायां ज्ञानमिव ज्ञातताजननतायामपि बुद्धेरेवालं किमनेन चिदाभासेनेत्याशंक्य चिदाभासरहिताया बुद्धेर्घटादिवदप्रकाश
रूपत्वेन ज्ञातताजननं न संभवतीत्याह आभासहीनयेति ८ चिदाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातत्वाभावं दृष्टान्तप्रदर्शनेन स्पष्टयति
ज्ञात इति लोके कुत्रचिदपि घटो मृदा मृत्कारककृतपयालिप्तो लेपनं प्राप्तो ज्ञात इति नोच्यते यथा तथा चिदाभासरहितबुद्धिव्याप्तस्यापि
कुम्भस्य ज्ञातत्वं नाभ्युपगम्यते इति भावः ९ फलितमाह ज्ञातत्वमिति यतः केवलाया बुद्धेर्ज्ञातत्वजननासमर्थत्वमतः कुम्भे चिदाभासल
क्षणस्य फलस्योत्पत्तिरेव ज्ञातत्वं नाम प्रसिद्धमित्यर्थः ननु तथापि चिदाभासो न कल्पनीयो ब्रह्मचैतन्यस्यैव फलत्वसंभवादित्या
शंक्याह न फलमिति ब्रह्मचैतन्यं फलं च घटादिस्फुरणं न भवति कुत इत्यत आह मानादिति मानात्प्रागपि प्रमाणप्रवृत्तेः पूर्वमपि

आभासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते तादृग्बुद्धेर्विशेषः को मृदादेः स्याद्विकारिणः ८ ज्ञात इत्यु
च्यते कुम्भो मृदा लिप्तो न कुत्रचित् धीमात्रव्याप्तकुम्भस्य ज्ञातत्वं नेष्यते तथा ९ ज्ञातत्वं नाम कुम्भे तु
चिदाभासफलोदयः न फलं ब्रह्मचैतन्यं मानात्प्रागपि तत्त्वतः १० परागर्थप्रमेयेषु या फलत्वेन सं
मता संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ११ इति वार्तिककारेण चित्सादृश्यं विवक्षितम्
ब्रह्मचित्फलयोर्भेदः साहस्र्यां विस्फुटो यतः १२ ॥

विद्यमानत्वात्फलस्य तु तदुत्तरकालीनत्वनियमादिति भावः १० ननु इदं परागर्थप्रमेयेष्वित्यादिसुरेश्वरवार्तिकविरुद्धमित्याशंक्य
तद्विवक्षानभिज्ञस्येदं चोद्यमिति परिहरति परागर्थेत्यादिना अस्य चायमर्थः परागर्था बाह्या घटादयः पदार्थास्तेषु प्रमेयेषु प्रमा
णविषयेषु सत्सु या प्रमाणफलत्वेनाभ्युपगता संविदस्ति सैवेहास्मिञ्छास्त्रे वेदान्तोक्तिप्रमाणतः वेदान्तवाक्यलक्षणप्रमाणेन मे
योऽर्थो ज्ञातव्योऽर्थ इत्यनेन वार्तिकेन ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमाणफलत्वेन विवक्षितो न ब्रह्मचैतन्यमिति भावः ११ वार्ति
ककारेणेदृशी विवक्षेति कुतोऽवगम्यत इत्याशंक्य तद्गुरुभिः श्रीसदाचार्यैरुपदेशसाहस्र्यां ब्रह्मचैतन्यचिदाभासयोर्भेदस्य
प्रतिपादितत्वादित्याह ब्रह्मेति ब्रह्मचिच्च फलं च ब्रह्मचित्फले तयोरिति विग्रहः १२ ॥

पं·टी·
५·

९०

एवं च सति प्रकृते किमायातमित्यत आह आभासेति यस्माद्ब्रह्मचित्फलयोर्भेदः सिद्धस्तस्माद्घटे उदित उत्पन्न आभासश्चिदाभासस्तत्र घटे ज्ञातत्वं जनयेत् उत्पन्नं तज्ज्ञातत्वं पुनरज्ञातत्ववद्ब्रह्मण एवावभास्यं भवति हि प्रसिद्धमित्यर्थः १३ एवं ब्रह्मचिदाभासयोर्भेदमुपपादितं विषयभेदप्रदर्शनेन स्पष्टयति धीवृत्त्येति चिता ब्रह्मचैतन्येनेत्यर्थः चिदाभासस्य कुम्भमात्रनिष्ठफलरूपत्वात्तेनाभासेन घट एक एव स्फुरेद्भास्यत इत्यर्थः १४ कुम्भस्य चिदाभासब्रह्मोभयभास्यत्वे लिंगमाह चैतन्यमिति अतो घटस्य ब्रह्मचिदाभासोभयभास्यत्वेन कुम्भे ज्ञातत्वेन द्विगुणं चैतन्यं भाति इदमेव घटज्ञाततावभासकं चैतन्यं तार्किकैर्नामान्तरेण व्यवह्रियत इत्याह अन्ये त्विति यथोदितं यथोक्तमे

आभास उदितस्तस्माज्ज्ञातत्वं जनयेद्घटे तत्पुनर्ब्रह्मणा भास्यमज्ञातत्ववदेव हि १३ धीवृत्त्याभासकुंभानां समूहो भास्यते चिता कुंभमात्रफलत्वात्स एक आभासतः स्फुरेत् १४ चैतन्यं द्विगुणं कुंभे ज्ञातत्वेन स्फुरत्यतः अन्ये त्वनुव्यवसायाख्यमाहुरेतद्यथोदितम् १५ घटोऽयमित्यसावुक्तिराभासस्य प्रसादतः विज्ञातो घट इत्युक्तिर्ब्रह्मानुग्रहतो भवेत् १६ आभासब्रह्मणी देहाद्बहिर्यद्वद्विवेचिते तद्वदाभासकूटस्थौ विविच्येतां वपुष्यपि १७ अहंवृत्तौ चिदाभासः कामक्रोधादिकास्तु च संव्याप्य वर्तते तप्ते लोहे वह्निर्यथा तथा १८ स्वमात्रं भासयेत्तप्तं लोहं नान्यत्कदाचन एवमाभाससहिता वृत्तयः स्वस्वभासिकाः १९ ॥

तदेव ब्रह्मचैतन्यं अन्ये तार्किकास्त्वनुव्यवसायाख्यं ज्ञानान्तरमाहुरिति योजना १५ अयं घट इति ज्ञातो घट इति व्यवहारभेदादपि चिदाभासब्रह्मणोर्भेदोऽवगंतव्य इत्याह घटोयमिति १६ देहाद्बहिश्चिदाभासब्रह्मणी विविच्येते यथा तथा देहान्तश्चिदाभासकूटस्थौ विवेचनीयावित्याह आभासब्रह्मणीति १७ ननु देहाद्बहिश्चिदाभासव्याप्यघटाकारवृत्तिवदान्तरविषयगोचरवृत्त्यभावात्कथं तज्ज्ञापकश्चिदाभासोऽभ्युपगम्यत इत्याशंक्य विषयगोचरवृत्त्यभावेप्यहमादिवृत्तिसद्भावात्तज्ज्ञापकश्चिदाभासोऽभ्युपगंतुं शक्यत इति सदृष्टान्तमाह अहंवृत्ताविति १८ अहमादिवृत्तीनामेव चिदाभासभास्यत्वं दृष्टान्तप्रपंचनेन स्पष्टयति

श्रीराम ५ ॥

५·

एवं चिदाभाससंभूतत्वाद्यत्कूटस्थरूपं सुप्त्यादावपि तत्तद्रूपयोगिनं वृत्त्यभावावसरं दर्शयति क्रमादिति २० भवत्वेवं समाध्यादौ वृत्तिविलयो नेन
कथं कूटस्थोऽवगम्यत इत्याशंक्य वृत्त्यभावसाक्षित्वेनासाववगम्यत इत्याह संधय इति वृत्तिसंधयो वृत्त्यभावाश्च येन चैतन्येनावभास्यन्ते स कू
टस्थोऽवगन्तव्य इत्यर्थः २१ एवं च सति किं फलितमित्यत आह घट इति बाह्ये घटे यथा घटमात्रावभासकश्चिदाभासो घटस्य ज्ञाततावभास
कब्रह्मचैतन्यं चेति द्वैगुण्यं तथान्तरेऽहंकारादिवृत्तिष्वपि कूटस्थचैतन्यं वृत्त्यवभासकश्चिदाभासश्चेति द्विगुणचैतन्यमस्ति तत्रोपपत्तिमाह तत
स्तत्रेति यतो द्विगुणचैतन्यमस्ति ततः संधितः संधिभ्यस्तत्र वृत्तिषु वैशिष्ट्यमधिकं दृश्यत इति शेषः २२ नन्वत्रापि घटादिष्विव ज्ञातताऽज्ञात
तावभासकत्वेन कूटस्थः किं नेष्यत इत्याशंक्य तत्र ज्ञातताद्यभावादेवेत्याह ज्ञाततेति तत्रोपपत्तिमाह स्वस्येति ज्ञानाज्ञानव्याप्तिभ्यां ज्ञातता

क्रमाद्विच्छिद्य विच्छिद्य जायन्ते वृत्तयोऽखिलाः सर्वा अपि विलीयन्ते सुप्तिमूर्छासमाधिषु २० संधयोऽखिलवृ
त्तीनामभावाश्चावभासिताः निर्विकारेण येनासौ कूटस्थ इति चोच्यते २१ घटे द्विगुणचैतन्यं यथा बाह्ये त
थान्तरे वृत्तिष्वपि ततस्तत्र वैशिष्ट्यं संधितोऽधिकम् २२ ज्ञातताज्ञातते न स्तो घटवद्वृत्तिषु क्वचित् स्वस्य स्वेना
गृहीतत्वात्ताभिश्चाज्ञानतनाशनात् २३ द्विगुणीकृतचैतन्ये जन्मनाशानुभूतितः अकूटस्थं तदन्यत्तु कू
टस्थमविकारितः २४ अन्तःकरणतद्वृत्तिसाक्षीत्यादावनेकधा कूटस्थ एव सर्वत्र पूर्वाचार्यैर्विनिश्चि
तः २५ ॥

ज्ञातते भवतः वृत्तीनां तु स्वप्रकाशत्वेन ज्ञानव्याप्तिर्नास्ति ताभिर्वृत्तिभिः स्वोत्पत्तिमात्रेण स्वगोचराऽज्ञानस्य निवर्तितत्वादज्ञानस्य व्याप्तिरपि
नास्तीति भावः २३ ननु कूटस्थचिदाभासयोरुभयोरपि चित्त्वे समाने एकस्य कूटस्थत्वमपरस्याकूटस्थत्वमित्येतत्कुत इत्याशंक्य चिदाभास
निष्ठयोर्जन्मनाशयोरनुभूयमानत्वादस्याकूटस्थत्वमितरस्याविकारित्वप्रमाणाऽभावात्कूटस्थत्वमित्याह द्विगुणीति २४ चिदाभासव्य
तिरिक्तकूटस्थस्याभ्युपगमः स्वकपोलकल्पित इत्याशंक्याचार्यैः कूटस्थस्योपपादितत्वान्मैवमित्याह अन्तःकरणेति अन्तःकरणत
द्वृत्तिसाक्षी चैतन्यविग्रहः आनन्दरूपः सत्यः सन्किं नात्मानं प्रपद्यसे इत्यादावित्यर्थः २५ ॥

कूटस्थातिरिक्तश्चिदाभासोपि तैर्वर्णित इत्याह आत्माभासेति आत्मा चाभासश्चाश्रयश्चात्माभासाश्रयाश्चेति द्वंद्वसमासः मुखाभासाश्रया इत्य
त्रापि तथा मुखं प्रसिद्धमाभासो मुखप्रतिबिंबमाश्रयो दर्पणादिस्त्रितयं यथा प्रत्यक्षेणावगम्यंते एवमात्मा कूटस्थ आभासश्चिदाभास आ
श्रयोंतःकरणादिरिति त्रयोपि शास्त्रयुक्तिभ्यामवगम्यंत इत्यर्थः अत्र चाभासग्रहणेन कूटस्थातिरिक्तश्चिदाभासो वर्णित इति भावः मनसः साक्षी
बुद्धेः साक्षीति बुद्धिसाक्षिणः प्रतिपादकं शास्त्रं रूपंरूपं प्रतिरूपो बभूवेति चिदाभासप्रतिपादकं विकारित्वाविकारित्वादिरूपा युक्तिः एवं
मेवोक्तेति भावः २६ तत्र चिदाभासमाक्षिपति बुद्ध्यवच्छिन्नेति स्वस्मिन्कल्प्यमानया बुद्ध्यावच्छिन्नः कूटस्थ एव घटद्वारा घटाकाश इव बुद्धि

आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा गम्यंते शास्त्रयुक्तिभ्यामित्याभासश्च वर्णितः २६ बु
द्ध्यवच्छिन्नकूटस्थो लोकांतरगमागमौ कर्तुं शक्तो घटाकाशइवाभासेन किं वद २७ शृण्वसंगः
परिच्छेदमात्राज्जीवो भवेन्नहि अन्यथा घटकुड्याद्यैरवच्छिन्नस्य जीवता २८ नकुड्यसदृशी बुद्धिः
स्वच्छत्वादिति चेत्तथा अस्तु नाम परिच्छेदे किं स्वाच्छ्येन भवेत्तव २९ प्रस्थेन दारुजन्येन कांस्यज
न्येन वा नहि विक्रीतैस्तंडुलादीनां परिमाणं विशिष्यते ३० परिमाणाविशेषेपि प्रतिबिंबो विशि
ष्यते कांस्ये यदि तदा बुद्धावप्याभासो भवेद्बलात् ३१ ॥

द्वारा लोकांतरे गमनागमने कर्तुं शक्नोति अतश्चिदाभासकल्पनायां गौरवमिति भावः २७ असंगस्य कूटस्थस्य बुद्ध्यवच्छेदमात्रेण जीवत्वं नच
तेऽन्यथातिप्रसंगादिति परिहरति शृण्विति २८ बुद्धिकुड्ययोः स्वाच्छ्यास्वाच्छ्याभ्यां वैषम्यं शंकते नकुड्येति उक्तं स्वच्छत्वं परिच्छेदप्रयोजकं
न भवतीत्याह तथास्त्विति २९ उक्तमर्थं दृष्टांतेन स्पष्टयति प्रस्थेनेति दारुकांस्यजन्ययोः प्रस्थयोः स्थिते स्वच्छत्वास्वच्छत्वे तंडुलप
रिमाणे न्यूनाधिकभावकृते न भवत इत्यर्थः ३० कांस्यप्रस्थे तंडुलपरिमाणाधिक्याभावेपि प्रतिबिंबलक्षणमाधिक्यमस्तीत्याशं
क्य तर्हि बुद्धावपि चिदाभासो भवतैवांगीकृतः स्यादित्याह परिमाणेति ३१ ॥

प्रतिबिंबांगीकारे चिदाभासः कथमंगीकृतः स्यादित्याशंक्य प्रतिबिंबाभासशब्दाभ्यामभिधेयस्यार्थस्यैक्यादित्याह ईषद्भासनमिति प्रति
बिंबस्याभासत्वं कथमित्याशंक्याभासलक्षणयोगादित्याह बिंबलक्षणेति हि यस्मात्कारणात्प्रतिबिंबो बिंबलक्षणरहितो बिंबवदवभा
सते ततो बिंबाभास इति भावः ३२ आभासलक्षणयोगित्वमेव स्पष्टयति ससंगत्वेति एतस्य चिदाभासस्य ससंगत्वविकारित्वाभ्यां बिंबभूता
संगाविकारिचैतन्यलक्षणहीनत्वं स्फुरणरूपत्वं बिंबवदवभासनमित्यर्थः हेतुलक्षणरहिता हेतुवदवभासमाना हेत्वाभासा इतिवदत् ३३
इयं चिदाभासस्याप्रयोजकतां निराकृत्येदानीं तस्य बुद्धेः पृथक्सत्त्वं साधयितुं पूर्वपक्षमाह नहीति यथा घटादिसत्त्यामेव भवन् घटो
न घटादेर्भिद्यते तद्वदिति भावः नन्वेवं तर्हि देहातिरिक्तधीरपि न सिद्ध्येदिति प्रतिबंद्या परिहरति अल्पमिति ३४ प्रतिबंदीमोचनं शंकते दे

ईषद्भासनमाभासः प्रतिबिंबस्तथाविधः बिंबलक्षणहीनः सन् बिंबवद्भासते स हि ३२ ससंगत्ववि
काराभ्यां बिंबलक्षणहीनता स्फूर्तिरूपत्वमेतस्य बिंबवद्भासनं विदुः ३३ नहि धीभावभावित्वादाभासो
ऽस्ति धियः पृथक् इति चेदल्पमेवोक्तं धीरप्येवं स्वदेहतः ३४ देहे मृतेऽपि बुद्धिश्चेच्छास्त्रादस्ति तथा सति
बुद्धेरन्यश्चिदाभासः प्रवेशश्रुतिषु श्रुतः ३५ धीयुक्तस्य प्रवेशश्चेन्नैतरेये धियः पृथक् आत्मा प्रवे
शसंकल्पात्प्रविष्ट इति गीयते ३६ कथं न्विदं साक्षदेहं मदृते स्यादितीरणात् विदार्य मूर्ध्नि सीमानं प्र
विष्टः संसरत्ययं ३७ ॥

हेति देहव्यतिरिक्ताया बुद्धेः सविज्ञानो भवतीत्यादिश्रुतिसिद्धत्वान्नासत्त्वमिति भावः ननु श्रुतिबलाद्देहातिरिक्ता बुद्धिरभ्युपगम्यते चेत्त
र्हि प्रवेशश्रुतिबलाद्बुद्ध्यतिरिक्तश्चिदाभासोऽप्यभ्युपेय इत्याह तथा सतीति ३५ ननु बुद्ध्युपाधिकस्यैव प्रवेशो युज्यते नेतरस्येति शंकते
धीयुक्तस्येति ऐतरेयश्रुतौ बुद्ध्यतिरिक्तस्यैव प्रवेशश्रवणान्नैवमिति परिहरति नैतरेय इति ३६ तां श्रुतिमर्थतः पठति कथमिति
अयं परमात्मा साक्षदेहमक्षाणि च देहश्चाक्षदेहाख्यैः सह वर्तत इति साक्षदेहमिदं जडजातं मदृते चेतनं मां विहाय कथं तस्यान्नक
थमपि निर्वहेदिति विचार्य मूर्ध्नि सीमानं कपालमध्यदेशं विदार्य स्वसन्निधिमात्रेणाभिव्याप्य प्रविष्टः सन् संसरति जाग्रदादिकमनुभव

नन्वसंगस्यात्मनः प्रवेशो न युक्त इति शंकते कथमिति इदं चोद्यं सृष्टावपि समानमित्याह सृष्टिरिति सृष्टिकर्तुर्मायिकत्वान्न दोष इत्याशंक्याय॑
परिहारः प्रवेशेऽपि समान इत्याह मायिकत्वमिति अनयोर्मायिकत्वे हेतुश्च सम इत्याह विनाश इति ३८ प्रज्ञानघन एवैतेभ्यो भूतेभ्यः
समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति औपाधिकरूपस्य विनाशप्रतिपादकां श्रुतिं दर्शयति समुत्थायेति एष प्रज्ञानघन
आत्मा एतेभ्यो देहेन्द्रियादिरूपेभ्यः पंचभूतकार्येभ्यो निमित्तभूतेभ्य उपादिभ्यः समुत्थाय जीवत्वाभिधानं प्राप्य तान्येव देहादीनि विन
श्यन्त्यनुविनश्यति तेष्वविनश्यत्सु तद्गतं जीवत्वाभिमानं जहातीति एवंप्रकारेणौपाधिकरूपस्य विनाशित्वं याज्ञवल्क्यो मैत्रेय्या उक्तवा
नित्यर्थः ३९ अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा इति श्रुत्या कूटस्थलक्षणो विविक्तः प्रदर्शित इत्याह अविनाशीति मात्राऽसंसर्गस्त्व

कथं प्रविष्टोऽसंगश्चेत्सृष्टिर्वाऽस्य कथं वद मायिकत्वं तयोस्तुल्यं विनाशश्च समस्तयोः ३८ समुत्था
यैष भूतेभ्यस्तान्येवानुविनश्यति विस्पष्टमिति मैत्रेय्यै याज्ञवल्क्य उवाच ह ३९ अविनाश्ययमा
त्मेति कूटस्थः प्रविवेचितः मात्राऽसंसर्ग इत्येवमसंगत्वस्य कीर्तनात् ४० जीवापेतं वाव कि
ल शरीरं म्रियते न सः इत्यत्र न विमोक्षोऽर्थः किन्तु लोकान्तरे गतिः ४१ नाहं ब्रह्मेति बुध्येत स विना
शीति चेन्न तत् सामानाधिकरण्यस्य बाधायामपि संभवात् ४२ ॥

संभवतीति श्रुत्याऽविनाशित्वे हेतुमसंगत्वं चोक्तवानित्याह मात्रासंसर्ग इति मीयन्त इति मात्रा देहादयस्ताभिरस्यात्मनोऽसंसर्गो भवतीत्यर्थः ४०
ननु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति श्रुत्याऽस्यौपाधिकस्यापि विनाशित्वं प्रतिपाद्यत इत्याशंक्य तस्याः श्रुतेर्देहान्तरप्राप्ति
विषयतया नात्यन्तिकनाशाभावपरत्वमित्याह जीवापेतमिति जीवापेतं जीवरहितं जीवेन त्यक्तमिति यावत् वाव एव स जीवो न
म्रियत इत्यर्थः ४१ ननु जीवस्याविनाशित्वे अहं ब्रह्मास्मीत्यविनाशिब्रह्मतादात्म्यज्ञानं न घटत इति शंकते नाहं ब्रह्मेतीति विनाशी स जी
वोऽहं ब्रह्मेति ब्रह्मरूपेणात्मानं न बुध्येत न जानीयाद्विनाश्यविनाशिनोरेकत्वविरोधादिति चेन्न मुख्यसामानाधिकरण्याभावेऽपि बा
धायां सामानाधिकरण्यसंभवाज्जीवभावबाधेन ब्रह्मभावोऽवगंतव्य इत्याशंकानन्तरमित्याह न तदिति ४२ ॥

बाधासामानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्त्तिककारैः सदृष्टान्तोभिहितस्तमिममर्थं तद्वाक्योदाहरणपूर्वकं दर्शयति योयं स्था
णुरिति स्थाणुरेष पुमानित्यस्मिन्वाक्ये पुरुषतत्त्वबोधे न स्थाणुत्वबुद्धिर्निवर्तते यथा एवमहं ब्रह्मास्मीति बोधेनाहंबुद्धिः कर्ताहमस्मी
त्येवमादिरूपा सर्वापि निवर्तत इति ४३ नैष्कर्म्येति एवमुक्तेन प्रकारेणाचार्यैर्वार्त्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थ
त्वमुपदिष्टमीरितमिति फलितमाह ततो हीति ततः कारणाद्ब्रह्माहमस्मीति वाक्येन सामानाधिकरण्यस्य बाधार्थत्वमस्तीत्यर्थः ४४
नन्वेवमपि श्रुतिषु बाधायां सामानाधिकरण्यं न क्वापि दृष्टमित्याशंक्य सर्वं ह्येतद्ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं दृष्टमतोत्रापि

योयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव ब्रह्मास्मीति धियाऽशेषा ह्यहंबुद्धिर्निवर्तते ४३ नैष्क
र्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितम् सामानाधिकरण्यस्य बाधार्थत्वं ततस्तु तत् ४४ सर्वं ब्र
ह्मेति जगता सामानाधिकरण्यवत् अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत् ४५ सामानाधि
करण्यस्य बाधार्थत्वं निराकृतम् प्रयत्नतो विवरणे कूटस्थत्वविवक्षया ४६ शोधितस्त्वंपदार्थो
यः कूटस्थो ब्रह्मरूपताम् तस्य वक्तुं विवरणे तथोक्तमितरत्र च ४७ देहेन्द्रियादियुक्तस्य जीवाभा
सभ्रमस्य या अधिष्ठानचितिः सैषा कूटस्थात्र विवक्षिता ४८ ॥

तद्दर्शयतीत्याह सर्वं ब्रह्मेति ४५ ननु तर्हि विवरणाचार्यैर्बाधायां सामानाधिकरण्यं कुतो निराकृतमित्याशंक्य तैरहंशब्देन कूटस्थस्य विवक्षि
तत्वादित्याह सामानाधिकरण्यस्येति ४६ कूटस्थत्वविवक्षयेत्युक्तमर्थं विवृणोति शोधितस्त्वमिति शोधितो बुद्ध्यादिभ्यो विवेचितस्त्वंपदल
क्ष्योर्थः कूटस्थो वक्ष्यमाणलक्षणस्तस्य ब्रह्मरूपतां सत्यादिलक्षणब्रह्मरूपतां वक्तुं विवरणादिषु बाधायां सामानाधिकरण्यनिराकरणपूर्वकं मुख्य
सामानाधिकरण्यमुक्तमित्यर्थः ४७ इदानीं कूटस्थस्य ब्रह्मणैक्यं संभावयितुं कूटस्थशब्देन विवक्षितमर्थमाह देहेन्द्रियादीति आदिशब्दा
द्बुद्धिमनआदयो गृह्यन्ते एवं च देहेन्द्रियादियुक्तस्य शरीरद्वयसहितस्य जीवाभासभ्रमस्य चिदाभासरूपभ्रमस्य याधिष्ठानचितिर्यदधिष्ठानचै
तन्यमस्ति तदत्र वेदान्तेषु कूटस्थत्वेन विवक्षितमित्यर्थः ४८ ॥

ब्रह्मशब्दस्यवार्थमाह जगद्भ्रमस्येति कृत्स्नजगत्कल्पनाधिष्ठानंयच्चैतन्यंवेदांतेषुनिरूपितंतदत्रब्रह्मशब्देनविवक्षितमित्यर्थः ४९
ननुजीवभ्रमाधिष्ठानचैतन्यंकूटस्थतत्त्वमनुपपन्नंजीवस्यारोपितत्वासिद्धेरित्याशंक्य तस्यारोपितत्वंकैमुतिकन्यायेनसाधयति
यतस्मिन्निति जगदेकदेशत्वंचानेनजीवेनानुप्रविश्येत्यादिश्रुतिसिद्धम् ५० ननुजगदधिष्ठानचैतन्यस्यैकत्वात्तत्त्वंपदार्थभेदाभावेन
त्वंपदार्थयोःयोत्तरुक्तःमित्याशंक्यतयोरौपाधिकोभेदोवास्तवमैक्यमित्याह जगदिति जगदितितदेकदेशइतिचत्राख्यापस्यसमा

जगद्भ्रमस्यसर्वस्ययदधिष्ठानमीष्टानमीरितम् त्रय्यंतेषुतदत्रस्याद्ब्रह्मशब्दविवक्षितम् ४९
यदस्मिन्नेवचैतन्येजगदारोप्यतेयदा तदातदेकदेशस्यजीवाभासस्यकाकथा ५० जगत्तदेक
देशाख्यसमारोप्यस्यभेदतः तत्त्वंपदार्थौभिन्नौस्तोवस्तुतस्त्वेकताचितः ५१ कर्तृत्वादीन्बु
द्धिधर्मान्स्फूर्त्याख्यांचात्मरूपताम् दधद्भातिपुरस्त्वाभासोतोभ्रमोभवेत् ५२ काबुद्धिः
कोयमाभासःकोवात्मात्रजगत्कथम् इत्यनिर्णयतोमोहःसोयंसंसारउच्यते ५३ बुद्ध्यादी
नांस्वरूपंयोविनक्तिस्वतत्त्ववित् सएवमुक्तइत्येवंवेदांतेषुविनिश्चयः ५४ ॥

रोप्यस्यतत्त्वथा ज्ञातावेकवचनं ५१ ननुचिदाभासस्यशुक्तिकारजतादिवदधिष्ठानारोप्योभयधर्मवत्त्वानुपलंभात्कथमा
रोपितत्वमित्याशंक्याह कर्तृत्वादीनितिबुद्ध्युपाधिद्वारासमारोप्यमानात् कर्तृत्वभोक्तृत्वप्रमातृत्वादीन् स्फुरणलक्ष
णमात्मरूपत्वंचदधत् पुरतोभातिस्पष्टंप्रतिभासतेऽतश्चाभासःकल्पितइत्यर्थः ५२ अस्यभ्रमस्यकिंकारणमित्याकांक्षा
यांबुद्ध्यादिस्वरूपाःपरिज्ञानमेवेत्याह काबुद्धिरिति तस्यनिवर्तनीयत्वापादनार्थंहेतुतामाह सोयमिति ५३ अस्यकिंनिवर्त
कमित्याकांक्षायांबुद्ध्यादीनांस्वरूपविवेकएवनिवर्तकइत्यभिप्रेत्यतद्विज्ञानेवत्तानीततएवचानर्थनिवृत्तिरित्याहबुद्ध्यादीनामिति

एवं बंधमोक्षयोरविवेकमूलत्वे सत्यहेतुत्वादेकस्य बंधः कस्य मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः श्रुततर्कमूलाः परिहासविशेषाः खं
डनोक्तप्रयुक्तिभिस्तेषां निरुत्तरत्वापादनेन परिहरणीया इत्याह एवमिति ५५ एवं श्रुतियुक्तिभ्यां कूटस्थं बुद्ध्यादिभ्यो विविच्य दर्शयित्वा पु
रतो ध्यापितद्विवेकः कृत इत्याह वृत्तेः साक्षितयेत्यादिना कामादिवृत्त्युत्पत्तेरसत्त्वात्तत्साक्षित्वेन तद्वृत्त्युदयात्पूर्वं तत्प्रागभावसाक्षित्वेन
च जिज्ञासायां सत्यां तत्साक्षित्वेन ततः पूर्वमज्ञोऽस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन च शिवरूपता सिद्धेति ५६ स चासत्यस्य जगत आलं
बनत्वेनाधिष्ठानत्वेन सत्यः जडस्य सर्वस्य साधकत्वेनावभासकत्वाच्चिद्रूपः सर्वदा प्रेमविषयत्वादानंदरूपः सर्वार्थावभासकत्वे

एवं च सति निर्बंधः स्यात्कस्येत्यादिकुतर्कजाः विडंबना दृढं खंड्याः खंडनोक्तिप्रकारतः ५५ वृत्तेः साक्षि
तया वृत्तिप्रागभावस्य च स्थितः बुभुत्सायां तथाज्ञोऽस्मीत्याभासाज्ज्ञानवस्तुनः ५६ असत्यालंबन
त्वेन सत्यः सर्वजडस्य तु साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः ५७ आनंदरूपः सर्वार्थसाधक
त्वेन हेतुना सर्वसंबंधवत्त्वेन संपूर्णः शिवसंज्ञकः ५८ ॥

न सर्वसंबंधित्वात्संपूर्णश्च उच्यते अत्र चेदमभिप्रेतं विमतः शिवो वृत्त्यादिभ्यो भिद्यते वृत्त्यादिसाक्षित्वात् यद्यद्वृत्त्यादिभ्यो न भिद्यते तत्तद्वृत्त्या
दिसाक्षी न भवति यथा वृत्त्यादिः विमतः सत्यो भवितुमर्हति मिथ्याधिष्ठानत्वादसत्यरजताधिष्ठानशुक्तिवत् विमतश्चिद्रूपो जडमात्राव
भासकत्वात् यच्चिद्रूपं न भवति तत्सर्वजडावभासकमपि न भवति यथा घटादिः विमतः परमानंदरूपः परप्रेमास्पदत्वात् यत्परमान
न्दरूपं न भवति तत्परप्रेमास्पदमपि न भवति यथा घटादिः विमतः परिपूर्णः सर्वसंबंधित्वात् गगनवत् सर्वसंबंधित्वं च सर्वार्थसा
धकत्वेन विमतः सर्वसंबंधवान् सर्वावभासकत्वात् यः सर्वसंबंधवान्न भवति स सर्वावभासकोऽपि न भवति यथा दीपादिरिति ५८

पं. टी. ९४

९५

उदाहृतपुराणवाक्यस्य तात्पर्यमाह इतिशैवपुराणेष्विति इत्येवंप्रकारेण सूतसंहितादिषु पुराणेषु जीवेश्वरादिकल्पनारहितः केव
लोऽद्वितीयः स्वप्रभः स्वयंप्रकाशचैतन्यरूपः शिवः कूटस्थो विवेचित इत्यर्थः ७९ जीवेश्वरादिरहितत्वेऽज्ञत इत्याशंक्य श्रुत्या तयोर्मायि
कत्वप्रदर्शनादित्याह मायाभासेनेति जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिर्मायाविद्याधीनयोश्चिदा
भासयोर्मायिकत्वं प्रतिपादयतीति भावः मायिकत्वेन तयोर्देहादिभ्यो वैलक्षण्यं न स्यादित्याशंक्य पार्थिवत्वाविशेषेऽपि काचकुम्भस्य
घटादिभ्यो वैलक्षण्यमिवानयोरपि स्यादित्याह स्वच्छाविति ८० ननु घटकाचकुम्भारंभकयोर्मृद्विशेषयोर्भेदात्तद्वैलक्षण्यमुचि

इति शैवपुराणेषु कूटस्थः प्रविवेचितः जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ७९ मायाभा
सेन जीवेशौ करोतीति श्रुतत्वतः मायिकावेव जीवेशौ स्वच्छौ तौ काचकुम्भवत् ८० अन्नजन्यं
मनो देहात्स्वच्छं यद्वत्तथैव तौ मायिकावपि सर्वस्मादन्यस्मात्स्वच्छतां गतौ ८१ चिद्रूपत्वं च संभा
व्यं चित्त्वेनैव प्रकाशनात् सर्वकल्पनशक्ताया मायाया दुःशकं न हि ८२ अस्मन्निद्रापि जीवेशौ चे
तनौ स्वप्नगौ सृजेत् महामाया सृजत्येताविति आश्चर्यं किमत्र ते ८३ सर्वज्ञत्वादिकं चेशे कल्पयित्वा
प्रदर्शयेत् धर्मिणं कल्पयेद्यास्याः को भारो धर्मकल्पने ८४ ॥

तं जगज्जीवेश्वरभेदहेतोर्मायाया एकत्वात्तयोर्जगतो वैलक्षण्यमनुचितमित्याशंक्यान्नजन्ययोर्देहमनसोर्यथा वैलक्ष
ण्यं तद्वदित्याह अन्नजन्यमिति भवतु काचादिवत्स्वच्छत्वं चित्त्वं तु कुत इत्याशंक्यानुभवादित्याह चिद्रूपत्वमिति चित्त्वेन
प्रकाशनमपि मायिकयोरनुपपन्नमित्याशंक्य तस्या दुर्घटकारित्वादुपपन्नमित्याह सर्वकल्पनेति ८२ उक्तमर्थं कै
मुतिकन्यायेन द्रढयति अस्मन्निति ८३ ईश्वरस्यापि मायिकत्वेन स्यजीववदसर्वज्ञत्वादिकं स्यादित्याशंक्य सर्वज्ञत्वा
दिकमपि मायैव कल्पयिष्यतीत्याह सर्वज्ञत्वेति तत्रोपपत्तिमाह धर्मिणमिति ८४ ॥

ननु जीवेशयोरिव कूटस्थस्यापि मायिकत्वं प्रसज्येतेत्याशंकते कूटस्थेऽपीति प्रमाणाभावान्नैवमिति परिहरति नातिशंक्यतामिति ६५ कूटस्थस्य वास्तवत्वेऽपि प्रमाणं नोपलभ्यत इत्याशंक्य श्रुतयः सर्वा अपि प्रमाणमित्याह वस्तुत्वं घोषयन्तीति अत्र कूटस्थस्य पारमार्थिकत्वे प्रतिपक्षभूतमन्यद्वस्तु किंचन न सहन्त इत्यर्थः ६६ ननु कूटस्थस्य जीवेशयोश्च वास्तवत्वावास्तवत्वसाधने श्रुतय एव प्रवृत्तास्तेन न तर्कैः किंचिदपि साध्यमित्याशंक्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय प्रवृत्तत्वान्न तर्कोपन्यास इत्याह श्रुत्यर्थमिति ६७ ततः किमित्यत आह तस्मादिति मुमुक्षूणां श्रुत्यर्थः कीदृशोऽनुसंधेय इत्यत आह श्रुताविति ६८ श्रुतिषु जीवेशयोर्मायिकत्वमीक्षणादिप्रवेशान्तायाः सृष्टेरीश्वरकर्तृत्वं जाग्रदादिसृष्टि-

कूटस्थेऽप्यतिशंका स्यादिति चेन्नातिशंक्यताम् । कूटस्थमायिकत्वे तु प्रमाणं न हि विद्यते ॥ ६५ ॥ वस्तुत्वं घोषयन्त्यस्य वेदान्ताः सकला अपि । सपत्नरूपं वस्त्वन्यन्न सहन्तेऽत्र किंचन ॥ ६६ ॥ श्रुत्यर्थं विशदीकुर्मो न तर्काद्वच्मि किंचन । तेन तार्किकशंकानामत्र कोऽवसरो वद ॥ ६७ ॥ तस्मात्कुतर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेत् । श्रुतौ तु मायया जीवेशौ करोतीति प्रदर्शितम् ॥ ६८ ॥ ईक्षणादिप्रवेशान्ता सृष्टिरीशकृता भवेत् । जाग्रदादिविमोक्षान्तः संसारो जीवकर्तृकः ॥ ६९ ॥ असंग एव कूटस्थः सर्वदा नास्य कश्चन । भवत्यतिशयस्तेन मनस्येवं विचार्यताम् ॥ ७० ॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ७१ ॥ अवाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा । जीवमीशं जगद्वापि समाश्रित्य प्रबोधयेत् ॥ ७२ ॥

बंधमोक्षलक्षणस्य संसारस्य जीवकर्तृत्वं कूटस्थस्यासंगत्वादिकं श्रुतिजन्मादिलक्षणस्य व्यवहारजातस्यासत्त्वं च प्रतिपादितं अतो मुमुक्षुरिममर्थं सर्वदा विचारयेदित्यभिप्रायः ७० कूटस्थस्य जन्माद्यतिशयाभावः कुतोऽवगम्यत इत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति न निरोध इति ७१ ननु तर्हि श्रुतिषु तत्र तत्र जीवेश्वरादिस्वरूपप्रतिपादनं किमर्थमित्याशंक्याऽवाङ्मनसगोचरस्यात्मनोऽवबोधनायेत्याह अवाङ्मनसेति ७२ ॥ ननु तत्त्वस्यैकरूपस्य श्रुतिबोध्यत्वे श्रुतिषु विगानं कुतो दृश्यत इत्याशंक्य न तत्त्वे विगानमस्ति ॥

अपि तत्त्वबोधनप्रकारेण तदपि बोधप्रयुक्तं चित्तं वेदवमानुसारेणाह पूज्यपादाचार्यैरुक्तमित्याह यथा यथेति ७३ श्रुत्यर्थस्यैकरूपत्वेन तत्प्रतिपादकानामेव श्रुतौ विप्रतिपत्तिरित्याशंक्य श्रुतितात्पर्यबोधशून्यानामेव विप्रतिपत्तिर्न तत्त्वविदामित्याह श्रुतितात्पर्यमिति ७४ तर्हि विवेकिनां निश्चयः कीदृश इत्याकांक्षायामाह मायामेघ इति ७५ ग्रंथाभ्यासफलमाह इमं कूटस्थदीपमिति ७६ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता कूटस्थदीपव्याख्या समाप्ता ८ ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते ध्यानदीपस्य व्याख्या संक्षेपतो मया १ इह तावद्वेदांतशास्त्रे नित्यानित्यवस्तुविवेकादिसा

यथा यथा भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि सा सैव प्रक्रियेह स्यात्साध्वीत्याचार्यभाषितम् ७३ श्रुतितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानंदवारिधौ ७४ मायामेघो जगन्नीरं वर्षत्वेष यथा तथा चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ७५ इमं कूटस्थदीपं योऽनुसंधत्ते निरंतरम् स्वयं कूटस्थरूपेण दीप्यतेऽसौ निरंतरम् ७६ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवि कूटस्थदीपः समाप्तः ८ संवादिभ्रमवद्ब्रह्मतत्त्वोपास्त्यापि मुच्यते उत्तरेतापनीयेतः श्रुतोपास्तिरनेकधा १ ॥

धनचतुष्टयसंपन्नस्य सम्यक्श्रवणमनननिदिध्यासनानुष्ठानवतस्तत्त्वंपदार्थविवेचनपूर्वकं महावाक्यार्थापरोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिपादितं तत्र श्रुतो यतिचक्रस्यापि बुद्धिमांद्यादिना केनचित्प्रतिबंधेन वाक्यार्थविषयः परोक्षप्रतीत्यनुत्पत्तौ सत्यां तदुत्पादनद्वारा मोक्षफलकोपासनां निर्दिदर्शयिषुरादौ तावत्सदृष्टांतं ब्रह्मतत्त्वोपासनयापि मोक्षो भवतीति प्रतिजानीते संवादीति यथा संवादिभ्रमेण ग्रहणस्याभिप्रेतार्थलाभो भवति एवं ब्रह्मतत्त्वोपासनयाप्यभिलषितब्रह्मभावलक्षणो मोक्षो भवतीत्यर्थः तत्र किं प्रमाणमित्यत आह उत्तर इति यत उपासनया विमोक्षोस्ति अतस्तापनीयोपनिषद्यनेकप्रकारेण ब्रह्मतत्त्वोपासनाश्रुता

संवादिभ्रमवदिति कृत्वा दृष्टान्तं प्रपञ्चयितुं संवादिभ्रमप्रतिपादकं वार्तिकं पठति मणिप्रदीपेति मणिश्च प्रदीपश्च मणिप्रदीपौ तयोः प्रभे मणिप्रदी
पप्रभे तयोरिति विग्रहः मणिप्रभायां दीपप्रभायां च या मणिबुद्धिः सा मिथ्याज्ञानमेवातस्मिंस्तद्बुद्धित्वात् दयापि मणिप्रभायां मणिबुद्ध्या
भिधावतः पुरुषस्य मणिलाभो भवति इतरस्य तु स नास्तीत्यर्थक्रियायां वैषम्यमस्तीत्यर्थः २ वार्तिकं व्याचष्टे दीपोऽपवरकस्यान्तरित्या
दिना श्लोकत्रयेण कस्मिंश्चिन्मन्दिरेऽपवरकस्यान्तर्दीपस्तिष्ठति तस्य प्रभा बहिर्द्वारप्रदेशे रत्नमिव वर्तुलोपलभ्यते तेन प्रान्यस्मिन्मन्दि
रेऽपवरकस्यान्तः स्थितस्य रत्नस्य प्रभा बहिर्द्वारप्रदेशे दीपप्रभेव रत्नसमानोपलभ्यते ३ तथाविधं प्रभाद्वयं दूरतो दृष्ट्वा यः मणिरयं
मणिरिति बुद्ध्या द्वौ पुरुषावभिधावन्तौ तयोर्द्वयोरपि प्रभाविषये जायमानं मणिज्ञानं भ्रम एव अथापि दीपप्रभायां मणिबुद्धिं कृत्वा धा

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति २ दीपोऽपवर
कस्यान्तर्वर्तते तत्प्रभा बहिः दृश्यते द्वार्यथान्यत्र तद्वद्दृष्टा मणेः प्रभा ३ दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्या
भिधावतोः प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ४ न लभ्यते मणिर्दीपप्रभां प्रत्यभिधावता प्र
भायां धावताऽवश्यं लभ्यतेव मणिर्मणेः ५ दीपप्रभामणिभ्रान्तिर्विसंवादिभ्रमः स्मृतः मणिप्रभा
मणिभ्रान्तिः संवादिभ्रम उच्यते ६ बाष्पभ्रमतया बुद्धा न त्वङ्गारानुमानतः वह्निर्यदृच्छया लब्धः
स संवादिभ्रमो मतः ७ ॥

वता पुरुषेण मणिर्न लभ्यते मणेः प्रभायां मणिबुद्ध्या धावता मणिर्लभ्यते एवमवतरे वं वार्त्तिकार्थं प्रकृते किमायातमित्यत आह
दीपप्रभेति या दीपप्रभायां मणिभ्रान्तिरस्ति स विसंवादिभ्रमः स्मृतो विद्वद्भिः मणिलाभलक्षणार्थक्रियारहितत्वात् मणिप्रभायां
वा॰ मणिलाभलक्षणार्थक्रियावत्त्वात् संवादिभ्रम इत्युच्यत इत्यर्थः ६ एवं प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वाऽनुमानविषयेऽपि तं द
र्शयति बाष्पमिति क्वचित्प्रदेशे स्थितेन बाष्पं भ्रमत्वेनानिश्चित्य तन्मूलप्रदेशे स्वयं प्रदेशोऽग्निमान् भ्रमवत्त्वादित्यनुमाय प्रवृ
त्तेन पुरुषेण दैवगत्या यद्यग्निर्लब्धोपलभ्येत तदा बाष्पविषयं धूमज्ञानं संवादिभ्रमो मतः ७ ॥

पं॰ टी॰
९८

आगमविषयेऽपि तं दर्शयति गोदावर्युदकमिति गोदावर्युदकस्यापि विशुद्धिहेतुत्वमागमसिद्धमतस्तत्प्रोक्षणादपि शुद्धिरस्त्येव अथापि गोदावर्युदके यागङ्गोदकबुद्धिः सा भ्रान्तिरेव ८ उदाहरणान्तरमाह ज्वरेणाप्त इति ज्वरेण सन्निपातं प्राप्तः पुरुषः इदं नारायणस्मरणं मम स्वर्गसाधनमिति ज्ञानमन्तरेणापि सन्निपातप्रयुक्तभ्रमवशात्स्वाधारणपुरुषतया चैत्रादिवन्नारायणं स्मरन्मृतः स्वर्गं प्राप्नोत्येव न हि हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः आकृष्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिमित्यादिपुराणवचनेभ्यः अत्रापि नारायणनाम्नः पुत्रनामत्वज्ञाने भ्रान्तिरेव ९ एवं त्रिविधसंवादिभ्रमोदाहरणेन

96

गोदावर्युदकं गङ्गोदकं मत्वा विशुद्धये संप्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमो मतः ८ ज्वरेणाप्तः सन्निपातं भ्रान्त्या नारायणं स्मरन् मृतः स्वर्गमवाप्नोति स संवादिभ्रमो मतः ९ प्रत्यक्षस्यानुमानस्य तथा शास्त्रस्य गोचरे उक्तन्यायेन संवादिभ्रमाः सन्ति हि कोटिशः १० अन्यथा मृत्तिकादारुशिलाः स्युर्देवताः कथम् अग्नित्वादिधियोपास्याः कथं वा योषिदादयः ११ अयथावस्तुविज्ञानात्फलं लभ्यत ईप्सितम् काकतालीयतः सोऽयं संवादिभ्रम उच्यते १२ ॥

सिद्धमर्थमाह प्रत्यक्षस्येति १० विपक्षे बाधकप्रदर्शनेनोक्तमर्थं दृढयति अन्यथेति अन्यथा संवादिभ्रमाभावे मृदादयः फलसिद्धये देवतात्वेन ध्याना न भवेयुः स्वतो देवतात्वाभावादित्यर्थः बाधकान्तरमाह अग्नित्वादिति पञ्चाग्निविद्यायां योषिद्वाव गौतमाग्निः पुरुषो वाव गौतमाग्निः पृथिवी वाव गौतमाग्निः पर्जन्यो वाव गौतमाग्निरसौ वाव द्युलोको गौतमाग्निरित्यादिवाक्यैर्योषित्पुरुषपृथिवीपर्जन्यद्युलोकानामग्नित्वेनोपासनं ब्रह्मलोकावाप्तिफलकं न भवेदित्यर्थः आदिशब्देन मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादेशा इत्येवमादयो गृह्यन्ते ११ इदानीं बहुभिर्दृष्टान्तैरुपपादितं संवादिभ्रमं बुद्धिसौकर्याय संक्षिप्य दर्शयति अयथेति विहितादविहिताद्वा यस्मादयथावस्तुविज्ञानाद्विपरीतज्ञानादीप्सितमभिलषितफलं काकतालीयतो दैवगत्या लभ्यते सोऽयं संवादिभ्रम इत्यर्थः १२ ॥

ननु ब्रह्मोपासनस्य यथावस्तुविषयस्य कथं सम्यग्ज्ञानसाध्यमुक्तिफलप्रदत्वमित्याशंक्य संवादिभ्रमवदेवेत्याह स्वयमिति १३ ननु ब्रह्मतत्त्वं
ज्ञात्वोपासनं क्रियते ज्ञात्वा वा आद्ये उपासनावैयर्थ्यं मोक्षसाधनस्य ज्ञानस्यैव विद्यमानत्वात् द्वितीये विषयापरिज्ञानादुपासनमेव न
घटत इत्याशंक्याह वेदान्तेभ्य इति अयमभिप्रायः ब्रह्मात्मैकत्वापरोक्षज्ञानस्य मोक्षसाधनस्यानुत्पन्नत्वान्नोपासनावैयर्थ्यं शास्त्रा
त्परोक्षतयावगतत्वाद्ब्रह्मण उपासनाविषयत्वमिति १४ उपास्यब्रह्मतत्त्वगोचरस्य परोक्षज्ञानस्य किंरूपमित्याकांक्षायामाह प्रत्य
गिति प्रत्यग्व्यक्तिं बुद्ध्यादिसाक्षिणमात्मानमनुल्लिख्याविषयीकृत्य शास्त्रात्तत्त्वज्ञानादिवाक्यजाताद्ब्रह्मास्मीत्येवं सामान्याकारेण
जायमानं ज्ञानमत्रास्यामुपासनायां परोक्षधीः परोक्षज्ञानं विवक्षितमित्यर्थः तत्र दृष्टान्तः विष्ण्वादिमूर्तिवदिति विष्ण्वादिमूर्तिप्र

स्वयं भ्रमोऽपि संवादी यथा सम्यक्फलप्रदः ब्रह्मतत्त्वोपासनापि तथा मुक्तिफलप्रदा १३ वेदान्तेभ्यो ब्रह्म
तत्त्वमखण्डैकरसात्मकम् परोक्षमवगम्यैतदहमस्मीत्युपासते १४ प्रत्यग्व्यक्तिमनुल्लिख्य शास्त्राद्वि
ष्ण्वादिमूर्तिवत् अस्ति ब्रह्मेति सामान्यज्ञानमत्र परोक्षधीः १५ चतुर्भुजाद्यवगतावपि मूर्तिमनुल्लि
खन् अक्षैः परोक्षज्ञान्येव न तदा विष्णुमीक्षते १६ परोक्षत्वापराधेन भवेन्नातत्त्ववेदनम् प्रमाणेनै
व शास्त्रेण सत्यमूर्तेर्विभासनात् १७ ॥

तिपादकशास्त्रजन्यज्ञानवदित्यर्थः १५ ननु शास्त्रेण विष्ण्वादिमूर्तेश्चतुर्भुजत्वादिविशेषप्रतीतेः तस्याप्यक्षतः परोक्षत्वमित्याशंक्या
ह चतुर्भुजाद्यवगताविति शास्त्रेण चतुर्भुजत्वादिविशेषप्रतीतावपि चक्षुरादिभिर्विष्ण्वादिमूर्तिमविषयीकुर्वन् पुरुषः परोक्षज्ञा
न्येव तत्रोपपत्तिमाह न तदेति तदोपासनाकाले विष्णुं शास्त्रस्थं नेक्षते नेन्द्रियैर्विषयीकरोतीत्यर्थः १६ ननु विष्ण्वादिगोचरस्य ज्ञान
स्य व्यक्तिगोचरत्वाभावाद्भ्रमत्वमित्याशंक्य प्रमाणेन जनितत्वान्न भ्रमत्वमित्याह परोक्षत्वेति परोक्षज्ञानत्वं भ्रान्तिज्ञानत्वे कारणं न भ
वति किन्तु विषयासत्यत्वं इह तु प्रमाणभूतेन शास्त्रेणैव यथार्थभूताया विष्ण्वादिमूर्तेरवभासनान्न भ्रमत्वमित्यर्थः १७ ॥

पं॰ टी॰
५७

ननु सच्चिदानंदव्यक्त्युल्लेखिनो ब्रह्मतत्त्वज्ञानस्य शास्त्रजन्यस्यापि कुतः परोक्षत्वमित्याशंक्यापरोक्षत्वप्रयोजकप्रत्यक्त्वोल्लेखाभावादित्या
ह सच्चिदानंदेति सत्यं ज्ञानमनंतं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनः सद्धीदं सर्वं सत्सदिति चिद्धीदं सर्वं प्रकाशते चेत्यादिशा
स्त्रात्सच्चिदानन्दरूपस्य ब्रह्मणो भानेऽपि प्रत्यंचं साक्षिणमनुल्लिखतस्य ब्रह्मणः प्रत्यगात्मरूपत्वमजानानस्य ब्रह्मसाक्षात्त्वान्न वीक्षते नै
व पश्यतीति १८ कथं तर्हि तथाविधब्रह्मणोचरस्य ज्ञानस्य तत्त्वज्ञानत्वमित्याशंक्यागमप्रमाणजन्यत्वादित्याह शास्त्रोक्तेनेति तज्ज्ञा
नं परोक्षमपि शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानंदरूपनिश्चायकत्वात्सम्यग्ज्ञानमेव न भ्रम इत्यर्थः १९ ननु सम्यग्ज्ञानादि

सच्चिदानंदरूपस्य शास्त्राज्ज्ञानेऽप्यनुल्लिखन् प्रत्यंचं साक्षिणं तत्तु ब्रह्म साक्षान्न वीक्षते १८ शास्त्रोक्तेनै
व मार्गेण सच्चिदानंदनिर्णयात् परोक्षमपि तज्ज्ञानं तत्त्वज्ञानं न तु भ्रमः १९ ब्रह्म यद्यपि शास्त्रेषु प्र
त्यक्त्वेनैव वर्णितम् महावाक्यैस्तथाप्येतद्दुर्बोधमविचारिणः २० देहादिष्वात्मत्वभ्रांतौ जाग्रत्यां
न हठात्पुमान् ब्रह्मत्वेनः न विज्ञातुं क्षमते मंदधीत्वतः २१ ॥

वाक्यैर्ब्रह्मणः सच्चिदानंदरूपत्वमिव तत्त्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एवातः शास्त्रजन्यस्यापि ज्ञानस्य प्र
त्यग्व्यक्त्युल्लेखित्वादपरोक्षमेवेत्याशंक्याह ब्रह्म यद्यपीति यद्यपि वेदांतेषु महावाक्यैर्ब्रह्म प्रत्यगात्मत्वेनैवोपदिष्टं तथाप्ये
तस्य प्रत्यग्रूपत्वव्यतिरेकाभ्यां तत्त्वंपदार्थविवेकशून्यस्य दुर्बोधं बोद्धुमशक्यमतः केवलाद्वाक्यात्परोक्षज्ञानमुत्पद्यत इ
त्यर्थः २० ननु सम्यग्ज्ञानस्य प्रमाणवस्तुतंत्रत्वात् प्रमाणस्य च तत्त्वमस्यादिवाक्यरूपस्य सद्भावाद्वस्तुनश्च ब्रह्मात्मैकत्व
लक्षणस्य विद्यमानत्वात्कुतो विचारमंतरेण दुर्बोधत्वमित्याशंक्याह देहादाविति ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधिनो दे
हेन्द्रियादिष्वात्मत्वभ्रमस्य विचारनिवर्त्यस्य सद्भावात्तन्निवृत्तये विचारोऽपेक्ष्यत इत्यर्थः २१ ॥

97

ननु तर्हि देहेन्द्रियादिगोचरस्य द्वैतभ्रमस्य सद्भावाद् द्वितीयब्रह्मगोचरं परोक्षज्ञानमपि नोदियादित्यादित्याशंक्य अपरोक्षद्वैतभ्रमस्य परोक्षाद्वै
तज्ञानाविरोधित्वाच्छ्रद्धावतः पुंसः शास्त्रात्परोक्षज्ञानमुत्पद्यत एवेत्याह ब्रह्ममात्रमिति अपरोक्षद्वैतबुद्धिर्यतः परोक्षाद्वैतबुद्ध्यनुदनो ब्र
ह्ममात्रं सुविज्ञेयमिति योजना २२ अपरोक्षभ्रमस्य परोक्षसम्यग्ज्ञानाविरोधित्वे दृष्टान्तमाह अपरोक्षेति विरोधाभावमेवोदाहृत्य दर्शय
ति प्रतिमादिष्विति २३ केचन विप्रतिपद्यमाना उपलभ्यन्त इत्याशंक्याह अश्रद्धालोरिति कुत इत्यत आह श्रद्धालोरिति सर्वेष्वेव वैदिकानु
ष्ठानेषु श्रद्धावत एवाधिकारित्वादित्यर्थः २४ एतावता परोक्षज्ञाने किमायातमित्यत आह सकृदिति उक्तमर्थं लोकानुभवेन द्रढयति

ब्रह्ममात्रं सुविज्ञेयं श्रद्धालोः शास्त्रदर्शिनः अपरोक्षद्वैतबुद्धिः परोक्षाद्वैतबुद्ध्यनुत् २२ अपरोक्षशि
लाबुद्धिर्न परोक्षेशतां नुदेत् प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यते २३ अश्रद्धालोरविश्वासो नो
दाहरणमर्हति श्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारतः २४ सकृदाप्तोपदेशेन परोक्षज्ञानमुद्भवेत्
विष्णुमूर्त्युपदेशो हि न मीमांसामपेक्षते २५ कर्मोपास्ती विचार्येते अनुष्ठेयाविनिर्णयात् बहुशा
खाविप्रकीर्णं निर्णेतुं कः प्रभुर्नरः २६ निर्णीतोर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः विचारमन्तरे
णापि शक्तोनुष्ठातुमञ्जसा २७ ॥

विष्णुमूर्त्युपदेशो हीति २५ ननु तर्हि कुतः शास्त्रेषु विचाराः क्रियन्त इत्याशंक्यानुष्ठेययोः कर्मोपासनयोः संदेहसंभवात्तन्निर्णयाय विचा
राः क्रियन्त इत्याह कर्मोपास्ती इति संदेहसंभवमेवोपपादयति बहुशाखेति अनेकासु शाखासु तत्र तत्र चोदितं कर्म उपासनं वा एकत्र समाहृ
त्य निर्णेतुमस्मदादिर्नरः कः प्रभुः समर्थः न कोपीत्यर्थः २६ ननु तर्हि अननुष्ठेयत्वमेव कर्मोपासनयोः प्राप्तमित्याशंक्याह निर्णीतोर्थ इति
जैमिन्यादिभिः सर्वैराचार्यैर्निश्चितोर्थोनुष्ठानप्रकारः कल्पसूत्रैः संगृहीतोस्ति तावता तेन ग्रथितत्वेनैव तेषु विश्वासवान् पुरुषः विचारं विना

९८

ननु तत्रोपासनाविचाराभावात्तदनुष्ठानं न संभवेदित्याशंक्याह उपासीनामिति आर्षग्रंथेषु ब्राह्मणवाशिष्ठादिमंत्रकल्पेषूपासनानुष्ठा
नप्रकारो वर्णितस्ततो विचारासमर्था मनुष्याः कल्पसूत्रं तदुपासनं गुरुमुखादवगत्यानुतिष्ठंतीति भावः २८ ननु तर्हीदानींतनैरपि ग्रं
थकर्तृभिर्वेदवाक्यविचारः कुतः क्रियत इत्याशंक्य स्वबुद्धिपरितोषायैव क्रियते नानुष्ठानसिद्धय इत्याह वेदवाक्यानीति २९ ननु ब्रह्मो
पासनावद्ब्रह्मसाक्षात्कारस्याप्युपदेशमात्रादेव सिद्धिः किं न स्यादित्याशंक्याह ब्रह्मसाक्षात्कृतिरिति ३० आप्तोपदेशमात्रेणोपास
नानुष्ठानोपयोगि परोक्षज्ञानमुत्पद्यते अपरोक्षज्ञानं तु विचारमंतरेण न जायत इत्युक्तं तत्र कारणमाह परोक्षज्ञानमिति यत

उपासीनामनुष्ठानमार्षग्रंथेषु वर्णितम् विचाराक्षममर्त्यास्तच्छ्रुत्वोपासते गुरोः २८ वेदवाक्यानि निर्णी
तुमिच्छन्मीमांसतां जनः आप्तोपदेशमात्रेण ह्यनुष्ठानं हि संभवेत् २९ ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण वि
नाऽऽनृणाम् आप्तोपदेशमात्रेण न संभवति कुत्रचित् ३० परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरः अविचारोऽ
परोक्षस्य ज्ञानस्य प्रतिबंधकः ३१ विचार्याप्यपरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् अपरोक्षावसानत्वाद्भूयो भू
यो विचारयेत् ३२ विचारयन्नामरणं नैवात्मानं लभेत चेत् जन्मांतरे लभेतैव प्रतिबंधक्षये सति ३३

अविश्वास एव परोक्षज्ञानं प्रतिबध्नाति नाविचारः न ह्यत्र निवृत्तौ सकृदुपदेशादेव परोक्षज्ञानं तस्योपपद्यते अविचारप्रतिबद्ध
स्यापरोक्षज्ञानस्य तु विचारद्वारा तन्निवृत्तिमंतरेणोत्पत्तिर्न संभवति अतो विचारः कर्तव्य इति भावः ३१ ननु विचारे कृते
ऽपि यदाऽपरोक्षज्ञानं न जायते तदा किं कर्तव्यमित्यत आह विचार्यापीति तत्त्वंपदार्थौ सम्यग्विचार्यापि वाक्यार्थं ब्रह्मात्मै
कत्वमपरोक्षतया न जानातीति चेत् तदापि पुनः पुनर्विचार एव कर्तव्योऽपरोक्षज्ञानहेतोरन्यस्याभावादिति भावः ३२
ननु भूयो विचारेणापि साक्षात्कारानुदये सति विचारो व्यर्थः स्यादित्याशंक्याह विचारयन्निति ३३ ॥

न विंदंति कुतोऽवगतमित्याशंक्याह सूत्रकृता व्यासेनैहिकमप्रस्तुतप्रतिबंधे तद्दर्शनादित्यस्मिन्सूत्रे विधानादित्याह इह वेति निप्रति
बंध इह जन्मनि ज्ञानानुत्पत्तौ श्रुतिं दर्शयति श्रुण्वंत इति ३४ इह जन्मनि श्रवणादिकर्तुर्जन्मांतरे यदि तज्ज्ञानं भवति तत्र ज्ञापि गर्भेन
सन्नेवैषामवेदमहं देवानां जन्मानि विश्वेत्यादिकां श्रुतिमर्थतः पठति गर्भ एवेति इह जन्मन्यनुत्पन्नस्य ज्ञानस्य कालांतरोत्पत्तौ दृष्टा
नमाह यद्वदिति ३५ दृष्टांतं विवृणोति बहुवारमिति ३६ आदिशब्देन परिगृहीतानि दृष्टांतांतराण्याह कालेनेति दार्ष्टांतिके योज
यति तद्वदिति ३७ बहुवारं विचारितेपि तज्ज्ञेप्रतिबंधबलात्साक्षात्कारो न जायत इत्येतद्वार्तिककारैरपि निरूपितमित्याह पुनःपुन

इह वामुत्र वा विद्येत्येवं सूत्रकृतोदितम् श्रृण्वंतोऽप्यत्र बहवो यन्न विद्युः श्रुतेरपि ३४ गर्भ एव शयानः
सन्वामदेवो वबुद्धवान् पूर्वाभ्यस्तविचारेण यद्वदध्ययनादिषु ३५ बहुवारमधीतेपि तदानायाति चे
त्पुनः दिनांतरेऽनधीत्यैव पूर्वाधीतं स्मरेत्तु मान् ३६ कालेन परिपच्यन्ते कृषिगर्भादयो यथा तद्वदा
त्मविचारोपि शनैः कालेन पच्यते ३७ पुनःपुनर्विचारेपि त्रिविधप्रतिबंधतः न वेत्ति तत्त्वमित्येतद्वार्ति
कैः सम्यगीरितम् ३८ कुतस्तज्ज्ञानमिति चेत्तद्धि बंधपरिक्षयात् असावपि च भूतो वा भावी वा वर्त्तते ऽ
थवा ३९ अधीतवेदवेदार्थोऽप्यत एव न मुच्यते हिरण्यनिधिदृष्टांतादिदमेव च दर्शितम् ४० ॥

रिति ३८ तान्येव वार्तिकान्युदाहरति कुतस्तज्ज्ञानमित्यादिना भरतस्य त्रिजन्मभिरित्यंतेन तत्र तावत्पूर्वमनुत्पन्नस्य ज्ञानस्येदा
नीमुत्पत्तौ कारणं पृच्छति कुत इति उत्तरमाह तद्धीति बंधः प्रतिबंधस्तस्य परिक्षयादित्यर्थः सोपि प्रतिबंधो भूतो भावी वर्त्तमान
श्चेति त्रिविध इत्याह असावपीति ३९ भवत्वेवं त्रिविधः प्रतिबंधस्तेन किमित्यत आह अधीतवेदवेदार्थोपीति अत एव प्रतिबंध
सद्भावादेवेत्यर्थः सति प्रतिबंधे ज्ञानं नोदेतीत्येतद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विंदेयुः एवमेवेमाः स
र्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंति अनृतेन हि प्रत्यूढा इत्यनया श्रुत्या प्रदर्शितमित्याह हिरण्येति ४० ॥

पं॰ टी॰
९९

99

नन्वतीतस्य प्रतिबंधकत्वं न दृष्टमित्याशंक्याह अतीतेनेति अयमर्थः कश्चिद्यतिः पूर्वं गार्हस्थ्यदशायां कस्यांचिन्महिष्यां स्नेहं कृत्वा पश्चात्संन्यासानंतरं श्रवणे प्रवृत्तोपि तेनैव स्नेहेन जनितात्प्रतिबंधात्तत्त्वं गुरुणोपदिष्टमपि न ज्ञातवानित्येवंविधा गाथा लोके प्रगीयते न पुराणादिषूपदिष्टेत्यर्थः ४२ तर्हि तथाविधस्य तस्य कथं ज्ञानोत्पत्तिरित्यत आह अनुसृत्येति गुरुस्तस्य तत्त्वोपदेशात्तदीयं महिषीस्नेहमनुसृत्य तस्यामेव महिष्यां तत्त्वं महिष्युपाधिकं ब्रह्मोक्तवान् ततः सोपि महिषीस्नेहलक्षणप्रतिबंधकापगमेन गुरूपदिष्टं तत्त्वं यथावच्छास्त्रोक्तप्रकारेणैव ज्ञातवानित्यर्थः ४२ एवमतीतप्रतिबंधं प्रदर्श्य वर्तमानं दर्शयति प्रतिबंध इति वर्तमानप्रतिबंधश्चित्तस्य विषयासक्तिरूपकः प्रज्ञामांद्यं बुद्धेस्तीक्ष्णत्वाभावः कुतर्कः शुष्कतार्किकत्वेन श्रुत्यर्थस्यान्यथोहनं विपर्ययदुराग्रहः विपर्यये आत्मनः कर्तृत्वादिधर्मयुक्तत्वज्ञानलक्षणे दुराग्रहो युक्तिरहितोभिनिवे

अतीतेनापि महिषीस्नेहेन प्रतिबंधतः भिक्षुस्तत्त्वं न वेदेति गाथा लोके प्रगीयते ४२ अनुसृत्य गुरुः स्नेहं महिष्यां तत्त्वमुक्तवान् ततो यथावद्वेदैष प्रतिबंधस्य संक्षयात् ४२ प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः प्रज्ञामांद्यं कुतर्कश्च विपर्ययदुराग्रहः ४३ शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयम् नीतेस्मिन्प्रतिबंधेतः स्वस्य ब्रह्मत्वमश्नुते ४४ आगामिप्रतिबंधश्च वामदेवे समीरितः एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ४५ ॥

शः एतेषामन्यतमस्यापि सत्त्वे ज्ञानं नोदेतीत्यर्थः ४३ अस्यापि प्रतिबंधस्य केन निवृत्तिरित्यत आह शमाद्यैरिति शमादयः शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वेति श्रुत्युक्ताः श्रवणादयः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्याभिहिताः एतैः साधनैस्तत्र तत्र तस्य तस्य प्रतिबंधस्य निवर्तने उचितैर्योग्यैस्तस्मिंस्तस्मिन्प्रतिबंधे क्षयं नीते सति विनाशिते सत्यतः प्रतिबंधापगमादेव स्वस्य प्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः ४४ इदानीं भाविप्रतिबंधं दर्शयति आगामीति आगामिप्रतिबंधो जन्मांतरहेतुः प्रारब्धशेष इत्यर्थः तस्य च भोगमंतरेण निवृत्त्यभावात्तन्निवृत्तौ कालनियमो नास्तीत्याह एकेनेति एकेन जन्मना क्षीणो वामदेवस्येति शेषः भरतस्य त्रिजन्मभिः क्षीण इत्यनुसज्यते ४५ ॥

नन्वेकेन द्वित्रिजन्मभिरिति नियतकालत्वं भवत्वेवोच्यत इत्याशंक्याह योगभ्रष्टस्येति योगभ्रष्टस्तत्त्वसाक्षात्कारपर्यन्तविचाररहित इत्यर्थः
तर्हि तत्त्वविचारो निष्फलः स्यादित्याशंक्याह नेति प्रतिबन्धनिवृत्त्यनन्तरमेवापरोक्षज्ञानलक्षणफलसंभवादिति भावः ४६ गीतायां प्र
तिपादितमर्थं दर्शयति प्राप्येत्यादिना ततो यामित्यन्तेन योगभ्रष्टश्चात्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोकान् स्वर्गवि
शेषान् प्राप्य तत्र बहुकालं सुखमनुभूय तद्भोगावसाने साभिलाषश्चेदस्मिंल्लोके शुचीनां मातृतः पितृतः शुद्धानां श्रीमतां कुले अभिजा
यते ४७ पक्षान्तरमाह अथवेति निस्पृहः स्वयमतिविरक्तश्चेद्ब्रह्मतत्त्वविचारादेव धीमतामात्मतत्त्वनिश्चयविचारवतां योगिनां चैते

योगभ्रष्टस्य गीतायामतीते बहुजन्मनि प्रतिबन्धक्षयः प्रोक्तो न विचारोऽप्यनर्थकः ४६ प्राप्य पुण्यकृतां
लोकानात्मतत्त्वविचारतः शुचीनां श्रीमतां गेहे साभिलाषोऽभिजायते ४७ अथवा योगिनामेव कुले भ
वति धीमताम् निस्पृहो ब्रह्मतत्त्वस्य विचारात्तद्धि दुर्लभम् ४८ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहि
कम् यतते च ततो भूयस्तस्मादेतद्धि दुर्लभम् ४९ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः अने
कजन्मसंसिद्धस्ततो याति परां गतिम् ५० ॥

कारुणवतां कुले भवति जायत इत्यर्थः पूर्वस्मात्पक्षात्कोऽतिशय इत्यत आह तद्धीति हि यस्मात्कारणात्तद्योगिकुले जन्म दुर्लभं अल्प
पुण्येनालभ्यमित्यर्थः ४८ तस्य दुर्लभत्वमुपपादयति तत्रेति हि यस्मात्कारणात्तत्र तस्मिञ्जन्मनि पौर्वदेहिकं पूर्वदेहे भवं तं बुद्धि
संयोगं तत्त्वगोचरबुद्धिसंबन्धं लभते प्राप्नोति न केवलं बुद्धिसंबन्धमात्रलाभः किं तु ततः पूर्वस्मात्प्रयत्नाद्भूयो यतते चापि कं प्रयत्नं करो
ति तस्मादेतज्जन्म दुर्लभमित्यर्थः ४९ भूयोऽभ्यासे कारणमाह पूर्वाभ्यासेनेति स योगभ्रष्टस्तेन पूर्वाभ्यासेनैवावशोऽपि अस्वाधीनोऽपि
ह्रियते आकृष्यते एवमनेकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धस्तत्त्वज्ञानसंपन्नः ततस्तस्मात्तत्त्वज्ञानात्परां गतिं मुक्तिं याति प्राप्नोती

आगामिप्रतिबन्धांतरं दर्शयति ब्रह्मेति ब्रह्मलोकप्राप्तीच्छायां सत्यां तां निरुध्य य आत्मानं विचारयेत् न तस्य साक्षात्कारो नैव जायत इत्यर्थः ५१ ननु तर्हि तस्य कदापि मुक्तिर्न स्यादित्याशंक्याह वेदांतेति वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वास्ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमित्यादिशास्त्रवशाद्ब्रह्मलोकप्राप्त्यनंतरं तत्त्वं साक्षात्कृत्य ब्रह्मणा सह मुक्तिर्भविष्यतीत्यर्थः ५२ एवं तत्त्वविचारे क्रियमाणे प्रतिबंधवशादत्र साक्षात्कारो न जायत इत्यभिधाय तीव्रपापिनां तस्योपि विचारो दुर्लभ इत्याह केषांचिदिति तत्र प्रमाणमाह श्रवणायेति यः परमात्मा बहुभिः पुरुषैः श्रवणायापि श्रोत्रमपि न लभ्यः दुर्ल

ब्रह्मलोकाभिवांछायां सम्यक्सत्यां निरुध्य ताम् विचारयेद्य आत्मानं न तु साक्षात्करोत्ययम् ५१ वेदांतविज्ञानसुनिश्चितार्था इति शास्त्रतः ब्रह्मलोके स कल्पांते ब्रह्मणा सह मुच्यते ५२ केषांचित्स विचारोपि कर्मणा प्रतिबध्यते श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेः ५३ अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सोनिशम् ५४ निर्गुणब्रह्मतत्त्वस्य नह्युपास्तेरसंभवः सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवात् ५५ अवाङ्मनसगम्यं तन्नोपास्यमिति चेत्तदा अवाङ्मनसगम्यस्य वेदनं न च संभवेत् ५६ ॥

भ इत्यर्थः ५३ एतावता सति प्रतिबंधे तत्त्वसाक्षात्कारस्तत्साधनभूतो विचारश्च न संभवतीत्यभिधाय इदानीं विचारासमर्थेन पुरुषार्थार्थिना किं कर्तव्यमित्यपेक्षायां विचारासमर्थस्य तद्ब्रह्मोपासने गुरोरिति यत्प्राक् प्रतिज्ञातं तदुपपादयति अत्यंतेति सामग्र्यसंभवो नाम तत्त्वोपदेष्टुर्गुरोरध्यात्मशास्त्रस्य देवाद्यसंभवस्तस्मादित्यर्थः ५४ ननु निर्गुणब्रह्मतत्त्वस्य गुणरहितत्वात्तदुपासनं न घटत इत्याशंक्योपास्तेः प्रत्ययावृत्तिरूपत्वात्सगुणब्रह्मणीव निर्गुणेपि तत्संभवतीत्याह निर्गुणेति ५५ ननु निर्गुणस्य ब्रह्मणो वाङ्मनोगोचरत्वाभावान्नोपास्यत्वमित्याशंक्य वेदनपक्षेप्ययं दोषः समान इत्याह अवाङ्मनसेति ५६ ॥

ननुब्रह्मावाङ्मनसगोचरमित्येवंज्ञातंतच्छक्यमित्याशंक्य एवमेवोपास्तिमपिशक्यमित्याह वागिति ५७ ब्रह्मणउपास्यत्वेसगुणत्वंप्रसज्ये
तेत्याशंक्य वेद्यत्वेपितत्सगुणत्वंस्यादित्याह सगुणत्वमिति तत्सगुणत्वमित्यर्थः ननुलक्षणावृत्त्याश्रवणान्नवेद्यत्वेसगुणत्वप्रसंग
इत्याशंक्योपासनमपितथैवक्रियतामित्याह वेद्यमिति ५८ ननुब्रह्मणउपास्यत्वंश्रुत्यानिषिध्यतइतिशंकते ब्रह्मविदिति यन्मनसा
नमनुतेयेनाहुर्मनोमतंतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतइतिश्रुतिरुपास्यस्यब्रह्मत्वंनिषेधतीत्यर्थः यद्वाङ्मनसगम्यंतदेव
ब्रह्मविद्धि इदमितियदुपासतेतत्पुरुषंब्रह्मनविद्धीतियोजना ५९ उपास्यवद्वेद्यस्यापितन्निषेधःसमानइत्याह विदितादिति अन्यदेवत

वागाद्यगोचरंब्रह्मज्ञितेत्येवंयदिवेत्त्यसौ वागाद्यगोचराकारमित्युपासीतनोकुतः ५७ सगुणत्वमुपा
स्यत्वाद्यदिवेद्यत्वतोपितत् वेद्यंचेल्लक्षणावृत्त्यालक्षितंसमुपास्यताम् ५८ ब्रह्मविद्धितदेवत्वंनत्वि
दंयदुपासते इतिश्रुतेरुपास्यत्वंनिषिद्धंब्रह्मणोयदि ५९ विदितादन्यदेवेतिश्रुतेर्वेद्यत्वमस्यन
यथाश्रुत्यैववेद्यंचेत्तथाश्रुत्याप्युपास्यताम् ६० अवास्तवीवेद्यताचेदुपास्यत्वंतथानकिम् वृत्तिव्या
प्तिर्वेद्यताचेदुपास्यत्वेपितत्समम् ६१ कातेभक्तिरुपास्तौचेत्कस्तेद्वेषस्तदीरय मानाभावोनवाच्यो
सौबहुश्रुतिषुदर्शनात् ६२ ॥

द्विदितादथोऽविदितादधीति ब्रह्मणोवेद्यत्वमपिनिषेधयतीत्यर्थः विदितात्ज्ञातादित्यर्थः विदिताविदिताभ्यामन्यद्ब्रह्मेतिश्रुतिः
प्रतिपादयतीतिचेन्नर्हितथैवतज्ज्ञानीयादित्याशंक्योपासनेप्येतत्समानमित्याह यथेति ६० ननुवेद्यत्वंब्रह्मणोवास्तवंनभ
वतीत्याशंक्योपास्यत्वमपितथेत्याह अवास्तवीति ननुवेदनपदेहत्तेर्ब्रह्माकारत्वमस्तिनोपासनइत्याशंक्य शाब्दबलात्तदाका
रत्वमुभयत्रसमानमित्याह वृत्तिव्याप्तिरिति ६१ युक्तिशून्यउपालंभस्त्वत्पक्षेपिसमानइत्याह केति ननुनिर्गुणोपासनेप्रमाणं
नास्तीत्याशंक्यानेकासुश्रुतिषुउपलभ्यमानत्वान्मैवमित्याह मानाभावइति ६२ ॥

बहुश्रुतिषु दर्शनादित्युक्तमर्थं विवृणोति उत्तरस्मिन्निति तापनीयोपनिषदि तावद्देवा ह वै प्रजापतिमब्रुवन् अणोरणीयांसमिममात्मानमोंकारं नो
व्याचक्ष्वेत्यादिना बहुधा निर्गुणोपासनमभिधीयते शैब्यप्रश्ने प्रश्नोपनिषदि पंचमे प्रश्ने यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभि
ध्यायीतेति काठके कठवल्ल्यां सर्वे वेदा यत्पदमामनंतीत्युपक्रम्य एतद्ध्येवाक्षरं ब्रह्म एतदालंबनं श्रेष्ठमित्यादिना प्रणवोपासनमुच्यते मां
डूक्योपनिषदि ओमित्येतदक्षरमिदं सर्वमित्यादिनाऽवस्थात्रयातीतं तुर्योपासनमेवाभिधीयत इत्यर्थः आदिशब्देन तैत्तिरीयमेडुकादयो
गृह्यंते ८३ ननु निर्गुणोपासनं कथमनुष्ठेयमित्यत आह अनुष्ठानेति तत्त्वेतदुपासनं ज्ञानसाधनमेव न मुक्तिसाधनमित्याशंक्य व
लतत्त्वोपास्त्यापि मुच्यत इति वदतामस्माकमनुकूलमित्याह ज्ञानसाधनेति ८४ ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न निर्गुणोपास

उत्तरस्मिंस्तापनीये शैब्यप्रश्नेऽथ काठके मांडूक्यादौ च सर्वत्र निर्गुणोपास्तिरीरिता ८३ अनुष्ठानप्रकारोऽस्याः
पंचीकरण ईरितः ज्ञानसाधनमेतच्चेदस्तु केनात्र वारितम् ८४ नानुतिष्ठति कोऽप्येतदिति चेन्मानुतिष्ठतु पु
रुषस्यापराधेन किमुपास्तिः प्रदुष्यति ८५ इतोऽप्यतिशयं मत्वा मंत्रान्वश्याऽऽदिकारिणः मूढा जपंतु तेभ्योऽ
तिमूढाः कृषिमुपासताम् ८६ तिष्ठंतु मूढाः प्रकृता निर्गुणोपास्तिरीर्यते विद्यैक्यात्सर्वशाखास्थान्गुणान
त्रोपसंहरेत् ८७ ॥

नमित्याशंक्य तस्य प्रमाणसिद्धस्यापलापो न युक्त इत्याह नानुतिष्ठतीति ८५ प्रमाणसिद्धस्यानुष्ठानाभावेनापरित्याज्यत्वे दृष्टांतमाह
इतोऽपीति अयमभिप्रायः यथा सगुणोपासनेभ्यः कालांतरभाविफलेभ्यः वश्याऽऽदिकारिमंत्रेष्वैहिकफलप्रदत्वमतिशयं बुद्ध्वा मू
ढानां तन्मंत्रजपादौ प्रवृत्तावपि विवेकिभिः सगुणोपासनं न परित्यज्यते यथा वा नियमानुष्ठानापेक्षेभ्यस्तेभ्योऽपि मंत्रेभ्यः कृष्या
दावतिशयं नियमनिरपेक्षं मत्वा मूढतराणां तत्र प्रवृत्तावपि न तन्मंत्रानुष्ठानं त्यज्यत इति तथा सांसारिकफलेप्सूनां निर्गुणोपास
नानुष्ठानाभावेऽपि न मुमुक्षुभिर्निर्गुणोपासनं त्यज्यत इति ८६ एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति तिष्ठंत्विति सर्ववेदांतप्रत्ययं चो
दनाद्यविशेषादित्युक्तन्यायेन निर्गुणोपासनस्यैकत्वाज्ज्ञात्वा शाखास्वुक्तानुपास्यगुणानेकत्रोपसंहृत्योपासनं कर्तव्यमित्याह विद्यैक्यादि

नेच गुणा हि प्रकाराः विधेया निषेध्याश्चेति तत्रानंदो ब्रह्म विज्ञानमानंदं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरद्वय आनंदः परः प्रत्य
गेकरस इत्यादयो विधेयगुणास्तेषामुपसंहार आनंदादयः प्रधानस्येत्यस्मिन्नधिकरणेऽभिहित इत्याह आनंदादेरिति ८५ येचास्थूलमन
ण्वह्रस्वमदीर्घयत्तदद्रेश्यमग्राह्यमशब्दमस्पर्शमरूपमव्ययमित्यादयो निषेध्यगुणास्तत्र तत्रोक्तास्तेषामुपसंहारोऽक्षरधियांत्व
वरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तमित्यस्मिन्नधिकरणेऽभिहित इत्याह अस्थूलादेरिति ८९ ननु निर्गुणब्रह्मविद्यायां तद्गु
णोपसंहार एव युज्यते निर्गुणविद्यात्वविरोधादित्याशंक्य सूत्रकारेणैवमभिहितस्योपसंहारस्यास्माभिरभिधीयमानत्वात्तास्मान्न

आनंदादेर्विधेयस्य गुणसंचयस्य संहृतिः आनंदादय इत्यस्मिन्सूत्रे व्यासेन वर्णिताः ८५ अस्थूलादेर्नि
षेध्यस्य गुणसंचयस्य संहृतिः तथा व्यासेन सूत्रेऽस्मिन्नुक्ताक्षरधियांत्विति ८९ निर्गुणब्रह्मतत्त्वस्य
विद्यायां गुणसंहृतिः न युज्येतेत्युपालंभो व्यासं प्रत्येवमानत ९० हिरण्यश्मश्रुसूर्यादिमूर्तीनाम
नुदाहृतेः अविरुद्धं निर्गुणत्वमिति चेन्नुध्यातांतया ९१ गुणानां लक्षकत्वेन न तत्त्वेंतः प्रवेशनम्
इति चेदस्त्वेवमेव ब्रह्मतत्त्वमुपास्यतां ९२ ॥

तीदं चोद्यमुचितमित्याह निर्गुणेति ९० हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्तीनामनभिधानादिदं निर्गुणोपासनमेवेति चेन्नहि तद्विरो
ध इत्याह हिरण्यश्मश्रुसूर्यादीति हिरण्यश्मश्रुसूर्यादिमूर्तीनां हिरण्मयानि श्मश्रूणि यस्याः सौ हिरण्यश्मश्रुः तथाविधः सूर्य आदि
र्येषां ते हिरण्यश्मश्रुसूर्यादयः तेषां मूर्तयो हिरण्यश्मश्रुसूर्यादिमूर्तय स्तासामिति विग्रहः ९१ नन्वानंदादीनामस्थूलादीनांच गुणा
नामुपास्यतत्त्वेंतःप्रवेशाभावात्तद्गुणविशिष्टत्वेन कथमुपास्यत्वमित्याशंक्य तेषां तत्त्वांतः प्रवेशाभावेपि तेषां लक्षकत्वसंभवात्तैः
र्लक्षितं ब्रह्मोपास्यमित्याह गुणानामिति ९१ ॥ ९२ ॥

तयोपासनाप्रकारं दर्शयति आनंदादिभिरिति अत्रात्मा श्रुतिषु योऽखंडैकरस आत्मानंदादिभिरस्थूलादिभिश्च गुणैर्लक्षितः सोहमस्मीत्येवमुपा
सते मुमुक्षव इति शेषः ७३ नन्वेवं सति विद्योपासनयोः कुतो भेद इत्याशंक्य वस्तुतंत्रत्वकर्तृतंत्रत्वाभ्यां भेद इत्याह बोध इति ७४ वैलक्ष
ण्यांतरसिद्धये बोधस्य हेत्वादिकं दर्शयति विचाराज्जायत इत्यादिश्लोकद्वयेन विचाराद्वस्तुतत्वविचाराद्बोधो जायते किंच विचारबलाज्जायमा
नं बोधमनिच्छा बोधो माभूदित्येवं न निवर्तयन्न निवारयेदुत्पद्यमानश्च बोधः स्वजन्ममात्रात्संसारेऽखिलस्य प्रपंचस्य सत्यतां दहति नाशयति
७५ तावता तत्वज्ञानोत्पत्तिमात्रेणानिरतिशयसुखं प्राप्नोतीत्यर्थः ७६ उपासनायाश्च बोधाद्वैलक्षण्यांतरसिद्धयेन दर्शयति आप्तोपदेशमि

आनंदादिभिरस्थूलादिभिश्चात्मात्र लक्षितः अखंडैकरसः सोहमस्मीत्येवमुपासते ७३ बोधोपास्त्योर्विशे
षः क इति चेदुच्यते शृणु वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनं ७४ विचाराज्जायते बोधोऽनिच्छयं न
निवर्तयेत् स्वोत्पत्तिमात्रात्संसारे दहत्यखिलसत्यतां ७५ तावता कृतकृत्यः सन्नित्यतृप्तिमुपागतः
जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते ७६ आप्तोपदेशं विश्वस्य श्रद्धालुरविचारयन् चिंतयेत्प्रत्य
यैरन्यैरनंतरितवृत्तिभिः ७७ यावच्चिन्त्यस्वरूपत्वाभिमानः स्वस्य जायते तावद्विचिंत्य पश्चाच्चैतथैवा
मृति धारयेत् ७८ ब्रह्मचारी भिक्षमाणो युतः संवर्गविद्यया संवर्गरूपतां चित्ते धारयित्वा ह्यभिक्षत ७९

ति आप्तस्य गुरोरुपदेशं तदुपास्यस्वरूपप्रतिपादकवाक्यजातं विश्वस्य विश्वासं कृत्वाऽविचारयन्नुपास्यतत्त्वप्रत्ययैरन्यैर्देहादिविषयैरनंतरित
वृत्तिभिरव्यवहितवृत्तिभिश्चिंतयेदिति ७७ कियंतं कालं चिंतयेदित्याशंक्याह यावदिति ७८ उपासकस्य तद्रूपत्वाभिमानमुदाहरण
प्रदर्शनेन स्पष्टीकरोति ब्रह्मचारीति कश्चित्संवर्गत्वगुणविशिष्टप्राणोपासको ब्रह्मचारी भिक्षाहरणार्थमागत्याभिप्रतारिनाम्नो
राज्ञः पुरतो महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपा तं केनोपायेनाभिपश्यंति मर्त्या अभिप्रतारिन्बहुधा वसंतमि
ति मंत्रेण स्वात्मनः संवर्गरूपत्वं चित्तेऽनुसंधत्तवानिति छांदोग्ये श्रूयत इत्यर्थः ७९ ॥

अस्तित्यागेनिमित्तं दर्शयन् अतिच्छायां तन्निवर्तयेदित्युक्ताद्दोषधर्मादेलक्षणमाह पुरुषस्येति उपास्तिः पुरुषस्योपासकस्येच्छया कर्तुमक
र्तुमन्यथा कर्तुं प्रकारान्तरेण वा कर्तुं शक्या अतः पुरुषस्येच्छाधीनत्वादुपासनं सदा कुर्यादित्यर्थः ८० एवं सदा चिंतने किं भवतीत्यत आह वेदाध्या
यीहीति अप्रमत्तो वेदाध्यायी सदाध्ययनशीलो जपिता सदा जपशीलो वा वासितो दृढवासनया स्वप्नादिष्वप्यध्ययनं जपं वा करोति एवमुपास
कोपि वासनादार्ढ्यात्स्वप्नादावपि ध्यायेदित्यर्थः ८१ स्वप्नादावपि ध्यानानुवर्तने कारणमाह विरोधीति वासनावेशात्संस्कारपाटवात् भावनां ध्या

पुरुषस्येछ्याकर्तुमकर्तुंकर्तुमन्यथा शक्योपास्तिरतोनित्यंकुर्यात्प्रत्ययसंततिम् ८० वेदाध्याय्यप्रमत्तो
ऽधीतेस्वप्नेपिवासितः जपितावाजपत्येवतथाध्यातापिवासयेत् ८१ विरोधिप्रत्ययंत्यक्त्वानैरंतर्येणभावय
न् लभतेवासनावेशात्स्वप्नादावपिभावनाम् ८२ भुंजानोपिनिजारब्धमास्थातिशयतोनिशम् ध्यातुंश
क्तोनसंदेहोविषयव्यसनीयथा ८३ परव्यसनिनीनारीव्यग्रापिगृहकर्मणि तदेवास्वादयत्यन्तःपरसंग
रसायनम् ८४ परसंगंस्वादयन्त्याअपिनोगृहकर्मतत् कुंठीभवेदपित्वेतदापातेनैववर्तते ८५ गृहकृ
त्यव्यसनिनीयथासम्यक्करोतितत् परव्यसनिनीतद्वन्नकरोत्येवसर्वथा ८६ एवंध्यानैकनिष्ठोपिले
शाल्लौकिकमाचरेत् तत्त्वविक्त्वविरोधित्वाल्लौकिकंसम्यगाचरेत् ८७ मायामयःप्रपंचोयमात्माचैत
न्यरूपधृक् इतिबोधेविरोधःकोलौकिकव्यवहारिणः ८८ ॥

ने ८२ ननु प्रारब्धकर्मवशाद्विषयाननुभवतः कथं नैरन्तर्येण भावनासिद्धिरित्याशंक्यास्थातिशये सति विषयव्यसनिवद्भावनासिद्धिः स्या
दित्याह भुंजानोपीति ८३ दृष्टान्तं विवृणोति परव्यसनिनीति ८४ परसंगास्वादने गृहकृत्यविच्छेदः स्यादित्याशंक्याह परसंगमिति ८५ आ
पातेनैव वर्तत इत्युक्तमर्थं विवृणोति गृहेति ८६ दार्ष्टान्तिके योजयति एवमिति ननु तत्त्वविदपि लौकिकव्यवहारं किं लेशेनाचरति किं वा सम्यगि
ति विषयव्यवहारस्य तत्त्वज्ञानाविरोधित्वात्सम्यगेवाचरतीत्याह तत्त्वविदिति ८७ अविरुद्धत्वमेव दर्शयति मायामय इति ८८ ॥

पं·टी·
९३

विरोधाभावमेव प्रपंचयति अपेक्षत इति ८९ कानि व्यवहारसाधनानीत्यत आह मनोवागिति तद्बाह्याः पदार्था गेहक्षेत्रादयस्तान्मन आदीन्स
त्त्वज्ञानी न निवारयति अतोऽस्य ज्ञानिनो व्यवहारः कुतो न भवेद्भवत्येवेत्यर्थः ९० ननु विषयाननुपमर्दयन्नपि तत्त्वविदा चित्तोपमर्दनं कार्यमित्याशं
क्य तथाकरणे तत्त्वविदेव न स्यादित्याह उपमृद्नातीति ननु तत्त्वविदा चित्तं नोपमृद्यत इत्येतत्क्व दृष्टमित्याशंक्याह न बुद्धिमिति घटतत्त्वस्य
वेदिता ज्ञाता बुद्धिं मर्दयन्पीडयन्नैकाग्र्यं कुर्वन्पुरुषो नो दृष्टः नोपलब्ध इत्यर्थः ९१ ननु घटस्य स्थूलत्वेन स्पष्टत्वात्तद्दर्शने चित्तपीडनेनापे

अपेक्षते व्यवहृतिर्न प्रपंचस्य वस्तुताम् नाप्यात्मजाड्यं किंत्वेषा साधनान्येव कांक्षति ८९ मनोवाक्कायतद्बा
ह्यपदार्थाः साधनानि तान् तत्त्वविन्नोपमृद्नाति व्यवहारोऽस्य नो कुतः ९० उपमृद्नाति चित्तं चेद्ध्यातासौ न
तु तत्त्ववित् न बुद्धिं मर्दयन्दृष्टो घटतत्त्वस्य वेदिता ९१ सकृत्प्रत्ययमात्रेण घटश्चेद्भासते तदा स्वप्र
काशोऽयमात्मा किं घटवच्च न भासते ९२ स्वप्रकाशतया किं ते तद्बुद्धिस्तत्त्ववेदनम् बुद्धिश्च क्षणना
शीति चोद्यं तुल्यं घटादिषु ९३ घटादौ निश्चिते बुद्धिर्नश्यत्येव यदा घटः इष्टो नेतुं तदा शक्य इति चेत्स
ममात्मनि ९४ निश्चित्य सकृदात्मानं यदापेक्षा तदैव तम् वक्तुं मन्तुं तथा ध्यातुं शक्नोत्येव हि तत्त्ववि
त् ९५ ॥

तर्हि ब्रह्मणस्तथात्वात्तज्ज्ञाने तदपेक्षत इत्याशंक्य तस्य स्वप्रकाशत्वेन घटादेरपि स्पष्टतरत्वात्तन्निरोधनं नैवापेक्षत इत्याह सकृदिति ९२
ननु ब्रह्मणः स्वप्रकाशत्वेऽपि तद्गोचराया बुद्धिवृत्तेरेव तत्त्वज्ञानत्वात्तस्याश्च क्षणिकत्वेन ब्रह्मणि पुनः पुनरवस्थानमपेक्षत इत्याशंक्येदं चो
द्यं घटादिष्वपि समानमित्याह स्वप्रकाशतयेति ९३ घटादिज्ञानस्य क्षणिकत्वेऽपि सकृन्निश्चितस्य घटस्य सर्वदा व्यवहर्तुं शक्यत्वात्तत्त्ववित्त
स्थैर्यसंपादनमप्रयोजकमित्याशंक्येदमात्मन्यपि समानमित्याह घटादाविति ९४ सममात्मनीत्युक्तमर्थं विवृणोति निश्चित्येति ९५ ॥

नन्वतत्त्वविदुपासकवदात्मानुसंधानवशात्तद्गतदनुसंधानरहितो ह्युपेत इत्याशंक्य सोऽनुसंधानाभावो ध्यानप्रयुक्तो न वेदनाप्रयुक्त इत्या
ह उपासक इव ध्यायन्निति ९६ ननु तत्त्वविदामपि मुक्तिसिद्धये ब्रह्मध्यानं कर्तव्यमित्याशंक्य ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते तमे
वविदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादिशास्त्रसद्भावान्मोक्षाय ध्यानं कर्तव्यमित्याह
ध्यानमिति ९७ तत्त्वविदो ध्यानानभ्युपगमे तस्य सदा बहिःप्रवृत्तिः स्यादित्याशंक्य बाधकत्वात्प्रवृत्तेः साऽभ्युपेयत इत्याह तत्त्वविद्यदी
ति ९८ ननु बहिःप्रवृत्त्यभ्युपगमेऽतिप्रसंगः स्यादित्याशंक्य प्रसंगस्य दुर्निरूपत्वान्मैवमिति परिहरति अतिप्रसंग इति नप्रसंगो दु

उपासक इव ध्यायँल्लौकिकं विस्मरेद्यदि विस्मरत्येव सा ध्यानाद्विस्मृतिर्न तु वेदनात् ९६ ध्यानं त्वैच्छिकमेत
स्य वेदनान्मुक्तिसिद्धितः ज्ञानादेव तु कैवल्यमिति शास्त्रेषु डिंडिमः ९७ तत्त्वविद्यदि न ध्यायेत्प्रवर्तेत तदा ब
हिः प्रवर्ततां सुखेनायं को बाधोऽस्य प्रवर्तने ९८ अतिप्रसंग इति चेत्प्रसंगं तावदीरय प्रसंगो विधिशा
स्त्रं चेन्न तत्तत्त्वविदं प्रति ९९ वर्णाश्रमवयोवस्थाभिमानो यस्य विद्यते तस्यैव च निषेधाश्च विधयः सक
ला अपि १०० वर्णाश्रमादयो देहे मायया परिकल्पिताः नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चयः १ समा
धिमथ कर्माणि मा करोतु करोतु वा हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशयः २ ॥

निरूप्यः विधिशास्त्रस्य प्रसंगशब्देन विवक्षितत्वादिति चेन्न तस्याज्ञानिविषयत्वेन तत्त्वविद्विषयत्वाभावादित्याह प्रसंग इति विधि
शास्त्रमित्युपलक्षणं निषेधशास्त्रस्यापि ९९ विधिशास्त्रस्याविद्वद्विषयत्वमेव दर्शयति वर्णाश्रमेति १०० ननु तत्त्वविदोऽपि देहधा
रित्वेन वर्णाश्रमाद्यभिमानित्वमस्तीत्याशंक्याह वर्णाश्रमादय इति १ ननु तत्त्वविन्निश्चयस्तावत्तिष्ठतु शास्त्रं तु तस्य कर्तव्यं प्रतिपा
दयतीत्याशंक्य तदपि तस्य कर्तव्याभावमेव बोधयतीत्याह समाधिमिति यो हृदयेन बुद्ध्या अस्तसर्वास्थोऽस्ताः परित्यक्ताः सर्वा अपे
क्षा आस्था आसक्तिविशेषा यस्य स तथाविधः अत एवोत्तमाशय उत्तम आशय अभिप्रायो निर्मलं ज्ञानं यस्य स तथोक्तः स मुक्त एव अ

पं॰ टी॰ १५

विदुषः कर्तव्यं नास्तीत्यत्र वचनांतरमुदाहरति नैष्कर्म्येणेति नैष्कर्म्यं कर्मराहित्यं तेन कर्मत्यागेनेत्यर्थः समाधानं समाधिः जप्यं जपः ३ ननु विदुषामपि वासनानिवृत्तये ध्यानं कर्तव्यमित्याशंक्य सम्यग्ज्ञानिनो वासनैव नास्तीत्याह आत्मेति ४ भवत्वेवं प्रकृते किमायातमित्यत आह एवमिति कस्य तर्ह्यतिप्रसंग इत्यत आह प्रसंग इति ५ एवं क्व दृष्टमित्यत आह विध्यभावादिति दार्ष्टान्तिके योजयति स्यात्कुत इति ६ बालस्य विध्यभावे प्रयोजकमज्ञत्वमस्ति न विदुष इत्याशंक्य तस्याज्ञत्वाभावेऽपि विध्यभावप्रयोजकं सर्वज्ञत्वमस्तीत्याह न किंचिदिति तर्हि विध्यधिकारः कस्येत्याशंक्याह अल्पज्ञस्येति ७ ननु व्यासादिवच्छापानुग्रहसामर्थ्यं यस्य स एव तत्त्ववित्नान्य इति शंकते शापानुग्रहे

104

नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः न समाधानजप्याभ्यां यस्य निर्वासनं मनः ३ आत्मासंगास्ततोऽन्यत्स्यादिंद्रजालं हि मायिकम् इत्यचंचलनिर्णीते कुतो मनसि वासना ४ एवं नास्ति प्रसंगोऽपि कुतोऽस्यातिप्रसंजनम् प्रसंगो यस्य तस्यैव शंक्येतातिप्रसंजनं ५ विध्यभावान्न बालस्य दृश्यतेऽतिप्रसंजनम् स्यात्कुतोऽतिप्रसंगोऽस्य विध्यभावे समे सति ६ न किंचिद्वेत्ति बालश्चेत्सर्वं वेत्त्येव तत्त्ववित् अल्पज्ञस्यैव विधयः सर्वे स्युर्नान्ययोर्द्वयोः ७ शापानुग्रहसामर्थ्यं यस्यासौ न तत्त्वविद्यदि न तच्छापादिसामर्थ्यफलं स्यात्तपसो यतः ८ व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलात् शापादिकारणादन्यत्तपो ज्ञानस्य कारणम् ९ द्वयं यस्यास्ति तस्यैव सामर्थ्यं ज्ञानशापयोः एकैकं तु तपः कुर्वन्नेकैकं लभते फलम् १० ॥

ति परिहरति न तदिति तत्र हेतुमाह स्यादिति ननु व्यासादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यते इत्याशंक्य तेषां न तत्त्वज्ञानफलमपि तु तपःफलमित्याह व्यासादेरिति ननु तर्हि तपसा ब्रह्म विजिज्ञासस्वेति श्रुतेस्तपोरहितस्य तत्त्वज्ञानमपि न घटेतेत्याशंक्य शापादिकारणादन्यस्य तस्य तपसः सत्त्वान्नैवमित्याह शापादीति ९ तर्हि तेषां व्यासादीनां तत्त्वज्ञानित्वं शापादिकारणं च कथं दृश्यत इत्याशंक्योभयविधतपसः

ननु यः शापादिसामर्थ्यरहितस्तस्य विप्रभावेऽपि विहितानुष्ठातृभिर्निन्द्यत्वं स्यादित्याशंक्य तेषामपि विश्वयलंपटैर्निंद्यत्वं स्यादित्याह सामर्थ्यही
न इति ११ एतेऽपि भोगितृष्णार्थं विषयान्संपादयेयुरित्याशंक्य तदा ते शोचयन्ति त्वमेव हीयेते त्वभिप्रायेणोपसंहरति भिक्षावस्त्रादीति १२ विश्व
यलंपटैः पामरैश्च क्रियमाणया निंदया क्रियापराणां विशिष्टानां हानिर्नास्तीत्युच्यते चेत्तर्हि देहाभिमानिभिः क्रियमाणया निन्दया तत्त्ववि
दोऽपि न हानिरित्याह वर्णाश्रमपरानिति १३ प्रासंगिकं परिसमाप्य प्रकृतमनुसरति तदित्थमिति तत्तस्मात्कारणादित्थमुक्तेन प्रका
रेण तत्त्वविज्ञानेन सति साधनानपमर्दनाल्लौकिकव्यवहारसाधनानां मन्त्रादीनामविलापनाल्लौकिकं राज्यादिराज्यपरिपालनादिक

सामर्थ्यहीनो निंद्यश्चेद्यतिभिर्विधिवर्जितः निंद्यन्ते यतयोऽप्यन्यैरनिशं भोगलंपटैः ११ भिक्षावस्त्रादि रक्षेयु
र्यद्येते भोगितुष्टये अहो यतित्वमेतेषां वैराग्यभरमन्थरम् १२ वर्णाश्रमपरान्मूढा निंदन्तीत्युच्यते यदि
देहात्ममतयो बुद्धं निंदन्त्वाश्रममानिनः १३ तदित्थं तत्त्वविज्ञाने साधनानुपमर्दनात् ज्ञानिनाचरितुं
शक्यं सम्यग्राज्यादि लौकिकम् १४ मिथ्यात्वबुद्ध्या तत्रेच्छा नास्ति चेत्तर्हि मास्तु तत् ध्यायन्वाथ व्यवहर
न्यथारब्धं वसत्वयम् १५ उपासकस्तु सततं ध्यायन्नेव वसेद्यतः ध्यानेनैव कृतं तस्य ब्रह्मत्वं विष्णुता
दिवत् १६ ध्यानोपादानकं यत्तद्ध्यानाभावे विलीयते वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयते १७ ॥

ऽपि वा ज्ञानिना सम्यगाचरितुं शक्यमित्यर्थः १४ ननु तत्त्वविदः प्रपंचमिथ्यात्वज्ञानेन तत्रेच्छैव नोदियादिति चेत्तर्हि स्वकर्मानुसारेण वर्त
तामित्याह मिथ्यात्वेति १५ इदानीमुपासकस्यातो वैषम्यं दर्शयति उपासक इति तत्रोपपत्तिमाह यत इति यतः कारणात्तस्य ब्रह्मत्वं ध्या
नेनैव कृतं न तु प्रमाणेन प्रमितमतो ध्यायिना सदा ध्यानं कर्तव्यमित्यर्थः तत्र दृष्टान्तमाह विष्णुतादिवदिति यथा स्वस्मिन्ध्यानेन सं
पादितस्य विष्णुत्वादेः पारमार्थिकत्वं नास्ति तद्वदित्यर्थः १६ ध्यानसंपादितस्याप्युक्तस्य पारमार्थिकत्वं किं न स्यादित्याशंक्य ध्यानसंपा
दितस्य वाग्धेन्वादेर्ध्यानापायेऽपगमदर्शनात्सैवमित्याह ध्यानेति ज्ञानेन प्रकाशितस्य ब्रह्मत्वस्य ततो वैलक्षण्यमाह वास्तवीति

हेतुगर्भितं विशेषणं यतो ब्रह्मत्वं वास्तवमतो ज्ञापकज्ञानाभावे सत्यपि नैव विली
यते १७ ॥

पं॰टी॰
९५

वास्तवत्वादेवज्ञानेनैवजन्यतेइत्याह ततइति यतोऽद्वैतब्रह्मतत्त्वंनित्यंततोज्ञानंतस्याभिज्ञापकंअवबोधकमेवनजनकमित्यर्थः तत्रोपपत्तिंव्यतिरेकमुखेनाह
ज्ञापकेति अयमभिप्रायः ब्रह्मतत्त्वंयदिज्ञानजन्यंस्यात्तर्हिज्ञाननाशेस्वयंविलीयेत नचविलीयतेऽतोनजन्यतइत्यर्थः १८ ननुज्ञानिवदुपासकस्यापिब्र
ह्मत्वंवास्तवमस्त्येवेतिशंकते अस्तीति अत्यल्पमिदमुच्यतइत्यभिप्रायेणाह पामराणामिति १९ पामरादीनांविद्यमानमपिब्रह्मत्वमज्ञातत्वान्न
पुरुषार्थोपयोगीत्याशंक्याज्ञातत्वेनापुरुषार्थोपयोगित्वमुपासकस्यापिसमानमित्याह अज्ञानादिति ननुतर्ह्युपासनंकिमर्थमभिधीयत
इत्याशंक्येतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमितिदृष्टांतपूर्वकमाह उपवासादिति २० इतरानुष्ठानाच्छ्रैष्ठ्यमेवदर्शयति पामराणामिति

105

ततोभिज्ञापकंज्ञानंननित्यंजनयत्यदः ज्ञापकाभावमात्रेणनहिसत्यंविलीयते १८ अस्त्येवोपासकस्यापि
वास्तवीब्रह्मतेतिचेत् पामराणांतिरश्चांचवास्तवीब्रह्मतानकिम् १९ अज्ञानादपुमर्थत्वमुभयत्रापितत्स
मम् उपवासाद्यथाभिक्षावरंध्यानंतथान्यतः २० पामराणांव्यवहृतेर्वरंकर्माद्यनुष्ठितिः ततोपिसगुणो
पास्तिर्निर्गुणोपासनंततः २१ यावद्विज्ञानसामीप्यंतावच्छ्रैष्ठ्यंविवर्द्धते ब्रह्मज्ञानायतेसाक्षान्निर्गुणोपा
सनंशनैः २२ यथासंवादिविभ्रांतिःफलकालेप्रमायते विद्यायतेतथोपास्तिर्मुक्तिकालेतिपाकतः २३
संवादिभ्रमतःपुंसःप्रवृत्तस्यान्यमानतः प्रमेतिचेत्तथोपास्तिर्मांतरेकारणायताम् २४ मूर्तिध्यानस्यमं
त्रादेरपिकारणतायदि अस्तुनामतथाप्यत्रप्रत्यासत्तिर्विवक्ष्यते २५ ॥

उत्तरोत्तरश्रैष्ठ्येकारणमाह यावदिति निर्गुणोपासनस्यसर्वश्रैष्ठ्येकारणमाह ब्रह्मज्ञानायतेइति २२ उक्तमर्थंदृष्टांतप्रदर्शनपूर्वकंदृढयति
यथेति २३ ननुसंवादिविभ्रांतिःस्वयमेवनप्रमाभवति किंतुतयाप्रवृत्तस्येंद्रियार्थसन्निकर्षात्प्रमाजायतइतिशंकते संवादीति अस्तुतर्हिनि
र्गुणोपासनमपिनिदिध्यासनरूपसहकारिजन्यापरोक्षज्ञानेकारणंभविष्यतीत्याह तथेति २४ नन्वेवंसतिमूर्तिध्यानादेरपिचित्तैकाग्र्यतासंपा
दनद्वाराऽपरोक्षज्ञानसाधनत्वंस्यादितिचेत्तदंगीक्रियतइत्याह मूर्तीति तर्हिनिर्गुणोपासनेकोतिशयस्तत्राह तथापीति प्रत्यासत्तिःसामी

ध्यानदीपप्रकरणं ९ ॥

प्रत्यासत्तिप्रकारमेव दर्शयति निर्गुणोपासनमिति निर्गुणोपासनं यदा पक्वं भवति तदा सविकल्पकसमाधिः स्यात्ततः सविकल्पकसमाधे
र्निरोधाख्यो यस्तस्यापि निरोधे सर्वनिरोधान्निर्वीजसमाधिरिति सूत्रोक्तलक्षणो निर्विकल्पकः समाधिः सोऽनायासेन लभ्यते २६ भवतै
वे निर्विकल्पलाभस्ततः किमित्यत आह निरोधइति ततोपि किमित्यत आह पुनः पुनरिति अस्मिन्नसंगे वस्तुनि पुनः पुनर्वासिते भा
विते सति वाक्यात्तत्त्वमस्यादिलक्षणात्तत्त्वधीस्तत्त्वज्ञानमहं ब्रह्मास्मीत्येवमाकारं जायेतोत्पद्येत २७ तत्त्वज्ञानस्वरूपमेव विशदयति
निर्विकारेति २८ ननु निर्विकल्पकसमाधिवशादपरोक्षज्ञानमुदेतीत्यत्र किं प्रमाणमित्याशंक्यामृतविंद्वादिश्रुतयः प्रमाणमित्याह

निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः यः समाधिर्निरोधाख्यः सोऽनायासेन लभ्यते २६ निरोधला
भे पुंसोऽन्तरसंगं वस्तु शिष्यते पुनः पुनर्वासितेऽस्मिन्वाक्याज्जायेत तत्त्वधीः २७ निर्विकारासंगनित्यस्व
प्रकाशैकपूर्णताः बुद्धौ झटिति शास्त्रोक्ता आरोहन्त्यविवादतः २८ योगाभ्यासस्त्वेतदर्थोऽमृतविंद्वादि
षु श्रुतः एवं च दृष्टद्वारापि हेतुत्वादन्यतो वरम् २९ उपेक्ष्य तत्तीर्थयात्रां जपादीनेव कुर्वताम् पिंडं स
मुत्सृज्य करं लेढीति न्यायआपतेत् ३० उपासकानामप्येवं विचारत्यागतो यदि बाढं तस्माद्विचारस्याऽ
संभवे योग ईरितः ३१ ॥

योगाभ्यास इति फलितमाह एवमिति एवं च सति निर्गुणोपासनस्यापरोक्षज्ञानप्रत्यासत्तिसंभवे सति दृष्टद्वारापि निर्विकल्पकसमा
धिलाभद्वारेणापि प्रागुक्तादृष्टद्वारापि हेतुत्वाज्ज्ञानसाधनत्वादन्यतः सगुणोपासनादिभ्यो वरं श्रेष्ठमित्यर्थः २९ एवं निर्गुणोपासन
स्यापरोक्षज्ञानसाधनत्वे सिद्धे सति तत्परित्यज्यान्यत्र प्रवृत्तानां हयाभ्रमः स्यादिति लौकिकन्यायप्रदर्शनेनाह उपेक्ष्येति ३० नन्वात्म
तत्त्वविचारं परित्यज्य निर्गुणोपासनं कुर्वतामप्ययं न्यायः समान इत्यंगीकरोति उपासकानामिति तर्हि निर्गुणोपासनं कुतः प्रतिपा
द्यत इत्यत आह तस्मादिति यस्मादुक्तन्यायप्रसंगस्तस्माद्विचारासंभवे योग उपासनमुक्तमित्यर्थः ३१ ॥

विचारासंभवेकारणमाह बुद्ध्याकुलचित्तानामिति यतोविचारोनसंभवत्यतोयोगःकर्तव्यइत्याह योगइति मुख्यत्वेकारणमाह धीदर्प्यइति तेन
योगेनयतोधीदर्प्योनश्यत्यतोमुख्यइत्यर्थः ३२ एवंव्याकुलचित्तानांयोगस्यमुख्यत्वमभिधायतद्रहितानांविचारएवमुख्यइत्याह अव्याकुलधियामि
ति सांख्यनामाविचारःसांख्यशब्दवाच्यस्तत्रविचारोमुख्यःकुतइत्यतआह झटितीति ३३ योगसांख्ययोरुभयोरपितत्त्वज्ञानद्वारामुक्तिसाधनत्वे
गीतावाक्यंप्रमाणयति यदिति यःसांख्यंचयोगंचफलतएकंपश्यतिसएवशास्त्रार्थंसम्यक्पश्यतीत्यर्थः ३४ नकेवलंगीतावाक्यंकिंतुतन्मूल
भूताश्रुतिरप्यस्तीत्याह तत्कारणमिति ननुसांख्ययोगयोस्तत्त्वज्ञानसाधनत्वेनांगीकारेतच्छास्त्रप्रतिपादितानांतत्त्वानामपिस्वीकार्यत्वंस्या
दित्याशंक्याह यत्त्विति आभासोवाध्यतइत्यर्थः ३५ ननूपासनेकुर्वाणस्यतत्त्वज्ञानाप्राप्त्यामरणेसतिमोक्षोनसिद्ध्येदित्याशंक्याह उपासनमि

बुद्ध्याकुलचित्तानांविचारात्तत्त्वधीर्नहि योगोमुख्यस्ततस्तेषांधीदर्प्यस्तेननश्यति १३२ अव्याकुलधियां
मोहमात्रेणाच्छादितात्मनाम् सांख्यनामाविचारःस्यान्मुख्योझटितिसिद्धिदः ३३ यत्सांख्यैःप्राप्यतेस्थानं
तद्योगैरपिगम्यते एकंसांख्यंचयोगंचयःपश्यतिसपश्यति ३४ तत्कारणंसांख्ययोगाभिपन्नमिति
हिश्रुतिः यस्तुश्रुतेर्विरुद्धःसआभासःसांख्ययोगयोः ३५ उपासनंनातिपक्वमिहयस्यपरंतुसः म
रणेब्रह्मलोकेवातत्त्वंविज्ञायमुच्यते ३६ यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरम् तंतमेवैतियच्चि
त्तस्तेनयातीतिशास्त्रतः ३७ अंतप्रत्ययतोनूनंभाविजन्मतथासति निर्गुणप्रत्ययोपिस्यात्सगुणोपा
सनेयथा १३८ ॥

ति ३६ मरणावसरेज्ञानान्मुक्तिलाभेप्रमाणमाह यंयमिति यच्चित्तस्तेनैषप्राणमायातिप्राणस्तेजसायुक्तः सहात्मनायथासंकल्पितंलो
कंनयतीतिवाक्यादित्यर्थः ३७ ननूदाहृताभ्यांश्रुतिस्मृतिवाक्याभ्यामंतप्रत्ययतोभाविजन्माभिधीयते नतुज्ञानान्मुक्तिरित्याशंक्यमुख्यत
स्तथाभिधानमंगीकरोति अंतप्रत्ययतइति कथंतर्हिमरणकालेज्ञानान्मोक्षोभवतीत्यत्रेदंवाक्यद्वयंप्रमाणत्वेनोपन्यस्तमित्याशं
क्याह तथासतीति तथासति अंतप्रत्ययाद्भाविजन्मेतिनिश्चयेसतिसगुणोपासकस्ययथामरणावसरेपूर्वाभ्यासवशात्सगुणब्र
ह्माकारःप्रत्ययोजायते एवंनिर्गुणोपासकस्यापिनिर्गुणब्रह्मगोचरःप्रत्ययोजनिष्यतइत्यर्थः १३८ ॥

ननु निर्गुणप्रत्ययाभ्यासवशान्निर्गुणब्रह्मप्राप्तिरेव भवेन्न मुक्तिरित्याशंक्य ब्रह्मप्राप्तिमुक्त्योः शब्दमात्रेण भेदो नार्थत इत्याह नित्यमि
ति तद्ब्रह्म नित्यमिति निर्गुणमिति नाममात्रेण अन्यन्नाम अर्थतस्त्वेष मोक्ष एव स्वरूपावस्थितिर्मुक्तिरित्यभिधानादिति भावः तत्र दृष्टान्त
माह संवादीति यथा संवादिभ्रमो नाममात्रेण भ्रम इत्युच्यते वस्तुतस्तु ज्ञानमेव तद्वदित्यर्थः ३५ ननु निर्गुणोपासनस्य मा

नित्यं निर्गुणरूपं तन्नाममात्रेण जल्पताम् अर्थतो मोक्ष एवैष संवादिभ्रमवन्मतः ३५ तत्सा
मर्थ्याज्जायते धीर्ब्रह्मविद्यानिवर्तिका अविमुक्तोपासनेन तारकब्रह्मबुद्धिवत् ३६ ॥

न सत्क्रियारूपस्य मुक्तिसाधनत्वाभिधानं विरुद्धमित्याशंक्य तज्जन्यज्ञानस्य मोक्षसाधनत्वाभिधानान्न विरोध इत्याह तदि
ति तत्र दृष्टान्तमाह अविमुक्तेति यथा अविमुक्ते सगुणब्रह्मोपासनसामर्थ्यात्तारकब्रह्मविद्या जायते एवं निर्गुणोपासनान्नि
र्गुणब्रह्मज्ञानं जायते ३६ ॥

पं· टी·
१०७

नुनिर्गुणोपासनस्यमोक्षःफलमित्यत्रकिंप्रमाणमित्याह सोकामइति सोकामोनिष्कामआप्तकामआत्मकामोभवति नतस्यप्राणा
उत्क्रामंत्यत्रैवसमवलीयंते ब्रह्मैवसन्ब्रह्माप्येति अशरीरोनिरिंद्रियोऽप्राणोह्यमनाःसच्चिदानंदमात्रःस्वराड्भवति यएवंवेद चि
न्मयोह्ययमोंकारश्चिन्मयमिदंसर्वंतस्मात्परमेश्वरएवैकमेतद्भवत्येतदमृतमभयमेतद्ब्रह्माभयंहिवैब्रह्मभवति यएवंवेदे

107

सोकामोनिष्कामइत्यशरीरोनिरिंद्रियः अभयंहीतिसकृत्त्वंतापनीयेफलंश्रुतम् ४१ उ
पासनस्यसामर्थ्याद्धियोत्पत्तिर्भवेत्ततः नान्यःपंथाइतिह्येतच्छास्त्रंनैवविरुध्यते ४२ निष्का
मोपासनान्मुक्तिस्तापनीयेसमीरिता ब्रह्मलोकःसकामस्यशैव्यप्रश्नेसमीरितः १४३

ति रहस्यमित्यादिवाक्यैस्तापनीयोपनिषदिनिर्गुणोपासनेमोक्षफलत्वेनश्रुतइत्यर्थः ४१ ननूपासनयापिमुक्तिःस्या
च्चेत्तान्यःपंथाविद्यतेऽयनायेतिश्रुतिविरोधइत्याशंक्यविद्याद्वारतयानेनमोक्षप्रदत्वाभिधानान्नविरोधइत्याह उपास
नस्येति ४२ मरणेब्रह्मलोकेवातत्त्वंविज्ञायमुच्यतइत्युक्तार्थेश्रुतिद्वयंप्रमाणयति निष्कामेति १४३ ॥

तत्र सोऽकामो निष्काम इत्यादिनाम्नायनीयवाक्यं पूर्वमेवोदाहृतं इदानीं शैव्यप्रश्नोपनिषद्वाक्यमर्थतः पठति य उपास्त इति यः पुनरेतं त्रिमात्रे
णोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरु
न्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते इति सकामस्य ब्रह्मलोकप्राप्तिः श्रूयत इत्यर्थः ननु शैव्यप्रश्ने सकाम
स्य ब्रह्मलोकगतिरेव प्रतीयते न मुक्तिरित्याशंक्य तत्र तत्साक्षात्कारः श्रूयत इत्याह स इति ब्रह्मलोकं गतः स उपासक एतस्माज्जीवघनाज्जीव
समष्टिरूपाद्धिरण्यगर्भात्परमुत्कृष्टं पुरुषं तिह पापिकं चैतन्यं परमात्मानमीक्षते साक्षात्करोतीत्यर्थः ४४ किंच अप्रतीकालम्बनान्नयती

य उपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते स एतस्माज्जीवघनात्परं पुरुषमीक्षते ४४ अप्रतीकाधिकर
णे तत्क्रतुन्यायईरितः ब्रह्मलोकफलं तस्मात्सकामस्येति वर्णितम् ४५ निर्गुणोपास्तिसामर्थ्यात्त
त्रैव ब्रह्म वेक्षते पुनरावर्तते नायं कल्पान्ते तु विमुच्यते ४६ प्रणवोपास्तयः प्रायो निर्गुणा एव वेदगाः
क्वचित्सगुणता प्युक्ता प्रणवोपासनस्य हि परापरब्रह्मरूप ओंकार उपवर्णितः पिप्पलादेन मुनिना
सत्यकामाय पृच्छते ४७ एतदालम्बनं ज्ञात्वा यो यदिच्छति तस्य तत् इति प्रोक्तं यमेनापि पृच्छते नचि
केतसे ४८ ॥

ति बादरायण उभयथा उभयथाप्यदोषात्तत्क्रतुश्चेत्यत्र कामानुसारेण फलप्राप्तिर्भवतीति प्रतिपादितं तस्मादपि सकामस्य ब्रह्मलोकप्राप्तिरु
क्तेत्याह अप्रतीकेति ४५ तर्हि सकामस्य तत्त्वज्ञानं कुतो जायत इत्याशंक्याह निर्गुणोपास्तीति इमं मानवमावर्तं नावर्तन्ते न स पुनरावर्त
ते ब्रह्मणा सह ते सर्वे इत्यादिश्रुतिस्मृतिसद्भावान्न तस्य पुनः संसारप्राप्तिः किंतु मुक्तिरेवेत्याह पुनरिति ४६ इदानीं प्रणवोपासनप्रसंगा
त्तु द्विविधं तद्द्वैविध्यं दर्शयति प्रणवेति ४७ द्वैविध्ये प्रमाणमाह परापरेति एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायत
नेनैकतरमन्वेतीत्युभयरूपत्वं प्रतिपादितमित्यर्थः ४८ यमेनापि कठवल्ल्यामेतदालम्बनं ज्ञात्वेत्यादिना द्वैविध्यमुक्तमित्याह एतदि

पं·टी·
१८८

उक्तमर्थमुपसंहरति इहेति ५० विचारासक्तस्य ज्ञानसंपादनासमर्थस्य निर्गुणब्रह्मध्यानेऽधिकारः अयमर्थ आत्मगीतायामस्माभिरभिहित इत्याह अर्थ इति ५१ आत्मगीतावाक्यान्येवोदाहरति साक्षात्कर्तुमिति ५२ ध्यानस्य सम्यग्ज्ञानोपायत्वे दृष्टान्तमाह यथेति दार्ष्टान्तिके योजयति मल्लाभेऽपीति ५३ व्यतिरेकेणोक्तमर्थमन्वयमुखेनाह देहोपलमिति ५४ ज्ञानेऽसमर्थस्य ध्यानेऽधिकार इत्यत्र वाक्यान्तरं पठति अनुभूतेरिति ध्यानाद्ब्रह्मप्राप्तौ कैमुतिकन्यायमाह अप्यसदिति उपासकस्य पूर्वमविद्यमानमपि देवत्वादिकं ध्यानात्प्राप्यते किल स्वरूपेण

इह वा मरणे वास्य ब्रह्मलोकेऽथवा भवेत् ब्रह्मसाक्षात्कृतिः सम्यगुपासीनस्य निर्गुणम् ५० अर्थोऽयमात्मगीतायामपि स्पष्टमुदीरितः विचाराक्षम आत्मानमुपासीतेति संततम् ५१ साक्षात्कर्तुमशक्तोऽपि चिन्तयेन्मामशङ्कितः कालेनानुभवारूढो भवेयं फलितो ध्रुवम् ५२ यथागाधनिधेर्लब्धौ नोपायः खननं विना मल्लाभेऽपि तथा स्वात्मचिन्तां मुक्त्वा न चापरः ५३ देहोपलमपाकृत्य बुद्धिकुद्दालकात्पुनः खात्वा मनोभुवं भूयो गृह्णीयान्मां निधिं पुमान् ५४ अनुभूतेरभावेऽपि ब्रह्मास्मीत्येव चिन्त्यताम् अप्यसत्प्राप्यते ध्यानान्नित्याप्तं ब्रह्म किं पुनः ५५ अनात्मबुद्धिशैथिल्यं फलं ध्यानाद्दिने दिने पश्यन्नपि न चेद्ध्यायेत्कोऽपरोऽस्मात्पशुर्वद ५६ देहाभिमानं विध्वस्य ध्यानादात्मानमद्वयम् पश्यन्मर्त्योऽमृतो भूत्वा ह्यत्र ब्रह्म समश्नुते ५७ ध्यानदीपमिमं सम्यक्परामृशति यो नरः मुक्तसंशय एवायं ध्यायति ब्रह्म संततम् १५८

इति श्री· ध्यानदीपः ९ ॥

नित्यप्राप्तं सर्वात्मकं ब्रह्म ध्यानात्प्राप्यत इति किं वक्तव्यमित्यर्थः ५५ ब्रह्मध्यानफलस्य प्रत्यक्षसिद्धत्वादपि ध्यानं कर्तव्यमित्याह अनात्मेति ५६ इदानीमुपपादितमर्थं संक्षिप्य दर्शयति देहाभिमानमिति मरणशीलदेहे कृतमभिमानं परित्यागात्स्वयममृतो भूत्वात्रास्मिन्नेव शरीरे स्वस्य निजं रूपं सदानन्दचिद्रूपं ब्रह्म प्राप्नोतीत्यर्थः ५७ ध्यानदीपानुसन्धानफलमाह ध्यानदीपमिति ५८ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता ध्यानदीपव्याख्या समाप्ता ९ ॥

108

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ । अर्थो नाटकदीपस्य मया संक्षिप्य वक्ष्यते १ चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिसमाप्त्यायाभिमतदेवतात-
त्त्वानुस्मरणलक्षणं मंगलमाचरन्मंदाधिकारिणामनायासेन निष्प्रपंचब्रह्मात्मतत्त्वप्रतिपत्तिसिद्धये अध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यत
इति न्यायमनुसृत्यात्मन्यध्यारोपं तावदाह परमात्मेति पूर्वं सृष्टेः प्रागद्वयानंदपूर्णः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं विज्ञानमानं-
दं ब्रह्म ब्रह्मणो मदः पूर्णमिदमित्यादिश्रुतिप्रसिद्धः स्वगतादिभेदशून्यः परमानंदरूपः परिपूर्णः परमात्मा स्वमायया मायां तु प्रकृतिं विद्यान्मा-
यिनं तु महेश्वरमिति श्रुत्युक्तया स्वशक्त्या मायाशक्त्या स्वयमेव जगद्भूत्वा तदात्मानं स्वयमकुरुत सच्च त्यच्चाभवदित्यादिश्रुतेः स्वयमेव जग-
दाकारतां प्राप्य जीवरूपतः प्राविशत् तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतेर्जीवरूपेणानुप्रविष्टवानित्य-
र्थः १ ननु परमात्मन एकस्य सर्वशरीरेषु प्रविष्टस्य पूज्यपूजकादिभावेन प्रतीयमान उत्तमाधमभावो विरुध्येतेत्याशंक्याह विष्ण्वाद्युत्तम

परमात्माद्वयानंदपूर्णः पूर्वं स्वमायया स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः १ विष्ण्वाद्युत्तमदेहेषु
प्रविष्टो देवताभवत् मर्त्याद्यधमदेहेषु स्थितो भजति देवतां २ अनेकजन्मभजनात्स्वविचारं चिकी-
र्षति विचारेण विनष्टायां स्वमायायामद्वयः शिष्यते स्वयं ३ अद्वयानंदरूपस्य सद्वयत्वं च दुःखिता बंधः प्रोक्तः
स्वरूपेण स्थितिर्मुक्तिरितीर्यते ४ ॥

देहेष्विति नायं स्वाभाविक उत्तमाधमभावः किंतु शरीरोपाधिनिबंधनोऽतो न विरोध इति भावः २ इत्थमात्मन्यध्यारोपं संक्षेपेण प्रदर्श्य तस्याप-
नं तदपवादं संक्षिप्य दर्शयति अनेकजन्मभजनादिति अनेकजन्मभजनादनेकेषु जन्मस्वनुष्ठितानां कर्मणां ब्रह्मणि समर्पणरूपाद्भजनात्स्व-
विचारं स्वस्यात्मनो ब्रह्मरूपस्य ज्ञानसाधनं श्रवणादिकं चिकीर्षति कर्तुमिच्छति ततः स्वविचारेण विचारजनितज्ञानेन मायायां स्वस्याद्वयानं-
दत्वादिरूपाच्छादिकायामज्ञानाविद्यादिशब्दवाच्यायां विनष्टायां सत्यां स्वयमद्वयानंदपूर्णः परमात्मैवावशिष्यते ३ ननु तद्ब्रह्माहमिति ज्ञात्वा
सर्वबंधैः प्रमुच्यत इत्यादिश्रुतिर्बंधनिवृत्तिलक्षणस्य मोक्षस्य ज्ञानफलत्वाभिधानात्परमात्मावशेषणस्य तत्फलताभिधानमनुपपन्नमित्या-
शंक्याह अद्वयेति अद्वितीयब्रह्मणो वास्तवस्य बंधस्य मोक्षस्य वाऽनिरूपत्वेन दुःखित्वादिभ्रमरूप एव बंधः स्वरूपावस्थितिलक्षणा तन्निवृत्तिरेव मोक्षः

पं॰ टी॰ ९५

१०९

ननु कर्मणैव हि संसिद्धिमास्थिता जनकादय इति स्मृतेर्मोक्षस्य कर्मसाध्यत्वावगमात्किमनेन विचारजनितज्ञानेनेत्यत आह अविचारकृत इति वि
चारप्रागभावोपलक्षिताः ज्ञानकृतस्य बंधस्य न विचारजन्यज्ञानादन्यतो निवृत्तिरुपपद्यते उदाहृतः स्मृतौ संसिद्धिशब्देन चित्तशुद्धिरेवाभिधीयते
न मोक्ष इति भावः विचारेण बंधनिवृत्तिरुक्ता किंविषयेण विचारेण बंधनिवृत्तिरुक्ता किंविषयेण विचारेणेत्यत आह तस्मादिति तत्त्वसाक्षात्कार
पर्यंतं सर्वदा विचारं कुर्यादित्यर्थः ५ तत्र जीवस्य स्वरूपं तावन्निरूपयति अहमित्यभिमंतेति यश्चिदाभासविशिष्टोहंकारो व्यवहारदशायां
देहादावहमित्यभिमन्यतेऽसौ कर्ता कर्तृत्वादिधर्मविशिष्टो जीव इत्यर्थः तस्य किं करणमित्यपेक्षायामाह तस्येति कामादिमदंतःकरणभागो मनः
करणस्य क्रियावत्त्वात्क्रियां दर्शयति तस्य क्रिय इति ६ अनयोः स्वरूपं विषयं च विविच्य दर्शयति अंतर्मुखाहमिति इदमित्येषेति बहिर्वृत्तेः

अविचारकृतो बंधो विचारेण निवर्तते तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत् ५ अहमित्यभिमंता यः
कर्तासौ तस्य साधनं मनस्तस्य क्रिये अंतर्बहिर्वृत्ती क्रमोत्थिते ६ अंतर्मुखाहमित्येषा वृत्तिः कर्तारमुल्लिखे
त् बहिर्मुखेदमित्येषा बाह्यवस्त्विदमुल्लिखेत् ७ इदमो ये विशेषाः स्युर्गंधरूपरसादयः असांकर्येण ता
न् भिंद्याद्घ्राणादींद्रियपंचकं ८ कर्तारं च क्रियां तद्वद्व्यावृत्तविषयानपि स्फोरयेदेकयत्नेन योऽसौ सा
क्ष्यत्र चिद्वपुः ९ ॥

स्वरूपाभिन्नत्वेऽपि वशिष्टेन विषयप्रदर्शनं बाह्यं देहादाबहिर्वर्तमानमिदं तया निर्दिश्यमानं वस्तूल्लिखेद्विषयीकुर्यादित्यर्थः ७ ननु मनस एव सर्व
व्यवहारसिद्धौ चक्षुरादिवैयर्थ्यप्रसक्तेरित्याशंक्याह इदम इति मनसेदमिति सामान्यमात्रं गृह्यते न तु तद्विशेषा गंधादिरतस्तद्ग्रहणे
घ्राणादिकमुपयुज्यत इत्यर्थः ८ एवं सोपकरणं जीवस्वरूपं निरूप्य परमात्मानं निरूपयति कर्तारमिति कर्तारं पूर्वोक्तमहंकाररूपं
क्रियामहमिदमात्मकमनोवृत्तिरूपां व्यावृत्तविषयानपि व्यावृत्तान्योन्यविलक्षणान् घ्राणादिग्राह्यान्गंधादीन् विषयांश्चैकप्रय
त्नेन युगपदेव यश्चिद्रूपः स्वरूपप्रयत्नः स्फोरयेत्प्रकाशयेदसावत्र वेदांतशास्त्रे साक्षीत्युच्यत इत्यर्थः ९ ॥

साक्षिणः प्रकाशकत्वेन सर्वप्रकाशकत्वमभिनीय दर्शयति ईक्षे इति ईक्षे रूपमहं पश्यामीत्येवं दृष्टदर्शनदृश्यलक्षणां त्रिपुटीमेव प्रकाशत्वेन भासय
ते एवं शृणोमीत्यादावपि योज्यं युगपदविकारित्वेनावभासकत्वे दृष्टांतमाह नृत्येति १० दृष्टांतं स्पष्टयति नृत्यशालास्थित इति अविशेषेण
प्रभ्वादिविषयविशेषावभासनाय वृद्ध्यादिविकारमंतरेणेति यावत् ११ दार्ष्टांतिके योजयति अहंकारमिति सुषुप्त्यादावहंकाराद्यभावेऽपि न
साक्षितया भात्येवेत्यर्थः १२ ननु प्रकाशरूपाया बुद्धेरेवाहंकारादिसर्वावभासकत्वसंभवात् किं तदतिरिक्तसाक्षिकल्पनयेत्याशंक्याह
निरंतरमिति कूटस्थे निर्विकारे साक्षिणि ज्ञप्तिरूपतः स्वप्रकाशचैतन्यरूपतया निरंतरं भासमाने सदा स्फुरति सतीयं बुद्धिस्तद्भासा तस्य साक्षि
णः स्वरूपचैतन्येन भास्यमाना प्रकाश्यमानैवानेकधा घटोऽयं पटोऽयमित्यादिज्ञानाकारेण नृत्यति विक्रियत इत्ययं भावः यतो बुद्धेर्विकारित

ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहं इति भासयते सर्वं नृत्यशालास्थदीपवत् १० नृत्यशालास्थि
तो दीपः प्रभुं सभ्यांश्च नर्तकीं दीपयेदविशेषेण तदभावेऽपि दीप्यते ११ अहंकारं धियं साक्षी विषयानपि भा
सयेत् अहंकाराद्यभावेऽपि स्वयं भात्येव पूर्ववत् १२ निरंतरं भासमाने कूटस्थे ज्ञप्तिरूपतः तद्भासा भास्य
मानेयं बुद्धिर्नृत्यत्यनेकधा १३ अहंकारः प्रभुः सभ्या विषया नर्तकी मतिः तालादिधार्यक्षगणो दीपः
साक्ष्यवभासकः १४ स्वस्थानसंस्थितो दीपः सर्वतो भासयेद्यथा स्थिरस्थायी तथा साक्षी बहिरंतः प्रकाश
येत् १५ ॥

या जडत्वात् स्वतः स्फूर्तिराहित्यमतस्तदतिरिक्तः सर्वावभासकः साक्ष्यभ्युपगंतव्य इति १३ उक्तमर्थं श्रोतृबुद्धिसौकर्याय नाटकत्वेन निरूपय
ति अहंकार इति विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात् स्वाभिमानिप्रभुतुल्यत्वमहंकारस्य परिसरवर्तित्वेऽपि
विषयाणां तद्राहित्यात् सभ्यतुल्यत्वं सभ्यानां नानाविधविकारवत्त्वान्नर्तकीसाम्यं धियः धीविक्रियाणामनुकूलव्यापारवत्त्वात्तालादिधारिस
मानत्वमिंद्रियाणामेतत्सर्वावभासकत्वात् साक्षिणो दीपसादृश्यमिति द्रष्टव्यं १४ ननु साक्षिणोऽप्यहंकाराद्यवभासकत्वे तेन तेन संबंधा
य गमनागमनरूपविकारवत्त्वं स्यादित्याशंक्याह स्वस्थानेति दीपो यथा गमनादिविकारशून्यः स्वदेश एवावस्थित एव सन् स्वसन्निहितानखि
लपदार्थानवभासयति एवं साक्ष्यपीति भावः १५ ॥

ननु साक्षिणो वहिरन्तरवभासकत्वाभिधानमनुपपन्नमपूर्वमनन्तरमबाह्यमिति श्रुत्या तस्य बाह्याभ्यन्तरविभागाभावाभिधानादित्याशंक्याह वहिरन्तरिति कस्य बाह्यत्वं कस्य वान्तरत्वमित्यत आह विषया इति १६ ननु स्थिरस्य धियो न तथा साक्षी वहिरन्तः प्रकाशयेदित्यविकारिणः सतो वहिरन्तरवभासकत्वोक्तिरयुक्ता अहमिदं च घटं पश्यामीत्यत आह अन्तरेऽहंकारसाक्षितया प्रथमतोऽवभासकस्यान्तरं च घटं पश्यामीति विषयाकारवृत्तिस्फुरणरूपेण वहिर्निर्गमनानुभवादित्याशंक्याह अन्तस्थेवा इति इदं इहकारेण देहान्तरावस्थिता बुद्धिः रूपादिग्रहणाय चक्षुरादिद्वारा भूयो भूयो निर्गच्छतीति तथा च तन्निष्ठं चाञ्चल्यं तद्भासके साक्षिण्यारोप्यतेऽतो न वास्तवं साक्षिणश्चाञ्चल्यमिति भावः १७ भासके भास्यचाञ्चल्यारोपः कुत्र दृष्ट इत्याशंक्याह गृहान्तरेति गवाक्षात् गृहान्तरागतः स्वल्पश्चातपोऽचल एव वर्तते तत्र तस्मिन्नातपे प्रक्षिप्तेन हस्तेन

वहिरन्तर्विभागोऽयं देहापेक्षो न साक्षिणि विषया बाह्यदेशस्था देहस्यान्तरहंकृतिः १६ अन्तस्था धीः सहैवाक्षैर्वहिर्याति पुनः पुनः भास्यबुद्धिस्थचाञ्चल्यं साक्षिण्यारोप्यते वृथा १७ गृहान्तरगतः स्वल्पो गवाक्षादातपोऽचलः तत्र हस्ते नर्त्यमाने नृत्यतीवातपो यथा १८ निजस्थानस्थितः साक्षी वहिरन्तर्गमागमौ अकुर्वन्बुद्धिचाञ्चल्यात्करोतीव तथा तथा १९ न बाह्यो नान्तरः साक्षी बुद्धेर्देशौ हि तावुभौ बुद्ध्याद्यशेषसंशान्तौ यत्र भात्यस्ति तत्र सः २० देशः कोऽपि न भासेत यदि तर्ह्यस्त्वदेशभाक् सर्वदेशप्रक्लृप्त्यैव सर्वगत्वं न तु स्वतः २१ ॥

र्त्यमाने इतस्ततश्चाल्यमाने यथा आतपो नृत्यतीव लक्ष्यते न तु चलतीत्यर्थः १८ दार्ष्टान्तिकमाह निजस्थानस्थित इति १९ निजस्थानस्थितत्वेनानेन न किं बाह्यादिदेशस्थत्वमेवोच्यते नेत्याह न बाह्य इति तत्र हेतुमाह बुद्धेरिति तर्हि किं विवक्षितमित्यत आह बुद्ध्यादीति बुद्ध्यादिशब्देनेन्द्रियादयो गृह्यन्ते संशान्तिशब्देन तत्प्रतीत्युपरमो विवक्षितः २० ननु सर्वव्यवहारोपरतौ देश एव नोपलभ्यते कुतस्तन्निष्ठत्वमुच्यत इत्याशंक्य स्वाभिप्रायमाविष्करोति देश इति देशादिकल्पनापि ज्ञातस्य स्वातिरिक्तदेशापेक्षा नास्तीति भावः ननु देशाद्यभावे शस्य सर्वगतत्वं सर्वसाक्षित्वापत्तिर्विरुध्येतेत्यत आह सर्वदेशेति स्वाभाविकमेव किं न स्यादित्यत आह न त्विति अद्वितीयत्वादसंगत्वा

सर्वगतत्ववत्सर्वसाक्षित्वमपिनवास्तवमित्याह अंतरिति २२ तथावस्तुषुयोजयेदित्येतत्प्रपंचयति यदिति तर्हिकिंतस्यनिजंरूपमितितत्राह
सतइति २३ अवाङ्मनसगोचरत्वेमुमुक्षुणानगृह्येतेतिशंकते कथमिति अग्रहत्वमिष्टमेवेत्याह नैवेति नत्वात्मनोग्राह्यत्वाभावेविचारेण
विनष्टायांमायायांशिष्यतेस्वयमित्युक्तं परमात्मनोऽवशेषणंनसिद्ध्येदित्यतआह सर्वग्रहेति स्वात्मातिरिक्तस्यद्वैतस्यमिथ्यात्वनिश्चयेनत
त्प्रतीत्युपशांतौस्वात्मैवसत्यतयावशिष्यतेइतिभावः २४ यद्यप्युक्तन्यायेनस्वात्मापरिशिष्यतेतथापितदपरोक्षायकिंचित्प्रमाणमपेक्षित
मित्यतआह नतत्रेति नत्रहेतुमाह स्वप्रकाशस्वरूपतइति नत्वात्मास्वप्रकाशतयास्वस्फूर्तौमानंनापेक्षतइतिव्युत्पत्तिसिद्धयेमानमपेक्षित
मित्याशंक्यश्रुतिरेवात्रप्रमाणमित्याह तादृग्व्युत्पत्त्यपेक्षेति २५ एवमुत्तमाधिकारिणामात्मानुभवोपायमभिधायमंदाधिकारिणांतद्दर्शि

अंतर्बहिर्वासर्वंवायंदेशंपरिकल्पयेत् बुद्धिस्तद्देशगःसाक्षीतथावस्तुषुयोजयेत् २२ यद्यद्रूपादिकल्प्येतबु
द्ध्यातत्तत्प्रकाशयन् तस्यतस्यभवेत्साक्षीसदोवाग्बुद्ध्यगोचरः २३ कथंतादृङ्मयाग्राह्यमितिचेन्नैवगृह्य
तां सर्वग्रहोपसंशांतौस्वयमेवावशिष्यते २४ नतत्रमानापेक्षास्तिस्वप्रकाशस्वरूपतः तादृग्व्युत्पत्त्यपेक्षा
चेच्छ्रुतिंपठगुरोर्मुखात् २५ यदिसर्वग्रहत्यागोशक्यस्तर्हिधियंव्रज शरणंतदधीनोंतर्बहिर्वैषोनुभूयतां २६
इतिश्रीनाटकदीपः १ ब्रह्मानंदंप्रवक्ष्यामिज्ञातेतस्मिन्नशेषतः ऐहिकामुष्मिकानर्थव्रातंहित्वासुखायते १

यति यदीति बुद्धिशरणत्वेकिंफलमित्यतआह तदधीनइति बुद्ध्यायद्यत्परिकल्प्यतेबाह्यमांतरंवातस्यतस्यसाक्षित्वेनतदधीनः परमात्मातथै
वानुभूयतामित्यर्थः २६ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणश्रीरामकृष्णाख्यविदुषाविरचिता
नाटकदीपव्याख्यासमाप्ता १ नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ब्रह्मानंदाभिधग्रंथव्याकृतिर्बोधसिद्धये १ चिकीर्षितस्यग्रंथस्यनिर्व्यू
हपरिसमाप्तयेयदविरोधिकल्मषनिहंतृयेभिमतदेवतातत्त्वानुसंधानलक्षणंमंगलमाचरन् श्रोतृप्रवृत्तिसिद्धयेसप्रयोजनमभिधेयमा
विष्कुर्वन्ग्रंथारंभंप्रतिजानीते ब्रह्मानंदमिति निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराःयेमंदास्तेनुकंप्यंतेसविशेषब्रह्मरूपाणांदेवतानांत
त्स्यानिविशेषब्रह्मरूपताभिधानाद्ब्रह्मणआनंदोब्रह्मेत्यादिश्रुतिभिरानंदरूपताऽभिधानात् ब्रह्मानंदमित्यानंदरूपस्यब्रह्मणोवाचक

शब्दप्रयोगेण यद्धि मनसा ध्यायति तद्वाचा वदतीति क्रमसुकन्यायेन ब्रह्मानुसंधानलक्षणं मंगलाचरणं सिद्धं ब्रह्मणश्च सर्ववेदांतप्रतिपाद्य
त्वात्तत्प्रकरणरूपस्यास्य ग्रंथस्यापि तदेव विषय इति ब्रह्मशब्दप्रयोगेण विषयश्च सूचितः ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायतस्थुरित्युत्तरा
ईनानिष्टनिवृत्तीष्टप्राप्तिरूपं प्रयोजनद्वयं मुखत एवोक्तं ब्रह्मानंदं ब्रह्म चासावानंदश्चेति ब्रह्मानंदः वाच्यवाचकयोरभेदोपचारात्तत्प्रतिपा
दकोयं ग्रंथोपि ब्रह्मानंदस्तं प्रवक्ष्यामि तस्मिन्प्रतिपाद्यप्रतिपादकरूपे ब्रह्मानंदे ज्ञातेऽवगते सति ऐहिकामुष्मिकानर्थव्रातमैहिकानामिह लो
के भवानां देहपुत्रादिष्वहंममाभिमानप्रयुक्तानामाध्यात्मिकादितापानामामुष्मिकानाममुष्मिन्परलोके भवानां च तेषामनर्थानां योव्रा
तोऽनर्थसमूहस्तमशेषतो निरवशेषं यथा भवति तथा हित्वा परित्यज्य सुखायते सुखरूपं ब्रह्मैव भवति १ ब्रह्मज्ञानस्याऽनिष्टनिवृत्तीष्ट
प्राप्तिहेतुत्वे वहंति श्रुतिस्मृतिवाक्यानि प्रमाणानि संतीति प्रदर्शयितुकामस्तावत् ब्रह्मविदाप्नोति परं श्रुतं ह्येव मे भगवद्दृशेभ्यस्त
रति शोकमात्मविदिति सोहं भगवन्शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति वाक्यद्वयमर्थतः पठति ब्रह्मविदिति ब्रह्म वेत्तीति

ब्रह्मवित्परमाप्नोति शोकं तरति चात्मवित् रसो ब्रह्म रसं लब्ध्वानंदी भवति नान्यथा १ प्रतिष्ठां विंदते
स्वस्मिन्यदा स्यादथ सोऽभवः कुरुतेस्मिन्नंतरं चेदथ तस्य भयं भवेत् २ ॥

ब्रह्मवित् परमुत्कृष्टमानंदरूपं ब्रह्म प्राप्नोत्यात्मवित् भूमशब्दवाच्यं देशकालवस्तुपरिच्छेदशून्यमात्मानं वेत्तीत्यात्मवित् शोकं स्व
संस्पृष्टं पुरुषं शोचयतीति शोकस्तमोमूलः संसारस्तं तरति अतिक्रामति ननु दृश्यते तैत्तिरीयकश्रुतिवाक्ये ब्रह्मज्ञानस्य परप्राप्तिहेतु
त्वावभासस्तेनानंदप्राप्तिहेतुत्वे न्याशंक्यानंदप्राप्तिहेतुत्वप्रतिपादनपरं रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति तदीयमेव वाक्य
मर्थतः पठति रस इति सत्यं ज्ञानमनंतं ब्रह्म तस्माद्वा एतस्मादात्मन आकाशः संभूत इति प्रकरणादौ ब्रह्मात्मशब्दाभ्यामभिहितो य
आत्मा सो रसः सारश्चानंदरूप इत्यर्थः रसमानंदरूपं ब्रह्म लब्ध्वा ब्रह्माहमस्मीति ज्ञानेन प्राप्यानंदी भवति अपरिच्छिन्ननिरतिशय
सुखवान्भवति उक्तमर्थं व्यतिरेकप्रदर्शनेन द्रढयति नान्यथेति अन्यथा ब्रह्मात्मैकत्वज्ञानं विहाय साधनांतरानुष्ठानेन नानंदी भवती
त्यर्थः १ एवमन्वयमुखेनेष्टप्राप्त्यनिष्टनिवृत्तिप्रतिपादनपराणि वाक्यानि प्रदर्श्यान्वयव्यतिरेकाभ्यामनर्थनिवृत्तिप्रदर्शनपरं यदा
ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदतेऽथ सोऽभयं गतो भवति ॥

यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति वाक्यद्वयमर्थतोऽनुक्रामति प्रतिष्ठामिति अस्य चायमर्थः यदा यस्मिन्काले
हीति विद्वत्प्रसिद्धिप्रदर्शनपरो निपातः एवेति अयमेवानर्थनिवृत्त्युपायो नान्य इति नियमार्थः एष मुमुक्षुरेतस्मिन् विद्वदनुभवगम्ये
अदृश्ये इंद्रियागोचरे अनात्म्ये नात्मीये स्वरूपतया स्वकीयत्वरहिते अनिरुक्ते निरुक्तं निर्वचनं शब्देनाभिधानं यत्र नास्ति तदनिरुक्तं
तस्मिन् अनिलयने निलीयतेऽस्मिन्निति निलयनमाधारः स न विद्यते यस्य तस्मिन् स्वमहिम्नि स्थिते इत्यर्थः अभयं द्वितीयाद्वै भयं
भवतीति श्रुतेः भयशब्देनात्र भयहेतुर्भेदो लक्ष्यते तेन न विद्यते भयं भेदो यथा न भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययराहित्येन
स्थितिं ब्रह्माहमस्मीत्यवस्थानं प्रतिष्ठां तां विंदते गुरूपसत्त्यादिना श्रवणादिकं कृत्वा लभते अथ तदानीमेव स एवं विद्वान् अभयं भय
रहितं मोक्षरूपमद्वितीयं ब्रह्मगतः प्राप्तो भवति ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः यदा यस्मिन्नेव काले एषः पूर्वोक्तः एतस्मिन्नदृश्यत्वा

वायुः सूर्यो वह्निरिंद्रो मृत्युर्जन्मांतरेंऽतरं
कृत्वा धर्मं विजानंतोऽप्यस्माद्भीत्याचरंति हि ५ ॥

द्वितीयके प्रत्यगभिन्ने ब्रह्मणि उत् इति निपातोऽपिशब्दार्थोऽरमुत अल्पमपि अंतरं भेदं उपास्योपासकादिलक्षणं कुरुते पश्यति था
तूनामनेकाथ तदानीमेव तस्य भेददर्शिनो भयं संसारप्रयुक्तं दुःखं भवति ३ भेददर्शिनो भयं भवतीत्येतत् द्रढीकर्तुं ब्रह्मात्मैकत्व
ज्ञानरहितानां वाय्वादीनां भयदर्शनपरं भीषास्माद्वातः पवते इत्यादिमंत्रमर्थतः पठति वायुरिति वाय्वादयो जगन्नियामकत्वेन
प्रसिद्धाः पंचापि देवता अतीते जन्मनि धर्ममिष्टापूर्त्तादिलक्षणं विजानंतोऽपि ज्ञानपूर्वकमनुष्ठितवंतोऽपि अंतरं प्रत्यग्ब्रह्मणोर्भेदं
कृत्वाऽस्माद्ब्रह्मणो भीत्या अस्मिन्वाय्वादिजन्मनि वर्तंते स्वस्वव्यवहारेषु सदा वर्तंते हि शब्देन भयादस्याग्निस्तपति भयात्तपति भ
यात्तपति सूर्यो भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति कठश्रुतौ यमेनोक्तां प्रसिद्धिं दर्शयति ५ ॥

पं॰ टी॰
११२

112

ननु तरति शोकमात्मविदित्यादिषूदाहृतेषु वाक्येषु ब्रह्मानंदज्ञानस्यानर्थनिवृत्तिहेतुत्वं स्पष्टं नाऽवभासत इत्याशंक्य तथा प्रतिपाद
नपरं वाक्यमुदाहरति आनंदमिति राहोः शिर इतिवद्भेदव्यपदेशस्त्वौपचारिकः ब्रह्मणः स्वरूपभूतमानंदं विद्वानऽपरोक्षतया
ज्ञातवान्पुरुषः कुतश्चन कस्मादपि ऐहिकभयहेतोर्व्याघ्रादेः पारलौकिकभयहेतोः पापादेर्वा न बिभेति न भयं प्राप्नोति ननु तत्त्व
विदः पापादेर्भयं नास्तीत्येतत्कुतोऽवगम्यते इत्याशंक्य तत्प्रतिपादकमेतं ह वाव न तपति किमहं साधु नाकरवं किमहं पा
पमकरवमिति वाक्यमर्थतः पठति एतमिति कर्माग्निसंभृता पुण्यपापरूपकर्मैवाग्निस्तत्करणाभ्यामग्निवत्संतापहे
तुत्वात्तेन संभृता संपादिता एवापुण्यं नाकरवं कस्मात्पापमहं कृतवान्कुत इत्येवंरूपा चिंता एतमेवं तत्त्वविदमेव न तप

आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन एतमेव न तपेन्नैषा चिंता कर्माग्निसंभृता ५ एवं वि
द्वान्कर्मणी द्वे हित्वात्मानं स्मरेत्सदा कृते च कर्मणी स्वात्मरूपेणैवैष पश्यति ६ ॥

न संतापयेत्तात्पर्यमविद्वांसं संतापयत्यनया चिंतया सदा संतप्यत इत्यर्थः पुण्यपापयोरतापकत्वे हेतुप्रदर्शनपरं सद्य
एवं विद्वानेते आत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृणुत इति वाक्यद्वयमर्थतः पठति एवमिति सद्यः क
श्चित्पुमानेवमुक्तेन प्रकारेण सद्यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यनेन प्रकारेण विद्वान् ज्ञानवान्वर्तते स
एते पुण्यपापे हित्वेत्यध्याहारः आत्मानं ब्रह्माभिन्नं प्रत्यक्चैतन्यं स्पृणुते प्रीणयति सदा स्मरेदित्यर्थः यतः पुण्यपाप
योर्मिथ्यात्वानुसंधानेन तद्धाने कृतमकृतं च हि विद्ययाविनैव नास्ति कुतस्तन्निमित्तकस्ताप इत्यभिप्रायः किंच ए
षविद्वानेते पूर्वोक्ते उभे पुण्यपापरूपे कर्मणी देहेंद्रियादिप्रवृत्त्या जनिते स्वात्मरूपेणैवेदं सर्वं यदयमात्मे
त्यादिवाक्योक्तप्रकारेण पश्यति जानातीत्यर्थः अतः स्वात्माभिन्नत्वादप्यतापकत्वमिति भावः ६ ॥

ननु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादिशास्त्रसद्भावादनादौ संसारे बहुजन्मोपार्जितेषु पुण्यापुण्यलक्षणेषु कर्मसु संभो
गेष प्रसिद्धत्वेनात्मतयाः तु संस्थानायोगेषु सत्सु कथं तद्विषया चिन्तानमवेदित्याशंक्य सनिदानानां तेषां तत्त्वज्ञानेन विनाशित्वात्तच्चिं
ताजनकत्वमित्यभिप्रायेण हृदयग्रन्थ्यादिनिहन्तिपरं मुण्डकादि ‥ भुक्तिमुक्तिस्थितं वाक्यमर्थतः पठति भिद्यत इति परावरे परमपि हि
रण्यगर्भादिकं यदवरं निकृष्टं यस्मात्तस्मिन्परात्मनि दृष्टे साक्षात्कृते अस्य साक्षात्कारवतः हृदयस्य बुद्धेः चिदात्मनश्च ग्रन्थिवद्दृ
ढसंश्लेषरूपत्वाद्ग्रन्थिरन्योन्याध्यासः भिद्यते विदीर्यते विनश्यतीत्यर्थः सर्वसंशयाश्चात्मा देहादिव्यतिरिक्तोस्ति न वा व्यतिरिक्तो
पि कर्तृत्वादिधर्मयोगी न वा कर्तृत्वेपि न स्य ब्रह्मणोऽभेदोस्ति न वाः भेदेपि तज्ज्ञानं कर्मसहितं मुक्तिसाधनं केवलं वेत्यादयश्छि
द्यन्ते द्वैधीक्रियन्ते नश्यन्तिः साक्षात्कृतस्य वस्तुनः संशयविपर्ययविषयत्वादर्शनादिति भावः कर्माणि संचितानि पुण्यापुण्य

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ७ ॥

लक्षणानि क्षीयन्ते सनिदानानि ज्ञानविनाशेन विनश्यन्तीत्यर्थः ७ ननु ऊर्ध्वं ज्ञानेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्य
थेतोस्ति न कर्म लिप्यते नरे विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते कर्मणैव हि संसिद्धिमा
स्थिता जनकादयः यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतं एवं तपश्च विद्या च संयुक्तं भेषजं महदित्यादिस्मृतेश्च केवलस्य ज्ञानस
मुच्चितस्य वा कर्मणो मुक्तिहेतुत्वस्यादिग्याशंक्याद्राक् तव वाक्यस्य लेपितपः शब्दस्य पापनिहन्तिपरत्वात् संसिद्धिशब्देन च ज्ञानसाधन
चित्तशुद्ध्यभिधानात् विद्याशब्देन चोपासनाया विवक्षितत्वात् न कर्मणो मुक्तिसाधनत्वमित्यभिप्रायेण साधनान्तरनिषेधपरं तमेव विदि
त्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रौतान्तरवाक्यमर्थतः पठति तमेवेति तं पूर्वोक्तं परमात्मानं विद्वानेव ॥

पं॰ टी॰
११३

मत्स्युं संसारमत्येत्यतिक्रामति इतरः संस्तुद्यद्रूपः केवलं कर्मद्रूपो वायं यथा मार्गः मोक्षोपायः नचनैवविद्यते ननूदास्त्वत्राप्युतिष्ठन्व यद्यातिरेकाभ्यामैहिकाः तिष्ठनिहतिरेवप्राधान्येनावभासते नामुष्मिकीत्याशंक्य आमुष्मिकस्यानिष्टस्यभाविजन्मपूर्वक त्वात्तस्यसनिदानस्याभावप्रतिपादकंज्ञात्वादेवंसर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममरणप्रहाणिरिति श्वेताश्वतरवा क्यमर्थतः पठति ज्ञात्वेति देवं स्वप्रकाशं प्रत्यगभिन्नं ब्रह्मज्ञात्वाऽपरोक्षतयानुभूयस्थितस्य कामक्रोधादीनांसर्वेषां पाशानांहानिर्भवति तैः पाशाशब्दाभिधेयैः रागादिभिः क्लेशैः क्षीणैर्नष्टैर्भाविजन्महेतुकर्मारंभायोगात्तत्नप्रा प्नोतीत्यर्थः ८ ननुश्रेयेकसंतरणादिफलंश्रूयते एवनानुभूयतेज्ञानिनामयीष्टानिष्टप्राप्तिपरिहारार्थप्रवृत्तिदर्श नादित्याशंक्य हृदयाऽपरोक्षज्ञानिनोऽनंदभावप्रतिपादनपरमःध्यात्मयोगाधिगमेन देवं मत्वाधीरो हर्षशोकौज

तमेवविद्वानत्येतिमृत्युंपंथानचेतरः ज्ञात्वादेवं पाशाहानिः क्षीणैः क्लेशैर्नजन्मभाक् ८
देवंमत्वाहर्षशोकौजहात्येवधैर्यवान् नैनंकृताकृतेपुण्यपापेतापयतःक्वचित् ९ ॥

हातीतिकठश्रुतिवाक्यमर्थतः पठति देवंमत्वेति धैर्यवान्ब्रह्मचर्यादिसाधनसंपन्नः देवंविदानंदादिलक्षणम वाऽवगम्याऽहमेवास्मीत्येवजन्मनिहर्षशोकौजहाति एतमेवतपेत्त्रैषाचिंताकर्मादितिसंभूतेरुक्तार्थेविशेषप्रद र्शनयरंनैनंकृताकृतेतपतइत्यादिजाबाल्यब्राह्मणवाक्यमर्थतः पठति नैनमिति एवंमकृतंपुण्यंकृतंचपा पंतत्त्वविदस्तापहेतुर्नभवतीत्युक्तं इहतच्छूतमकृतं वापुण्यपापंवातथाविधंतापकंनभवतीत्युच्यतइतिवि शेषः तथाहि तापोनामचित्तविकारविशेषः पुण्यंकृतंसद्धर्षलक्षणंविकारमुत्पादयति अकृतंविषादलक्ष णंपापंपुनस्तद्वैपरीत्येनअकृतंहर्षमुत्पादयतिकृतंविषादंतत्त्वविदस्तुउभेअपितुभयविधविकारहेतू नक दाचिद्भवतः अविक्रियब्रह्मरूपत्वज्ञानादित्यभिप्रायः ९ ॥

113

नन्विदं पंसेववाक्यानि प्रमाणानि नेत्याह इत्यादि इति आदिशब्देन हचेदवेदीदथ सत्यमस्ति न चेदिहाः वेदीन्महती विनष्टिः यएतद्विदुरमृतास्ते भवंति अथेतरे दुःखमेवोपयंति तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् निचाय्य तं मृत्युमुखात्प्रमुच्यते इत्याद्याः श्रुतयो गृह्यंते सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति देवत्वस्यात्मविज्ञानाद्धि शुद्धिः परमा मतेत्यादि पुराणस्मृतिवचनैः सह प्रमाणानीत्यर्थः उदाहृतानां श्रुतिस्मृतिपुराणवाक्यानां सर्वेषां तात्पर्यमाह ब्रह्मज्ञानमिति ९ ननु ब्रह्मानंदपदस्य ब्रह्मपदेनाविशेषणादानंदांतरमप्यस्तीत्यवगम्यते स कतिविधः कीदृशश्चानंद इत्याकांक्षायां तद्भेदप्रदर्शनपूर्वकं ब्रह्मानंदविवेचनं प्रतिजानीते आनंदेति ब्रह्मानंदो विद्यानंदो विषयानंद इत्यनेन प्रकारेणानंदस्य त्रैविध्यमवगंतव्यं तत्रेतरयोरानंदयोर्ब्रह्मानंदमू

इत्यादिश्रुतयो वक्ष्यः पुराणैः स्मृतिभिः सह ब्रह्मज्ञाने नर्थहानिमानंदं चाप्यवोधयन् ९ आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इत्यादौ ब्रह्मानंदो विविच्यते ११ भृगुः पुत्रः पितुः श्रुत्वा वरुणाद्ब्रह्मलक्षणं अन्नप्राणमनोविद्धि त्यक्त्वानंदं विनिश्चिवान् १२ ॥

लत्वादादावध्यायत्रयेण ब्रह्मानंदो विविच्यते विभज्य प्रदर्श्यत इत्यर्थः ११ तत्रादौ तावत्तैत्तिरीयश्रुतिपर्यालोचनायामानंदरूपं ब्रह्मावगम्यत इत्यभिप्रायेण भृगुवल्ल्या अर्थं संक्षेपेण प्रदर्शयति भृगुरिति भृगुनामकः पुत्रः पितुर्वरुणाख्याद्ब्रह्मलक्षणं यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेत्येवं रूपं श्रुत्वान्नमयादिकोशेषु तल्लक्षणासंभवेन तेषाम ब्रह्मत्वं विनिश्चित्यानंदं आनंदमयकोशे यं च माव पवत्तेन ब्रह्मत्वं तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठेति श्रुतेर्बिंवभूतमानंदं ब्रह्मलक्षणयोजनया ब्रह्मत्वेन ज्ञातवानित्य

कथमानंदेन लक्षणं योजितवानित्याशंक्य तद्योजनप्रकारप्रदर्शनपरमानंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जा
तानि जीवंति आनंदं प्रयंत्यभिसंविशंतीति वाक्यमर्थतः पठति आनंदादिति ग्राम्यधर्मनिमित्तकानंदादेव भूतानि प्रा
णिनो जायंते उत्पद्यंते तेनैव विषयभोगादिनिमित्तकेनानंदेन जीवनं प्राप्नुवंति तेषां प्राणिनां लयश्च तत्र तस्मिन्सुषुप्ति
कालीने स्वस्वरूपभूते आनंद एव भवति सुषुप्तावानंदातिरेकेणकस्याप्यनुभवाभावादत आनंदो ब्रह्मैवेति सर्वानुभव
सिद्धत्वादत्र संशयः कर्तव्य इति भावः १३ एवं तैत्तरीयश्रुतिपर्यालोचनया ब्रह्मण आनंदरूपतां प्रदर्श्य छांदोग्यश्रु
तिपर्यालोचनयापि तदादर्शयिषुः सनत्कुमारनारदसंवादरूपे सप्तमाध्यायेस्मिन्तस्य भूमरूपब्रह्मप्रतिपादकस्य

आनंदादेव भूतानि जायंते तेन जीवनं तेषां लयश्च तत्रा
तो ब्रह्मानंदो न संशयः १३ भूतोत्पत्तेः पुरा भूमा त्रिपुटीद्वै
तवर्जनात् ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो १४ ॥

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यादिवाक्यस्यार्थं संक्षेपेणाह भूतोत्पत्तेरिति भूतानामाकाशादीनां
तत्कार्याणां जरायुजांडजादीनां चोत्पत्तेः पूर्वं त्रिपुटीद्वैतवर्जनात् त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां समा
हारस्त्रिपुटी सैव द्वैतं तस्य वर्जनमभावस्तस्माद्भूमा देशतः कालतो वस्तुतो वा परिच्छेदशून्यः परमात्माभावानयते द्वया
नयनयनमिति न्यायाद्भूमैवासीदित्यध्याहारः तदेव द्वैतवर्जनमुपपादयति ज्ञातृज्ञानेति वक्ष्यमाणज्ञात्रादिरूपा
त्रिपुटी प्रलयकाले नास्तीत्येतत्सर्ववेदांतसंमतमिति हि शब्दं प्रयुंजानस्यायमभिप्रायः १४ ॥

इदानीं ज्ञात्रादिस्वरूपं दर्शयति विज्ञानेति परमात्मन उत्पन्नो बुद्ध्युपाधिको जीवो विज्ञानमयो ज्ञाता मनो मयः मनसि प्रतिबिंबितो मनोमय
शब्दवाच्यचैतन्यं ज्ञानं शब्दस्पर्शादयो ज्ञेयाः प्रसिद्धाः इदं त्रयं कार्यत्वादुत्पत्तितः पुरा कारणव्यतिरेकेण नास्तीत्यर्थः १५ फलितमाह
त्रयेति ज्ञात्रादित्रयाभावे निर्द्वैतः द्वैतरहितः पूर्ण एवात्मानुभूयते अत्रानुभूयत इत्युक्तः अत आह समाधिरिति विद्वदनुभवप्रदर्शना
य समाधिग्रहणं सर्वानुभवद्योतनाय सुप्तिमूर्छयोरुदाहरणं सुप्त्याद्युत्थितस्य द्वैतादर्शनस्मरणाऽन्यथानुपपत्त्या निर्द्वै
तस्य तदनुभवितुः सिद्धिरिति भावः भवतु सुप्त्यादावद्वैतसिद्धिः प्रकृते किमायातमित्यत आह पूर्ण इति यथा सुषुप्त्या

विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः ज्ञेयाः शब्दादयो नैतत्त्रयमुत्पत्तितः पुरा १५ त्रयाभावे तु नि
र्द्वैतः पूर्ण एवानुभूयते समाधिसुप्तिमूर्छासु पूर्णः सृष्टेः पुरा तथा १६ यो भूमा स सुखं नाल्पे सुखं त्रे
धा विभेदिनि सनत्कुमारः प्राहैवं नारदायात्तिशोकिने १७ ॥

द्वैतपरिच्छेदकाभावात्पूर्णस्तथा सृष्टेः पुरापि तदभावात्पूर्णः इत्यर्थः १६ अस्तु ब्रह्मणः पूर्णत्वमानंदरूपत्वे किमायातमित्या
शंक्यान्वयव्यतिरेकाभ्यां भूम्नः सुखरूपत्वप्रदर्शनपरं यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति वाक्यमर्थतोनुक्रामति यो
भूमेति यः पूर्वोक्तो भूमा स सुखस्वरूप एवाद्वितीये दुःखहेतोरभावादल्पे परिच्छिन्ने तस्यैव विवर्णत्रेधा विभेदिनीति द्वैतगर्भि
ते विशेषणं सुखं तत्र न विद्यते इत्यर्थः एवं कस्मै केनाभिहितमित्यत आह सनत्कुमार इति नारदस्य शिष्यत्वकारणमाह
आत्तिशोकिने इति आत्तिशापितोऽधिकः शोको यस्यास्तीत्यात्तिशोकी तस्मै १७ ॥

पं॰टी॰
११५

तस्यातिशोकित्वे हेतुमाह सपुराणानिति नारदः पुराणैः सहवर्त्तन्त इति सपुराणाः पंचवेदास्तान्विविधानि शास्त्राणि च विदित्वा
प्यात्मज्ञानरहितत्वेनातिशयेन शोके प्राप्तः १८ ननु वेदशास्त्रविषयज्ञानस्य शोकनिवर्त्तकत्वेन प्रसिद्धस्य कथमतिशोक
हेतुत्वमित्यत आह वेदेति तापत्रयेणाध्यात्मिकादिलक्षणेनैव शोकिता शोकोऽस्यास्तीति शोकी तस्य भावस्तत्ता आसीदि
त्यध्याहारः पश्चादिति तु शब्दो विशेषद्योतनार्थः अभ्यासः पाठाद्यावर्त्तनं विस्मारः पठितस्य विस्मरणं भंगः स्वतोऽधिके
न तिरस्कारः गर्वोऽस्मदर्शनेन स्वाधिक्यबुद्धिरेतैश्च कारणैः शोकित्वं १९ नन्वेवं सर्वज्ञस्यापि नारदस्यातिशोकित्वं ना

115

सपुराणान्पंच वेदान्शास्त्राणि विविधानि च ज्ञात्वाप्यनात्मवित्त्वेन नारदोऽतिशुशोच ह १८ वे
दाभ्यासात्पुरा तापत्रयमात्रेण शोकिता पश्चादभ्यासविस्मारभंगगर्वैश्च शोकिता १९ सोऽहं
विद्वन्प्रशोचामि शोकपारं नयस्व मां इत्युक्तः सुखमेवास्य पारमित्यभ्यधादृषिः २० सुखं वैष
यिकं शोकसहस्रेणावृतत्वतः दुःखमेवेति मत्वाह नाल्पेऽस्ति सुखमित्यसौ २१ ॥

स्तीति कुतोऽवगम्यते इत्याशंक्य सोऽहं भगवन्शोचामीति तदीयादेव वाक्यादवगतमित्यभिप्रेत्याह तं मां भगवान्छोकस्य
पारं तारयत्विति तन्निवृत्त्युपायेन तेन पृष्टे सति सनत्कुमारो भूमशब्दवाच्यं सुखरूपं ब्रह्मैव ज्ञायमानं शोकनिवृत्त्युपाय
इति सुखं त्वेव विजिज्ञासितव्यमित्यारभ्योत्तरग्रंथसंदर्भेणोक्तवानित्याह सोऽहमिति २० ननु स्वर्गादिजन्येषु सुखेषु
बहुषु सत्सु नाल्पे सुखमस्तीत्युक्तिरनुपपन्नेति चेन्न तेषां दुःखानुषंगेन विषसंपृक्तान्नवत् दुःखरूपत्वस्य मु
निनाभिप्रेतत्वादित्याह सुखमिति २१ ॥

द्वैते सत्त्वाभावमंगीकृत्याद्वैतेऽपि तमाशंकते नन्विति तत्रानुपलब्धिं प्रमाणयति अस्ति चेदिति अद्वैते सत्त्वं यदि विद्येत तर्हि विषयसत्त्वा
दिवदुपलभ्येत यतो नोपलभ्यतेऽतो नास्तीत्यर्थः ननूपलभ्यत एवेत्याशंक्यमानं प्रत्याह तथा चेति अनुभवस्यानुभवित्रनुभा
व्यापेक्षत्वाद्द्वैतहानिरिति भावः २२ अद्वैतस्य सत्त्वाधिकरणत्वनिषेधमंगीकरोति सिद्धान्ती मास्त्विति तत्र हेतुमाह किं त्वि
ति हि यस्मात्कारणादद्वैतमेव सत्त्वमतः सत्त्वाऽधिकरणोऽन भवतीत्यर्थः अद्वैते सत्त्वमित्यत्र किं प्रमाणमित्याशंक्यानुवाद

ननु द्वैते सत्त्वं माभूदद्वैतेऽप्यस्ति नो सत्त्वं अस्ति चेदुपलभ्येत न तथा च त्रिपुटी भवेत् २२ मास्तु द्वैते
सत्त्वं किं तु सत्त्वमद्वैतमेव हि किं मानमिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे २३ स्वप्रभत्वे भवद्वा
क्यं मानं यस्माद्भवानिदं अद्वैतमभ्युपेत्यास्मिन्सत्त्वं नास्तीति भाषते २४ नाभ्युपैम्यहमद्वैतं त्वद्
वचोऽनूद्य दूषणं वच्मीति चेत्तदा ब्रूहि किमासीद्द्वैततः पुरा २५ ॥

सर्वं केनास्य स्वप्रकाशत्वात् प्रमाणप्रश्न एवानुपपन्न इत्याह किं मानमिति २३ ननु स्वप्रकाशत्वेऽपि किं प्रमाणमित्याशंक्य त्व
दीयमेव वचनं प्रमाणमित्याह स्वप्रभत्व इति तदुपपादयति यतः कारणाद्भवता प्रमाणनैरपेक्ष्येणाद्वैतमभ्युपेत्य सत्त्वमे
वाक्षिप्यतेऽतः स्वप्रभत्वमित्यर्थः २४ न मयाद्वैतमभ्युपगम्यते किं तु त्वदुक्तमद्वैतमनूद्य दूष्यतेऽतो नोक्तासिद्धिरिति शंकते नाभ्युपै
मीति विकल्पासहत्वादद्वैतानभ्युपगमोऽनुपपन्न इति मन्वानः पृच्छति तदेति २५ ॥

पं॰ टी॰
११८

किंशब्दसूचितं विकल्पं दर्शयति किमद्वैतमिति तृतीयं पक्षं निराकरोति अंतिम इति द्वैताद्वैतविलक्षणस्य रूपस्य लोकेऽदर्शनादिति भावः द्वि
तीयं पक्षं निराकरोति न द्वितीय इति तत्र हेतुमाह अनुत्पत्तेरिति द्वैतस्य तदानीमनुत्पन्नत्वादिति भावः अतः प्रथमः पक्षः परिशिष्यत
इत्याह शिष्यत इति २६ ननु केन प्रकारेणाद्वैतं युक्त्यैव सिद्ध्यति नानुभवेनेति चोदयति अद्वैतेति अद्वैतसिद्धिर्युक्त्यैवेत्युक्तं विकल्पास
हत्वादनुपपन्नमिति मत्वा तां युक्तिं विकल्पयति सिद्धांती वदेति विकल्पस्य मूलं तां निराकरोति कोटीति २७ प्रथमं पक्षं सोपहासं

किमद्वैतमुत द्वैतमन्यो वा कोटिरंतिमः अप्रसिद्धो न द्वितीयोऽनुत्पत्तेः शिष्यतेऽग्रिमः २६ अद्वैतसिद्धि
र्युक्त्यैव नानुभूत्येति चेद्वद निर्दृष्टांता सदृष्टांता वा कोट्यंतरमत्र नो २७ नानुभूतिर्न दृष्टांत इति युक्ति
स्तु शोभते सदृष्टांतत्वपक्षे तु दृष्टांतं वद मे मतं २८ अद्वैतः प्रलयो द्वैतानुपलंभेन सुप्तिवत् इति
चेत्सुप्तिरद्वैतेत्यत्र दृष्टांतमीरय २९ ॥

निराकरोति नानुभूतिरिति अद्वैतसिद्धिर्युक्त्यैवेति वदता अनुभूतिस्तावन्नाभ्युपेयते युक्तिस्तु दृष्टांतप्रदर्शनमंतरेण न किंचित्साधय
त्यतो निर्दृष्टांता इत्युक्तिरयुक्तेति भावः द्वितीये विकल्पे उभयवादिसंप्रतिपन्नो दृष्टांतो वक्तव्य इत्याह सदृष्टांतत्वेति २८ नहि
दृष्टांतेनैवाद्वैतं साधयामीति शंकते पूर्ववादी अद्वैत इति प्रलयो द्वैतरहितो भवितुमर्हति द्वैतानुपलब्धिमत्त्वात् यो यो द्वै
तानुपलब्धिमान् स स द्वैतरहितः यथा स्वाप इति नन्वेवं साधयतस्तव स्वपक्षसिद्धिर्दृष्टांतः परस्तु सुप्तिर्वा अद्वयो नास्याः परंप्र
त्यप्रसिद्धत्वेन न तत्सिद्धये दृष्टांतांतरं वक्तव्यमित्याह सुप्तिरिति २९ ॥

नन्वन्तस्याः परमात्मनिरेव दृष्टांत इति द्वितीयविकल्पमाशंकते दृष्टांत इति परमात्मनस्त्वाप्रसिद्धत्वेन त्वया दृष्टांतीकरणमनुपपन्न
मिति सोपहासमाह सिद्धांती ग्रहो इति योभवान्स्वात्मनेरनुभवगम्यत्वानंगीकारेण स्वात्मानमपि न वेत्ति अस्य तव परात्मज्ञो काक
थापरात्मसिद्धानं भवतीति किमुवक्तव्यमिति भावः ३१ नन्वनुमानात्परात्मसिद्धिरिति शंकते निश्चेष्टत्वादिति विमतः परः
आत्मा भवितुमर्हति प्राणादिमत्त्वे सति निश्चेष्टत्वान्मद्वदित्यनुमानादित्यर्थः एवं तर्हि न व स्वात्मनः स्वप्रकाशत्वं परिशिष्य
त इत्याह सिद्धांती तदेति तदा तर्हि मां प्रति स्वात्मसिद्धदाहर्तुः दृष्टांतीकर्तुः तेन तव स्वात्मज्ञाने स्वप्रभत्वस्वप्रकाशत्वं बला

दृष्टांतः परात्मसिद्धे देहो नैकोऽलमहत्‌ यः स्वात्मानं न वेत्यस्य परात्मभौतु का कथा ३० निश्चेष्ट
त्वात्परः आत्मेयथाहमितिचेत्तदा उदाहर्तुः स्वात्मनः स्वप्रभत्वं बलाद्भवेत्‌ ३१ नेंद्रियाणि न
दृष्टांतस्तथाप्यंगीकरोषि तो इदमेव स्वप्रभत्वं यज्ज्ञानं साधनैर्विना ३२ ॥

त्स्युदाहरणसामर्थ्यादेव भवेत्‌ ३१ कथं बलाद्भवतीत्याशंक्याह नेति स्वात्मग्राहकाणींद्रियाणि न संति तेषां स्वकार
णे विलीनत्वात्‌ दृष्टांतस्य संप्रतिपन्नो नास्ति परात्मनेरप्रसिद्धत्वस्योक्तत्वात्‌ तथापि तां स्वात्मनिमंगीकरोषि एवं सति साध
नैर्विना ज्ञानसाधनमंतरेणापि मानं प्रकाशनमिति यदिमेव स्वप्रकाशत्वं स्वात्मनः इत्यर्थः अत्रायं प्रयोगः विमता
त्मनिः स्वप्रकाशा असत्स्वपिज्ञानसाधनेषु प्रकाशमानत्वात्संप्रत्याभिमतात्मवत्प्रभाकराभिमतसंवेदनवत्‌ शाक्ता
भिमतस्वात्मवदित्यर्थः ३२ ॥

इत्थं प्रलयस्य दृष्टान्तत्वेनोदाहृतायाः सुषुप्तेरद्वैतत्वं स्वप्रभत्वं च प्रसाध्य तत्र सुखप्रसाधनाय पूर्वं पक्षिण आशङ्कामुत्थापयति
स्तामिति सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात्सुखमेव परिशिष्यत इत्याह शृण्विति सुखदुःखयोः प्रकाशतमसोरिव परस्प
रविरोधित्वात् दुःखाभावे सुखमेवाभ्युपेयमिति भावः ३३ सुप्तौ दुःखाभावे किं मानमित्याकाङ्क्षायां श्रुत्यनुभवावित्याह अंधइति न
स्माज्जाग्रत्प्रसिद्धोंऽधः सन्ननंधो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तद्यद्यपीदं भगवः शरीरमंधं
भवत्यनंधः स भवतीत्यादिश्रुतिर्देहाभिमानप्रयुक्तांधत्वादीन्दोषान्सुप्तौ निवारयति व्याध्यादिना पीड्यमानस्यापि सुप्तौ
न दुःखानुभवो नास्तीत्येतत्सर्वजनप्रसिद्धं चेत्यर्थः ३४ ननु यत्र दुःखाभावस्तत्र सुखमित्यस्याः व्याप्तेर्लोष्टादौ व्यभि

स्तामद्वैतस्वप्रभत्वे वद सुप्तौ सुखं कथं शृणु दुःखं तदा नास्ति ततस्ते शिष्यते सुखं ३३ अंधः सन्नप्य
नंधः स्याद्विद्धोऽविद्धस्तथा रोग्यपि अरोगीति श्रुतिः प्राह तच्च सर्वे जना विदुः ३४ न दुःखाभावमात्रेण
सुखं लोष्टशिलादिषु द्वयाभावस्य दृष्टत्वादिति चेद्विषमं वचः ३५ मुखदैन्यविकासाभ्यां परदुःख
सुखोहनं दैन्याद्यभावतो लोष्टे दुःखाद्यूहो न संभवेत् ३६ ॥

चार इति शंकते न दुःखाभावमात्रेण सुखं कल्पयितुं न शक्यते लोष्टशिलादिषु द्वयाभावस्य सुखदुःखयोरभावस्य दर्श
नादित्यर्थः दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यान्मैवमिति परिहरति विषममिति वचो दृष्टान्तवचनं विषमं दार्ष्टान्तिकाननुसारी
त्यर्थः ३५ दृष्टान्तस्याननुकूलत्वमेवोपपादयति मुखेति अन्यनिष्ठयोर्दुःखसुखयोरूहनं यथाक्रमं मुखदैन्यविकासाभ्यामित्यनकर्त्त
व्यमयं दुःखी विषण्णवदनत्वात्संप्रतिपन्नवत् अयं सुखी प्रसन्नवदनत्वात्संप्रतिपन्नवदित्यर्थः भवत्वेवं लोके प्रकृते किमायातमित्यत आह
दैन्येति लोष्टादौ मुखदैन्यादिलिंगाभावात् दुःखसुखयोरूहनमेव न संभवति अतस्तत्र दुःखाभावोपि न निश्चेतुं शक्यत इत्यर्थः ३६ ॥

117

इदानीं परकीयसुखदुःखाभ्यां स्वकीयसुखदुःखयोर्वैषम्यं दर्शयति स्वकीयेति स्वनिष्ठयोस्तु सुखदुःखयोरनुभवसिद्धत्वान्नानुमेयत्वं यतस्ततस्तयोः सुखदुःखयोर्भावः सद्भावो यथानुभूत्यैव वेद्यः प्रत्यक्षेणावगम्यते तथा तदभावोऽपि तयोः सुखदुःखयोरभावोऽपि नान्यतोऽन्यस्मादनुमानादेर्नावगम्यते किं तु प्रत्यक्षेणैवेत्यर्थः ३७ फलितमाह तथा सतीति तथा सति स्वकीयस्य दुःखादेरनुभवगम्यत्वे सति स्वसुखे स्वकीयसुखभावेऽपि विद्यमाने दुःखाभावोऽनुभवेनैव सिद्धः ततोऽपि किं तत्राह विरोधीति सुखे सुखविरोधिनो दुःखस्याभावान्निर्विघ्नं बाधारहितं सुखमिष्यतामभ्युपेयतां ३८ शय्यादिसुखसाधनसम्पादनाम्यथा

स्वकीयसुखदुःखे तु नोऽनुमेये ततस्तयोः भावो वेद्योऽनुभूत्यैव तदभावोऽपि नान्यतः ३७ तथा सति स्वसुखे च दुःखाभावोऽनुभूतितः विरोधिदुःखराहित्यात्सुखं निर्विघ्नमिष्यतां ३८ महत्तरप्रयासेन मृदुशय्यादिसाधनम् कुतः संपाद्यते सुखे सुखं चेत्तत्र नो भवेत् ३९ दुःखनाशार्थमेवैतदिति चेद्रोगिणस्तथा भवत्वरोगिणस्त्वेतत्सुखायैवेति निश्चितम् ४० ॥

नुपपत्त्यापि सुखे सुखमस्तीत्यवगम्यते इत्याह महतरेति तत्र तस्मात् सुखे सुखं न भवेच्चेन्महत्तरप्रयासेन बहुवित्तव्ययशरीरपीडादिना मृदुकोमलशय्यादिका शिशुमंचादिसुखसाधनं कुतः कस्मात्कारणात्संपाद्यते न कुतोऽपीत्यर्थः ३९ अर्थापत्तेरन्यथोपपत्तिं शंकते दुःखेति यतच्छय्यादिसाधनसम्पादनं दुःखनिहन्ति फलकं तन्नियतमिति परिहरति रोगिण इति रोगादिदुःखसति तन्निहन्तये तद्भवतु तदभावे तन्निहन्त्य दुःखाभावात्तत्संपादनं सुखायैवेत्यवगम्यत इत्यर्थः ४० ॥

पं॰टी॰
११८

ननु सौषुप्तसुखस्य शय्यादिसाधनजन्यत्वे आत्मस्वरूपत्वं व्याहन्येतेति शङ्कते नहीति किं निद्रागमनात्पूर्वकालीनस्य विषयजन्यत्वमुच्य
ते उत निद्राकालीनस्येति विकल्प्याद्यमङ्गीकरोति भवत्विति ५२ द्वितीयं निराकरोति निद्रायामिति समोऽशय्याद्यनुसंधानाभावान्न
जन्यत्वं तस्य न सम्भवतीति भावः ननु निद्रायामजन्यं सुखं यद्यस्ति तर्हि तद्विषयसुखवत् कुतो नानुभूयत इत्याशङ्क्यानुभवितु
स्तदा तस्मिन्निमग्नत्वान्न विषयसुखवत्तदनुभवः स्यादित्यभिप्रायेणाह सुखेति आदौ निद्रायाः पूर्वस्मिन्काले जीवः सुखाभि

118

तर्हि साधनजन्यत्वात्सुखं वैषयिकं भवेत् भवत्वेवात्र निद्रायाः पूर्वं शय्यासनादिजं ५१ निद्रा
यां तु सुखं यत्तज्जन्यते केन हेतुना सुखाभिमुखधीरादौ पश्चान्मज्जेत्परे सुखे ५२ जाग्रद्व्यापृ
तिभिः श्रान्तो विश्रम्याप्य विरोधिनि अपनीते स्वस्य चित्तेऽनुभवेद्विषये सुखं ५३ ॥

सुखधीः शय्यादिजन्यसुखाभिमुखबुद्धिर्यस्य स तथोक्तः तथाविधो भवति पश्चान्निद्राकाले परे उत्कृष्टे सुखे स्वरूपसुखे मज्जेल्लि
नो भवेत् ५२ संक्षेपेणोक्तमर्थं श्लोकत्रयेण प्रपञ्चयति जाग्रद्व्यापृतिभिरित्यादिना जीवो जाग्रद्व्यापृतिभिर्जागरणावस्थायां क्रि
यमाणैर्व्यापारविशेषैः श्रान्तो विश्रम्य मृदुशय्यादौ शयनं कृत्वा अथानन्तरं विरोधिनि व्यापारजनिते दुःखे अपनीते निवारिते
सति स्वस्य चित्तः अव्याकुलमना भूत्वा शय्यादौ विषये जायमानं सुखमनुभवेत्साक्षात्कुर्यात् ५३ ॥

विषयसुखं कीदृशमित्याकांक्षायां तत्स्वरूपं प्रदर्शयन् परेऽह्न्येव निमज्जननिमित्तत्वेन तदनुभवेऽपि श्रमं दर्शयति अमोति अना-
गतविषयसंपादनादिना दुःखमनुभूय तन्निवृत्तये परिश्रमशय्यादौ शयानस्य बुद्धिरंतर्मुखा भवति तस्यां च बुद्धिवृत्तौ स्वस्वरूपभू-
तस्यानन्दः स्वाभिमुखे दर्पणे मुखमिव प्रतिबिंबति एष हि विषयानंदोऽत्रापि अस्यामपि वेलायां पुनः विषयानंदमनुभू-
य अनुभवितुरनुभवानुभाव्यलक्षणया त्रिपुट्याः साम्यं प्राप्नुयात् ४४ ततः किं तत्राह तद्ब्रह्मस्थेति तत्र त्रिपुटीदर्शनजनित-
श्रमस्यापनोदाय स एव जीवः परमात्मन्यानंदरूपे ब्रह्मणि यावत् स्थितिं गच्छेत् तावता च तेन ब्रह्मणैक्यं तादात्म्यं गतवान् स-
ता सोम्य तदा संपन्नो भवतीति श्रुतेः स्वयमपि तत्पत्तस्यास्तूष्णीं स्थितो ब्रह्मानंदो भवेत् ४५ अस्मिन्नुपपादिते सो-

आत्माभिमुखधीवृत्तौ स्वानंदः प्रतिबिंबति अनुभूयैनमत्रापि त्रिपुट्याः शांतिमाप्नुयात् ४४
तद्ब्रह्मस्थापनस्यार्थे जीवो यावत्परात्मनि तेनैक्यं प्राप्यते तस्यो ब्रह्मानंदः स्वयं भवेत् ४५ दृ-
ष्टांताः शाकुनिः श्येनः कुमारश्च महान्नृपः महाब्राह्मण इत्येते सुप्त्यानंदे श्रुतीरिताः ४६ शाकु-
निः सूत्रबद्धः सन् दिक्षु व्याप्त्या विश्रमं अलब्ध्वा बंधनस्थाने हस्तस्तंभमुपाश्रयेत् ४७ ॥

सुप्तेश्चानंदे शाकुन्यादयो बहवो दृष्टांताः श्रुत्युक्ता विद्यंत इत्याह दृष्टांता इति शाकुन्यादिभिः पंचभिर्दृष्टांतैः सुप्तावानं-
दोपपादनेन तत्र सुखं नास्तीति मतं निराकृतं ४६ तत्र तावत्सयथा शाकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रा-
यतनमलब्ध्वा बंधनमेवोपाश्रयते एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपा-
श्रयते प्राणबंधनं हि सोम्य मन इत्यस्य दृष्टांतदार्ष्टांतिकप्रतिपादनपरस्य छांदोग्यश्रुतिवाक्यस्यार्थं संक्षेपेण दर्श-
यति श्लोकद्वयेन शाकुनिरित्यादिना हस्तादौ कचिदाधारे सूत्रेण बद्धः शाकुनिः पक्षी आहारादिग्रहणाय दिक्षु प्राच्यादि-
षु व्यापारं कृत्वा तत्र विश्रमं विश्रम्यतेऽस्मिन्निति विश्रमः आधारस्तमलब्ध्वा बंधनस्थानं हस्तादिकमेव यथाश्रयेत् ४७ ॥

तथा जीवोपाधिभूतं मनोऽपि पुण्यापुण्यफलयोः सुखदुःखयोरनुभवाय स्वप्नजाग्रदवस्थयोस्तत्रतत्र भ्रान्त्वा तत्तद्भोगप्रदे कर्मणि क्षी
णे सति स्वोपादानेऽज्ञाने विलीयते तल्लये च तदुपहितो जीवः परमात्मैव भवतीत्यर्थः ४८ इदानीं श्येनदृष्टान्तप्रपञ्चनपरस्य तद्यथास्मि
न्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ स्वालयायैव धावते एवमेवायं पुरुष एतस्मा आनन्दाय धावति यत्र सुप्तो
न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीत्यस्य बृहदारण्यकवाक्यस्यार्थं संक्षिप्याह श्येन इति यथाकाशे सर्वतः प्रचरन् श्ये
नपक्षी श्रमापन्नो गगने संचारनिमित्तश्रमपरिहाराय शायितुं शयनं कर्तुं नीडैकलंपटः कुलायैकाभिलाषवान् स्वापाय व्रजे

जीवोपाधिर्मनस्तद्वद्धर्माधर्मफलाप्तये स्वप्ने जाग्रति च भ्रान्त्वा क्षीणे कर्मणि लीयते ४८ श्येनो
वेगेन नीडैकलंपटः शायितुं व्रजेत् जीवः सुप्तौ तथा धावेद्ब्रह्मानन्दैकलंपटः ४९ अतिबालः स्त
नं पीत्वा मृदुशय्यागतो हसन् रागद्वेषाद्यनुत्पत्तेरानन्दैकस्वभावभाक् ५० महाराजः सार्वभौ
मः संतृप्तः सर्वभोगतः मानुषानन्दमासीमं प्राप्यानन्दैकमूर्तिभाक् ५१ ॥

त्सुप्तौ ब्रह्म गच्छेत्तद्वदेव जीवो मनउपाधिकश्चिदाभासोऽपि ब्रह्मानन्दैकाभिलाषवान् स्वापाय सुप्तौ ब्रह्म गच्छेत् हृदयाकाशमिति शेषः ४९ स
यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते इति कुमारादिदृष्टान्तत्रयप्रदर्श
नपरं बालाकिब्राह्मणगतं वाक्यं श्लोकत्रयेण व्याचष्टे अतिबाल इत्यादिना यथा स्तनंधयः शिशुरागलं स्तनं पीत्वा मृत्वादिना गुणयो
गिनि तल्पे शायितः स्वकीयादिज्ञानशून्यत्वेन रागादिरहितः सन् सुखमूर्तिरेवावतिष्ठते ५० यथा वा सार्वभौमो राजा विशदबुद्धि
तोऽपि सर्वैर्मानुषानन्दैर्युक्तत्वात्प्रार्थनीयाभावेन रागादिरहितः सन् आनन्दमूर्तिरेवावतिष्ठते ५१ ॥

यथा वा महाविप्रो महाब्राह्मणः प्रत्यगभिन्नब्रह्मसाक्षात्कारवानहं कृतकृत्य इत्येवंरूपां विद्यानंदस्य परमां सीमां जीवन्मुक्ततां प्राप्तः परमानंदस्वरूप एवावतिष्ठते तथा सुप्तोप्यानंदरूपस्तिष्ठतीति भावः ५२ नन्वेते कुमारादयस्तु यथैव किमिति दृष्टान्तीकृताः नाऽन्ये इत्याशंक्य दृष्टान्तत्रयोदाहरणतात्पर्यमाह मुग्धेति विवेकशून्यानां मध्येऽतिबालः सुखी विवेकिषु सार्वभौमोऽति विवेकिष्वानंदात्मसाक्षात्कारवानेव कृत्यपरेषु सर्वदा रागादिमत्वाद् दुःखिन इति दृष्टान्तीकृता इत्यर्थः ५३ भवन्त्वेते सुखिनः प्रकृते किमायातमित्याशंक्य दार्ष्टान्तिकश्रुतिवाक्यस्य तात्पर्यमाह कुमारादिवदिति कुमारादिवत्कुमारादयो यथानंदभाज एवमयमपि सुषुप्तौ ब्रह्मानंदैकतत्परः ब्रह्मानंदैकभागित्यर्थः ब्रह्मानंदैकपरत्वे युक्तिप्रदर्शनपरं तद्यथाप्रि

महाविप्रो ब्रह्मवेदी कृतकृत्यत्वलक्षणां विद्यानंदस्य परमां काष्ठां प्राप्यावतिष्ठते ५२ मुग्धबुद्धातिबुद्धानां लोके सिद्धा सुखात्मता उदासीनानामन्ये तु दुःखिनो न सुखात्मकाः ५३ कुमारादिवदेवायं ब्रह्मानंदैकतत्परः स्त्रीपरिष्वक्तवन्न वेद न बाह्यं नापि चान्तरं ५४ बाह्यं रथ्यादिकं वृत्तं गृहकृत्यं यथान्तरं तथा जागरणं बाह्यं नाडीस्थः स्वप्न आन्तरः ५५ ॥

यथा स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति श्रुतिर्ब्रह्मलोकगतं वाक्यमर्थतोऽनुक्रामति स्त्रीति यथा लोके प्रियया स्त्रियालिंगितः कामी बाह्याभ्यन्तरविषयज्ञानशून्यत्वात्सुखमूर्तिर्भवति तथा सुषुप्तौ प्राज्ञेन परमात्मनैक्यं गतो जीवो बाह्यादिविषयज्ञानाभावादानंदरूप एव भवति ५४ श्रुतदृष्टान्तदार्ष्टान्तिकवाक्यस्थयोर्बाह्याभ्यन्तरशब्दयोर्विवक्षितमर्थं क्रमेण दर्शयति बाह्यमिति वृत्तं वृत्तान्तं नाडीस्थो जाग्रद्वासनया नाडीमध्ये प्रतीयमानः प्रपंचः स्वप्न उच्यते ५५ ॥

पं॰टी॰
१२०

जीवः सुप्तौ ब्रह्मानन्दरूपे लीनो वा वर्तत इत्येतस्य युक्तिप्रदर्शनपरायाः अत्र पितापिता भवतीत्यादिकायाः श्रुतेः तात्पर्यमाह पितापीति अत्र सुप्ता
वाध्यासिकानां पितृत्वादिजीवधर्माणां श्रुत्यैव निवारितत्वाज्जीवत्वाप्रतीतौ ब्रह्मत्वेनैवावशिष्यत इत्यर्थः ५६ ननु पितृत्वाद्यभिमानाभावेऽपि दुः
खित्वादिसंसारः किं न स्यादित्याशङ्क्य संसारस्य देहाभिमानमूलत्वात्तदभावेऽभाव इति मन्वानः तत्प्रतिपादकं तीर्णो हि तदा सर्वाञ्छोकान्हृद
यस्य भवतीति समनन्तरवाक्यं तात्पर्यतो व्याचष्टे पितृत्वादीति ५७ ननूदाहृताभिः श्रुतिभिर्न सुखप्राप्तिर्दुःखनिवृत्तिर्वाभिधीयमानोपलभ्यत

120

पितापि सुप्तावपितेत्यादौ जीवत्ववारणात् सुप्तौ ब्रह्मैव नो जीवः संसारित्वासमीक्षणात् ५६ पितृ
त्वाद्यभिमानो यः सुखदुःखाकरः स हि तस्मिन्नपगते तीर्णः सर्वाञ्छोकान्भवत्ययं ५७ सुषुप्ति
काले सकले विलीने तमसावृतः सुखरूपमुपैतीति ब्रूते ह्याथर्वणी श्रुतिः ५८ सुखमस्वाप्सम
त्राहं नैव किंचिदवेदिषं इति दृष्टसुखाज्ञाने परामर्शाति चोत्थितः ५९ ॥

इत्याशङ्क्य तथाभिधानपरं कैवल्यश्रुतिवाक्यमर्थतः पठति सुषुप्तीति सकले जाग्रदादिलक्षणे प्रपञ्चे विलीने स्वोपादानभूता
यां तमःप्रधानायां प्रकृतौ विलयं गते सति तमसा तया प्रकृत्या आवृत आच्छादितो जीवः सुखरूपं ब्रह्मोपैतीति तस्याः श्रुतेरर्थः ५८
न केवलमयं श्रुतिसिद्धोऽर्थः किं तु सर्वानुभवसिद्धोऽपीत्याह सुखमिति सुषुप्तादुत्थितः पुरुषः एतावन्तं कालं सुखमस्वाप्सं न किंचि
दवेदिषमित्येवं निद्राकालीने सुखाज्ञाने परामृशति स्मरति अतोऽपि सुषुप्तौ सुखमस्तीत्यवगम्यते ५९ ॥

ननुपरामर्शस्याऽप्रमाणत्वात्कथं तद्बलात्सुखसिद्धिरित्याशङ्क्य तस्याऽप्रामाण्येऽपि तन्मूलभूतानुभवबलात्तत्सिद्धिरित्यभिप्रायेणाह परामर्श इ
ति परामर्शः स्मरणज्ञानं अनुभूतएव विषये भवति नाननुभूतविषये इत्यस्माद्धेतोस्तदा सुषुप्तौ अनुभव आसीदित्यवगम्यते ननु सुषुप्तौ मनः
सहितानां ज्ञानकरणानां विलीनत्वात्कथमनुभवसिद्धिरित्याशङ्क्य किं सुखानुभवसाधनं नास्तीत्युच्यतेऽज्ञानानुभवसाधनं सुषुप्तौ मनः
सहितानां ज्ञानकरणानां विलीनत्वात्कथमनुभवसिद्धिरित्याशङ्का किं सुखानुभवसाधनं नास्तीत्युच्यतेऽज्ञानानुभवसाधनं वा नाद्यः
स्वप्रकाशचिद्रूपत्वेन सुखस्य करणाऽनपेक्षत्वात् न द्वितीयः स्वप्रकाशसुखबलादेव तदावरकाऽज्ञानप्रतीतिसिद्धेरित्यभिप्रा
येणाह चिदात्मत्वादिति ततः स्वप्रकाशसुखादज्ञानधीरज्ञानस्य प्रतीतिर्भवतीति ८० ननु सौषुप्तस्य सुखस्य स्वप्रकाशसुखत्वेऽपि ब्र
ह्मानन्दः स्वयं भवेदित्युक्तं ब्रह्मरूपत्वं न संभवति मानाऽभावादित्याशङ्क्य विज्ञानमानन्दं ब्रह्मेत्यादि बृहदारण्यकवाक्यसद्भावान्मैवमित्या

परामर्शोऽनुभूतेऽस्तीत्यासीदनुभवस्तदा चिदात्मत्वात्स्वतो भाति सुखमज्ञानधीस्ततः ८० ब्रह्मवि
ज्ञानमानन्दमिति वाजसनेयिनः पठन्त्यतः स्वप्रकाशं सुखं ब्रह्मैव नेतरम् ८१ यदज्ञानं तत्र लीनौ
तौ विज्ञानमनोमयौ तयोर्हि विलयावस्था निद्राज्ञानं च सैव हि ८२ ॥

ह ब्रह्मेति ८१ नन्वनुभवस्मरणयोरेकाधिकरणत्वनियमात्सुखमहमस्वाप्सं न किंचिदवेदिषमिति च सौषुप्तसुखाज्ञानयोर्विज्ञानम
यशब्दवाच्येन जीवेन स्मर्यमाणत्वात्तस्यैव सुखाद्यनुभवितृत्वं वक्तव्यमित्याशङ्क्य तदुपाधेर्विज्ञानस्याज्ञानकार्यस्याऽज्ञाने विलीन
त्वान्मैवमित्यभिप्रायेणाह यदज्ञानमिति न किंचिदवेदिषमिति स्मरणान्यथानुपपत्त्यागम्यमानं यदज्ञानमस्ति तत्र तस्मिन्नज्ञा
ने तौ प्रमातृप्रमाणत्वेन प्रसिद्धौ विज्ञानमनोमयौ लीनौ विज्ञानत्वाद्याकारं परित्यज्य कारणरूपेणावस्थितौ अतस्तदुपाधिकस्य
नानुभवितृत्वमिति भावः तत्रोपपत्तिमाह तयोर्हीति हि यस्मात्कारणात्तयोर्विज्ञानमनोमययोर्विलयावस्था निद्रेत्युच्यते
विज्ञानाविरतिः स्वप्तिरित्यभिधानात्तर्हि निद्रायामेव विलीनाविति वक्तव्यमित्याशङ्क्याह अज्ञानं चेति सैव निद्रा विहङ्गिर
ज्ञानमिति व्यवह्रियत इत्यर्थः ८२ ॥

ननु तर्हि सौषुप्तसुखस्यानुभवकालेऽसतो विज्ञानमयस्य प्रबोधे कथं न स्मर्तृत्वमित्याशंक्य विलयावस्थायामपि तत्स्वरूपनाशाभावाद्विलयावस्थोपाधिमदानंदमयरूपेणानुभवितृत्वं विज्ञानमयशब्दवाच्यघनीभावोपाधिमत्त्वेन स्मर्तृत्वं चैकस्यैवेत्यभिप्रायेणाह विलीनेति यथाग्निसंयोगादिना विलीनं घृतं पश्चाच्छायादिसंबंधवशाद्घनीभवति एवं जाग्रदादिभोगप्रदस्य कर्मणः क्षयवशान्निद्रारूपेण विलीनमंतःकरणं पुनर्भोगप्रदकर्मवशात्प्रबोधे विज्ञानाकारेण घनीभवत्यतस्तदुपाधिकत्वाद्विज्ञानमयो घनः स्यात्तद्

विलीनघृतवत्पश्चात्स्याद्विज्ञानमयो घनः विलीनावस्थ आनंदमयशब्देन कथ्यते ८३ सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिंबिता सैव तद्बिंबसहिता लीनानन्दमयस्ततः ८४ अन्तर्मुखो य आनन्दमयो ब्रह्मसुखं तदा भुंक्ते चिद्बिंबयुक्ताभिरज्ञानात्मकवृत्तिभिः ८५ ॥

वस्थो विलयावस्थोपाधिकः स आनंदमयशब्देनोच्यते ८३ विलीनावस्थानंदमयशब्दोक्तमेवार्थं स्फुटीकरोति सुप्तीति सुप्तेः पूर्वस्मिन्नव्यवहिते क्षणे याऽन्तर्मुखा बुद्धिवृत्तिः सुखरूपब्रह्मसुखप्रतिबिंबयुक्ता भवति ततोऽनंतरं तत्प्रतिबिंबसहिता सैव वृत्तिर्निद्रारूपेण विलीना आनंदमयशब्देनाभिधीयते ८४ एवमानंदमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेण स्मर्तृत्वं सिद्ध्यतीति तदानीं सुखानुभवमुपपादयति अन्तर्मुख इति सुखप्रतिबिम्बसहितान्तर्मुखवृत्तीहितजनितसंस्कारसहिताज्ञानोपाधिको य आनंदमयः स तदा सुषुप्तौ ब्रह्मसुखं स्वरूपभूतं सुखं चिदाभाससहिताभिरज्ञानाद्यन्यत्राभिः सुखादिगोचराभिर्वृत्तिभिः सत्त्वपरिणामविशेषैर्भुंक्तेऽनुभवति ८५ ॥

ननु तर्हि जागरण इव तदानीं सुखमनुभवामीत्यभिमानः कुतो न स्यादित्याशंक्याविद्यावृत्तीनां बुद्धिवृत्तिवत्स्पष्टत्वाभावादित्यभिप्रायेणाह अज्ञानेति इदं कुतोऽवगतमित्यत आह इतीति ८६ तत्वानन्दमयो ब्रह्मानन्दं सूक्ष्माभिरविद्यावृत्तिभिर्भुंक्ते इत्यत्र किं मानमित्यत आह आनन्दमयेति ८७ इदानीं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानंदभुक् चेतोमुख इति माण्डूक्यादिश्रुतिगतं वाक्यमर्थतः पठति एकीभूत इति सुषुप्तं सुषुप्तिस्थलं तत्र तिष्ठतीति सुषुप्तिस्थः सुषुप्त्यभिमानी इत्यर्थः आनंदमय आनंदप्रचुरः आनंदभुक् स्वस्वरूपभूतमानन्दं भुंक्ते इत्यानंदभुक् चेतोमयवृत्तिभिश्चेतश्चैतन्यं तन्मयास्तत्प्रचुराश्चित्प्रतिबिं

अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बुद्धिवृत्तयः इति वेदान्तसिद्धान्तपारगाः प्रवदन्ति हि ८६ माण्डूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटम् आनंदमये भोक्तृत्वं ब्रह्मानंदे च भोग्यता ८७ एकीभूतः सुषुप्तस्थः प्रज्ञानघनतां गतः आनंदमय आनंदभुक् चेतोमयवृत्तिभिः ८८ विज्ञानमयमुख्यैर्यो रूपैर्युक्तः पुराधुना स लयेनैकतां प्राप्तो बहुतण्डुलपिष्टवत् ८९ ॥

बसहिता इत्यर्थः तादृशाभिर्वृत्तयश्चेतोमयवृत्तयस्ताभिरानंदभुगिति योजना ८८ तद्वाक्यगतस्यैकीभूत इति पदस्यार्थमाह विज्ञानेति यस्त्वात्मा पुरा जागरणावस्थायां विज्ञानमयमुख्यैः स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमय इत्यादिश्रुत्युक्तैराकारविशेषैर्युक्तोऽभूत्स एवाधुना लयेन विज्ञानमयाद्युपाधिविलयेन एकतामेकाकारतां प्राप्तो गतो भवति तत्र दृष्टान्तमाह बहुतण्डुलेति बहुतण्डुलजनितपिष्टवदित्यर्थः ८९ ॥

अथ प्रज्ञानघनशब्दार्थमाह प्रज्ञानानीति पुरा पूर्वं जाग्रदादौ प्रज्ञानशब्दवाच्या घटादिगोचराः या बुद्धिवृत्तयो भवन्नथ सुषुप्तिकाले घटादिविषयाभावे सति घनो भवत् बिंदुरूपेणैकरूपोऽभवत् तत्र दृष्टांतमाह घनत्वमिति ७० इदानीं प्रज्ञानघनशब्दार्थनिरूपणप्रसंगादागतं किंचिदाह तद्घनत्वमिति यदिदं वेदांतेषु साक्षित्वेनाभिधीयमानं प्रज्ञानघनत्वमस्ति तदेव लौकिकाः शास्त्रसंस्काररहितास्तार्किका वैशेषिकादयः शास्त्रिणश्च दुःखाभावं प्रचक्षते तेषु दुःखाभावस्याक्रांतत्वमत आह यावदिति यावत्योऽद्युःखवृत्तयस्तासां सर्वासां विलयादित्यर्थः ७१ एवं शास्त्रानुक्तिवाक्यगतं चेतोमुखशब्दार्थमाह अज्ञानेति आनंदभोजने सौषुप्तब्रह्मानंदाख्यानंदे मुखं साधनं अज्ञानविंबिता

अज्ञानानि पुरा बुद्धिवृत्तयोऽथ घनो भवत् घनत्वं हिमबिंदूनामुदग्देशे यथा तथा ७० तद्घनत्वं साक्षिभावं दुःखाभावं प्रचक्षते लौकिकास्तार्किका यावद्दुःखवृत्तिविलापनात् ७१ अज्ञानविंबिता चित्स्यान्मुखमानंदभोजने भुक्त्वा ब्रह्मसुखं त्यक्त्वा बहिर्यात्यथ कर्मणा ७२ कर्मजन्मांतरेऽभूद्यत्तद्योगाद्बुध्यते पुनः इति कैवल्यशाखायां कर्मजो बोध ईरितः ७३ ॥

चित्स्यादज्ञानवृत्तौ प्रतिबिंबितं चैतन्यमेव भवेत् ननु सुषुप्तावानंदमयरूपेण जीवेन ब्रह्मसुखं चेद्भुज्यते तर्हि तत्परित्यज्य कुतो जागरणं दुःखालयं गच्छेदित्यत आह भुक्त्वेति पुण्यापुण्यकर्मपाशबद्धत्वात्तेन प्रेरितो जीवः साक्षात्कृतमपि ब्रह्मानंदं परित्यज्याथ बहिर्याति जागरणादिकं गच्छतीत्यर्थः ७२ एतत्कुतोऽवगम्यत इत्याशंक्य पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्ध इति कैवल्यश्रुतिवाक्यादिति मन्वानस्तद्वाक्यमर्थतः पठंस्तदभिप्रायमाह कर्मेति ७३ ॥

रूपोब्रह्मानंदोनुभूयत इत्यत्र लिंगं चाह किंचिदिति प्रबुद्धस्य जागरणं प्राप्तस्यापि किंचित्कालं स्वल्पकालपर्यंतं सुषुप्तावनुभूतस्य ब्रह्मानंदस्य वासना संस्कारानुगच्छेदनुगच्छति कुत एतदवगम्यते इत्यत आह यत इति यतः कारणात्स्वबोधादौ निर्विषयो विषयानुभवरहितोपि सुखी तूष्णीमास्ते अतोवगम्यते ७४ तर्हि तथैव तूष्णींकतो नावतिष्ठते इत्यत आह कर्मभिरिति कर्मभिः पूर्वोक्तैः प्रेरितः सर्वोपि प्राणी पश्चान्नानाविधान्यपि दुःखान्यनुसंदधानः शनैर्ब्रह्मानंदं विस्मरति ७५ अतोपि ब्रह्मानंदे न विप्रतिपत्तिः कार्येत्याह प्रागिति प्रत्यहं मनुष्याणां निद्रायाः प्रागूर्ध्वमपि निद्रारम्भे निद्रावसाने च ब्रह्मानंदे स्नेहोस्ति यतो निद्रादौ मृदुशय्यादि संपादयंति तदवसाने च तं

किंचित्कालं प्रबुद्धस्य ब्रह्मानंदस्य वासना अनुगच्छेद्यतस्तूष्णीमास्ते निर्विषयः सुखी ७४ कर्मभिः प्रेरितः पश्चान्नानादुःखानि भावयन् शनैर्विस्मरति ब्रह्मानंदमेषोखिलो जनः ७५ प्रागूर्ध्वमपि निद्रायाः पक्षपातो दिने दिने ब्रह्मानंदे नृणां तेन प्राज्ञोस्मिन् विवदेत कः ७६ ननु तूष्णीं स्थितो ब्रह्मानंदश्चेद्भाति लौकिकाः आलस्याद्यास्तथा तेषां शास्त्रेण गुरुणा नु किं ७७ वाढं ब्रह्मेति विद्युस्ते कृतार्थास्तावतैव ते गुरुशास्त्रे विनात्यंतं गंभीरं ब्रह्म वेत्ति कः ७८ ॥

परित्यक्तुमशक्तस्तूष्णीमासनेतेन कारणेनास्मिन्ब्रह्मानंदे कः बुद्धिमान् विवदेत न कोपीत्यर्थः ७६ चोदयति नन्विति गुरुशुश्रूषादिलभ्यस्य ब्रह्मानंदानुभवस्य तूष्णीं स्थितिमात्रलभ्यत्वे गुरुशुश्रूषादिपूर्वकश्रवणादिकं वृथा स्यादित्यर्थः ७७ अयं ब्रह्मानंद इति ज्ञाते सति भवत्येव कृतार्थता न तदेव गुरुशुश्रूषादिकमन्तरेण न संभवतीत्याह वाढमिति अत्यंतगम्भीरं दुरवगाहमवाङ्मनसगम्यं सर्वज्ञं सर्वांतरं सर्वात्मरूपं ब्रह्म गुरुशास्त्रे विहायान्येन केनापि उपायेन को जानीयान्न कोपीत्यर्थः ७८ ॥

ननु त्वद्वाक्यादेव ब्रह्मानंदं जानतोऽपि मम न कृतार्थतोपलभ्यत इत्याशंक्यानुवादपूर्वकं सोपहासमुत्तरमाह जानामीति ७९ तमेव वृत्तांतं दर्शयति चतुर्वेदेति कश्चिच्चतुर्वेदविदे कस्मैचिद्धनं दातव्यमित्येवंविधं वाक्यं श्रुत्वा वेदाश्चत्वार इत्येतस्मादेव वाक्यादहं वेद्मि अतो दीयतामिति वक्ति न ह्यन्यद्वान पीत्यर्थः ८० ननु वेदाश्चत्वार इति यो वेद स वेदगतां संख्यामेव वेद न तु वेदानां स्वरूपमिति चोदयति संख्यामिति साम्येन समाधत्ते यदि तर्हीति एवं चतुर्वेदा इत्युक्तमात्रेण त्वमप्यशेषं संपूर्णं यथा भवति तथा ब्रह्म न वेत्सि नैव जानासि ८१ ननु संख्यातिरिक्तवेदस्वरूपभेदवद्ब्रह्मगतादिभेदशून्ये आनंदरूपे ब्रह्मणि अज्ञायमानस्याशेषस्याभावात्संपूर्णं ज्ञानं तत्वोपालंभो न घटत इति चोदयति अखं

जानाम्यहं त्वदुक्त्याऽतो मे न कृतार्थता शृण्वत्र त्वादृशो वृत्तं प्राज्ञंमन्यस्य कस्यचित् ७९ चतुर्वेदविदे देयमिति श्रुत्वाऽवोचत वेदाश्चत्वार इत्येवं वेद्मि मे दीयतां धनम् ८० संख्यामेवैष जानाति न तु वेदानशेषतः यदि तर्हि त्वमप्येवं नाशेषं ब्रह्म वेत्सि हि ८१ अखंडैकरसानंदे मायातत्कार्यवर्जिते अशेषत्वसशेषत्ववार्तावसरः कुतः ८२ शब्दानेव पठस्याहो तेषामर्थं च पश्यसि शब्दपाठेऽर्थबोधस्ते संपाद्यस्तेन नाशिष्यते ८३ अर्थे व्याकरणाद्बुद्धे साक्षात्कारोऽवशिष्यते स्यात्कृतार्थत्वधीर्यावत्तावद्गुरुमुपास्यताम् ८४ ॥

डेति ८२ ब्रह्मज्ञानेऽप्यशेषत्वादिकं दर्शयितुं ब्रह्म जानामीति वदंतं विकल्प्य पृच्छति शब्दानिति किमखंडैकरसमद्वितीयं सच्चिदानंदरूपमित्यादिशब्दानेव पठसि आहो अथवा तेषां शब्दानामर्थं स्वगतादिभेदशून्यत्वादिकं च पश्यसि जानासीति विकल्पार्थः आद्ये पक्षे मा वक्षोऽशेषत्वं दर्शयति शब्देति ८३ द्वितीयेऽपि तं दर्शयति अर्थ इति व्याकरणादिपदलक्षणं निगमादेः व्याकरणादिना परोक्षज्ञाने संपादितेऽपि संशयादिनिरासेनाऽपरोक्षीकरणमवशिष्यते तर्हि कदा संपूर्णत्वं ज्ञानस्येत्याशंक्य तदवधिं दर्शयति स्यादिति यदा कृतार्थत्वबुद्धिः स्यात् तदा ज्ञानस्य संपूर्णतावगंतव्येत्यर्थः ८४ ॥

एवं चासंगिकं परिसमाप्य प्रकृतमेवानुसरति आत्मारामिति यत्र यत्र यस्मिन्यस्मिन्काले तूष्णींभावादौ विषयानुभवमंतरेण सुखं भवति तत्र
तत्र सुखस्य विषयजन्यत्वाभावात् सामान्याहंकाराहतत्वाच्च वासनानंदत्वमवगंतव्यमित्यर्थः ८५ एवं ब्रह्मानंदवासनानंदौ दर्शयित्वा
इदानीमानंदद्वैविध्यनियमाय आत्माभिमुखधीवृत्तावित्यत्रोक्तमेव विषयानंदं पुनरनुवदति विषयेष्विति यदा यदा स्रगादिविषय
लाभात्तत्तदिच्छोपरमो भवति तदा तदा मनस्यंतर्मुखे सति तस्मिन्यः स्वात्मानंदः प्रतिबिंबितो भवत्ययं विषयानंद इत्यर्थः ८८ फलि
तमाह ब्रह्मानंद इति उक्तप्रकारेण स्वप्रकाशतया सुषुप्तौ प्रतिभासमानो यो ब्रह्मानंदो यश्च तूष्णींस्थितौ विषयानुभवमंतरेण
प्रतीयमानो वासनानंदो यो ह्यभीष्टविषयलाभादंतर्मुखे मनसि प्रतिबिंबितो विषयानंद एतत्त्रितयातिरेकेणास्मिन्नु गतिन
कश्चिदानंदोस्ति ननु आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंदश्चेत्युक्तप्रकारेणानंदस्य द्वैविध्यमुक्तमिदानीं तु ब्रह्मा

आत्मारामेन यत्र यत्र सुखं स्याद्विषयैर्विना तत्र सर्वत्र विज्ञेया ब्रह्मानंदस्य वासना ८५ विषयेष्वपि
लब्धेषु तदिच्छोपरमे सति अंतर्मुखमनोवृत्तावानन्दः प्रतिबिंबति ८८ ॥

नंदो वासना च प्रतिबिंब इति त्रयं तत्र हि लक्षणमानंदस्य द्वैविध्यमुच्यतेऽतः पूर्वोत्तरविरोधः किंच यावद्यावदहंकारो विस्मृतोऽभ्यास
योगतः तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयत इति नाटकदीपे तूदासीनकाले ह्यानन्दवासनामुपेक्ष्य सुखमानंदं भावयत्येवं त
त्र इति वैलक्षण्यप्रकारस्तु यातिरिक्तौ निजानंदमुख्यानंदावभिधीयेते तथा द्वितीयाध्याये मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेदि
त्यात्मानंदस्तृतीयोभिधीयते योगानंदः पुरोक्तोयमित्यत्र योगानंदोपि कश्चिदवभासते ब्रह्मानंदाभिधे ग्रंथे तृतीयाध्याय इति तः
ब्रह्मेतानंदप्रवस्यादित्यत्राद्वैतानंदं चान्यमवगच्छामः अतोंतरेण जगत्यस्मिन्नानंदो नास्ति कश्चनेत्युक्तिर्विरुध्येतेति चेन्मैवं वि
यानन्दस्य विषयानंदवदंतःकरणवृत्तिविशेषत्वेन विषयानंदेंतर्भावस्य विषयानन्दवहिश्चानंदो यौ हि ते ॥

पं॰ टी॰
२२५

रूपकस्यमुत्तरत्रयपीहृतिनिरूपणत्वाभिधानेन विवक्षितत्वात्तिजानंदस्य मुख्यानंदात्मानंदयोगानंदाः ऽद्वैतानंदानंतत्वब्रह्मानंदादनतिरिक्तत्वाच्च तथा
हि यावद्यावदहंकार इत्युदाहृते श्लोके योगलक्षणोपायगम्यतयायोगानंदत्वेन विवक्षितस्य निजानंदस्यैव नद्वैतं भासते नाविनिद्रात्तत्रा
त्यितस्व इत्याह भगवानन्तर्जे नं प्रतीत्यस्मिन्नुत्तरश्लोक एव ब्रह्मानंदत्वाभिधानान्निजानंदो ब्रह्मानन्दान्नभिद्यते तथामु
ख्यानंदोपि ब्रह्मानंद एव तथा च विषयानंदो वासनानंद इत्यमूश्चानन्दो जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभ इत्यत्र जन्यत्वेनामुख्यभूत
योर्विषयानंदवासनानंदयोर्जनकत्वेनाभिहितस्य ब्रह्मानंदस्यैव तादृक्सुषुप्त्यादौ दासीनकालेष्वानंदवासनाया येन सुखमा
नंदभावयत्यैव तत्प्रत्यर इति मुख्यानंदत्वाभिधानादात्मानंदाऽद्वैतानंदयोस्तु ब्रह्मानंदत्वं योगस्तु ब्रह्मानंदत्वं योगानंदः पुरोक्तो यः
स आत्मानंद इत्यतो मिनित्तीयाध्यायादौ प्रथमाध्याये यो नंदनयाविवक्षितस्य ब्रह्मानंदस्यैव योगानंदश्चाद्वैतानंदवादपूर्व

ब्रह्मानंदो वासनाच प्रतिबिंब इति त्रयं अंतरेण जगत्यस्मिन्नानंदो नास्ति कश्चन ८७ ॥

कमात्मानंदत्वमभिधाय कथं ब्रह्मत्वमेतस्य सहृदयस्येति वेदिति प्रश्नः सर्वं कर्माकाशादिशरीरांतमित्यादिना ऽद्वितीयस्य
ब्रह्मत्वप्रतिपादनादवगंतव्यं तस्माद् ब्रह्मानंदो वासनाच प्रतिबिंब इत्युक्तं त्रैविध्यस्य सत्यं नन्वत्र हि तत्त्रैववासनानंदाद् ब्रह्मा
नंदादपीतरत्त् वेत्ति योगी निजानंदमित्यत्र निजानन्दस्य ब्रह्मानन्दवासनानंदाभ्यामभेदेनानिर्देशो न निर्देशोतयुज्यत इति नशंक
नीयं एकस्यैव ब्रह्मानंदस्य जगत्कारणराहित्यसाहित्यभेदेन भेदव्यपदेशोपपत्तेः तथा हि ब्रह्मानंदनिरूपणावसरे
आनंदादेव खल्विमानि भूतानि जायंते इत्यादिना जगत्कारणत्वाभिधानेन ब्रह्मानंदस्य मायकत्वमवगम्यते निर्मायस्य ज
गत्कारणत्वानुपपत्तेः निजानंदनिरूपणकालेपि यावद्यावदहंकार इत्यादिना सकारणस्य विलयप्रतिपादनान्निजान
दस्य निर्मायत्वमिति सर्वमनवद्यम् ८७ ॥

न त्वस्मिन् पक्षे ब्रह्मानंदविवेचनस्यैव प्रस्तुतत्वादितरानंदद्वयप्रतिपादनं प्रकृतासंगतमित्याशंक्य तयोर्ब्रह्मानंदजन्यत्वेन तच्छेषोपयोगित्वान्न प्रकृतासंगतमित्यभिप्रायेणाह तथा चेति तथा च एवमानंदत्रैविध्ये सति यः स्वयंप्रकाश आनंदो विषयानंदवासनानंदौ जनयति स ब्रह्मानंदो वेदितव्यः ८८ इदानीमनुसंकीर्तनपूर्वकमुत्तरग्रंथमवतारयति श्रुतीति सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेतीत्यादिभिरुदाहृताभिर्युक्तिभिः सुखमहमस्वाप्समित्यादिपरामर्शान्यथानुपपत्त्यादिभिरनुभूत्या चाचार्योपनिकल्पितेन सोऽहमनुभवेन च सुषुप्तिकाले स्वप्रकाशो ब्रह्मानंदः साधितः अतः परमन्यदा जागरणावस्थायामपि यो ब्रह्मानन्दावगमोपायो वक्ष्यते तं शृण्वित्यर्थः ८९ प्रतिज्ञातमेव ब्रह्मानंदावगमोपायं दर्शयितुं तदुपोद्घातत्वेन सुप्तिमितो जीवस्यावस्थाद्वयप्राप्तिं दर्शय

तथा च विषयानंदो वासनानंद इत्यमू । आनंदौ जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभः ८८ श्रुतियुक्त्यनुभूतिभ्यः स्वप्रकाशचिदात्मके । ब्रह्मानंदे सुप्तिकाले सिद्धे सत्यन्यदा शृणु ८९ य आनंदमयः सुप्तौ स विज्ञानमयात्मताम् । गत्वा स्वप्नं प्रबोधं वा प्राप्नोति स्थानभेदतः ९० नेत्रे जागरणं कंठे स्वप्नः सुप्तिर्हृदंबुजे । आपादमस्तकं देहं व्याप्य जागर्ति चेतनः । देहतादात्म्यमापन्नस्तप्तायःपिंडवत्ततः । अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते ९२ ॥

ति य इति सुप्तौ सुषुप्तिकाले विलीनाचस्य आनंदमयशब्देन कथ्यत इत्युक्तो य आनंदमयः स विज्ञानशब्दाभिधेयबुद्ध्युपाधिमत्त्वेन विज्ञानमयतां प्राप्य स्थानभेदतः वक्ष्यमाणस्थानविशेषयोगेन स्वप्नं जागरणं वा कर्मानुसारेण गच्छति ९० इदानीं जाग्रदाद्यवस्थोपयोगीनि स्थानानि दर्शयति नेत्र इति नेत्रशब्दस्य कृत्स्नदेहोपलक्षणपरत्वमभिप्रेत्य नेत्रे जागरणमित्यंशस्यार्थमाह आपादेति चेतनो जीवः ९१ देहं व्याप्येत्यनेन विवक्षितमर्थं दृष्टान्तप्रदर्शनेन स्पष्टयति देहेति तत्र प्रमाणमाह तत इति यतो मनुष्यत्वादिजातिमता देहेन तादात्म्यं प्राप्नस्ततोऽहं मनुष्य इत्येवं निश्चित्य संशयादिरहितज्ञानेन गृहीत्वैवावतिष्ठते ९२ ॥

पं·टी·
१२५

देहतादात्म्याभिमानहेतुकान्येवावस्थांतराणि दर्शयति उदासीन इति तत्र सुखित्वदुःखित्वयोः कर्मजन्यत्वज्ञानाय विशेषणमाह तयोः सुखदुः
खयोः कर्मैकहेतुत्वं दर्शयति सुखदुःखेति ९३ तयोः सुखदुःखयोर्निमित्तभेदाद्द्वैविध्यमाह बाह्येति तयोरौदासीन्यकदाचित्स्यादित्यत आ
ह सुखेति व्यक्तिभेदविवक्षया बहुवचनं ९४ यदर्थं जाग्रदाद्युपन्यस्तं तदिदानीं दर्शयति नकापीति सर्वोपि जन इदानीं मम कापि
चिंता गृहादिविषया नास्त्यतः सुखं यथा भवति तथा तिष्ठामीति वदन्नौदासीन्यकाले स्वरूपानंदस्फूर्तिं ब्रूतेऽतो जागरणावस्थाया
मपि निजानंदभानमस्तीत्येवं गंतव्यमित्यभिप्रायः ९५ नन्वौदासीन्ये वभासमानस्य निजानंदत्वे तस्य ब्रह्मानंदत्वात्सर्वो

उदासीनः सुखी दुःखीत्यवस्थात्रयमेत्यसौ सुखदुःखे कर्मकार्ये त्वौदासीन्यं स्वभावतः ९३ बाह्यभो
गान्मनोराज्यात्सुखदुःखे द्विधा मते सुखदुःखांतरालेषु भवेत्तूष्णीमवस्थितिः ९४ न कापि चिं
ता मेस्त्यद्य सुखमास इति ब्रुवन् औदासीन्ये निजानंदभानं वक्त्यखिलो जनः ९५ अहमस्मीत्यहं
कारसामान्याच्छादितत्वतः निजानंदो न मुख्योयं किंतु सोपि तस्य वासना ९६ नीरपूरितभांडस्य
बाह्ये शैत्यं न तज्जलम् किंतु नीरगुणस्तेन नीरसत्तानुमीयते ९७ ॥

क्ता वासनानंदता न स्यादित्याशंक्याहंकारसामान्याछन्नत्वान्न ब्रह्मानंदनेति परिहरति अहमिति देवदत्तोहमित्यादिवि
शेषरूपेणाहमस्मीत्येवंरूपेणाहंकारसामान्येनावृतत्वादयं मुख्य इत्यर्थः तर्हि तस्य किंरूपत्वमित्यत आह किंत्विति ९६ मुख्या
नंदातिरिक्ता वासनानंदसद्भावे दृष्टांतमाह नीरेति जलपूर्णकुंभस्य बहिर्भागस्पर्शेनोपलभ्यमानं यच्छैत्यमस्ति तन्नाव ज
लं भवति द्रवत्वानुपलंभात् किं तर्हि तदित्यत आह किंत्विति नीरगुणत्वं कथमवगम्यत इत्यत आह तेनेति विमतं च
टेउपलभ्यमानशैत्यं जलजन्यं भवितुमर्हति शैत्यत्वाज्जले उपलभ्यमानशैत्यवदिति ९७ ॥

125

भवत्येवं नीरन्ध्रमायकत्वं शैत्यस्य प्रकृतत्वे किमायातमित्याशंक्य तद्द्वारा स्वानंदस्याविर्भावानंदानुमायकत्वमायातमित्याह यावदिति
अभ्यासयोगतः ज्ञानमात्मनि महति नियच्छेत् यच्छेच्छान्त आत्मनीति श्रुत्यभिहितनिरोधसमाध्यभ्यासयोगेन यथा यथा यावदहमादिवृ
त्तिविलयवशात्चित्तस्य स्वच्छता जायते तावत्तावन्निजानंदाभिव्यक्तिर्भवतीत्यनुमीयते अयमत्र प्रयोगः अहंकारसंकोचविशेषविशिष्ट
त्वेनाभ्युदितीयादिक्षणः पक्षः स्वपूर्वस्मात्क्षणादधिकनिजानंदाविर्भाववानहंकारसंकोचविशेषयुक्तकालत्वादहंकारसंकोचविशेष
युक्तायन्तक्षणवदिति २८ तर्हि सोऽभ्यासस्य कोऽवधिरित्यत आह सर्वेति तर्हि सा निद्रैव स्यादित्यत आह प्रलीनत्वादिति सर्ववृत्तिविलये
ऽन्तःकरणस्वरूपविलयाभावान्नेयं निद्रा दुष्टः कारणात्मनावस्थानस्य सुषुप्तिरित्याचार्यैरुक्तत्वादित्यर्थः अन्तःकरणस्वरूपविलया

यावद्यावदहंकारो विस्रस्तोऽभ्यासयोगतः तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोऽनुमीयते २८ सर्वा
त्मना विस्रस्तः सन्स्वच्छतोपरमां व्रजेत् प्रलीनत्वान्न निद्रैषा ततो देहोऽपि नोपतेत् २९ न ह्येतंभा
सते नापि निद्रा तत्रास्ति यत्त्वेव स ब्रह्मानन्द इत्याह भगवानर्जुनं प्रति ३० शनैः शनैरुपरमेद्बु
द्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ३१ ॥

भावे लिंगमाह तत इति यत्र स्वस्यादावहंकारविलयस्तत्र देहपातो दृष्ट उक्तस्तदभावादविलीन इति गम्यते २९ फलितमा
ह न ह्येतमिति यस्मिन्काले ह्येतं भाने नास्ति निद्रापि नागच्छति तस्मिन्काले उपलभ्यमानं यत्स्वत्वमस्ति स ब्रह्मानन्द इत्यर्थः अ
यं ब्रह्मानंद इति कुतोऽवगम्यत इत्याशंक्य कस्माद्वाक्यादित्याह इत्याहेति गीतायां षष्ठाध्याये इति शेषः ३० तत्रैकैः श्लोकैरुक्त
वानित्याशंक्य तान् श्लोकान्पठत्यर्थक्रमानुसारेण शनैरिति अयमर्थः धृतिगृहीतया धैर्ययुक्तया बुद्ध्या साधनभूतया शनैः
शनैर्न सहसा उपरमेत् मन उपरतं कुर्यात् किंपर्यन्तमित्यत आह आत्मेति मन आत्मसंस्थमात्मनि संस्थानं सम्यक्स्थि
तिः आत्मन्येवेदं सर्वं न ततोऽन्यत्किंचिदस्तीत्येवंरूपा यस्य तदात्मसंस्थं तथाविधं कृत्वा न किंचिदपि चिन्तयेदेष योगस्य परमोऽवधिः ३१

एतत्संपादने प्रवृत्तो योगी प्रथमं किं कुर्यादित्यत्राह यत इति चंचलं स्वभावदोषात् अत एवाऽस्थिरमेकत्र विषयेऽनियतमेवं विधं मनो यतो यतो यस्माद्यस्माच्छब्दादेर्निमित्तान्निश्चरति निर्गच्छति तदा ततस्ततस्तस्मात्तच्छब्दादेः सकाशान्नियम्य तेषां शब्दादीनां मिथ्यात्वादिदोषदर्शनेनाभावीकृत्य वैराग्यभावनापूर्वकं निरुध्य एतन्मन आत्मन्येव वशं नयेदात्मवश्यतामापादयेत् २ एवं योगमभ्यसतोभ्यासवशादात्मन्येव मनः प्रशाम्यति मनः प्रशांते किं भवतीत्यत आह प्रशांतेति शांतरजसं प्रक्षीणमोहादिक्लेशरजसं अत एव प्रशांतमनसं प्रकर्षेणात्यर्थं शांतं विक्षेपशून्यं मनो यस्य तं ब्रह्मभूतं ब्रह्मैवेदं सर्वमिति निश्चयवत्तया जीवन्मुक्तमकल्मषमधर्मादिवर्जितं एनं योगिनमुत्तमं निरतिशयं सुखं समाधिजं समाधिजं यथावादिदोषरहितं सुखमुपैत्युपगच्छति ३ संग्रही

यतो यतो निश्चरति मनश्चंचलमस्थिरम् ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् २ प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमम् उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ३ यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ४ सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियम् वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ९५ ॥

तार्थं प्रपंचनपरान् तदीयानेव श्लोकान्पठति यत्रेत्यादित्रीन् चित्तं यत्र यस्मिन्काले योगसेवया योगानुष्ठानेन सर्वस्माद्विषयान्निवारितं सद्धुपरमते उपरतिं गच्छति किंच यत्र यस्मिन्नेव काले आत्मना समाधिपरिशुद्धेनांतःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नुपलभमानः स्वस्मिन्नेव तुष्यति तुष्टिं लभते न विषयेष्वित्यर्थः ४ किंच यत्र यस्मिन्काले आत्मनि स्थितो योगी आत्यंतिकमत्यंतमेव भवतीत्यात्यंतिकमनंतं बुद्धिग्राह्यमिंद्रियनिरपेक्षया बुद्ध्यागृह्यमाणं अतींद्रियमिंद्रियगोचरातीतमविषयजनितं यत्तदीदृशं सुखं वेत्त्यनुभवति किंच आत्मनि स्थितो यं तत्त्वतः स्वस्मादात्मस्वरूपान्न चलति न प्रच्यवते ९५ ॥

किंच यमात्मलाभं लब्ध्वा प्राप्यापरं लाभं लाभांतरं ततोऽधिकं न मन्यते आत्मलाभान्न परं विद्यत इति स्मृतेः किंच यस्मिन्नात्मतत्वे स्थितो गुरुणा महता
ऽपि दुःखेन शस्त्रविघातादिलक्षणेन प्रह्लादवन्न विचाल्यते ६ इदानीमुपपादितं योगं निगमयति तं विद्यादिति शनैः शनैरित्यादिना याव
द्धि विशेषणैर्विशिष्ट आत्मावस्थाविशेषो यो योगउक्तः तं दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगस्तेन वियोगस्तं विपरी
तलक्षणया योगसंज्ञितं योगइत्येव संज्ञितं विद्याज्जानीयात् एवंविधयोगानुष्ठाने किं विकर्तव्यताविशेषमाह स इति स पूर्वो
क्तो योगो निश्चयेनाध्यवसायेन अनिर्विण्णचेतसा निर्वेदरहितेन चित्तेन योक्तव्योऽनुष्ठेयः ७ इदानीमुक्तमर्थमुपसंहरति युंजन्नि

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिंस्थितो न दुःखेन गुरुणापि विचाल्यते ६ तं विद्या
द्दुःखसंयोगवियोगं योगसंज्ञितम् स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ७ युंजन्नेवं
सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ८ उत्सेक उदधेर्य
द्वत्कुशाग्रेणैकबिन्दुना मनसो निग्रहस्तद्वद्भवेदपरिखेदतः २५ ॥

ति विगतकल्मषो विगतपापो योगांतरायवर्जितो योगी सदात्मानमेवं यथोक्तेन प्रकारेण युंजन्ननुसंदधानः सुखेनाऽनायासेन ब्र
ह्मसंस्पर्शं ब्रह्मणा संस्पर्शो यस्य सुखस्य तद्ब्रह्मसंस्पर्शं सुखं ब्रह्मस्वरूपमनंतमिति यावदत्यंतमविनश्वरं निरतिशयं सुखमश्नु
ते प्राप्नोतीत्यर्थः ८ अनिर्वेदेन क्रियमाणो योगाभ्यासः फलपर्यंतो भवत्येतत्सदृष्टांतमाह उत्सेक इति कुशाग्रेणोद्धृतेने
केन बिंदुना क्रियमाण उदधेरुत्सेक उद्धृत्य बहिः सेचनं परिखेदाभावे सति यद्वत्कालांतरे भवेदेव तद्वन्मनसो निग्रहोऽपि श्रम
रहितानां क्रियमाणः कालांतरे सिद्ध्यते इदं च टिट्टिभोपाख्याने मनः स्मिनियायोक्तम् २५ ॥

पं॰टी॰
१२७

न केवलमयमर्थो गीतायामेवाभिहितः किन्तु मैत्रायणीयशाखायामपीत्याह हृदयस्येति मैत्रायणीयनामके यजुःशाखाभे
दे शाकायन्यनामकः कश्चिदृषिः स्वशिष्यत्वेनोपसन्नस्य हृदयाख्यस्य राजर्षेर्ब्रह्मस्वरूपसमाध्यभिधानपूर्वकं प्रश्नाभवतित
प्रोक्तत्वात् । केन प्रकारेणोक्तवानित्याशंक्य तत्प्रतिपादकांस्तदीयान्मंत्रान्पठति यथेति निरिंधनो दग्धकाष्ठो वह्निः स्वयो
नौ स्वकारणे तेजोमात्रे उपशाम्यति ज्वालादिरूपं विशेषाकारं परित्यज्य तेजोमात्ररूपेण यथावतिष्ठते तथा तेनैव प्र
कारेण चित्तमन्तःकरणमपि वृत्तिक्षयाविरोधसमाध्यभ्यासेन राजसादिसकलवृत्तिनाशात्स्वकारणे सत्त्वमात्रे उपशा

127

हृदयस्य राजर्षेः शाकायन्यो मुनिः स्वयम् । प्राह मैत्राख्यशाखायां समाध्युक्तिपरं परम् ।
यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति । तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति ॥ स्वयो
नावुपशान्तस्य मनसः सत्यकामिनः । इन्द्रियार्थविमूढस्यानृताः कर्मवशानुगाः ॥ १२ ॥

म्यति सत्त्वमात्रावशिष्टं भवतीत्यर्थः ॥ ततः किमित्यत आह स्वयोनाविति सत्ये आत्मतत्त्वविषये कामोऽस्यास्तीति
सत्यकामी तस्य । एवं स्वयोनावुपशान्तस्य उपशान्तत्वादेवेन्द्रियार्थविमूढस्येन्द्रियार्थेषु शब्दादिषु विमूढ
स्य विषयेष्वसंज्ञातशून्यस्य मनसः कर्मवशमनुगच्छन्तीति कर्मवशानुगाः ससाधनाः सुखदुःखादयोऽनृता मा
यिकत्वज्ञानेन मिथ्याभूताः स्युरित्यर्थः ॥ १२ ॥

ननु चित्तोपशान्तौ जगन्मिथ्या भवतीत्येतदनुपपन्नं तदुपादानकत्वाभावात्तस्येत्याशङ्क्याह चित्तमिति यद्यपि स्वरूपेण चित्तोपादानकं जग
न्न भवति तथापि तस्य भोग्यत्वं चित्तकारणकमेव हिशब्देनात्र सर्वानुभवं प्रमाणयति सुषुप्त्यादौ चित्तविलये भोगादर्शनादिति भावः यत
श्चित्तात्मकः संसारोऽतस्तच्चित्तमेव प्रयत्नेनाभ्यासवैराग्यादिलक्षणेन शोधयेत् रजस्तमोमलराहित्येनैकाग्र्यं कुर्यात् नन्वात्मनो विमुक्त
ये आत्मैव शोधनीयो न चित्तमित्याशङ्क्याह यच्चित्त इति मर्त्य इत्युपलक्षणं देहिमात्रस्य यो देही यच्चित्तो यस्मिन् पुत्रादौ विषये चित्तवा
न्भवति स तन्मयस्तदात्मक एव तस्मात्कल्पविकल्पयोरात्मन्येव समारोपणादेतत्सनातनमिदमनादिसिद्धं गुह्यं रहस्यं एतदुक्तं भवति
स्वभावतः शुद्धस्यात्मनो यतश्चित्तसंपर्कादेव संसारित्वं ध्यायतीव लेलायतीवेति श्रुतेः अतश्चित्तस्य शोधनेनात्मनः संसारनिवृत्ति

चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत् यच्चित्तस्तन्मयो मर्त्यो गुह्यमेतत्सनातनम् १३ चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते १४ ॥

रिति १३ नन्वनादिभवपरंपरोपार्जितसुखदुःखप्रदपुण्यपापकर्मणोः सतोः चित्तशोधनेनापि कथमात्मनः संसारनिवृत्तिर्भविष्यती
त्याशङ्क्य चित्तप्रसादोपलक्षितब्रह्मानुसंधानेन सकलकर्मक्षयोपपत्तेर्मैवमिति परिहरति चित्तस्य हीति हिशब्देन तत्रयथैषीका
तूलमग्नौ प्रोतं प्रदूयेतैवमेवे हास्य सर्वे पाप्मानः प्रदूयन्ते उपपातकेषु सर्वेषु पातकेषु महत्सु च प्रविश्य रजनीपादं ब्रह्मध्यानं
समाचरेदित्यादिश्रुतिस्मृतिप्रसिद्धिं द्योतयति ततः किमित्यत आह प्रसन्नेति प्रसन्नश्चासावात्मा चेतो यस्य स तथोक्तः आत्मनि स्वस्वरूपभू
तेऽद्वितीयानंदलक्षणे ब्रह्मणि स्थित्वा तदेवाहमिति निश्चयेन दृष्टप्रपञ्चजातं परिहृत्य चिन्मात्ररूपेणावस्थाय अक्षयमविनाशि यत्सुखं स्वरू

पं॰टी॰
१२८

प्रसन्नात्मात्मनि स्थितेत्युक्तमेवार्थं दृष्टान्तोक्तिपुरःसरं द्रढयति समासक्तमिति प्राणिनश्चित्तं विषय एव गोचरो विषयगोचरः इंद्रियप्रचारभूमिः तस्मिन् य
थास्वभावतः सम्यगासक्तं भवति तदेव चित्तं ब्रह्मणि प्रत्यगभिन्ने परमात्मनि यद्येवमासक्तं स्यात्तर्हि कः संसारान्न मुच्येत सर्वोऽपि मुच्यत एवेत्यर्थः १५
उक्तार्थदार्ढ्याय मनसो द्वैविध्यमाह मनो हीति तत्र कारणमाह अशुद्धमिति कामः इच्छा उपलक्षणं क्रोधादेरपि १६ द्विविधस्यैव तस्य क्रमेण सं
सारमोक्षयोर्हेतुतां दर्शयति मन इति १७ प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुत इत्युक्तमेवार्थं श्रुतिः स्वयमेव प्रपंचयति समाधीति आ

समासक्तं यथा चित्तं जन्तोर्विषयगोचरे यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बंधनात् १५ मनो हि द्विवि
धं प्रोक्तं शुद्धं चाशुद्धमेव च अशुद्धं कामसंपर्काच्छुद्धं कामविवर्जितम् १६ मन एव मनुष्याणां का
रणं बंधमोक्षयोः बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् १७ समाधिनिर्धूतमलस्य चेतसो
निवेशितस्यात्मनि यत्सुखं भवेत् न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते १८
यद्यप्यसौ चिरं कालं समाधिर्दुर्लभो नृणाम् तथापि क्षणिको ब्रह्मानन्दो निश्चाययत्यसौ १९ ॥

त्मनि प्रत्यक्स्वरूपे निवेशितस्य समाधिनिर्धूतमलस्य समाधिना प्रत्यग्ब्रह्मणोरैक्यगोचरवृत्त्या धूत्वा निर्धूतमलस्येति शोधितानि वा
दितरजस्तमोमलस्य चेतसस्तस्मिन् समाधौ यत्सुखमनुभूयते तदा समाध्यावस्थायां तत्सुखं गिरा वाचा वर्णयितुं न शक्यते अ
लौकिकसुखत्वादित्यर्थः किं तु स्वयं तत्स्वरूपभूतं सुखमन्तःकरणेनैव गृह्यते १८ नन्वस्यैव समाधेर्दुर्लभत्वात्कथमनेन
ब्रह्मानन्दनिश्चयसंभव इत्याशंक्याह यद्यपीति अस्य समाधेः सततस्यासंभवेऽपि क्षणिकस्य तस्य संभवान्नैवायमानन्दो
निश्चेतुं शक्यत इत्यर्थः ११९ ॥

नन्वात्मदर्शनाय श्रवणादौ प्रवृत्ता अपि केचिदानंदनिश्चयमकृत्वा बहिर्मुखा एव वर्तन्त इत्याशंक्य श्रद्धादिरहितानां तथात्वेपि श्रद्धादिमतां तन्नि
श्चयो भवत्येवेत्याह श्रद्धालुरिति व्यसनं सर्वदा संपादयिष्यामीत्याग्रहः तद्वान् व्यसनी अत्र समाधौ सर्वथा अवश्यं ततः किमित्यत आह नि
श्चिते त्विति तस्मिन्नुत्तमानंदे सकृदेकदा क्षणिकसमाधौ निश्चिते सति अयं सकृन्निश्चयवान् अन्यदापि इतरस्मिन्कालेपि विश्वसितीति आ
नंदोऽस्तीति विश्वासं करोति २० ततोपि किं तत्राह तादृगिति तादृक्पुमान् सकृच्छ्रद्धादिगुणः सन् सकृन्निश्चयवान् पुरुष औदासीन्यद
शायामप्युपलभ्यमानां पूर्वोक्तामानंदवासनामुपेक्ष्य तत्परो मुख्यानंदे तात्पर्यवान् भूत्वा तमेव भावयति २१ एवं व्यवहारका

श्रद्धालुर्व्यसनी योऽत्र निश्चिनोत्येव सर्वथा निश्चिते तु सकृत्तस्मिन्विश्वसित्यन्यदाप्ययम् २० तादृ
क्पुमानुदासीनकालेप्यानंदवासनां उपेक्ष्य मुख्यमानंदं भावयत्येव तत्परः २१ परव्यसनिनी ना
री व्यग्रापि गृहकर्मणि तदेवास्वादयत्यंतः परसंगरसायनं २२ एवं तत्त्वे परे शुद्धे धीरो विश्रांतिमा
गतः तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपि २३ धीरत्वमक्षप्राबल्येप्यानंदास्वादवांछया तिरस्कृ
त्याखिलाक्षाणि तच्चिंतायां प्रवर्तनम् २४ भारवाही शिरोभारं मुक्त्वास्ते विश्रमं गतः संसारव्या
पृतित्यागे तादृग्बुद्धिस्तु विश्रमः १२५ ॥

लेपि निजानंदं भावयतीत्यत्र दृष्टांतमाह परेति २२ दार्ष्टांतिके योजयति एवमिति २३ धीरशब्दार्थमाह धीरत्वमिति इंद्रियाणां
विषयाभिमुखेन पुरुषाकर्षणसामर्थ्येपि स्वरूपसुखानुसंधानेच्छया सर्वाणींद्रियाणि तिरस्कृत्य आनंदानुसंधान एव प्रवर्तमान
त्वं धीरत्वमित्यर्थः २४ विश्रांतिशब्दस्य विवक्षितमर्थं सदृष्टांतमाह भारवाहीति यथा लोके भारं वहन् पुरुषः श्रमहेतुं शिरसि
स्थितं भारं परित्यज्य श्रमरहितो वर्तते तथा संसारव्यापारपरित्यागे सति श्रमराहित्यमस्मीति जायमाना या बुद्धिः सा विश्रम
शब्देनोच्यत इत्यर्थः १२५ ॥

पं॰ टी॰
१२९

इदानीं फलितमाह विश्रान्तिमिति परमां निरतिशयां विश्रान्तिं मुक्तलक्षणां प्राप्तः पुरुषः स्वस्यौदासीन्यदशायां यथा परमानन्दास्वादनेन तात्पर्यवान्भवति एवं सुखदुःखदशायामपि कालेऽपि तदनुसंधानं परित्यज्य निजानन्दास्वादनपर एव तात्पर्यवान्भवतीत्यर्थः २६ ननु दुःखस्य प्रतिकूलत्वेन तदनुसंधानेच्छाभावेऽपि वैषयिकसुखस्यानुकूलत्वेन पुरुषैरर्थ्यमानत्वात्तदनुसंधानेच्छा कुतो न भवेदित्याशंक्य तस्य विषयसम्पादनादिद्वारा ज्ञानिवद्बहिर्मुखत्वापादनेन निजानन्दानुसंधानविरोधित्वात्तदिच्छा विवेकिनी न जायत इति दृष्टान्तप्रदर्शनपूर्वकमाह अग्नीति धीरग्नौ देहविमोचनेच्छायां दृढतरायां सत्यां तद्विलंबकारणेऽलंकारादौ यथाग्निप्रवेष्टुः वैरस्यबुद्धिरुत्पद्यते एवं वैराग्यादिसाध

विश्रान्तिं परमां प्राप्तः स्वौदासीन्ये यथा तथा सुखदुःखदशायां च तदानन्दैकतत्परः २६ अग्निप्रवेशहेतौ धीः शृङ्गारे यादृशी तथा धीरसोदेति विषयेऽनुसंधानविरोधिनी २७ अविरोधिसुखे बुद्धिः स्वानन्दे च गमागमौ कुर्वन्त्यास्ते क्रमादेषा काकाक्षिवदितस्ततः २८ एकैव दृष्टिः काकस्य वामदक्षिणनेत्रयोः यात्यायात्येवमानन्दद्वये तत्त्वविदो मतिः २९ भुञ्जानो विषयानन्दं ब्रह्मानन्दं च तत्त्ववित् द्विभाषाभि-
ज्ञवद्विद्यादुभौ लौकिकवैदिकौ १३० ॥

न सम्पन्नस्य विवेकिनो ब्रह्मानुसंधानविरोधिनि विषयसुखे धीरित्यर्थः २७ मा भूद्विरोधिविषयसुखेच्छाऽप्रयत्नसौलभ्येन अबहिर्मुखत्वहेतौ विषये किं न भवतीत्यत आह अविरोधीति २८ दृष्टान्तं विवृणोति एकैवेति यथा काकस्य दृष्टिः दृश्यतेऽनयेति दर्शनसाधनं चक्षुरिन्द्रियमेकमेव वामदक्षिणनेत्रयोर्गोलकयोः पर्यायेण गमनागमने करोति एवं विवेकिनो बुद्धिरप्यानन्दद्वये इत्यर्थः २९ दार्ष्टान्तिकं प्रपञ्चयति भुञ्जान इति तत्त्वविद्विषयान्भुञ्जानस्तज्जन्यं विषयानन्दं उपनिषद्वाक्यादवगतं ब्रह्मानन्दं च लौकिकवैदिकावुभौ विषयानन्दब्रह्मानन्दौ द्विभाषावेदिवत् जानीयादित्यर्थः १३० ॥

ननु दुःखानुभवदशायामुद्वेगे सति कथं निजानंदानुभव इत्याशंक्याह दुःखप्राप्ताविति यतो यस्मात्कारणाद्विवेकी द्विदृक् लौकिकवैदिकव्यवहारयोरुभयोरपि वेत्ता अतो दुःखप्राप्तावपि पूर्ववदज्ञानदशायामिव न तस्योद्वेगः विवेकेन तद्बाध्यमानत्वात् ततो दुःखानुभवकालेपि निजानंदानुसंधानं न विहन्यत इत्यर्थः युगपदुभयानुसंधाने दृष्टांतमाह गंगेति ३१ फलितमाह इत्थमिति सदा सुखदुःखानुभवदशायां तूष्णींस्थितौ चेत्यर्थः न केवलं जागरण एव तज्ज्ञानं किंतु स्वप्नावस्थायामपीत्याह तद्वासनेति हेतुगर्भितं विशेषणं जाग्रद्वासनाजन्यत्वात्स्वप्नस्य तत्रापि तद्ब्रह्मसुखं तथा जाग्रदवस्थायामिव भासत इत्यर्थः ३२ ननु स्वप्नस्यानंदानुभववासनाजन्यत्वे सत्यानं

दुःखप्राप्तौ च नोद्वेगो यथा पूर्वं यतो द्विदृक् गंगामग्नार्द्धकायस्य पुंसः शीतोष्णधीर्यथा ३१ इत्थं जागरणे तत्त्वविदो ब्रह्मसुखं सदा भाति तद्वासनाजन्ये स्वप्ने तद्भासते तथा ३२ अविद्यावासनाप्यस्ति ततस्तद्वासनोत्थिते स्वप्ने मूर्खवदेवैष सुखं दुःखं च वीक्षते ३३ ब्रह्मानंदाभिधे ग्रंथे ब्रह्मानंदप्रकाशकम् योगिप्रत्यक्षमध्याये प्रथमेस्मिन्नुदीरितं ३४ ॥

द एव भासेतेत्याशंक्याह अविद्येति न केवलमानंदवासनाबलादेव स्वप्नो जायते किंत्वविद्यावासनाबलादपि ततस्तद्वासनाजन्यत्वात्तत्रात्रस्येव सुखाद्यनुभवो भवतीत्यर्थः ३३ एतावता ग्रंथसंदर्भेणोक्तमर्थं निगमयति ब्रह्मानंदेति ब्रह्मानंदनामके अध्यायपंचकात्मके ग्रंथेऽस्मिन्प्रथमाध्याये सुषुप्त्यवस्थायामौदासीन्यकालेपि समाध्यवस्थायां सुखदुःखदशायां च स्वप्रकाशाविर्भूतब्रह्मानंदस्य प्रकाशकं योग्यनुभवरूपं प्रत्यक्षमुक्तमित्यर्थः इदं चोपलक्षणमागमादीनां तेषामप्यत्र प्रदर्शितत्वात् ३४ इति श्रीब्रह्मानंदे योगानंदो नाम प्रथमोध्यायः १ ॥

नदेवं प्रथमाध्याये विवेकिनो योगेन निजानंदानुभवप्रकारं प्रदर्श्य मूढस्य जिज्ञासोरात्मानंदशब्दवाच्यं त्वंपदार्थविवेचनमुखेन ब्रह्मानंदानुभवप्रकारदर्शनाय शिष्यप्रश्नमवतारयति नन्वेवमिति १ शिष्यो गोवष्टो गुरुरिति मूढस्य विद्याधिकाराभावनास्तीत्याह धर्मेति एषो निरूढो नादौ संसारे ऽतीते पुनर्जन्मस्वनुष्टितसुकृतदुष्कृतवशान्नानाविधदेहस्वीकारेण पुनः पुनर्जायतां म्रियतां चेत्यर्थः २ सर्वानुग्राहकत्वादाचार्येण तस्यापि का च न गतिर्वक्तव्येति शिष्यस्त्राह अस्तीति वो युष्माकं अनुजिघृक्षुत्वादनुग्रहीतमिच्छवो ऽनुजिघृक्षवस्तेषां भावस्तत्त्वं तस्माच्छिष्येष्विच्छायुक्तत्वाद्दाक्षिण्यं तत्स्तद्धरणलक्षणं प्रयोजनमस्तीत्यर्थः एवं शिष्यवचनमाकर्ण्य गुरुस्तं वि-

130

नन्वेवं वासनानंदाद्ब्रह्मानंदादपीतरं वेत्ति योगी निजानंदं मूढस्यात्रास्ति का गतिः १ धर्माधर्मवशादेष जायतां म्रियतामपि पुनः पुनर्देहलक्षैः किं नो दाक्षिण्यतो वद २ अस्ति वो ऽनुजिघृक्षुत्वाद्दाक्षिण्येन प्रयोजनं तर्हि ब्रूहि स मूढः किं जिज्ञासुर्वा पराङ्मुखः ३ उपास्तिं कर्म वा ब्रूयाद्विमुखाय यथोचितं मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेत् ४ ॥

कल्प्य पृच्छति तर्हीति यदि मूढस्यापि का च न गतिर्वक्तव्या तर्हि स मूढः किं रागी विरक्तो वेति वद ३ रागी चेत्तदिच्छानुसारेण कर्म वो पासनं वा वक्तव्यमिति प्रथमो परिहारमाह उपास्तिमिति विमुखाय तत्त्वज्ञानविमुखाय बहिर्मुखायेत्यर्थः यथोचितं यथायोग्यं ब्रह्मलोकादिकामश्चेदुपास्तिं ब्रूयात्स्वर्गादिकामश्चेत्कर्म ब्रूयादित्यर्थः जिज्ञासुत्वेपि सोऽपि विवेकी मंदप्रज्ञो वेति विकल्प्यातिविवेकिनः पूर्वाध्यायोक्तप्रकारेण योगेन ब्रह्मसाक्षात्कारमभिप्रेत्य मंदप्रज्ञस्य तद्दर्शनोपायमाह मंदेति यो मंदप्रज्ञः मंदा जडा प्रज्ञा बुद्धिर्यस्य स मंदप्रज्ञस्तं ज्ञातुमिच्छुर्जिज्ञासुस्तमात्मानंदेन आत्मानंदविवेचनमुखेन बोधयेत् ४ ॥

पूर्वकेन को बोधित इत्यत आह बोधयामासेति याज्ञवल्क्य एतन्नामको यजुःशाखाविशेषप्रवर्तकः कश्चिदृषिः मैत्रेयीमेतन्नामिकां निजप्रि
यां स्वभार्यां न वा अरे पत्युरर्थे पतिः प्रिय इति न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादिप्रकारेण ईरयन् ब्रुवन् बोधयामास बोधित
वानित्यर्थः ५ उत्तरत्र परप्रेमास्पदत्वेन परमानन्दरूपतामिति वाक्येन परप्रेमास्पदत्वेन हेतुनात्मनः परमानन्दरूपतां सिसाधयिषु
रादौ परप्रेमास्पदत्वे हेतुसमर्थनाय तावदुदाहृतवाक्यस्योपलक्षणपरतामभिप्रेत्य तत्प्रकरणस्य सकलपर्यायवाक्यतात्पर्यमा
ह पतिरिति पतिजायादिकं भोग्यजातं भोक्तृशेषत्वाद्भोक्तृसंबंधेनैव प्रियं न स्वरूपेणेत्यभिप्रायः ६ इदानीं पूर्वोदाहृतस्य न वा अ
रे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवतीत्यस्य वाक्यस्य तात्पर्यार्थं विभज्य दर्शयति पत्याविति य

बोधयामास मैत्रेयीं याज्ञवल्क्यो निजप्रियां न वा अरे पत्युरर्थे पतिः प्रिय इतीरयन् ५ पति
र्जायापुत्रवित्तेषु पशुब्राह्मणबाहुजाः लोका देवा वेदभूते सर्वं चात्मार्थतः प्रियं ६ पत्याविच्छा
यदा पत्न्यास्तदा प्रीतिं करोति सा क्षुदनुष्ठानरोगाद्यैस्तदा नेच्छति तत्पतिः ७ न पत्युरर्थे सा
प्रीतिः स्वार्थ एव करोति ताम् पतिश्चात्मन एवार्थे न जायार्थे कदाचन ८ ॥

दायस्मिन्काले पत्न्या जायायाः पत्यौ भर्तरि विषये इच्छा कामो भवति तदा सा पत्नी पत्यौ प्रीतिं स्नेहं करोति यदा तत्पतिः क्षुधादिना इच्छा
भावहेतुना युक्तो भवति चेत्तदा तन्नेच्छति न कामयते ७ एवं सति किं फलितमित्यत आह न पत्युरिति जायया क्रियमाणा या प्रीतिः
सा पत्युरर्थे पत्युः प्रयोजनाय न किंतु जाया तां पत्यौ प्रीतिं स्वार्थ एव स्वप्रयोजनायैव करोति न वा अरे जायायै कामाय जाया प्रिया
भवत्यात्मनस्तु कामाय जाया प्रिया भवतीत्यादि न वा अरे सर्वस्य कामाय सर्वं प्रियं भवतीत्येतानां वाक्यानां तात्पर्यं क्रमेण विभ
ज्य दर्शयति पतिश्चेत्यादिना पतिश्च भर्तापि स्वप्रयोजनायैव जायायां प्रीतिं करोति न जायाप्रीतय इत्यर्थः ८ ॥

नन्वेकैककामनया प्रवृत्तौ प्रीतिः स्वार्था भवतु पुत्रादेरुभयेच्छया प्रवृत्तौ तु प्रीतेरुभयार्थता स्यादित्याशंक्याह अन्योन्येति एवमुक्तेन प्रकारेण स्वेच्छयैव स्वकामनापूरणेच्छयैव प्रवर्तनमुभयोरपीति शेषः ९ स्वेच्छया प्रवर्तनत्वमेव दर्शयति श्मश्रुकंटकेति पित्रा क्रियमाणं श्मश्रुमुखादिचुंबनं तत्पुत्रप्रीत्यर्थं तस्य श्मश्रुकंटकवेधेन रोदनकर्तृत्वात् तत्पितुः स्वसुखार्थमेवेत्यवगंतव्यमित्यर्थः १० चेतनेषु पतिजायापुत्रेषु क्रियमाणायाः प्रीतेः स्वार्थत्वपरार्थत्वसंदेहसंभवादचेतनत्वेनेच्छामात्ररहितस्य वित्तविषयस्य तच्छंकैव नास्तीत्यभिप्रेत्य न वा अरे वित्तस्य कामायेत्यादिवाक्यस्य तात्पर्यार्थमाह निरिच्छमिति ११ चेतनत्वेपि वाहनादीच्छारहितपशुविषयस्य न वा अरे पशूनामित्यस्य वाक्यस्य तात्पर्यमाह

अन्योन्यप्रेरणेप्येवं स्वेच्छयैव प्रवर्तनं ९ श्मश्रुकंटकवेधेन बालो रुदति तत्पिता चुंबत्येव न सा प्रीतिर्बालार्थे स्वार्थ एव सा १० निरिच्छमपि रत्नादि वित्तं यत्नेन पालयन् प्रीतिं करोति सा स्वार्थे वित्तार्थत्वं न शंकितं ११ अनिच्छति बलीवर्दे विवाहयिषते बलात् प्रीतिः सा वणिगर्थैव बलीवर्दार्थता कुतः १२ ब्राह्मण्यं मे स्फुटं पूज्योहमिति तुष्यति पूजया अचेतनाया जातेर्नो संतुष्टिः पुंस एव सा १३ क्षत्रियोहं तेन राज्यं करोमीत्यत्र राजता न जातेर्वैश्यजात्यादौ योजनीयमिदं तथा १४

अनिच्छतीति बलीवर्दे उदुहि अनिच्छति भारं वोढुमिच्छामकुर्वत्यपि बलाद्विवाहयिषते वाहयितुं कामयते तत्र वहनादिविषयायाः प्रीतेर्वणिगर्थत्वे न बलीवर्दार्थतेत्यर्थः १२ न वा अरे ब्राह्मणस्य कामायेति वाक्यतात्पर्यमाह ब्राह्मण्यमिति ब्राह्मण्यनिमित्तया पूजया ब्राह्मणोहमस्मीत्यभिमानवान्नेव तुष्यति न जडा जातिरित्यर्थः १३ न वा अरे क्षत्रस्येत्यादिवाक्यतात्पर्यमाह क्षत्रियेति राज्योपभोगनिमित्तं सुखं क्षत्रियत्वजातिमत एव न क्षत्रियत्वजातेरित्यर्थः इदं क्षत्रियोदाहरणं वैश्याद्युपलक्षणार्थमित्याह वैश्येति १४ ॥

नवाञ्छेल्लोकानां कामायेति वाक्यस्य तात्पर्यमाह स्वर्गेति लोकद्वयोपादानं कर्मोपासनालक्षणसाधनद्वयसंपाद्यसकललोकोपलक्षणार्थं १५
किंचेईशेति पापनष्टये पापनिवृत्तये इत्यर्थः न तु पूजनेन निःपापदेवार्थं स्वतःपापरहितानां न देवानां प्रयोजनाय किंतु स्वार्थं पूजाकर्तुः प्र-
प्रयोजनाय १६ किंच ऋगादय इति ऋग्ब्राह्मण्यप्राप्त्यर्थं न तु ब्राह्मण्यपरूपं मनुष्यत्वावान्तरजातिरूपं तदुहितेषु वेदेषु न प्रसज्यत इत्यर्थः १७
किंच भूम्यादीति सर्वप्राणिनोऽवस्थानप्रदानतृट्निवारणपाककरणाद्विशोषणाऽवकाशप्रदानाख्यैर्हेतुभिर्निमित्तैः पृथिव्यादीनि भूता-
नि वाञ्छत्यपेक्षते न पुनः पृथिव्यादीनां तु हेतवे ऽवस्थानवाञ्छनादीनि निमित्तानि न संत्यतो न स्वयमाकांक्षत इत्यर्थः १८ इदानीं नवाञ्छेत्सर्व-

स्वर्गलोकब्रह्मलोकौ स्तां ममेत्यभिवाञ्छनम् लोकयोर्नोपकाराय स्वभोगायैव केवलं १५ ईशा-
दिस्वादयो देवाः पूज्यन्ते पापनष्टये न तन्निःपापदेवार्थं स्वार्थं तन्नूपपूज्यते १६ ऋगादयोऽध्य-
धीयन्ते ब्राह्मण्यपानवाप्तये न तत्प्रसक्तं वेदेषु मनुष्येषु प्रसज्यते १७ भूम्यादिपंचभूतानि
स्थानतृट्पाकशोषणैः हेतुभिश्चावकाशेन वाञ्छत्येषां न हेतवे १८ स्वामिभृत्यादिकं सर्वं
स्वोपकाराय वाञ्छति न तत्कृतोपकारस्तु तस्य तस्य न विद्यते १९ सर्वव्यवहृतिष्वेवमनुसंधा-
नमीदृशं उदाहरणबाहुल्यतेन स्वां वासयेन्मतिं २० ॥

स्य कामयेत्यस्य वाक्यस्य तात्पर्यमाह स्वामीति भृत्यादि सर्वो जनः स्वाम्यादिकं सर्वं स्वोपकाराय स्वप्रयोजनाय वाञ्छति एवं स्वाम्यादिर-
पि १९ ननु श्रुतावेवं बहूदाहरणप्रदर्शनं किमर्थं कृतमित्यत आह सर्वेति इच्छापूर्वकेषु सर्वेष्वपि भोजनादिव्यवहारेष्वेवमात्म-
नस्तु कामाय सर्वं प्रियं भवतीत्युक्तेन प्रकारेणानुसंधानं तु मनुसंधानाय ईदृशं पतिजायादिषु प्रीतिप्रदर्शनरूपमुदाहरणबाहुल्य-
मुक्तमिति शेषः तेन कारणेन स्वां स्वसंबन्धिनीं मतिं बुद्धिं वासयेत्सर्वस्यापि स्वशेषत्वावगमेन स्वात्मनः प्रियतमत्वानुसंधान-
वतीं मतिं कुर्यादित्यर्थः २० ॥

तत्त्वात्मशेषत्वेन सर्वस्य प्रियत्वोक्तेः आत्मनश्च प्रियतमत्वमुक्तमनुपपन्नं विकल्प्य क्रियमाणे प्रीतेरेव दुर्निरूपत्वादित्यभिप्रायेण प्रीतिस्वरूपं पृच्छति अथेति अथशब्दः प्रश्नार्थः या निजात्मनि प्रीतिः श्रूयत इतीयं प्रीतिः का किं रागरूपा किं वा श्रद्धारूपा उत भक्तिरूपा यद्वेच्छारूपेति किंशब्दार्थः चतुर्ष्वपि पक्षेषु प्रीतेः सर्वविषयत्वं न संभवतीत्याह राग इति रागस्तु वध्वादिविषयत्वान्न यागादिषु श्रद्धा च यागादिविषयत्वान्न वध्वादिषु भक्तिश्च गुर्वादिविषयत्वान्नेतरेषु इच्छा चैवदप्राप्तवस्तुविषयत्वान्नेतरविषयातो न सर्वविषयत्वं प्रीतेरित्यर्थः २१ उक्तप्रकारचतुष्टयातिरिक्तपक्षमादायोत्तरमाह तर्हीति तर्हि प्रीतेः रागादिरूपत्वासंभवे सति सुखमात्रानुवर्तिनी सुखमेव सुखमात्रं सुखमात्रमनुसृत्य वर्तते इति सुखमात्रानुवर्तिनी सुखैकगोचरा इत्यर्थः सात्त्विकी सत्त्वगुणपरिणामरूपा हि वृत्तिरन्तःकरणवृत्तिः प्रीतिरस्तु ननु तर्हि सा प्रीति

अथ केयं भवेत्प्रीतिः श्रूयते या निजात्मनि रागो वध्वादिविषये श्रद्धा यागादिकर्मणि भक्तिः स्याद्गुरुदेवादाविच्छा त्वप्राप्तवस्तुनि २१ तर्ह्यस्तु सात्त्विकी वृत्तिः सुखमात्रानुवर्तिनी प्राप्ते नष्टेऽपि सद्भावादिच्छातो व्यतिरिच्यते २२ सुखसाधनतोपाधेरन्नपानादयः प्रियाः आत्मानुकूल्यादन्नादिसमश्चेदनुनाशकः २३ ॥

रिच्छैवेत्याशंकापरिहरति प्राप्त इति इच्छा तावदप्राप्तसुखादिमात्रविषया इयं तु सर्वविषया प्राप्ते लब्धे सुखादौ नष्टेऽपि तस्मिन्विषये विद्यमानत्वादत इच्छात इच्छायाः व्यतिरिच्यते भिद्यते २२ इदानीं सुखसाधनभूतेष्वन्नादिष्विवात्मन्यपि प्रीतिदर्शनादात्मनोऽप्यन्नादिवत्सुखसाधनत्वं स्यादिति शंकते सुखेति अन्नपानादयः सुखसाधनत्वोपाधिना यथा प्रियाः दृष्टाः आत्मापि आनुकूल्यात् प्रियत्वादन्नादिसमः अन्नपानादिवत्सुखसाधनं स्यादित्यर्थः अत्रेदमनुमानं सूचितं विमत आत्मा सुखसाधनं भवितुमर्हति प्रियत्वादन्नादिवदिति अन्नादिषु भोग्यत्वमुपाधिरित्यभिप्रायेण परिहरति अनुनेति अत्र लोके अनुना सुखसाधनतयाऽनुकूलेन अनुकूलयितव्यः कः स्यान्न कोऽपि स्यादात्मातिरिक्तस्य भोक्तुरभावादित्यर्थः २३ ॥

ननु स्वयमेवानुकूलयितव्यः स्यादित्यत आह नैकस्मिन्निति एकस्यैवात्मनो युगपदुपकार्यत्वमुपकारकत्वं चेति धर्मद्वयं विरुद्धमित्यर्थः
नन्वन्नादिवत्सुखसाधनत्वाभावेपि सुखवद्भोक्तृशेषत्वं तस्यास्यादित्याशंक्य आत्मनो निरतिशयप्रेमास्पदत्वान्मैवमिति परिहरति सुख इति
वैषयिके विषयजन्ये सुखे प्रीतिमात्रं प्रीतिरेव न निरतिशया आत्मा तु अतिप्रियो निरतिशयप्रेमविषयः अतो न विषयजन्यसुखवत्तच्छेषत्वमित्यर्थः २४ त
त्रोभयत्रोपपत्तिमाह सुखे व्यभिचरतीति सुखे वैषयिके सुखे जायमानैषा प्रीतिर्व्यभिचरति कदाचित्सुखान्तरं गच्छति न तस्मिन्नेव नियता वर्त
ते आत्मनि तु विद्यमाना प्रीतिर्न व्यभिचारिणी विषयान्तरगामिनी न भवति अतो निरतिशयास इत्यर्थः सुखगोचरायाः प्रीतेर्व्यभिचारं दर्श

अनुकूलयितव्यः स्यान्नैकस्मिन्कर्मकर्तृता सुखे वैषयिके प्रीतिमात्रमात्मा त्वतिप्रियः २४ सुखे व्य
भिचरत्येषा नात्मनि व्यभिचारिणी एकं त्यक्त्वान्यदादत्ते सुखं वैषयिकं सदा २५ नात्मा त्याज्यो न चा
देयस्तस्मिन्व्यभिचरेत्कथम् हानादानविहीनेस्मिन्नुपेक्षा चेत्तृणादिवत् २६ उपेक्षितुः स्वरूप
त्वान्नोपेक्ष्यत्वं निजात्मनि रोगक्रोधाभिभूतानां मुमूर्षा वीक्ष्यते क्वचित् २७ ॥

यति एकमिति २५ आत्मनि तु तदभावं दर्शयति नात्मेति अयोग्यत्वादित्यर्थः फलितमाह तस्मिन्निति हानादिविषयत्वाभावेप्यात्म
नस्तृणादिवदुपेक्षाविषयत्वं स्यादित्याशंकते हानेति हानं परित्यागः आदानं स्वीकारः उपेक्षा औदासीन्यं २६ आत्मनो हानाद्यविष
यत्ववदुपेक्षाविषयत्वमपि न संभवत्ययोग्यत्वादित्यभिप्रायेण परिहरति उपेक्षितुरिति उपेक्षितुरुपेक्षाकर्तुः यो निजात्मा अविनाशि
स्वरूपमस्ति तस्य स्वरूपत्वात्स्वस्वरूपत्वादेव स्वव्यतिरिक्ततृणादिवन्नोपेक्ष्यत्वमुपेक्षाविषयत्वं न विद्यत इति शेषः ननु हानविषयत्वमात्मनो
नास्तीत्युक्तमनुपपन्नं द्वेषात्त्याज्यत्वदर्शनादिति शंकते रोगेति यतो मुमूर्षा दृश्यते तत आत्मनि विद्वेषसंभवात् वृश्चिकादिवदात्मापि

पं॰टी॰
१३३

तत्यागस्यात्मव्यतिरिक्तदेहविषयत्वान्नैवमिति परिहरति नत्वहीति त्यक्तुमुत्तमं हंयोग्यस्योचितस्य देहस्यात्मता नास्ति कस्य तर्हि सेत्यत आह
त्यक्तुरिति त्यक्तुर्देहत्यागकारिणो देहातिरिक्तस्य जीवस्य साक्षात्मतेत्यर्थः २८ भवतु त्यक्तुरात्मत्वं प्रकृते किमायातमित्यत आह नत्यक्तरीति
अतो नात्मनस्त्याज्यत्वमित्यभिप्रायः मा भूदात्मनि हेयादेहेतूपलभ्यतम्(?) वे त्याज्यं क्वाह त्याज्येति त्याज्यदेहगोचरे हेये सत्यपि का क्षतिरात्मन
स्त्यागाभाववादिनो ममेति शेषः २९ तदेवं न वास्त्रे(?)पत्तुः कामायेत्यारभ्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतायाः श्रुतेस्तात्पर्यपर्यालो
चनयात्मनः प्रियतमत्वं प्रदर्श्य युक्तितोपि तद्दर्शयति आत्मेति सर्वस्य स्वस्य सहितस्य तत्सायतजातस्य पतिजायादेरात्मार्थत्वेन स्वस्यो
पकारकत्वेन प्रीतेश्च प्रियत्वादप्यात्मा उपकार्यः स्वयमतिशयेन प्रियः सिद्धो हि एतदेव दृष्टांतप्रदर्शनेन द्रढयति यथेति लोके य

ततो हेयाद्वेत्याज्य आत्मेति यदि तन्न हि त्यक्तुं योग्यस्य देहस्य नात्मता त्यक्तुरेव सा २८ न त्यक्तर्य
स्ति हेयः त्याज्यहेयेन तु का क्षतिः २९ आत्मार्थत्वेन सर्वस्य प्रीतेश्चात्मा ह्यतिप्रियः सिद्धो यथा
पुत्रमित्रात्पुत्रः प्रियतरस्तथा ३० मा न भूवमहं किं तु भूयासं सर्वदेत्यसौ आशीः सर्वस्य दृष्टे
ति प्रत्यक्षा प्रीतिरात्मनि ३१ ॥

यः पुत्रमित्रात् पुत्रस्य मित्रभूतात् पुत्रहारा प्रीतिविषयात् यज्ञदत्तादेः सकाशात् पुत्रो देवदत्तादिरव्यवधानेन प्रीतिविषयत्वात्तस्मादति
शयेन प्रियो भवति पितुर्विस्तु मित्रादेस्तु व्यवधानेन तत्संबंधित्वेन प्रीतिविषयात् सर्वस्मात् स्वयमतिशयेन प्रिय इत्यर्थः ३० एवमा
त्मनि श्रुतियुक्तिभ्यामुपपादितां निरतिशयां प्रीतिमनुभवप्रदर्शनेन द्रढयति मा न भूवमिति अहं मा न भूवमिति नकापि मम
सत्त्वमस्तु किं तु सर्वदा भूयासं सदा मम सत्तास्तु इत्येवंरूपा आशीः प्रार्थना सर्वस्य प्राणिजातस्य संबंधिनी दृष्टा सर्वेष्वेव भवेत्प्रार्थ्य
यत इत्यर्थः फलितमाह प्रत्यक्षेति यत एवं सर्वैः प्रार्थ्यते ततः आत्मनि निरतिशया प्रीतिः प्रत्यक्षा सिद्धेत्यर्थः ३१ ॥

ह्वत्तानुकीर्तनपूर्वः सरंमतांतरं दूषयितुमनुभाषते इत्यादिभिरिति इतिशब्देनानुभवः परामृश्यते आदिशब्देन युक्तिश्रुती त्यादिभिरनुभवयुक्तिश्रुतिल
क्षणैस्त्रिभिः प्रमाणैरेवमुक्तेन प्रकारेणात्मनि प्रीतो सिद्धायामपि केश्चित्स्तुत्यादि तात्पर्याऽनभिज्ञैरात्मनः पुत्रभार्यादिशेषत्वं पुत्रादीनां तिस्वरूप
सर्जनत्वमीरितमभिहितं ३२ इदं कुतोवगतमित्यत आह एतदिति एतद्धि वस्तुयापवंकेश्चिदीर्यत इत्येतदभिव्यक्तीकरणाभिप्रायेणात्मा वै पुत्र
नामासि इत्यादिकयाश्रुत्या पुत्रस्य मुख्यात्मत्वमीरितमित्यर्थः किंच तत्पुत्रस्य मुख्यात्मत्वमुपनिषदि येत्तरीयोपनिषदादौ स्फुटं व्यक्तमभिहित
मितिशेषः ३३ केन वाक्येनेत्याकांक्षायां तद्वाक्यमर्थतः पठति सोस्येति अस्य पितुः स पुरुष एव वा अयमादितो गर्भो भवतीति प्रकरणादौ पुरुषे
देहे गर्भत्वेनोक्तः अयं सोयमेवकुमारं जन्मनोग्रेऽपि भावयतीत्यत्रातिशयेन पालनीयतयोक्तः पुत्ररूप आत्मा पुण्येभ्यः पुण्यकर्मानुष्ठानाय

इत्यादिभिस्त्रिभिः प्रीतो सिद्धायामेवमात्मनि पुत्रभार्यादिशेषत्वमात्मनः केश्चिदीरितं ३२ एत
द्धि वस्तुया पुत्रे मुख्यात्मत्वं श्रुतीरितम् आत्मा वै पुत्रनामेति तच्चोपनिषदि स्फुटं ३३ सोस्यायमा
त्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते अथास्येतर आत्मायं कृतकृत्यः प्रमीयते ३४ सत्यप्यात्मनि
लोकोस्ति नापुत्रस्यात एव हि अनुशिष्टं पुत्रमेव लोक्यमाहुर्मनीषिणः ३५ ॥

प्रतिधीयते प्रतिनिधित्वेनावस्थाप्यते पित्रेति शेषः अथानंतरमस्य पितुरयं प्रत्यक्षेण परिदृश्यमान इतरः पुत्रादन्यो जरसा ग्रस्तः पितृरूप
आत्मा स्वयं कृतकृत्यः अनुष्ठितकृत्यजातः सन् प्रमीयते म्रियत इत्यर्थः ३४ उक्तार्थस्पष्टीकरणाय पुत्ररहितस्य परलोकाभावप्रदर्श
नपरस्य नापुत्रस्य लोकोस्तीति वाक्यस्यार्थमाह सत्यपीति यतः पुत्रस्य मुख्यमात्मत्वमस्त्यत एवात्मनि स्वस्मिंस्तत्पिस्थितेऽप्यपुत्रस्यापु
त्ररहितस्य पितुर्लोकः परलोको नास्ति हि इदं पुराणादिषु प्रसिद्धमित्यर्थः व्यतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकस्यान
नुशिष्टं पुत्रं लोक्यमाहुरिति वाक्यस्यार्थमाह अनुशिष्टमिति मनीषिणः शास्त्राभिज्ञाः अनुशिष्टं वक्ष्यमाणैस्त्वं ब्रह्मेत्यादिभिर्मंत्रैः
शिक्षितमेव पुत्रं लोक्यं लोकाय हितं परलोकसाधनमाहुरित्यर्थः ३५ ॥

इदानीमैहिकसुखस्यापि पुत्रहेतुत्वप्रतिपादनपरं सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणेति श्रुतिवाक्यमर्थतः पठति मनुष्येति मनुष्य
लोकस्सुखं पुत्रेणैव जय्यः स्यात्तत्प्राप्यः स्यादितरेण कर्मादिना साधनान्तरेण नो नैव भवति पुत्रस्य सुखसाधनमपि धनादिकं निर्वेदजनकं भ
वतीति भावः अत्रापि पुत्रं लोक्यमित्यत्र पुत्रानुशासनमुक्तं इदानीं तस्यावसरं तन्मन्त्रांश्च दर्शयति मुमूर्षुरिति अत्रादिशब्देन त्वं यज्ञस्त्वं लो
क इति मन्त्रो गृह्यते एभिस्त्वं ब्रह्मेत्यादिभिस्त्रिभिर्मन्त्रैर्मुमूर्षुः पिता मरणावसरे पुत्रं मन्त्रयेत पुत्रस्यानुशासनं कुर्यादित्यर्थः ३६ उक्तमर्थं
निगमयति इत्यादीति न केवलमयं श्रुतिसिद्धोऽर्थः किंतु लोकप्रसिद्धोऽपीत्याह लौकिका इति ३७ तदेवोपपादयति स्वस्मिन्निति स्वस्मिन्मृ

मनुष्यलोको जय्यः स्यात्पुत्रेणैवेतरेण नो मुमूर्षुर्मन्त्रयेत्पुत्रं त्वं ब्रह्मेत्यादिमन्त्रकैः ३६ इत्या
दिश्रुतयः प्राहुः पुत्रभार्यादिशेषताम् लौकिकाश्चापि पुत्रस्य प्राधान्यमनुमन्वते ३७ स्वस्मिन्मृते
ऽपि पुत्रादिर्जीवेद्वित्तादिना यथा तथैव यत्नं कुरुते मुख्याः पुत्रादयस्ततः ३८ बाढमेतावता
नात्मा शेषो भवति कस्यचित् गौणमिथ्यामुख्यभेदैरात्मायं भवति त्रिधा ३९ ॥

तेऽपि पुत्रादौ एकेनादिशब्देन भार्यादयो गृह्यन्ते द्वितीयेन त्वेत्वादयः फलितमाह मुख्या इति यस्मात्त्वप्रयासं सोढ्वापि पुत्रादिर्जीवनोपा
यं संपादयति ततस्तस्मात्पुत्रादयो मुख्याः प्रधानभूता इत्यर्थः ३८ एवं वेदलोकप्रसिद्धिभ्यां प्रदर्शितं पुत्रादिप्राधान्यमङ्गीकरोति
सिद्धान्ती बाढमिति तर्ह्यात्मनः शेषित्वोपपादनं कथं न व्याकुप्येदित्याशंक्याह एतावतेति एतावता पुत्रादेः क्वचित्प्राधान्यमस्तीत्येता
वता न हि प्रतीतिमात्रेणार्थसिद्धिरित्याशंक्य यत्र यत्र व्यवहारे यस्य यस्यात्मत्वं विवक्ष्यते तस्य तस्यात्मनः तत्र तत्र प्राधान्यप्रदर्शना
योपोद्घातत्वेनात्मत्रैविध्यमाह गौणेति गौणात्मा मिथ्यात्मा मुख्यात्मा चेत्ययमात्मा त्रिधा भवति ३९ ॥

134

तत्र पुत्रादेर्गौणात्मत्वप्रदर्शनाय लोके गौणप्रयोगमुदाहरति देवदत्त इति अयं देवदत्तः सिंह इति यद्देवदत्तसिंहयोरैक्यं तद्गौणमौपचारिकं तत्र
हेतुमाह एतयोर्भेदस्य भासमानत्वादिति दार्ष्टान्तिके योजयति पुत्रादेरिति ५१ अनन्तरं मिथ्यात्मानं दर्शयति भेद इति पंचकोशेष्वानन्दमया
द्यन्नमयान्तेषु पंचसु कोशेषु साक्षिणः सकाशाद्विद्यमानोऽपि भेदो नावभासते ऽतस्तेषां मिथ्यात्मत्वमित्यर्थः मिथ्यात्मत्वे दृष्टान्तमाह स्थाणो
रिति वस्तुतश्चौराद्भिन्नस्य स्थाणोश्चौररूपत्वं यथा मिथ्या तद्वदित्यर्थः ५२ एवं गौणमिथ्यात्मानावुपपाद्येदानीं साक्षिणो मुख्यात्मत्वमु
पपादयति न भातीति साक्षिणः साक्षिरूपस्यात्मनो गौणात्मनः पुत्रादेरिव कस्मादपि भेदो न भाति मिथ्यात्मनो देहादेरिव भेदो नास्त्यपि

देवदत्तस्तु सिंहोऽयमित्यैक्यं गौणमेतयोः भेदस्य भासमानत्वात्पुत्रादे
रात्मता तथा ५१ भेदोऽस्ति पंचकोशेषु साक्षिणो न तु भात्यसौ मिथ्यात्मता
ऽतः कोशानां स्थाणोश्चौरात्मता यथा ५२ न भाति भेदो नाप्यस्ति साक्षिणोऽप्र
तियोगिनः सर्वान्तरत्वात्तस्यैव मुख्यमात्मत्वमिष्यते ५३ ॥

तत्रोभयत्र हेतुः अप्रतियोगिन इति हेतुगर्भितं विशेषणं अप्रतियोगित्वात् यथा पुत्रादेर्देहादेरपि स्वयं प्रतियोगी विद्यते नैवं स्वस्य
वस्तुतः कश्चित्प्रतियोग्यस्ति देहादेः सर्वस्यारोपितत्वादिति भावः ननु भेदाभावेन साक्षिणो गौणमिथ्यात्मत्वे मा भूतां मुख्यात्मत्वं तु कुत इ
त्यत आह सर्वेति सर्वस्माद्देहपुत्रादेरान्तरत्वात्सर्वसाक्षिणः प्रतीचः सर्वान्तरत्वेन प्रतीयमानत्वात्तस्यैव साक्षिण एवात्मत्वं मुख्यमनौ
पचारिकमिष्यते ऽभ्युपगम्यत इत्यर्थः अत्रेदमनुमानं सूचितं विमतः साक्षी मुख्य आत्मा भवितुमर्हति सर्वान्तरत्वाद्यो मुख्य आत्मा
न भवति स सर्वान्तरोऽपि न भवति यथाहंकारादिरिति केवलव्यतिरेकी ५३ ॥

भवतात्मत्रैविध्यं पुत्रादेः शेषित्वाभिधाने किमायातमित्यत आह सत्येमिति एवमात्मत्रैविध्ये सति येषु लौकिकवैदिकलक्षणेषु पालनपोष
णब्रह्मत्वानुसंधानादिषु व्यवहारविशेषेषु यस्य पुत्रादेर्देहादेः साक्षिणो वात्मत्वमुचितं भवति तेषु तस्य पुत्रादेर्देहादेः साक्षिणो वा शे
षित्वं प्रधानत्वं अन्यस्य तद्व्यतिरिक्तस्य सर्वस्य शेषता उपसर्जनत्वं भवतीति शेषः ४३ तदेव प्रपंचयति मुमूर्षोरित्यादिना श्लोकपंचके
न गृहरक्षादौ कर्मविशेषे गौणात्मैव पुत्रभार्यादिरूप एवोपयुज्यते उपयुक्तो भवति उत्तरोत्तरजिजीविषुत्वादित्यर्थः मुख्यात्मा साक्षी
नोपयुज्यते ऽविकारित्वान्नापि मिथ्यात्मा तस्य मरणोन्मुखत्वादित्यर्थः फलितमाह पुत्र इति स्पष्टं ४४ उक्तगृहरक्षादिव्यवहारे सत्यपि

सत्येवं व्यवहारेषु येषु यस्यात्मतोचिता तेषु तस्यैव शेषित्वं सर्वं स्यादन्यशेषता ४३ मुमूर्षो
र्गृहरक्षादौ गौणात्मैवोपयुज्यते न मुख्यात्मा न मिथ्यात्मा पुत्रः शेषी भवत्यतः ४४ अध्ये
तावह्निरित्यत्र सन्नप्यग्निर्न गृह्यते अयोग्यत्वेन योग्यत्वाद्बटुरेवात्र गृह्यते ४५ कृशोऽहं पु
ष्टिमाप्स्यामीत्यादौ देहात्मतोचिता न पुत्रं विनियुंक्तेत्र पुष्टिहेत्वन्नभक्षणे ४६ ॥

पि स्वस्मिन् पुत्रादिस्वीकारे दृष्टान्तमाह अध्येतेति अयं अध्येता वह्निरित्यस्मिन्प्रयोगे स्वरूपेण विद्यमानोप्यग्निर्नाग्निशब्दार्थत्वेन गृह्यते
तस्याध्येतृत्वायोग्यत्वात् किंतु अध्येतृत्वयोग्यो बटुर्माणवक एवात्रास्मिन्प्रयोगेऽग्निशब्दार्थत्वेन गृह्यते योग्यत्वादित्यर्थः ४५ एवं गौणात्म
प्राधान्यस्थलमुदाहृत्य मिथ्यात्मप्राधान्यस्थलमुदाहरति कृशोहमिति अहं कृशो जातोऽतोऽन्नभक्षणादिना पुष्टिं संपादयिष्यामीत्या
दौ लोकव्यवहारेऽन्नभक्षणयोग्यस्य देहस्यैवात्मत्वग्रहीतुमुचितं उक्तमर्थं लोकव्यवहारप्रदर्शनेन द्रढयति न पुत्रमिति ४६ ॥

किंच तपसेति यदा तु तपः कृत्वा स्वर्गं संपादयिष्यामीत्यादिव्यवहारं करोति तदा कर्तृशब्दवाच्यविज्ञानमयस्यैवात्मत्वमुचितं न देहादेरित्य-
र्थः तदेवोपपादयति अनपेक्ष्येति यतो न देहस्यात्मत्वमुचितं ततो देहभोगपरित्यागपूर्वकं कर्तृरूपकारं कृच्छ्रचान्द्रायणादि कमा-
चरतीत्यर्थः ४७ किंच मोक्ष इति यदा तु मामामादीन्नपाय मुक्तिं प्राप्स्यामीति मतिं करोति तदा गुरुशास्त्राभ्यामाचार्योपदेशवाक्यार्थ-
विचारजन्यापरोक्षज्ञानेन नाहं कर्तात्मा सच्चिदानंदब्रह्माहमस्मीति चिदात्मानमवगच्छति तस्य चिदात्मत्वमेवोचितं न तु कर्तृया-
त्मत्वमित्यर्थः ४८ उदाहृतानां त्रिविधानामात्मनां व्यवहारविशेषेषु व्यवस्थया प्राधान्ये दृष्टान्तमाह विप्रेति यथा ब्राह्मणो बृह-

तपसा स्वर्गमेष्यामीत्यादौ कर्तात्मतोचिता अनपेक्ष्य वपुर्भोगं चरेत्कृच्छ्रादिकं तपः ४७ मोक्षे
हमित्यत्र युक्तं चिदात्मत्वं तदा पुमान् तद्धेत्ते गुरुशास्त्राभ्यां न तु किंचिच्चिकीर्षति ४८ विप्रक्षत्रा
दयो यद्वद्बृहस्पतिसवादिषु व्यवस्थितास्तथा गौणमिथ्यामुख्या यथोचितम् ४९ तत्र तत्रो
चिते प्रीतिरात्मन्येवातिशायिनी अनात्मनि न तच्छेषे प्रीतिरन्यत्र नोभयम् ५० ॥

स्पतिसवेन यजेतेत्यत्र ब्राह्मणस्यैवाधिकारो न क्षत्रियवैश्ययोः राजा राजसूयेन यजेतेत्यत्र राज्ञ एवाधिकारो न ब्राह्मणवैश्ययोः
वैश्यः वैश्यस्तोमेन यजेतेत्यत्र वैश्यस्यैवाधिकारो नेतरयोः एवं गौणमिथ्यामुख्यभेदानामात्मनां यथायोग्यं स्वोचितव्यवहारेषु प्रा-
धान्यमिति भावः ४९ फलितमाह तत्र तत्रेति यस्मिन्यस्मिन्व्यवहारे य आत्मा उचितो भवति तत्र तत्र तस्मिंस्तस्मिन्व्यवहारे उचिते उप-
योगितया प्राधान्यभूते आत्मन्येव प्रीतिरतिशायिनी अतिशयवती तच्छेषे तस्यात्मनः शेषभूतेऽनात्मनि आत्मव्यतिरिक्ते वस्तुनि
प्रीतिः प्रीतिमात्रं न निरतिशयं प्रेमेत्यर्थः अन्यत्रागन्तच्छेषाभ्यामन्यस्मिन्वस्तुनि नोभयं उभयविधमपि प्रेम नास्तीत्यर्थः ५० ॥

पं॰ टी॰
१३८

अन्यत्तूभयमित्यत्राभिहितस्यान्यशब्दार्थस्यावान्तरभेदमाह उपेक्ष्यमिति अन्यदित्युच्यमानं वस्तु उपेक्ष्यमुपेक्षाविषयः द्वेष्यं द्वेषविष
यश्चेति द्विधा द्विप्रकारं भवति तदुभयमुदाहरति मार्गेति मार्गगतं तृणलोष्टादिकमुपेक्ष्यं स्वस्योपद्रवहेतुर्व्याघ्रादिकं द्वेष्यमित्यर्थः
फलितमाह एवमिति ५१ चतुर्विधमेव दर्शयति आत्मेति तत्त्वात्मादीनां चतुर्णामपि प्रियतमत्वादिकं किं नियतं नेत्याह चतुर्ष्वपी
ति अयमेव प्रियतमः अयमेव प्रियः इदमेवोपेक्ष्यं इदमेव द्वेष्यं नान्यदिति नियमो नास्तीत्यर्थः किं तर्हीत्याह किं त्विति तस्मात्तस्मा
त्कार्यविशेषादुपकारापकारादिरूपात्तथा तथा प्रियाप्रियादिरूपेणेत्यर्थः ५२ सर्वत्रोऽनियमयोजनाय प्रसिद्धद्वेष्ये व्याघ्रे तदभा

136

उपेक्ष्यं द्वेष्यमित्यन्यद्द्विधा मार्गे तृणादिकम् उपेक्ष्यं व्याघ्रसर्पादि द्वेष्यमेवं चतुर्विधम् ५१ आ
त्मा शेषा उपेक्ष्यश्च द्वेष्यश्चेति चतुर्ष्वपि न व्यक्तिनियमः किं तु तत्तत्कार्यात्तथा तथा ५२ स्याद्व्या
घ्रः संमुखो द्वेष्यो ह्युपेक्ष्यस्तु पराङ्मुखः लालनादनुकूलश्चेद्विनोदायेति शेषताम् ५३ व्यक्ती
नां नियमो मास्तु लक्षणात्तु व्यवस्थितिः आनुकूल्यं प्रातिकूल्यं द्वयाभावश्च लक्षणम् ५४

वं दर्शयति स्यादिति यदा व्याघ्रः स्वभक्षणाय संमुख आगच्छति तदा द्वेष्यो भवति स एव पराङ्मुखो गच्छति चेदुपेक्ष्यो भवति स ए
व लालनात्स्वानुकूलो भवति तदा विनोदायेति विनोदसाधनं भवतीति शेषतां स्वस्योपकारकत्वेन प्रियत्वं भजत इत्यभिप्रायः ५३
नन्वेकैकस्यैव वस्तुनः प्रियत्वादिधर्मत्रयाङ्गीकारे व्यवहारव्यवस्था न स्यादित्याशंक्याह व्यक्तीनामिति व्यक्तिनियमाभावेऽपि ल
क्षणवशाद्व्यवस्था भविष्यतीत्यर्थः किं लक्षणमित्याकांक्षायां तल्लक्षणमाह आनुकूल्यमिति अनुकूलत्वं प्रियस्य लक्षणं आव
र्तको धर्मः प्रतिकूलत्वं द्वेष्यस्य लक्षणं उपेक्ष्यस्यानुकूल्यप्रातिकूल्यरूपद्वयाभावो लक्षणमित्यर्थः ५४ ॥

एतावता ग्रंथसंदर्भेणोपपादितमर्थं बुद्धिसौकर्याय संक्षिप्य कथयति आत्मेति आत्मा प्रत्यगानंदः प्रेयान् अतिशयेन प्रियः शेषश्चोपस
र्जनभूतः पदार्थः प्रियः तदन्ययोः ताभ्यामात्मनस्तच्छेषाच्चान्ययोः व्याघ्रपथिगततृणादिरूपयोर्हेयोपेक्षे यथाक्रमं भवतः इति
एवं चातुर्विध्येन लोको व्यवस्थितः व्यवस्थापितः उक्तप्रकारचतुष्टयातिरिक्तं न किंचिद् दृश्यते इत्यभिप्रायः अयमर्थः श्रुत्यभिमतो
पीत्याह याज्ञवल्क्य इति आत्मादीनां प्रियतमत्वादिकं यत्तद्याज्ञवल्क्यमतं याज्ञवल्क्यस्यापि संमतमित्यर्थः ५५ न केवलं मैत्रेयी
ब्राह्मण एवात्मनः प्रियत्वमुक्तं किंतु पुरुषविधब्राह्मणेपीत्यभिप्रायेणात्रत्यवाक्यार्थं संगृह्णाति अन्यत्रापीति तदेतत्प्रेयः पुत्रात्प्रेयो वित्ता

आत्मा प्रेयान्प्रियः शेषो हेयोपेक्षे तदन्ययोः इति व्यवस्थितो लोकः याज्ञवल्क्यमतं च तत् ५५ अ
न्यत्रापि श्रुतिः प्राह पुत्राद्वित्तात्तथान्यतः सर्वस्मादान्तरं तत्त्वं तदेतत्प्रेय इष्यतां ५६ श्रौत्या वि
चारदृष्ट्याऽयं साक्ष्येवात्मा न चेतरः कोशान्पंच विविच्यान्तर्वस्तुदृष्टिर्विचारणा ५७ जागरस्व
प्नसुप्तीनामागमापायभासनं यतो भवत्यसावात्मा स्वप्रकाशचिदात्मकः ५८ ॥

प्रेयोन्यस्मात्सर्वस्मादान्तरतरं यदयमात्मेत्यनेन वाक्येन पुत्रवित्तादेः सर्वस्मादान्तरत्वस्यात्मतत्त्वस्य प्रियतमत्वमीरितमित्यर्थः ५६ भवत्वेवं
श्रुत्यावभियानं प्रकृते किमायातमित्यत आह श्रौत्येति श्रुत्यर्थपर्यालोचनरूपया विचारदृष्ट्या साक्षिण एव मुख्यमात्मत्वं नेतरस्य पु
त्रादेरित्यर्थः विचारदृष्ट्येत्यभिहितं तस्य विचारस्य स्वरूपमाह कोशानिति अन्नमयादीन्पंच कोशांस्तैत्तिरीयश्रुत्युक्तप्रकारेणात्मनः
पृथक्कृत्यान्तःस्थितस्यात्मनोऽनुभवो विचारणेत्यर्थः ५७ अंतःस्थितस्य वस्तुनो दर्शनप्रकारमेवाह जागरेत्यादिना जाग्रदाद्यवस्था
नामथोत्तरोत्तरावस्थागमनस्य पूर्वपूर्वावस्थानिवृत्तेश्चावभासनं यतो नित्यचैतन्यरूपात्साक्षिणो भवति सः स्वप्रकाशचिद्रूपसाक्षी

पं॰ ५८ ॥

संग्रहेणोक्तमर्थं प्रपंचयति शेषा इति साक्षिव्यतिरिक्ताः प्राणादिवित्तान्ताः वक्ष्यमाणाः पदार्थास्तारतम्येनात्मन आसन्नाः समीप
वर्तिनो भवंति तत्रोपपत्तिमाह प्रीतिरिति यथा तारतम्येनान्तरत्वं तद्वदेव तेषु प्राणादिषु तारतम्यात्प्रीतिर्वीक्ष्यते सर्वैरपीतिशेषः
५९ प्रीतेस्तारतम्येनानुभवमेव विशदयति वित्तादिति पिंडोऽन्नमयो देहः अयंभावः सर्वैः प्राणिभिः पुत्रादिविपत्परिहाराय वि
त्तव्ययः क्रियते स्वदेहरक्षणाय कदाचित्पुत्रादिरपि दीयते इंद्रियनाशपरिहाराय ताडनादिना देहपीडाप्यंगीक्रियते मरणाश
सक्तौ तत्परिहारायैंद्रियवैकल्पमप्यंगीक्रियते अतएवोत्तरोत्तरमतिशयेन प्रियत्वं सर्वानुभवसिद्धमात्मनस्तु निरतिशय

शेषाः प्राणादिवित्तांता आसन्नास्तारतम्यतः प्रीतिस्तथा तारतम्यात्तेषु सर्वेषु वीक्ष्यते ५९ वित्ता
त्पुत्रः प्रियः पुत्रात्पिंडः पिंडात्तथेंद्रियं इंद्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रियः ६० एवं स्थि
ते विवादोत्र प्रतिबुद्धविमूढयोः श्रुत्योदाहारित आत्मा प्रेयानित्येव निर्णयः ६१ साक्ष्येव दृश्या
दन्यस्मात्प्रेयानित्याह तत्ववित् प्रेयान्पुत्रादिरेवेमं भोक्तुं साक्षीति मूढधीः ६२ आत्मनोन्यं
प्रियं ब्रूते शिष्यश्च प्रतिवाद्यपि तस्योत्तरं वचो बोधशापौ कुर्यात्तयोः क्रमात् ६३

प्रेमास्पदत्वं विद्वदनुभवसिद्धमिति ६० एवमात्मनः प्रियतमत्वे प्रमाणसिद्धेपि तज्ज्ञान्यज्ञानिनोर्विप्रतिपत्तिनिरासाय श्रुत्या
तद्विप्रतिपत्तिर्दर्शितेत्याह एवं स्थित इति तत्र निर्णयमाह तत्रेति आत्मनः प्रियतमत्वस्योपपादितत्वादिति भावः ६१
तामेव विप्रतिपत्तिमाह साक्षीति ६२ आत्मातिरिक्तस्य प्रियत्ववादिनो विभज्योत्तराभिधानाय तमेव वादिनं विभज्य क
थयति आत्मन इति उत्तराभिधानप्रकारमाह तस्योत्तरमिति तयोः शिष्यप्रतिवादिनोः संबंधिनस्तस्य वचनस्योत्तरं
वचः प्रत्युक्तिरूपं वाक्यं क्रमेण बोधशापौ बोधरूपं शापरूपं च कुर्यादित्यर्थः ६३ ॥

अनयोः प्रतिवचनस्य प्रदानरूपं स योऽन्यमात्मनः प्रियं ब्रुवाणं प्रति ब्रूयात् प्रियं त्वां रोत्स्यतीति समन्तंत्र श्रुतिवाक्यमर्थतः पठति प्रियं त्वामि
ति तत्र विजिगीषुप्रतिवादिना उभावपि प्रति हे शिष्य हे प्रतिवादिन् प्रियं त्वदभिप्रेतं पुत्रादिरूपं स्वनाशेन त्वां शिष्यं प्रतिवादिनं वा रोत्स्यति
रोदयिष्यति इत्येवमुक्तेन प्रकारेण उत्तरं प्रतिवचनं वक्ति ब्रवीति इदमेकमेव वचनं शिष्यप्रतिवादिनोरुभयोऽप्युत्तरं जातमित्या
शंक्य शिष्यं प्रत्युत्तरं तावद्द्योतयति स्वोक्तेत्यादिना वीक्ष्यते तमहर्निशमित्यन्तेन सार्धश्लोकचतुष्टयेन शिष्यः स्वोक्तप्रियस्य स्वेनाभिम
तस्य पुत्रादिरूपस्य प्रीतिविषयस्य विवेकतो वक्ष्यमाणदोषविचारेण दुष्टत्वं वेत्ति अवगच्छति ९४ दोषविचारप्रकारमेव दर्शयति अलभ्येत्या

प्रियं त्वां रोत्स्यतीत्येवमुत्तरं वक्ति तत्त्ववित् स्वोक्तप्रियस्य दुष्टत्वं शिष्यो वेत्ति विवेकतः ९४ अलभ्यमा
नस्तनयः पितरौ क्लेशयेच्चिरम् लब्धोऽपि गर्भपातेन प्रसवेन च बाधते ९५ जातस्य ग्रहरोगादिः
कुमारस्य च मूर्खता उपनीतेऽप्यविद्यत्वमनुद्वाहश्च पंडिते ९६ पुनश्च परदारादि दारिद्र्यं च कुटु
म्बिनः पित्रोर्दुःखस्य नास्त्यन्तो धनी चेन्म्रियते तदा ९७ एवं विविच्य पुत्रादौ प्रीतिं त्यक्त्वा निजात्म
नि निश्चित्य परमां प्रीतिं वीक्ष्यते तमहर्निशम् ९८ आग्रहाद्ब्रह्मविद्द्वेषादपि पक्षममुञ्चतः
वादिनो नरकः प्रोक्तो दोषश्च बहुयोनिषु ९९ ॥

दिना एवं पुत्रगतदोषसंकीर्तनं दारादिसर्वविषयदोषोपलक्षणार्थम् ९५।९७ एवं विविच्येति एवमुक्तेन प्रकारेण पुत्रादौ विषयजाते वि
विच्य विद्यमानान् दोषान् विभज्य ज्ञात्वा तस्मिन् प्रीतिं परित्यज्य निजात्मनि प्रत्यग्रूपे साक्षिणि परमां निरतिशयां प्रीतिं निश्चित्य तं प्रत्यगात्मान
महर्निशं सर्वदा वीक्ष्यते अनुसंधत्ते इत्यर्थः ९८ प्रियं त्वां रोत्स्यतीत्यस्यैव वाक्यस्य प्रतिवादिनं प्रति शापरूपत्वं प्रकटयति आग्रहादिति आग्र
हादुक्तं पुत्रादि प्रियत्वं सर्वथा न त्यजामीत्येवंरूपात् ब्रह्मविद्द्वेषादनेनोक्तं विघटयिष्यामीत्येवंरूपाच्च पक्षं पुत्रादीनामेव प्रियत्वाभिधानरूपमप
रित्यजतः प्रतिवादिनो नरकप्राप्तिस्तथा बह्वयोनिषु नरतिर्यगादिष्वनेकेषु जन्मसु दोषः पुत्रभार्यादिविशिष्टवियोगानिष्टप्राप्तिरूपः प्रोक्तः प्रियं

ननु ज्ञानिनोक्तस्यैकस्यैव वाक्यस्य शिष्यं प्रत्युपदेशरूपत्वं वादिनं प्रति शापरूपत्वं चेति विरुद्धं रूपद्वयं कथं च घटत इत्याशंक्योत्तरत्र वदात्तरीश्व
रूपत्वात्तस्याभिप्रायानुसारेणैव भयं भविष्यतीति मत्वा तदुपपादकमस्येश्वरो हि तथैव स्यादिति समनंतरवाक्यस्य तात्पर्यमाह ब्रह्मवि
दिति यतो ब्रह्मविदः स्वस्यैव ब्रह्मत्वानुभवादीश्वरत्वमस्यातस्तेन यद्यच्छिष्यादिकं प्रतियद्यदिष्टमनिष्टं वाभिधीयते तत्तच्छिष्यप्रतिवादि
नोस्तस्य ज्ञानिनो यः शिष्यः यश्च प्रतिवादी तयोस्तथैव स्यादिष्टमनिष्टं वावश्यं भवेदित्यर्थः ७० अतिदेशमुखेनोक्तस्यार्थस्यान्वयमु
खेन प्रतिपादकमात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति समनंतरवाक्यमर्थतः
पठति यस्त्विति तुशब्दश्चार्थे वैलक्षण्ये वा द्योतनार्थः अनात्मप्रियत्ववादिनोन्यो यः शिष्यः आत्मानमेव उत्तमं प्रियं निरतिशयप्रेमगोचरं
सेवते सदानुस्मरति तस्य शिष्यादेः प्रेयान् प्रियतमत्वेनाभिमतः स आत्मा प्रतिवाद्यभिमतं प्रियमिव न कदाचिद्विनश्यति किं तु सदा

ब्रह्मविद्ब्रह्मरूपत्वादीश्वरस्तेन वर्णितम् यद्यत्तत्तत्तथैव स्यात्तच्छिष्यप्रतिवादिनोः ७० यस्तु साक्षि
णमात्मानं सेवते प्रियमुत्तमम् तस्य प्रेयान्स आत्मा न नश्यति कदाचन ७१ परप्रेमास्पदत्वेन
परमानन्दरूपता सुखवृद्धिः प्रीतिवृद्धौ सार्वभौमादिषूक्तता ७२ चैतन्यवत्सुखं चास्य स्वभावश्चे
च्चिदात्मनः धीवृत्तिष्वनुवृत्तिः स्यात्सर्वास्वपि चितेर्यथा ७३ ॥

नैकरूपः सन्नेवभासत इत्यर्थः ७१ अस्यात्मनः परप्रेमास्पदत्वहेतुं प्रसाध्येदानीं फलितमाह परप्रेमेति अत्रायं प्रयोगः आत्मा प
रमानंदरूपः निरतिशयप्रेमविषयत्वात् यः परमानंदरूपो न भवति स निरतिशयप्रेमविषयोपि न भवति यथा घटादिरिति केवलव्यति
रेकी परप्रेमास्पदत्वहेतोरात्मनः परमानंदरूपता सा यनेन सामर्थ्ययोतनाय प्रीतिवृद्धौ सुखवृद्धिमुदाहरति सुखवृद्धिरिति यतः सा
र्वभौमादिहिरण्यगर्भांतेषु पदविशेषेषु यत्र यत्र प्रीतिर्वर्द्धते तत्र तत्र सुखाभिवृद्धिरस्तीति तैत्तिरीयबृहदारण्यकयोरभिहितम
तः प्रीतेर्निरतिशयत्वे सत्यानंदस्यापि निरतिशयत्वमवगंतुं शक्यत इति भावः ७२ ननु आत्मनः परमानंदरूपत्वमनुपपन्नं तथात्वे चैत
न्यस्येव तत्स्वरूपम् तस्यानंदस्यापि सर्वासु धीवृत्तिष्वनुवृत्तिः प्रसज्येतेति शंकते चैतन्यवदिति ७३ ॥

138

चिदानंदयोरुभयोरप्यात्मस्वरूपत्वेपि वृत्तिषु चिज्ञप्त्यैवानुवृत्तिर्नानंदस्येति दृष्टांतावष्टंभेन परिहरति नैवमिति यथोत्स्वप्रकाशात्मकस्य दीप
स्य प्रकाशएव गृहादावनुगच्छति नोष्णता एवं चैतन्यस्यैवानुवृत्तिर्नानंदस्येत्यर्थः ७४ ननु चिदानंदयोरभेदे चिदभिव्यंजकधीवृत्तावेवानंदाभि
व्यक्तिरपि स्यादित्याशंक्य तथानियमाभावे दृष्टांतमाह गन्धेति यथैकद्रव्यवर्त्तिनां गंधादीनां चतुर्णां मध्ये घ्राणादिना एकैकेंद्रियेण गंधा
दिरेकैक एव गृह्यते नेतरस्तथा चिदानंदयोर्मध्ये चिदेवावभासनमित्यर्थः ७५ दृष्टांतदार्ष्टांतिकयोर्वैषम्यमाशंकते चिदानंदा
विति विलक्षणाभिन्नाइत्यर्थः उक्तंवैषम्यं परिहर्तुं दार्ष्टांतिके चिदानंदयोरभेदः किं स्वाभाविकउतऔपाधिकइतिविकल्पयति तदभे

नैवं स्वस्य प्रकाशात्मा दीपस्तस्य प्रभा गृहे व्याप्नोति नोष्णता तद्वच्चित्तेरेवानुवर्त्तनं ७४ गंधरूप
रसस्पर्शेष्वपि सत्स्व यथा पृथक् एकाक्षेणैक एवार्थो गृह्यते नेतरस्तथा ७५ चिदानंदौ नैव
भिन्नौ गंधाद्यास्तु विलक्षणाः इति चेत्तदभेदोपि साक्षिण्यन्यत्र वा वद ७६ आद्ये गंधादयोप्येवम
भिन्नाः पृष्ठवर्त्तिनः अक्षभेदेन तद्भेदे वृत्तिभेदात्तयोर्भिदा ७७ ॥

द इति तदभेदस्तयोः चिदानंदयोरभेदः एकं साक्षिण्यात्मस्वरूपेवाऽन्यत्रतदुपाधिभूतासुवृत्तिषु वेत्यर्थः ७६ प्रथमे पक्षे दृष्टांतदार्ष्टां
तिकयोः साम्यमाह आद्ये इति आद्ये चिदानंदयोः साक्षिण्यभेदाभावपक्षे पृष्ठवर्त्तिनो गंधादयोपि एवं चिदानंदवदेवाऽभिन्नाः परस्प
रं भेदरहिता इतरपरिहारेणैकस्याऽनेतुमशक्यत्वादिति भावः द्वितीये पक्षेपि साम्यमाह अक्षेति अक्षाणां गंधादिग्राहकाणां घ्रा
णादीन्द्रियाणां भेदेन तद्भेदे तेषां गंधादीनां भेदाभ्युपगमे तद्वदेव वृत्तिभेदाच्चिदानंदाभिव्यक्तिहेतूनां राजससात्त्विकवृत्तीनां भे
दात्तयोश्चिदानंदयोर्भिदा भेदो न विरुध्यतीत्यर्थः ७७ ॥

पंच· टी· २३५

ननु तर्हि चिदानंदयोरैक्यं कुत्रोपलभ्यत इत्याशंक्याह सत्ववृत्ताविति सत्ववृत्तौ शुभकर्मोपस्थापितायां सत्वगुणपरिणामरूपायां बुद्धिवृ
त्तौ चित्सुखैक्यं चिदानंदयोरैक्यं भासत इति शेषः तत्रोपपत्तिमाह तद्वृत्तेरिति कुत्र तर्हि भेदोवभासत इत्यत आह रजोवृत्तेरिति ७८ विद्यमा
नस्यापि सुखांशस्य तिरस्कारे दृष्टांतमाह तिंतिणीति यथा तिंतिणीफले लवणयोगादम्लत्वं तिरोहितं तद्वद्रजोवृत्तावानन्दस्य तिरो
भाव इत्यर्थः ७९ गूढाभिसंधिः शंकते नन्विति ननूक्तेन प्रकारेणात्मनः परमानंदरूपत्वं परप्रेमास्पदत्वहेतुना गौणमिथ्यात्मरूपेभ्यः
प्रियोपस्हेभ्यो विवेक्तुं विविच्य ज्ञातुं शक्यतां नाम तथापि नायं विवेको मुक्तिसाधनं अपरोक्षज्ञानद्वारा मुक्तिहेतोर्योगस्यानभिसं

सत्ववृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः रजोवृत्तेस्तु मालिन्यात्सुखांशोऽत्र तिरस्कृतः ७८ तिं
तिणीफलमत्यम्लं लवणेन युतं यदा तदाम्लस्य तिरस्कारादीषदम्लं यथा तथा ७९ ननु प्रिय
तमत्वेन परमानंदतात्मनि विवेक्तुं शक्यतामेवं विना योगेन किं भवेत् ८० यद्योगेन तदेवाप्ति
वदामो ज्ञानसिद्धये योगः प्रोक्तो विवेकेन ज्ञानं किं नोपजायते ८१ यत्सांख्यैः प्राप्यते स्थानं
तद्योगैरपि गम्यते इति श्रुतफलैकत्वं योगिनां च विवेकिनाम् ८२ ॥

धानादिति गूढोभिसंधिः ८० गूढाभिसंधेरेवोत्तरमाह यद्योगेनेति यथा योगस्यापरोक्षज्ञानहेतुत्वमस्ति एवं विवेकस्यापीत्यत्रा
पि गूढोभिसंधिः इदानीं चोद्यपरिहारयोरुभयोरभिसंधिं प्रकटयति ज्ञानेति यथाऽपरोक्षज्ञानसाधनत्वेन योगोऽभिहितः एवं
स्मिन्नध्याये एवमस्मिन्नध्यायेऽभिहितेन गौणमिथ्यात्मविवेकद्वारा कोशपंचकविवेकेनापि ज्ञानमुत्पद्यत एवेत्यर्थः ८१ तत्र किं प्र
माणमित्याशंक्याह यत्सांख्यैरिति सांख्यैरात्मानात्मविवेकिभिर्यत्स्थानं मोक्षरूपं प्राप्यते गम्यते तत् योगैर्योगिभिरपि गम्यते प्राप्यत इ
त्यनेन वचनेन योगिनां विवेकिनां च फलैकत्वं ज्ञानद्वारा मोक्षलक्षणस्यैकत्वमुक्तमित्यर्थः ८२ ॥

139

ननु विवेकयोगयोरेकमेव चेत्फलं तर्हि अनयोरन्यतरस्यैवमुक्तं शास्त्रेषु प्रतिपादनेनोभयोरित्याशंक्याधिकारिवैचित्र्यादुक्तमुभयप्रतिपा
दनमित्यभिप्रायेणाह असाध्य इति ८३ ननु ससंतायासमसाध्यस्य योगस्य निरायाससहल्लभाद्विवेकादतिशयो वक्तव्य इत्याशंक्य सोतिश
यः किमपरोक्षज्ञानजनकत्वादुच्यते उत रागद्वेषनिवृत्तिहेतुत्वादथवा द्वैतानुपलब्धिकारणत्वादिति विकल्प्य प्रथमे पक्षे फलसा
म्यमित्याह योगेति द्वयोर्योगविवेकयोरपि ज्ञानलक्षणं फलं सममुक्तं यस्मात्स्वैरिसादिना अतस्तेन वा अयोगे कोतिशयः न कोपी

असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः इत्थं विचार्य मार्गौ द्वौ जगाद परमेश्वरः ८३ यो
गे कोतिशयस्तेन ज्ञानमुक्तं समं द्वयोः रागद्वेषाद्यभावश्च तुल्यो योगिविवेकिनोः ८४ न प्री
तिर्विषयेष्वस्ति प्रेयानात्मेति जानतः कुतो रागः कुतो द्वेषः प्रातिकूल्यमपश्यतः ८५ देहा
देः प्रतिकूलेषु द्वेषस्तुल्यो द्वयोरपि द्वेषं कुर्वन्नयोगी चेदविवेक्यपि तादृशः ८६ ॥

त्यर्थः द्वितीयं प्रत्याह रागद्वेषेति ८४ विवेकिनो रागाद्यभावमुपपादयति न प्रीतिरिति आत्मा प्रेयानिति आत्मा प्रियतम इति जानतः
पुरुषस्य न तावद्विषयेषु प्रीतिरस्ति अतो न तेषु रागो जायते रागहेतोरानुकूल्यज्ञानस्याभावात् नापि द्वेषः तद्धेतोः प्रातिकूल्यज्ञा
नस्याभावादित्यर्थः ८५ ननु विवेकिनो व्यवहारदशायां देहाद्युपद्रवकारिषु द्वेषो दृश्यत इत्याशंक्य तदा योगिविवेकिनोः समतुल्य
इति परिहरति देहादेरिति प्रतिकूलेषु वृश्चिकादिषु द्वेषकर्तृत्वदा योगित्वमेव नाभ्युपगम्यते चेद्भवता तर्हि तादृशस्य विवेकित्वम
पि नाभ्युपगच्छाम इत्याह द्वेषमिति तादृशो द्वेषकर्ता चेदविवेक्यपि विवेकवानपि न भवतीत्यर्थः ८६ ॥

ननु विवेकिनो द्वैतदर्शनमस्ति योगिनस्तु तन्नास्तीति तत्तनीये विकल्पे योगिनो ऽतिशयो भविष्यतीत्याशंक्य विवेकिनस्तु द्वैतदर्शनं किं व्यवहा
रदशायामुच्यते उत समाधावेतिति विकल्प्याद्ये तत्र योगिनो ऽपि समानमित्याह द्वैतस्येति द्वितीयमाशंकते समाधाविति योगिनः समाधिका
ले द्वैतदर्शनं नास्तीत्युच्यते चेदित्यध्याहारः तर्हि विवेकिनो ऽपि विवेकदशायां द्वैतादर्शनं तुल्यमिति परिहरति तद्वदिति योगि
नः समाधिदशायामिवाद्वैतत्वं विवेकिनः अद्वैतं तत्त्वमिति श्रुतियुक्तिभ्यां विवेचनं कुर्वतो ऽपि तस्मिन्काले द्वैतदर्शनं नास्तीत्य

द्वैतस्य प्रतिभानं तु व्यवहारे द्वयोः समं समाधौ नेति चेत्तद्वदद्वैतत्वं विवेकिनः ८७ विवक्ष्य
ते तदस्माभिरद्वैतानंदनामके अध्याये हि तृतीये ऽतः सर्वमप्यतिमंगलम् ८८ सदा पश्यन्नि
जानंदमपश्यन्नखिलं जगत् अर्थाद्योगीति चेत्तर्हि संतुष्टो वर्द्धतां भवान् ८९ ब्रह्मानंदाभिधे
ग्रंथे मंदानुग्रहसिद्धये द्वितीयाध्याय एतस्मिन्नात्मानंदो विवेचितः ९० इति ब्रह्मानंदे आत्मानं
दो नाम द्वितीयो ऽध्यायः २ ॥

र्थः ८७ कथं तदभाव इत्याशंक्योपरितने ऽध्याये तदुपपादयिष्यत इत्याह विवक्ष्यत इति उक्तमर्थं निगमयति सर्वमपीति ८८ ननु
द्वैतादर्शनसहितात्मदर्शनवतो योगित्वमेव भविष्यतीति शंक्यते सदा पश्यन्निति इष्टापत्त्या परिहरति तर्हीति ८९ अध्या
यतात्पर्यं संक्षिप्य दर्शयति ब्रह्मानंदेति ९० इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिकिंकरे
ण रामकृष्णाख्यविदुषा विरचिते ब्रह्मानंदे आत्मानंदः द्वितीयो ऽध्यायः २ ॥

नन्वानंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इति प्रथमाध्याये आनंदत्रयमेव प्रतिज्ञाय द्वितीयाध्यायेन तदतिरिक्तात्मानंदनिरूपणान्न हि दो
षो जायत इत्याशंक्याह योगानंद इति यथा प्रतिज्ञातस्यैव ब्रह्मानंदस्य योगजन्यसाक्षात्कारविषयत्वेन योगानंदत्वं निरुपाधिकत्वेन निजानंद
त्वं च व्यवह्रियते तथा तस्यैव गौणमिथ्यामुख्यात्मविवेचनेनावगम्यत्वविवक्षयात्मानंदत्वमभिहितमिति भावः ननु सजातीयाद्गौणात्म
नः पुत्रभार्यादेः मिथ्यात्मनो देहादेः विजातीयादाकाशादेश्च विभिन्नस्य सद्वयस्यात्मानंदस्य प्रथमाध्यायोक्ताद्वितीययोगानंदरूपता न
संभवतीति शंकते कथमिति सजातीयत्वेनाभिमतस्य गौणात्मनः पुत्रादेः मिथ्यात्मनो देहादेश्च तैत्तिरीयश्रुत्यभिहितजगदंतः पाति

योगानंदः पुरोक्तो यः स आत्मानंद इष्यतां कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेच्छृणु १ आकाशा
दिस्वदेहांतं तैत्तिरीयश्रुतीरितं जगन्नास्त्यन्यदानंदादद्वैतब्रह्मता ततः २ आनंदादेव तज्जातं
तिष्ठत्यानंद एव तत् आनंद एव लीनं चेत्युक्तानंदात्कथं पृथक् ३ ॥

त्वादाकाशादेश्च जगत आत्मानंदातिरेकेणाऽसत्त्वाद्द्वितीयब्रह्मरूपता तस्य घटत इति सदृष्टमानमुत्तरमाह शृण्विति १ आकाशादीति त
स्माद्वा एतस्मादात्मन आकाशः संभूतः इत्यादिकया तैत्तिरीयश्रुत्याभिहितं जगत्स्वकारणभूतादात्मानंदाद्यतः पृथङ्नास्ति अतः कारणात्तस्या
त्मानंदस्याद्वितीयत्वमित्यभिप्रायः २ ननूदाहृतश्रुतिवाक्ये आत्मनः कारणत्वं श्रूयते नानंदस्येत्याशंक्य तत्प्रतिपादकं तदीयमेवानंदाद्ध्ये
व खल्विमानि भूतानि जायंते इत्यादिवाक्यमर्थतः पठति आनंदादेवेति व्याख्यातं फलितमाह इत्युक्तेति ३ ॥

अत्रेदमनुमानं सूचितं विमतं जगदानंदान्न भिद्यते तत्कार्यत्वात् यद्यत्कार्यं तत्तन्न भिद्यते यथास्मत्कार्यं घटादिमृदो न भिद्यत इति ३ ननु कुला
लाद्युत्पन्नस्य घटस्य ततो भेददर्शनादनैकांतिकता हेतोरित्याशंक्य कुलालस्य निमित्तकारणत्वादिह चानंदस्योपादानत्वस्य समर्थितत्वान्नैवमित्या
ह कुलालादिति एवमात्मानंदः स्वहस्तकृतघटस्येव उपादानमुपादानकारणं कुलालवत्कुलाल इव निमित्तं निमित्तकारणं न भवति ४ ननु कु
तो नोपादानत्वं कुलालस्यापीत्याशंक्य स्थितिलयाधारत्वरूपोपादानलक्षणाभावादित्याह स्थितिरिति हि यस्मात्कारणात् घटस्य स्थितिलयौ
कुलालाधारौ न भवतस्ततो नोपादानत्वमिति शेषः ननु तर्हि तादृशत्वमस्तीत्यत आह दृष्टाविति तौ घटस्य स्थितिलयौ तदुपादानभूतायां मृद्येव दृष्टौ प्र
त्यक्षेणोपलब्धौ भवतस्त्वेवं तत्र प्रकृते किमायातमित्यत आह तद्वदिति यद्वदिति यद्वद्घटस्य मृदुपादानं तद्वज्जगतोप्यानंद उपादानं स्यात् न

कुलालाद्घट उत्पन्नो भिन्नश्चेति न शंक्यताम् मृद्वदेष उपादानं नो निमित्तं कुलालवत् ४ स्थिति
लयश्च कुंभस्य कुलाले स्तो न हि क्वचित् दृष्टौ तौ मृदि तद्वत्स्यादुपादानं तयोः श्रुतेः ५ उपादानं द्वि
धाभिन्नं विवर्तिपरिणामिवत् आरंभकं च तत्रांत्यौ निरंशेनावकाशिनौ ६ आरंभवादिनोऽन्यस्मा
दन्यस्योत्पत्तिमूचिरे तंतोः पटस्य निष्पत्तेर्भिन्नौ तंतुपटौ खलु ७ ॥

तद्धेतुमाह तयोरिति तयोर्जगत्स्थितिलययोः श्रुतेरानंदाद्ध्येवेति वाक्ये आनंदहेतुकत्वश्रवणादित्यर्थः ५ आनंदस्याभिमतं ज
गदुपादानत्वं वक्तुं तदवांतरभेदमाह उपादानमिति तत्र विवर्तपरिणामौ परिशोधयितुमितरौ पक्षौ दूषयति तत्रेति अंत्यो आरंभपरिणाम
पक्षौ निरंशे निरवयवे वस्तुनि नावकाशिनौ अवकाशवंतौ न भवतः ६ तयोरनवकाशित्वमेव दर्शयितुं तावदारंभवादिनो मत
मनुवदति आरंभेति आरंभवादिनो वैशेषिकादयः अन्यस्मात्कार्यापेक्षयान्यस्मात्कारणादन्यस्य कारणापेक्षयाऽन्यस्य कार्यस्योत्
पत्तिमूचिरे उक्तवंतः कुत एवं वदंतीत्यत आह तंतोरिति निष्पन्नस्य पटस्य दर्शनादिति शेषः एतावता कथं कार्यकारणभेदसिद्धिरि
त्यत आह भिन्नाविति विरुद्धपरिमाणत्वाद्विरुद्धार्थक्रियावत्त्वाच्चेति भावः ७ ॥

इदानीं परिणामस्वरूपमाह अवस्थेति एकस्यैव वस्तुनः पूर्वावस्थापरित्यागपुरःसरमवस्थान्तरप्राप्तिः परिणाम इत्यर्थः तमुदाहरति
स्यादिति यथा क्षीरमृत्सुवर्णादीनां क्षीरादिव्यवहारयोग्यतां परित्यज्य दध्यादिव्यवहारयोग्यतापत्तिः ८ इदानीं विवर्तलक्षणमाह अव
स्थेति तत्राप्येकस्यैव वस्तुन इत्यादिलक्षणपदयोजनार्थः पूर्वावस्थामपरित्यज्यैवावस्थान्तरभानं विवर्तः उदाहरति रज्ज्विति यथा रज्ज्वात्म
नावस्थितस्यैव द्रव्यस्य सर्पात्मनाऽवभासनम् ननु विवर्तमानस्य रज्ज्वादेः सांशत्वदर्शनान्निरंशे सोऽपि न घटत इत्याशङ्क्य निरवयवे गगना

अवस्थान्तरतापत्तिरेकस्य परिणामिता स्यात्क्षीरं दधि मृत्कुंभः सुवर्णं कुंडलं यथा ८ अवस्था
न्तरभानं तु विवर्तो रज्जुसर्पवत् निरंशेऽप्यस्त्यसौ व्योम्नि तलमालिन्यकल्पनात् ९ ततो निरं
शआनंदे विवर्तो जगदिष्यताम् मायाशक्तिः कल्पिका स्यादैंद्रजालिकशक्तिवत् १० ॥

दावपि तद्दर्शनान्नैवमित्याह निरंशेऽपीति असौ विवर्तः व्योम्नि तलत्वमधोमुखेन्द्रनीलकटाहतुल्यत्वं मालिन्यं नीलवर्णता तयोः
कल्पनादाकाशस्वरूपानभिज्ञैरारोपिमाणत्वादित्यर्थः ९ फलितमाह तत इति ततो निरंशेऽपि विवर्तसंभवाज्जगन्निरंशआ
नंदे विवर्तः कल्पितमित्यंगीकार्यमित्यर्थः नन्वद्वितीयआनन्दे जगत्कल्पनमनुपपन्नं कल्पनाहेतोरभावादित्याशंक्याह मा
येति शक्तेः कल्पकत्वं क्व दृष्टमित्यत आह ऐन्द्रजालिकेति यथैन्द्रजालिकनिष्ठायां मणिमंत्रादिरूपायां मायाशक्तेर्गंधर्वनगरा
दिकल्पकत्वं तथेत्यर्थः १० ॥

पं॰टी॰
१५२

नन्वात्मातिरिक्ताया मायाया अभ्युपगमे द्वैतापत्तिरित्याशंक्य तस्या अनिर्वचनीयत्वेनात्तत्त्वं वक्तुमुपरत्रवद्रूपमाणाया लौकिक्या
अग्न्यादिगतशक्तेस्तावद्भेदेन वाऽभेदेन वा निर्वक्तुमशक्यत्वं दर्शयति शक्तिरिति शक्तिरग्न्यादिनिष्ठा स्फोटादिजनका शक्ताद् अग्न्यादिस्व
रूपात्पृथक्भेदेन नास्ति कुत इत्यत आह तद्वदिति तद्वत् तथात्वस्य भेदेनास्तत्वस्य दृष्टेर्दर्शनादग्न्यादिस्वरूपातिरेकेणानुपलम्भमा
नत्वादित्यर्थः नाप्यग्न्यादिस्वरूपमेव शक्तिरित्याह नचेति अभिदा अभेदोपि नच नैव तत्रापि हेतुमाह प्रतिबंधस्येति मणिमंत्रा
दिभिः शक्तिकार्यस्य स्फोटादेः प्रतिबंधदर्शनात्स्वरूपातिरिक्ता शक्तिरिष्टव्येत्यभिप्रायः भवतु प्रतिबंधदर्शनेन शक्तेर्भेदोपि मा

152

शक्तिः शक्तात्पृथङ्नास्ति तद्वद्दृष्टेर्न चाभिदा प्रतिबंधस्य दृष्टत्वाच्छक्त्यभावे तु कस्य सः ॥ ११
शक्तेः कार्यानुमेयत्वादकार्ये प्रतिबंधनम् ज्वलतोग्नेरदाहेस्मिन्मंत्रादिप्रतिबन्धता १२ ॥

भूत्को दोषस्तत्राह शक्त्यभाव इति प्रत्यक्षसिद्धस्याग्न्यादिस्वरूपस्य प्रतिबंधासंभवात्तदतिरिक्तशक्त्यनभ्युपगमेपि प्र
तिबंधो निर्विषयः स्यादित्यभिप्रायः ११ नन्वतीन्द्रियायाः शक्तेः कथं प्रतिबंधोवगंतुं शक्यत इत्याशंक्याह शक्तेरिति अ
तीन्द्रियापि शक्तिर्यतः कार्यलिंगगम्यातः अकार्ये सत्यपि कारणे कार्यानुत्पत्तौ सत्यां प्रतिबंधनं प्रतिबंधः अवगम्य
ते इति शेषः उक्तमर्थं दृष्टांतप्रदर्शनेन स्पष्टयति ज्वलत इति लोके स्वरूपेण ज्वलतोग्नेः सकाशाद्दाहादिलक्षणे कार्ये नु
त्पद्यमाने सति मंत्रादिप्रतिबंधता मंत्रादीनां शक्तिप्रतिबंधकत्वं स्यादित्यर्थः १२ ॥

इत्थं लौकिकशक्तिस्वरूपतः प्रमाणतश्चोपन्यस्येदानीं मायाशक्तिसद्भावे ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति श्वेताश्वतरोपनिषद्वाक्यमर्थतः पठति देवात्मेति मुनयः कालस्वभावादिकारणवादिष्वदोषदर्शनवन्तः जगत्कारणजिज्ञासया ध्यानयोगमाश्रिता अधिकारिणः देवात्मशक्तिं देवस्य द्योतमानस्य प्रकाशचिद्रूपस्यात्मनः प्रत्यगभिन्नस्य ब्रह्मणः शक्तिं मायां स्वगुणैः कार्यभूतैः स्थूलसूक्ष्मशरीरैः निगूढां नितरां गूढामावृतां अविदन् साक्षात्कृतवन्त इत्यर्थः तस्यामेवोपनिषदि स्थितं परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति वाक्यान्तरमर्थतः पठति परास्येति अस्य ब्रह्मणः परा उत्कृष्टा जगत्कारणभूता शक्तिर्विविधा

देवात्मशक्तिं स्वगुणैर्निगूढां मुनयोऽविदन् परास्य शक्तिर्विविधा क्रियाज्ञानबलात्मिका १३
इति वेदवचः प्राह वसिष्ठश्च तथाब्रवीत् सर्वशक्तिः परं ब्रह्म नित्यमापूर्णमद्वयम् १४ ॥

श्रूयते इति वाक्यशेषः विविधत्वमेवाह क्रियेति क्रियाज्ञाने प्रसिद्धे बलमिच्छाशक्तिः ज्ञानक्रियाशक्तिसाहचर्यात् क्रियादिशक्तय आत्मा स्वरूपं यस्याः सा क्रियाज्ञानबलात्मिका १३ इदं वाक्यद्वयं श्रुत्यन्तरमित्यत आह इतीति न केवलं मायाशक्तिः श्रुतिसिद्धा किं तु स्मृतिसिद्धापीत्याह वसिष्ठ इति यथा श्रुतिर्विचित्रां मायाशक्तिमुक्तवती वसिष्ठोऽपि तां तथोक्तवान् वासिष्ठाभिधे ग्रन्थे इति शेषः मायाप्रतिपादकान् वासिष्ठश्लोकानेव पठति नित्यमापूर्णमद्वयमिति ब्रह्मणः पारमार्थिकं रूपमुक्तं सर्वशक्तीति तस्यैव सोपाधिकं रूपं १४ ॥

तत्परं ब्रह्म यदा यदा यया यया शक्त्या उल्लसति विकसति विवर्त्तते इत्यर्थः तदा तदाऽस्य वसौ शक्तिः प्रकाशमधिगच्छति अभिव्यक्तिं प्रा
प्नोति इदानीं तामेवाभिव्यक्तिं प्रपंचयति चिच्छक्तिरिति शरीरेषु देवतिर्यङ्मनुष्यादिलक्षणेषु चिच्छक्तिः चेतनत्वव्यवहारहेतुभूतो
पलभ्यते दृश्यते १५ स्पंदशक्तिः स्खलनहेतुभूता प्रकाशमधिगच्छतीत्युक्त्याऽनभिव्यक्तिदशायामपि ब्रह्मणो जगत्त्वादर्शिता १६
अनभिव्यक्तस्यापि सत्त्वे दृष्टान्तमाह यथाण्डेति १७ विचित्रस्यापि तस्य सत्त्वे दृष्टान्तमाह फलेति १८ ननु सर्वासामपि शक्तीनां युग
पदेवाभिव्यक्तिः कुतो न स्यादित्याशंक्याह क्वचिदिति क्वचिद्देशविशेषे कदाचित्कालविशेषे काश्चिच्छक्त्यादयः तासामयुगपदभि

यथोल्लसति शक्त्यासौ प्रकाशमधिगच्छति चिच्छक्तिर्ब्रह्मणो राम शरीरेषूपलभ्यते १५ स्पंदश
क्तिश्च वातेषु दार्ढ्यशक्तिस्तथोपले द्रवशक्तिः स्थिता वाप्सु दाहशक्तिस्तथानले १६ शून्यशक्ति
स्तथाकाशे नाशशक्तिर्विनाशिनि यथाण्डेऽन्तर्महासर्पो जगदस्ति तथात्मनि १७ फलपत्रलता
पुष्पशाखाविटपमूलवान् तरुबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितम् १८ क्वचित्काश्चित्कदा
चिच्च तस्मादुद्यन्ति शक्तयः देशकालविचित्रत्वात्क्ष्मातलादिव शालयः १९ स आत्मा सर्वगो
राम नित्योदितमहावपुः यन्मनाङ्मननीं शक्तिं धत्ते तन्मन उच्यते २० ॥

व्यक्तौ दृष्टान्तमाह क्ष्मातलादिति यथा भूमिगतानां सर्वेषां बीजानां मध्ये देशविशेषे कालविशेषे च केषांचिदेव बीजानामंकुरोत्प
त्तिर्नान्येषां तद्वदित्यर्थः १९ इदानीं जगतः कल्पनामात्ररूपतां दर्शयितुं तत्कल्पकस्य मनसो रूपं तावद्दर्शयति स इति नित्योदित
महावपुः नित्यं सदा उदितं प्रकाशमानं महद्देशकालादेः परिच्छेदरहितं वपुः स्वरूपं यस्य स तथा यदा यस्मिन्काले मनाक् ईषत्
मननीं स्वपरावबोधनरूपां शक्तिं मायायाः परिणामरूपां धत्ते धारयति तत्तदा मन इत्युच्यते २० ॥

इदानीं कल्पनाप्रकारमाह आदाविति आदौ प्रथमं मननप्रान्त्युल्लासेन मनो भवति तदनु तदनंतरं बंधविमोक्षदृष्टी बंधविमोक्षकल्पने भवतः पश्चात्तदनंतरं बंधदृष्ट्यावेव भुवनाभिधानां भुवनमित्यभिधानं यस्याः सा भुवनाभिधाना प्रपंचरचना प्रपंचस्य शैलनगरादिसरित्समुद्रादेः रचना कल्पना भवतीत्यादिका एवंप्रकारा इयं जगतः स्थितिः प्रतिष्ठां स्थैर्यं गता प्राप्ताऽस्थितस्यापि वास्तवत्वप्रतीतौ दृ

आदौ मनस्तदनु बंधविमोक्षदृष्टी पश्चात्प्रपंचरचना भुवनाभिधाना इत्यादिका स्थितिरियं हि गता प्रतिष्ठामाख्यायिका सुभग बालजनोदितेव २१ बालस्य हि विनोदाय धात्री वक्ति शुभां कथाम् क्वचित्संति महाबाहो राजपुत्रास्त्रयः शुभाः २२ द्वौ न जातौ तथैकस्तु गर्भ एव हि न स्थितः वसंति ते धर्मयुक्ता अत्यंतासति पत्तने २३ स्वकीयाच्छून्यनगरान्निर्गत्य विमलाशयाः गच्छंतो गगने वृक्षान्ददृशुः फलशालिनः २४ भविष्यन्नगरे तत्र राजपुत्रास्त्रयोऽपि ते सुखमद्य स्थिताः पुत्र मृगयाव्यवहारिणः २५ धात्र्यैवं कथिता राम बालकाख्यायिका शुभा निश्चयं स ययौ बालो निर्विचारणया धिया २६ इयं संसाररचना विचारोज्झितचेतसाम् बालकाख्यायिकेवेत्थमवस्थितिमुपागता २७ इत्यादिभिरुपाख्यानैर्मायायाः प्राक्तैस्तुविस्तरम् वसिष्ठः कथयामास सैव शास्त्रे निरूप्यते २८ ॥

ष्टांतमाह आख्यायिकेति बालजनाय उदिता उक्ता आख्यायिका कथा यथा वास्तवत्वबुद्धिं गता तथेदं जगदपीत्यर्थः २१ तामेव कथां कथयति बालस्येत्यादिना पंचभिः २२ २३ । २४ । २६ दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति इयमिति २७ वसिष्ठोक्तिमुपसंहरति इत्यादिभिरिति एवं मायासद्भावे प्रमाणमुपन्यस्य तस्या अनिर्वचनीयत्वं वक्तुं प्रतिजानीते सैवेति २८ ॥

कार्येति एषा मायाशक्तिः कार्यात्स्वकार्यभूताज्जगतः आश्रयतः आश्रयाद्ब्रह्मणश्च विलक्षणा विपरीतस्वभावा भवेत् मायाशक्तेः कार्यादाश्रयतो वैलक्षण्यं दृष्टान्तेन स्पष्टयति स्फोटेति वह्निगतशक्तेः कार्यरूपः स्फोटः आश्रयरूपोऽङ्गारश्च प्रत्यक्षगम्यौ शक्तिस्तु कार्येणानुमेया न तु ताभ्यां सा विलक्षणेत्यर्थः २९ उक्तमर्थं सच्छक्तावपि योजयति पृथुबुध्नेति यः पृथुबुध्नोदराकारः पृथुः स्थूलं बुध्नं वर्तुलं उदरं यस्य सः पृथुबुध्नोदरः तथाविधश्चाकारो यस्य सः पृथुबुध्नोदराकारः तादृग्घटः कार्यः शब्दस्पर्शरूपरसगन्धाख्यपञ्चगुणोपेता मृत्तिकाश्रयः शक्तिस्त्वतद्विधा उभयविलक्षणेत्यर्थः ३० वैलक्षण्यमेवाह न पृथ्वादिरिति शक्तौ पृथुत्वादिकार्यधर्मो नास्ति शब्दादिकाश्रयधर्मोऽपि नावि

कार्यादाश्रयतश्चैषा भवेच्छक्तिर्विलक्षणा स्फोटांगारौ दृश्यमानौ शक्तिस्तत्रानुमीयते २९ पृथुबुध्नोदराकारो घटः कार्योऽत्र मृत्तिका शब्दादिभिः पञ्चगुणैर्युक्ता शक्तिस्त्वतद्विधा ३० न पृथ्वादिर्न शब्दादिः शक्तावस्तु यथा तथा अत एव ह्यचिन्त्यैषा न निर्वचनमर्हति ३१ कार्योत्पत्तेः पुरा शक्तिर्निगूढास्त्यवस्थिता कुलालादिसहायेन विकाराकारतां व्रजेत् ३२ ॥

अतोऽतो विलक्षणेत्यर्थः तर्हि सा कीदृशीत्यत आह अस्त्विति यथा तथेत्युक्तमेवार्थं स्पष्टयति अत एवेति यतः कार्यादाश्रयतश्च विलक्षणा अत एवैषा अचिन्त्या चिन्तयितुमशक्या ननु तर्हि चिन्त्यत्वमेव तस्या रूपं स्यादित्याशङ्क्याह न निर्वचनमिति भेदेनाभेदेन वा चिन्त्यत्वाचिन्त्यत्वादिना वा केनापि रूपेण निर्वचनं नार्हतीत्यर्थः ३१ ननु कारणस्वरूपातिरिक्ता सच्छक्तिर्यद्यस्ति तर्हि कारणस्वरूपमिव सा कुतो नावभासत इत्याशङ्क्याह कार्योत्पत्तेरिति सच्छक्तिर्घटादिकार्योत्पत्तेः पूर्वं मृदि निगूढावतिष्ठतेऽतो नावभासत इत्यर्थः निगूढत्वे सत्युपरिष्टादपि न तस्या अभिव्यक्तिः स्यादित्याशङ्क्यानभिव्यक्तस्यापि नवनीतादेर्मन्थनादिनेव कुलालादिव्यापारेण तस्या अभिव्यक्तिः स्यादित्याह कुलालादीति आदिशब्देन दण्डचक्रादयो गृह्यन्ते ३२ ॥

ननु कारणातिरिक्तस्य शक्तिकार्यस्य सत्त्वे कार्यकारणयोर्भेदो न कुतो वभासत इत्याशंक्य भेदप्रतीतिहेतोर्विचारस्याभावादित्याह पृथुत्वादीति अविवेकिनो जनाः पृथुबुध्नादिरूपं कार्यं शब्दस्पर्शादिगुणरूपां कारणभूतां मृत्तिकां चाविचारतः एकीकृत्य घट इत्याचक्षते ३३ उक्तस्य घटव्यवहारस्याविचारमूलत्वं कुत इत्याशंक्याह कुलालेति कुलालव्यापारात्पूर्वभाविनो मृदंशस्याघटत्वेन व्यवहारादविचारमूलत्वं तस्येति भावः कस्य तर्हि घटत्वमित्यत आह पश्चाच्चेति कुलालादिव्यापारानन्तरभाविनः पृथुबुध्नाद्याकारस्यैव घटवाच्यत्वमुचितं तदुत्पत्त्यनन्तरमेव घटशब्दप्रयोगदर्शनादिति भावः ३४ ननु पारमार्थिकस्य घटस्यानिर्वचनीयशक्तिकार्यत्वमयुक्तमित्याशं

पृथुबुध्नादिविकारान्तं स्पर्शादिं चापि मृत्तिकां एकीकृत्य घटं प्राहुर्विचारविकला जनाः ३३ कुलालव्यापृतेः पूर्वो यावानंशः स नो घटः पश्चात्तु पृथुबुध्नादिमत्त्वे युक्ता हि कुम्भता ३४ स घटो न मृदो भिन्नो वियोगे सत्यनीक्षणात् नाप्यभिन्नः पुरा पिण्डदशायामनवेक्षणात् ३५ अतोऽनिर्वचनीयोऽयं शक्तिवत्तेन शक्तिजः अव्यक्तत्वे शक्तिरुक्ता व्यक्तत्वे घटनामभृत् ३६ ऐन्द्रजालिकनिष्ठापि माया न व्यज्यते पुरा पश्चाद्गन्धर्वसेनादिरूपेण व्यक्तिमाप्नुयात् ३७ ॥

क्य घटस्यापि पारमार्थिकत्वमसिद्धमित्याह स घट इति घटो मृदः पृथक्कृत्य द्रष्टुमशक्यत्वान्न मृदो भिद्यते नाप्यभिन्नः मृदेव पिण्डावस्थायामनुपलभ्यमानत्वादतः शक्तिवदनिर्वचनीय एव घटः ३५ फलितमाह तेनेति ननु शक्तिकार्ययोरुभयोरप्यनिर्वचनीयत्वे शक्तिः कार्यं चेति भेदव्यवहारः कुत इत्याशंक्याह अव्यक्तत्वे इति ३६ सर्वमनभिव्यक्तमायाशक्तिः पश्चादभिव्यज्यत इत्येतन्न प्रसिद्धमायारूपमुपलभ्यत इत्याशंक्याह ऐन्द्रजालिकेति पुरा मणिमन्त्रादिप्रयोगात्पूर्वम् ३७ ॥

शक्तिकार्यस्य घटादेरनृतत्वं शक्त्याधारस्य मृदादेः सत्यत्वमित्येतच्छांदोग्यश्रुतावप्यभिहितमित्याह एवमिति मायामयत्वेन माया
कार्यत्वेन विकारस्य कार्यरूपस्य घटादेरनृतात्मता मिथ्यात्वं विकाराणां घटादीनामाधारभूताया मृदः सत्यत्वं च वाचारम्भणं विकारो
नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिरुक्तवतीत्यर्थः ३८ इदानीं वाचारम्भणमित्याद्युदाहृतवाक्यमर्थतः पठति वाङ्निष्पाद्यमि
ति विकारो मृत्कार्यो घटादिः वाङ्निष्पाद्यं वागिन्द्रियेणोच्चार्यं नाममात्रं नाम्नैवास्य घटादेर्न सत्यता नाममातिरेकेण न पारमार्थिकं रू
पमस्ति किं तु तदाधारभूता मृदेव सत्येत्यर्थः ३९ शक्तितत्कार्ययोरनृतत्वे तदाधारस्य सत्यत्वे च कारणमाह व्यक्ताव्यक्ते इति व्यक्ता

एवंमायामयत्वेनविकारस्यानृतात्मता विकाराधारमृद्वस्तुसत्यत्वंचाब्रवीच्छ्रुतिः ३८
वाङ्निष्पाद्यंनाममात्रंविकारोनास्यसत्यता स्पर्शादिगुणयुक्तातुसत्याकेवलमृत्तिका ३९
व्यक्ताव्यक्तेतदाधारइतिद्विधाद्ययोर्द्वयोः पर्यायःकालभेदेनतृतीयस्त्वनुगच्छति ४० निस्त
त्वंभासमानंचव्यक्तमुत्पत्तिनाशभाक् तदुत्पत्तौतस्यनामवाचानिष्पाद्यतेनृभिः ४१ ॥

घटादिलक्षणकार्यं अव्यक्तं तत्कारणभूता शक्तिस्ते व्यक्ताव्यक्ते तदाधारस्तयोराधारभूता मृत्तिकेत्येतेषु त्रिषु मध्ये आद्ययोः प्रथ
मोद्दिष्टयोर्द्वयोः कार्यशक्त्योः संबन्धिनौ यौ कालौ तयोर्भेदेन भेदस्य विद्यमानत्वात्पर्यायः क्रमेण भवनं तृतीयस्तूभयाधारस्तु
मृदादिरनुगच्छति उभयत्रानुवर्तते अयं भावः शक्तिकार्ययोः कादाचित्कत्वादनृतत्वं आधारस्य तु कालत्रयानुगामित्वात्स
त्यत्वमिति ४० इदानीं विकारस्यैवासत्यत्वे हेत्वन्तरमाह निस्तत्त्वमिति व्यक्तमाहृवार्थं घटादिकं कार्यं स्वरूपेणासदेवावभास
ते तथोत्पत्तिविनाशवदुपलभ्यते तदुत्पत्त्यनंतरं वागिन्द्रियजन्यनामात्मकत्वेन व्यवह्रियते च ४१ ॥

किंच व्यक्ते कार्यस्वरूपेण नष्टेऽपि तत्कार्यभिन्नं नाम तत्त्ववक्त्रेषु तत्रत्यानां प्राक्प्रयोक्तॄणां मनुष्याणां वदनेष्वनुवर्तते ततः किं तत्राह तेन नाम्नेति
व्यक्तं कार्यं तेन वाचा व्यवह्रियमाणेन नाम्ना शब्देन निरूप्यत्वाद्व्यवह्रियमाणत्वात् तद्रूपं तस्य नाम्नो रूपमेव रूपं यस्य तत् तथा नाममात्रक-
मित्यर्थः अयं भावः विमतो घटो घटशब्दात्मको भवितुमर्हति घटशब्देन व्यवह्रियमाणत्वात् घटशब्दवदिति ॥ ४२ एवं हेतुत्रयं प्रसा-
ध्येदानीमनुमानरचनाप्रकारं सूचयति निःसत्त्वादिति व्यक्तस्य घटादिरूपस्य कार्यस्य यत् कम्बुग्रीवोदराकारं रूपमस्ति तत् किंचित्क्षणम-
पि सत्यं न भवति निःसत्त्वाद्विगतं तत्त्वं वास्तवं रूपं यस्मात् तन्निःसत्त्वं तस्य भावो निःसत्त्वं तस्मात् तथा विनाशित्वात् मृदि सत्यामेव नाशप्रति-

व्यक्ते नष्टेऽपि नामैतन्नृवक्त्रेष्वनुवर्तते तेन नाम्ना निरूप्यत्वाद्व्यक्तं तद्रूपमुच्यते ॥ ४२ निःसत्त्वाद्वा-
द्विनाशित्वाद्वाचारम्भणनामतः व्यक्तस्य न तु तद्रूपं सत्यं किंचिन्मृदादिवत् ॥ ४३ व्यक्तकालेततः
पूर्वमूर्ध्वमप्येकरूपभाक् सतत्त्वमविनाशं च सत्यं ब्रह्म तु कथ्यते ॥ ४४ ॥

योगित्वात् वाचारम्भणनामतः वागिन्द्रियजन्यशब्दमात्रात्मकत्वाद्धेतुत्रयेऽपि हेतुषु मृद्वदिति वैधर्म्यदृष्टान्तः अत्रैवं प्रयोगः घटादिरूपः
कार्यः असत्यो भवितुमर्हति निःसत्त्वात् यदसत्यं न भवति तन्न निःसत्त्वं यथा घटाद्युपादानं मृदिति केवलव्यतिरेकी एवमितरहेतुद्वयेऽपि यो-
जनीयम् ॥ ४३ एवं विकारस्यासत्यत्वमुपपाद्येदानीं तदधिष्ठानभूताया मृदः सत्यत्वमुपपादयति व्यक्तेति व्यक्तकालेऽस्थितिकालेततः पूर्वं
व्यक्तोत्पत्तेः सर्वस्मिन्काले ऊर्ध्वमपि व्यक्तविनाशोत्तरकालेऽपि एकरूपभाक् एकाकारं सतत्त्वं तत्त्वेन वास्तवरूपेण सह वर्तते तत् इति सतत्त्वम्
अविनाशं नाशरहितं च यन्मृद्ब्रह्म तत्सत्यमिति कथ्यते विमतं मृद्ब्रह्म सत्यं भवितुमर्हति सतत्त्वादात्मवदित्यादि प्रयोज्यम् ॥ ४४ ॥

ननु घटादेः कार्यजातस्यासत्यत्वेनारोपितरजतादेरिवाधिष्ठानज्ञाननिवर्त्यता स्यादिति शंकते व्यक्तमिति व्यक्तमित्यादिभिस्त्रिभिः शब्दैरभिधी यमानो योऽर्थः कार्यरूपः तस्य कारणातिरेकेणासत्यत्वेऽङ्गीक्रियमाणे मृल्लक्षणस्य कारणस्य ज्ञाने किं न तन्निवृत्तिः स्यादित्यर्थः ५५ इष्टापत्तिरि ति परिहरति निवृत्तमिति तत्रोपपत्तिमाह यस्मादिति यस्मात्कारणज्ञानवतां घटादिविषया सत्यत्वबुद्धिर्नष्टा गताऽतः सति हि ज्ञान एवेत्यर्थः नन्वा रोपितरजतादिस्वरूपस्येवाप्रतीतिरुपलभ्यते न सत्यत्वबुद्ध्यपगममात्रमित्याशंक्य तस्य निरुपाधिकभ्रमत्वादस्तु तथात्वमिह तु सोपाधिकभ्र मेण सत्यत्वबुद्ध्यपगम एव निवृत्तिः स्यादित्यभिप्रायेणाह ईदृगिति अत्र सोपाधिकभ्रमस्थले ईदृगेव सत्यत्वबुद्ध्यपगमरूपैव बोध

व्यक्तं घटो विकारश्चेत्येतैर्नामभिरीरितः अर्थश्चेदनृतः कस्मान्न मृद्बोधे निवर्तते ५५ निवृ त्त एव यस्मात्ते तत्सत्यत्वमतिर्गता ईदृङ्निवृत्तिरेवात्र बोधजानां न भासनं ५६ पुमानधोमु खो नीरे भातोऽप्यस्ति न वस्तुतः तटस्थमर्त्यवत्तस्मिन्नैवास्थाऽस्य कस्यचित् ५७ ईदृग्बोधे पुमर्थत्वं मतमद्वैतवादिनां मृद्रूपस्यापरित्यागाद्विवर्तत्वं घटे स्थितं ५८ ॥

नाधिष्ठानयाथात्म्यज्ञानजन्या निवृत्तिरस्मदपेया न त्ववभासनेन स्वरूपाऽप्रतीतिरूपेत्यर्थः ५६ एवं क्व दृष्टमित्यत आह पुमानिति जले ऽधोमुखत्वेन प्रतिभासमानोऽपि पुमान् परमार्थतो नास्ति तत्रोपपत्तिमाह तटस्थेति कस्यचिद्विवेकिनोऽविवेकिनो वा तस्मिन्नधोमुखे पुरुषे नीरस्थपुरुषवद्वा सत्यत्वाभिमानः क्वचिद्देशकाले वा नैवास्तीति ५७ नन्वारोपितस्यासत्यत्वज्ञानमात्रान्न पुरुषार्थसिद्धिरित्या शंक्याह ईदृग्बोध इति अद्वैतवादे आत्मानंदातिरिक्तस्य सर्वस्य मिथ्यात्वनिश्चये सत्यः द्वितीयानंदाभिव्यक्तिलक्षणः पुरुषार्थः सिध्यतीत्य भिप्रायः ननु घटस्य मृद्विवर्तत्वे सिद्धे तज्ज्ञानाद्घटसत्यत्वबुद्धिर्निवर्तेत न चैतदिदानीं सिद्धमित्याशंक्याह मृद्रूपस्येति ५८ ॥

घटे मृद्रूपपरित्यागाभावेपि मृत्परिणामत्वाच्च घटस्य किं न स्यादित्याशंक्याह परिणाम इति यत्क्षीरादेः परिणामोभ्युपगम्यते तत्र क्षीरा
दिभावस्य पूर्वस्य रूपस्य त्यागः उपलभ्यते इत्यर्थः ननु विवर्तेपि पूर्वरूपापरित्यागः क्व दृष्ट इत्याशंक्य मृत्स्वर्णयोर्दृश्यत इत्याह मृत्स्वर्ण
इति मृत्स्वर्णौ विवर्तयोर्घटकुंडलयोर्निष्पन्नयोरपि तत्कारणभूतमृत्स्वर्णरूपेण निवर्तेते इति प्रसिद्धमित्यर्थः ४९ ननु घटस्य मृद्वि
वर्तत्वमनुपपन्नं घटनाशे पुनर्मृद्भावादर्शनादिति शंकते घट इति मृद्भावाभावे कारणमाह कपालानामिति कपालानामपि ना
शे मृद्भावोपलब्धिः स्यादिति परिहरति नैवमिति स्वर्णे त्वेतच्चोद्यमेवानवकाशमित्याह स्वर्णेति ५० ननु परिणामे दृष्टान्तत्वे

परिणामे पूर्वरूपं त्यजेत्क्षीररूपवत् मृत्स्वर्णौ निवर्तेते घटकुंडलयोर्न हि ४९ घ
टे भग्ने न मृद्भावः कपालानामवेक्षणात् नैवं चूर्णेस्ति मृद्रूपं स्वर्णरूपं न तिरस्कृतं ५० क्षी
रादेः परिणामोस्तु पुनस्तद्भाववर्जनात् एतावता मृदादीनां दृष्टान्तत्वं न हीयते ५१ ॥

नाभिहितानां क्षीरमृत्स्वर्णानां मध्ये यदि मृत्स्वर्णयोर्विवर्ते दृष्टान्तत्वमंगीक्रियते तर्हि तद्वदेव क्षीरस्यापि तथात्वं स्यादित्याशंक्या
ह क्षीरादाविति तर्हि क्षीरवदेवावस्थान्तरमापाद्यमानयोस्तयोर्विवर्ते दृष्टान्तत्वं न भवेदित्याशंक्याह एतावतेति एतावता
क्षीरादेः परिणामित्वेन मृदादीनां मृत्स्वर्णादीनां दृष्टान्तत्वं विवर्ते दृष्टान्तभावः न हीयते न नश्यति अयमभिप्रायः क्षीर
स्यैव पूर्वरूपत्यागपुरःसरमवस्थान्तरापत्तिसद्भावात्परिणामित्वमेव मृत्स्वर्णयोस्तु अवस्थान्तरापत्तिसद्भावेपि पूर्व
रूपत्यागाभावाद्धि विवर्ततापीति ५१ ॥

ननु मृत्सुवर्णयोः परिणामविवर्त्तौ विवारम्भकत्वमपि किं नाङ्गीक्रियत इत्याशङ्क्याह आरम्भेति आरम्भवादिनो मते कार्ये घटादिरूपे मृदो मृत्तिका
देर्द्वयस्य द्वैगुण्यं कार्याकारेण कारणाकारेण च द्विगुणत्वमापद्येत न तथास्ति गुरुत्वादिद्वैगुण्यमप्यापद्येतेति भावः कुत एतदित्याशङ्क्याह रूपे
ति रूपादीनां गुणानां कार्यकारणयोस्तैरेव भेदस्याङ्गीकृतत्वादिति भावः ५२ ननु मृत्सुवर्णयोः किं द्वयोरेव विवर्त्ते दृष्टान्तत्वेनेत्याह मृदिति
अरुणस्य पुत्र उद्दालकाख्यः कश्चिदृषिः यथा सोम्यैकेन मृत्पिण्डेनेत्यारम्भकाम्नाय समित्येव सत्यमित्यनेन वाक्यं सदर्भेण कार्यस्यानृतत्वे

आरम्भवादिनः कार्ये मृदो द्वैगुण्यमापतेत् रूपस्पर्शादयः प्रोक्ताः कार्यकारणयोः पृथक् ५२
मृत्सुवर्णमयश्चेति दृष्टान्तत्रयमारुणिः प्राहातो वासयेत्कार्यानृतत्वं सर्ववस्तुषु ५३ कार
णज्ञानतः कार्यविज्ञानं चापि सोऽवदत् सत्यज्ञानेऽनृतज्ञानं कथमत्रोपपद्यते ५४ ॥

मृत्सुवर्णायोरूपं दृष्टान्तत्रयमुक्तवानित्यर्थः किमर्थमेवं दृष्टान्तत्रयमुक्तवानित्याशङ्क्याह अत इति यत एवं वस्तुषु मृदादिषु कार्यानृत
त्वमुपलब्धमतो भूतभौतिकरूपेषु सर्वेषु वस्तुषु कार्यानृतत्वं वासितं कुर्यादित्यर्थः ५३ ननु कार्यानृतत्वानुसंधानमपि किमर्थमुक्त
मित्याशङ्क्य कारणज्ञानात् कार्यज्ञानसिद्धय इत्यभिप्रायेणाह कारणेति कारणस्य मृदादेर्ज्ञानात्कार्यजातस्य घटादेर्ज्ञानमपि य
था सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादित्यादिवाक्यजातेनोक्तवानित्यर्थः ननु मृत्सुवर्णादिरूपस्य पारमार्थिकस्य कारणस्य
विज्ञानात् तद्विलक्षणस्य घटरुचकादेर्विज्ञानमनुपपन्नमिति शङ्कते सत्यज्ञान इति ५४ ॥

कार्यस्य समस्तस्यानन्तांशाद्वयरूपत्वात्कारणज्ञानात्कार्यगतसत्यांशज्ञानं भवतीत्यभिप्रायेणाह समस्तस्येति समस्तस्याधिष्ठानभूतमस्त
हितस्य विकारस्यारोपितस्य घटादिरूपस्य कार्यता कार्यशब्दार्थत्वं लोकप्रसिद्धमित्यर्थः भवत्वेवं एतावता कारणज्ञानात्कार्यज्ञानं न संभवतीति
चोद्यस्य कः परिहारो जात इत्याशंक्य कार्यगतानन्तांशज्ञानाभावेपि न क्षतिस्तत्सत्यांशज्ञानं भवत्येवेति परिहरति वास्तव इति अत्र कार्ये यो वास्त
वो मृदंशोस्ति अस्य वास्तवांशस्य बोधो ज्ञानं कारणबोधतः कारणज्ञानाद्भवतीत्यर्थः ५५ ननु कार्यगतसत्यांशवदनन्तांशोपि बोद्धव्य इत्या
शंक्य प्रयोजनाभावान्नैवमित्याह अनन्तांश इति प्रयोजनाभावमेव प्रकटयति तज्ज्ञानमिति तस्याबाध्यस्य वस्तुनो ज्ञानं पुमर्थं पुंसो

समस्तस्य विकारस्य कार्यता लोकदृष्टितः वास्तवो यो मृदंशोस्य बोधः कारणबोधतः ५५ अ
नन्तांशो न बोद्धव्यस्तद्बोधानुपयोगतः तज्ज्ञानं पुमर्थं स्यान्नानन्तांशावबोधनम् ५६ तर्हि
कारणविज्ञानात्कार्यज्ञानमितीरिते मृद्बोधान्मृत्तिकाबुद्धेरुक्तेस्यात्कोत्र विस्मयः ५७ सत्ये
कार्ये घटवस्त्वंशः कारणात्मेति जानतः विस्मयो मास्तिहाज्ञस्य विस्मयः केन वार्यते ५८ ।

ज्ञातः पुरुषस्यार्थः प्रयोजनं यस्मिन् तत्पुमर्थमिति बहुव्रीहिः अनन्तांशस्य विकारस्यावबोधनं प्रयोजनवन्न भवतीत्यर्थः ५६ ननु
कारणज्ञानात्कार्यज्ञानं भवतीत्येतच्छ्रोतृबुद्धौ चमत्कारहेतुर्भविष्यतीत्यभिप्रायेणोक्तं तदेतन्न सम्भवतीति शंकते तर्हीति कार
णस्य मृदादेर्ज्ञानात्कार्यगतमृदादिसत्यांशज्ञानं भवतीत्युक्ते मृद्ज्ञानान्मृदोज्ञानमित्युक्तं भवति एवं च सति श्रोतृगत एव चमत्कारो
नास्तीत्यर्थः ५७ इष्टमविवेकवतां विस्मयाभावेपि तद्रहितानां विस्मयः स्यादेवेति परिहरति सत्यमिति कार्येषु घटादिषु विद्यमानो वा
स्तवोंशः कारणस्वरूपमेवेति ये जानन्ति तेषामाश्चर्यं माभूदितरेषां तज्ज्ञानशून्यानां जायमानो विस्मयो न निवारयितुं शक्यत इत्यर्थः ५८

अज्ञत्वाद्विस्मयो भवेदित्युक्तमेवार्थं प्रपंचयति आरम्भीति आरम्भो नाम समवाय्यसमवायिनिमित्तकारणेभ्यो भिन्नस्योत्पत्तिस्तद्योगव्य
क्तिः सोयमारम्भीत्युच्यते पूर्वरूपपरित्यागेन रूपांतरप्राप्तिलक्षणं परिणामं यो व्यक्तिः स परिणामीत्युच्यते प्रक्रियाद्वयमजानानो लोक
व्यवहारमात्रपरो लौकिक इत्युच्यते एषां त्रयाणामपि कारणस्यैकस्य ज्ञानादनेकेषां कार्याणां विज्ञानं भवतीति वाक्यश्रवणाद्विस्म
यो भवेदित्यर्थः ५९ ननु यथाश्रुतमर्थं परित्यज्येत्थं व्याख्याने किं कारणमित्याशंक्य श्रुतेस्तत्र तात्पर्याभावादित्याह अद्वैत इति अ
द्वैतविज्ञाने शिष्यमभिमुखीकर्तुमेव छांदोग्यश्रुतावेकस्य कारणस्य विज्ञानात्सर्वेषां कार्याणां विज्ञानमुक्तं न तु कार्याणामनेकेषां
विज्ञानसिद्ध्यर्थमित्यभिप्रायः ६० इदानीमेकविज्ञानेन सर्वविज्ञाने दृष्टांतप्रदर्शनपरस्य यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं वि

आरम्भी परिणामी च लौकिकश्चैककारणे ज्ञाते सर्वमतिं श्रुत्वा प्राप्नुवंत्येव विस्मयं ५९
अद्वैतेभिमुखीकर्तुमेवात्रैकस्य बोधतः सर्वबोधः श्रुतौ नैव नानात्वस्य विवक्षया ६० एक
मृत्पिंडविज्ञानात्सर्वं मृन्मयधीर्यथा तथैकब्रह्मबोधेन जगद्बुद्धिर्विभाव्यतां ६१ सच्चि
त्सुखात्मकं ब्रह्म नामरूपात्मकं जगत् तापनीये श्रुतं ब्रह्म सच्चिदानंदलक्षणम् ६२ ॥

ज्ञातं स्यादिति वाक्यस्यार्थं निरूपणपुरःसरं दार्ष्टान्तिकप्रदर्शनपरस्य उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवति
अविज्ञातं विज्ञातं स्यादिति वाक्यस्यार्थं प्रदर्शयन् प्रकृते फलितमाह एकमृत्पिंडेति यथा घटशरावाद्युपादानस्यैकस्य मृत्पिंडस्या
वबोधात्तद्विकाराणां सर्वेषां घटादीनां बोधो भवति एवं सर्वोपादानस्यैकस्य ब्रह्मणो बोधात्तत्कार्यस्य कृत्स्नस्य जगतो बोधो भवतीत्य
वगंतव्यमित्यर्थः ६१ ननु ब्रह्मजगतोः स्वरूपापरिज्ञाने ब्रह्मज्ञानाज्जगतो ज्ञानं भवतीत्येवं नावगंतुं शक्यत इत्याशंक्य तदवग
मायतदुभयस्वरूपं दर्शयति सच्चिदिति ब्रह्मणः सच्चिदानन्दरूपत्वे किं प्रमाणमित्याशंक्य तापनीयादिश्रुतयः प्रमाणमित्यभि
प्रायेणाह तापनीय इति उत्तरस्मिंस्तापनीये आथर्वणिके तावद्ब्रह्मैवेदं सर्वं सच्चिदानंदमात्रमित्यादिप्रदेशे ब्रह्मणः सच्चिदानंदरूप

अद्वैतानन्दः ॥

आदिशब्देन विवक्षितानि श्रुत्यन्तराणि दर्शयति स्वरूपमिति अरुणपुत्रेणोद्दालकेन छांदोग्यश्रुतौ सदेव सोम्येदमग्र आसीदित्यादिना सद्रूपं ब्र
ह्म निरूपितं तथा बह्वृचः ऋक्शाखाध्यायिनः ऐतरेयोपनिषदि प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मेति प्रज्ञानरूपत्वं ब्रह्मणो दर्शयंति एवं पूर्वोदाह्
तायां छांदोग्यश्रुतौ देवसनत्कुमाराख्यो गुरुः नारदाय शिष्याय भूमा त्वेव विजिज्ञासितव्य इत्युपक्रम्य यो वै भूमा तत्सुखमिति भूमशब्दाभि
धेयस्य ब्रह्मण आनंदरूपत्वमुक्तवानित्यर्थः उक्तन्यायमन्यत्राप्यतिदिशति एवमिति अन्यत्र तैत्तिरीयकादिश्रुतिष्वानंदो ब्रह्मे
ति व्यजानादित्यादिवाक्यैरानंदरूपत्वादिकमुक्तमिति द्रष्टव्यमिति भावः ८३ सच्चिदानंदेष्विव नामरूपयोरपि श्रुतिं दर्शयति विचिंत्ये

स्वरूपमारुणिः प्राह प्रज्ञानं ब्रह्म बह्वृचः सनत्कुमारश्चानंदं एवमन्यत्र गम्यतां ८३ विचिंत्य स
र्वरूपाणि कृत्वा नामानि तिष्ठति अहं व्याकरवाणीमे नामरूपे इति श्रुतेः ८४ अव्याकृतं पुरा सृष्टे
रूर्ध्वं व्याक्रियते द्विधा अचिंत्यशक्तिर्मायैषा ब्रह्मण्यव्याकृताभिधा ८५ ॥

ति सर्वाणि रूपाणि विचिंत्य धीरो नामानि कृत्वाभिवदन्यदास्ते इति अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च सृष्ट
स्य जगत्स्रष्टा नामरूपे श्रुत्या दर्शिते इत्यर्थः ८४ तत्रैव श्रुत्यंतरमुदाहरति अव्याकृतमिति बृहदारण्यकश्रुतौ तद्धेदं तर्ह्यव्याकृतमा
सीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदं रूपमिति सृष्टस्य जगतो नामरूपात्मकत्वं दर्शितमित्यर्थः सृष्टेः पूर्वमिदं ज
गदव्याकृतमव्यक्तनामरूपात्मकमभूत् ऊर्ध्वं सृष्टेरवसरे द्विधा वाच्यवाचकभावेन व्याक्रियते व्यक्तीकृतमित्यर्थः इदानीं तद्धेदं त
र्ह्यव्याकृतमासीदित्यत्राव्याकृतशब्दस्यार्थमाह अचिंत्येति येयं ब्रह्मणि अचिंत्यशक्तिर्मायास्त्येषा अव्याकृतमित्यभिधा नाम यस्या
स्साऽव्याकृताभिधा अस्मिन्वाक्ये व्याकृतशब्देनाभिधीयत इत्यर्थः ८५ ॥

पं॰टी॰
१४५

तत्त्वान्यत्वाभ्यामेव व्याक्रियते तस्यार्थमाह अविक्रियेति अविकारिणि ब्रह्मणि वर्तमाना साऽनेकधा भूतभौतिकप्रपंचरूपेण बहुधा विकारं परिणामं प्राप्नोति मायाब्रह्मणोर्वर्तते इत्यत्र प्रमाणमाह मायामिति मायां पूर्वोक्तां प्रकृतिं प्रक्रियतेऽनयेति प्रकृतिरुपादानकारणं विद्याज्जानीयात् मायिनं तस्या आश्रयत्वेन तत्कर्तृ महेश्वरं मायानियामकं विद्यादित्यनुषज्यते उभयत्र तुशब्दः परस्परवैलक्षण्यद्योतनार्थः ६६ इदानीं मायोपहितस्य ब्रह्मणः प्रथमं कार्यमाह आद्य इति तस्य कारणादागतं रूपत्रयमाह सोऽस्तीति सच्चिदानंदरूप इत्यर्थः तस्य प्रातिस्विकं रूपमाह अवकाश इति तस्य पूर्वस्माद्रूपत्रयाद्वैलक्षण्यमाह तन्मिथ्येति सच्चिदादिरूपत्रयं वास्तवमित्यर्थः ६७ तस्य च तथैव रूपस्य मिथ्यात्वे हेतुमाह न व्यक्तेरिति नन्वुत्पत्तिविनाशयोर्मध्ये प्रतीयमानस्यावकाशस्य कथमसत्त्वमित्याशंक्याह

अविक्रियब्रह्मनिष्ठा विकारं यात्यनेकधा मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ६६ आद्यो विकार आकाशः सोऽस्ति भात्यपि च प्रियः अवकाशस्तस्य रूपं तन्मिथ्या न तु तत्त्रयं ६७ न व्यक्तेः पूर्वमस्त्येव न पश्चाच्चापि नाशतः आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ६८ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येवेत्याह कृष्णोऽर्जुनं प्रति ६९ मृद्वत्ते सच्चिदानंदा अनुगच्छन्ति सर्वदा निराकाशे सदादीनामनुभूतिर्निजात्मनि ७० अवकाशे विस्मृतेऽथ तत्र किं भाति तद्वद शून्यमेवेति चेदस्तु नाम तादृग्विभाति हि ७१ ॥

आदाविति ६८ उक्तार्थे श्रीकृष्णवाक्यं प्रमाणयति अव्यक्तादिति ६९ सदादिरूपत्रयस्याकाशेऽसत्त्वे किं प्रमाणमित्याशंक्यानुभूतिरेव प्रमाणमित्याह मृद्वत्त इति मृद्वदिति दृष्टान्तप्रदर्शनार्थः घटादिषु यथा कालत्रयेऽपि मृदनुवर्तते तथा सदादिरूपत्रयं सर्वदानुगतमित्यर्थः नन्ववकाशं विहाय सदादिरूपत्रयं कथमनुभूतमित्याशंक्याह निराकाश इति ७० तदेवोपपादयति अवकाश इति पूर्ववादिनः शून्यमनुवदति शून्यमिति अंगीकृत्य परिहारमाह अस्त्विति शाहृतः शून्यमसत्त्वार्थे न त्ववकाशाभावविशेषणस्य विशेष्यत्वेन प्रतीयमानं किंचिदस्तीत्यभ्युपगंतव्यमित्याह तादृगिति हिशब्दो लोकप्रसिद्धिद्योतनार्थः ७१

159

भवत्वेवं प्रकृते किमायातमित्याशंक्याविशेष्यत्वेन प्रतीयमानस्य सुखरूपमभ्युपेयमित्याह ताटस्थ्यादिति तस्य सुखरूपत्वमाह औदासीन्येति औ
दासीन्यरूपत्वात्तस्य सुखस्वरूपत्वमित्यर्थः ननु आनुकूल्यरहितस्य कथं सुखस्वरूपत्वमित्याशंक्याह आनुकूल्येति ७२ तदेवोपपादयति आ
नुकूल्य इति ननु निजानंदवन्निजं दुःखमपि किं न स्यादित्याशंक्य दुःखे निजरूपासिद्धभावान्नैवमित्याह निजं दुःखमिति ७३ ननु निजानं
दस्य सदानंदत्वात्सर्वदा हर्ष एव स्यान्न तु शोक इत्याशंक्य तस्य नित्यत्वेपि तद्ग्राहिणो मनसः क्षणिकत्वेन मानसयोस्तयोरपि क्षणिक

ताटस्थ्यादेव तत्तस्यमौदासीन्येन तत्सुखं आनुकूल्यप्रातिकूल्यहीनं यत्तन्निजं सुखं ७२ आनुकूल्ये हर्ष
धीः स्यात्प्रातिकूल्ये तु दुःखधीः द्वयाभावे निजानंदो निजं दुःखं तु न क्वचित् ७३ निजानंदे स्थिरे हर्षशो
कयोर्व्यत्ययः क्षणात् मनसः क्षणिकत्वेन तयोर्मानसतेष्यतां ७४ आकाशेप्येवमानंदः सत्ताभाने तु सं
मते वाय्वादिदेहपर्यंते वस्तुष्वेवं विभाव्यताम् ७५ गतिस्पर्शौ वायुरूपं वह्नेर्दाहप्रकाशने जलस्य द्रव
ता भूमेः काठिन्यं चेति निर्णयः ७६ असाधारण आकारो ओषध्यन्नवपुष्ष्वपि एवं विभाव्यं मनसा तत्तद्रू
पं यथोचितं ७७ अनेकधा विभिन्नेषु नामरूपेषु चैकधा तिष्ठंति सच्चिदानंदा विसंवादो न कस्यचित् ७८
निस्तत्त्वे नामरूपे द्वे जन्मनाशयुते च ते बुद्ध्या ब्रह्मणि वीक्षस्व समुद्रे बुद्बुदादिवत् ७९ सच्चिदानंदरूपे
स्मिन् पूर्णे ब्रह्मणि वीक्षिते स्वयमेवावजानाति नामरूपे शनैः शनैः ८० ॥

त्वमित्याह निजानंद इति ७४ दृष्टान्ते सिद्धमर्थं दार्ष्टान्तिके योजयति आकाशेपीति एवं निजात्मसुखप्रकारेणेत्यर्थः सत्ताभाने तु भव
ताप्यभ्युपगम्येते अतो नोपपादनीये इत्यर्थः आकाशे प्रतिपादितमर्थं वाय्वादिशरीरान्तेष्वभ्युपगन्तव्यमित्याह वाय्वादीति ७५ तत्र
वाय्वादीनामसाधारणधर्मान्दर्शयति गतीति द्वाभ्यां ७६ ७७ फलितमाह अनेकधेति ७८ तर्हि प्रतीयमानयोर्नामरूपयोः का गति
रित्याशंक्य कल्पितत्वमेव गतिरित्याह निस्तत्त्वे इति कल्पितत्वे हेतुः जन्मेति ७९ ततः किमित्यत आह सच्चिदानंदेति ८० ॥

पं॰टी॰
१५॰

150

ब्रह्मज्ञानदार्ढ्यस्य हेतावज्ञातपूर्वकत्वाच्छ्रवणादिवद्धेतावज्ञापिकर्तव्येत्याह यावदिति ८१ अभ्यासस्य फलमाह तदभ्यासेनेति ८२ इदानीं ब्रह्माभ्यासस्य स्वरूपमाह तच्चिंतनमिति ८३ नन्वनादिकालमारभ्य प्रतिभासमानस्य द्वैतस्य कादाचित्केन ज्ञानाभ्यासेन कथं निवृत्तिरित्याशंक्य दीर्घकालनैरंतर्यसत्कारसेवितेनाभ्यासेन निवर्तत एवेत्याह वासनेति ८४ ननु ब्रह्मण एकस्यानेकाकारजगद्धेतुत्वमनुपपन्नमित्याशंक्य मायासहितस्योपपद्यत इत्याह मृच्छक्तिवदिति अनन्तान्कार्याणीत्यर्थः ननु मृच्छक्तेः सत्य

यावद्यावदवस्थास्यात्तावत्तावन्नदीक्षणं यावद्यावद्धीयते तत्तावत्तावद्धुभेत्प्रजेत् ८१ तदभ्यासेन विद्यायां सुस्थितायामयं पुमान् जीवन्नेव भवेन्मुक्तो वपुरस्तु यथा तथा ८२ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ८३ वासनानेककालीना दीर्घकालं निरंतरम् सादरं चाभ्यस्यमाने सर्वथैव निवर्तते ८४ मृच्छक्तिवद्ब्रह्मशक्तिरनेकानन्ततान्सृजेत् यद्वा जीवगता निद्रा स्वप्नस्यात्र निदर्शनम् ८५ निद्राशक्तिर्यथा जीवे दुर्घटस्वप्नकारिणी ब्रह्मण्येषा तथा माया सृष्टिस्थित्यंतकारिणी ८६ स्वप्ने वियद्गतिं पश्येत्स्वमूर्धच्छेदनं तथा मुहूर्ते वत्सरौघं च मृतं पुत्रादिकं पुनः ८७ इदं युक्तमिदं नेति व्यवस्था तत्र दुर्लभा यथा यथेक्ष्यते यद्यत्तत्तद्युक्तं तथा तथा ८८ ईदृशो महिमा दृष्टो निद्राशक्तेर्यदा तदा मायाशक्तेरचिंत्योयं महिमेति किमद्भुतम् ८९ शयाने पुरुषे निद्रा स्वप्नं बहुविधं सृजेत् ब्रह्मण्येवं निर्विकारे विकारान्कल्पयत्यसौ ९०

त्वादनेकहेतुत्वाद्विषमो दृष्टान्त इत्याशंक्य पक्षान्तरमाह यद्वेति ८५ दृष्टान्तं विशदयति निद्रेति दार्ष्टान्तिकमाह ब्रह्मणीति ८६ दुर्घटकारित्वमेव स्पष्टयति स्वप्न इति ८७ स्वप्नस्य दुर्घटत्वे हेतुमाह इदं युक्तमिति ८८ उक्तमर्थं कैमुतिकन्यायेन स्पष्टयति ईदृश इति ८९ अप्रच्युतमानब्रह्मनिष्ठाया मायाया जगद्धेतुत्वे दृष्टान्तमाह शयान इति ९० ॥

मायया स्रष्टान्पदार्थान्दर्शयति खानिलेति ननु पांचभौतिकत्वेन साम्येपि केषांचिच्चेतनत्वं केषांचिज्जडत्वं कुत इत्याशंक्याह प्राणिधीष्विति प्राणिशरीरेष्वंतःकरणेषु चैतन्यप्रतिबिंबनाच्चेतनत्वमितरत्र तदभावाज्जडत्वमित्यर्थः ९१ ननु चेतनाचेतनविभागः चिद्रूपब्रह्मकृत एव किं न स्यादित्याशंक्य ब्रह्मणः सर्वोपादानत्वेन सर्वत्र समत्वान्मैवमित्याह चेतनेति ९२ ब्रह्मणश्चिज्जडसाधारणत्वे हेतुमाह ब्रह्मणीति ब्रह्मणः सर्वकल्पनाधारत्वात्सर्वगतत्वमित्यर्थः तत्कथमवगम्यत इत्याशंक्यायां कल्पितनामरूपत्यागे पिष्टानं ब्रह्मावगम्यत इत्या

खानिलाग्निजलोर्व्यंडलोकप्राणिशिलादिकाः विकाराः प्राणिधीष्वंतश्चिच्छायाप्रतिबिंबिता ९१ चेतनाचेतनेष्वेषु सच्चिदानंदलक्षणं समानं ब्रह्म भिद्येते नामरूपे पृथक्पृथक् ९२ ब्रह्मण्येते नामरूपे पटे चित्रमिव स्थिते उपेक्ष्य नामरूपे द्वे सच्चिदानंदधीर्भवेत् ९३ जलस्थेधोमुखे स्वस्य देहे दृष्टेप्युपेक्ष्य तं तीरस्थ एव देहे स्वे तात्पर्यं स्याद्यथा तथा ९४ सहस्रशो मनोराज्ये वर्तमाने सदैव तत् सर्वैरुपेक्ष्यते यद्वदुपेक्षा नामरूपयोः ९५ क्षणे क्षणे मनोराज्यं भवत्येवान्यथान्यथा गतं गतं पुनर्नास्ति व्यवहारो बहिस्तथा ९६ नलभ्यं यौवने बाल्यं यौवनं स्थविरे तथा मृतः पिता पुनर्नास्ति नायात्येव गतं दिनम् ९७ मनोराज्याद्विशेषः कः क्षणध्वंसिनि लौकिके अतोस्मिन्भासमानेपि तत्सत्यत्वधियं त्यजेत् ९८ ॥

ह उपेक्ष्येति ९३ उक्तार्थे दृष्टांतमाह जलस्थ इति नीरेधोमुखे देहे परिदृश्यमानेपि तत्रादरं परित्यज्य तीरस्थे स्वदेहे तद्विपरीते समबुद्धिर्यथा तथेत्यर्थः ९४ इदानीं सर्वजनप्रसिद्धं दृष्टांतांतरमाह सहस्रश इति उपेक्षाकर्तृत्वेति शेषः ९५ प्रपंचे चैव विशेषं दृष्टांतमाह क्षणे क्षण इति दार्ष्टांतिकमाह व्यवहार इति ९६ तदेव विवृणोति नलभ्यमिति ९७ ह्येतु क्षणिकत्वमुपसंहरति मनोराज्यादिति क्षणिकत्वसाधनेन प्रयोजनमाह अतोस्मि

सिद्धि ५८ ॥

ननुलौकिकोपेक्षायांकोलाभोभवतीत्याशंक्य ब्रह्मणिधीःस्थिराभवतीत्याह उपेक्षितइति नर्हिज्ञानिनोव्यवहारःकथमित्याशंक्या
ह नटवदिति ११९ ननुज्ञानिनोव्यवहारास्युपगमेविकारित्वप्रसंगेनेत्याशंक्य बुद्धेर्व्यवहारवत्त्वमपितत्साक्षिण्यात्मानिर्विकारइति
सदृष्टांतमाहप्रवहतीति उदकेउपरिप्रवहत्यपिअधःस्थिताप्रौढशिलायथानचलतितथाएवंबुद्धेःसंसरंत्यामपिनज्ञा
नीसंसरतीत्यर्थः १२० ननुअखंडेब्रह्मणितद्विलक्षणस्यजगतःकथमवभासनमित्याशंक्यनिश्छिद्रेदर्पणेसावकाशवस्तुनोय

उपेक्षितेलौकिकेधीर्निर्विघ्नाब्रह्मचिंतने नटवत्कृत्रिमास्थायांनिर्वहत्येवलौकिकं ११९ प्रवहत्यपि
नीरेधःस्थिराप्रौढशिलायथा नामरूपान्यथात्वेपिकूटस्थंब्रह्मनान्यथा १२० निश्छिद्रेदर्पणेभाति
वस्तुगर्भंबृहद्वियत् सच्चिद्घनेतथानानाजगद्गर्भमिदंवियत् १ अदृष्ट्वादर्पणंनैवतदंतःस्थेक्ष
णंतथा अमत्वासच्चिदानंदंनामरूपमतिःकुतः १२ प्रथमंसच्चिदानंदेभासमानेथतावता बु
द्धिंनियम्यनैवोर्ध्वंधारयेन्नामरूपयोः १२३ एवंचनिर्जगद्ब्रह्मसच्चिदानंदलक्षणं अद्वैतानंदए
तस्मिन्विश्राम्यंतुजनाश्चिरम् १२४ ब्रह्मानंदाभिधेग्रंथेतृतीयोध्यायईरितः अद्वैतानंदएवस्या
ज्जगन्मिथ्यात्वचिंतया १२५ इतिब्रह्मानंदेऽद्वैतानंदस्तृतीयोध्यायः ३ ॥

थाभानंतद्वदित्याह निश्छिद्रइति १२१ ननुदृष्टेब्रह्मणिकथंजगत्प्रतीतिरित्याशंक्य सच्चिदानंदप्रतीतिपुरस्सरमेवजगत्प्र
तीतिरितिसदृष्टांतमाह अदृष्ट्वेति १२२ ननुनामरूपयोरपिभासमानत्वात्कथंनिर्विषयब्रह्मप्रतीतिरित्याशंक्य तदुपायमाह प्र
थममिति सच्चिदानंदेब्रह्मणिकल्पितनामरूपात्मकेप्रपंचेसच्चिदानंदमात्रबुद्ध्यागृहीत्वानामरूपयोर्बुद्धिंनधारयेत् १२३ एवंसति
निर्जगद्ब्रह्मसच्चिदानंदलक्षणंभवतीत्यर्थः ४ इदानीमध्यायार्थमुपसंहरति ब्रह्मानंदाभिधइति १२५ इतिश्रीब्रह्मानंदेऽद्वैतानंदोना

इदानीं तत्त्ववर्णिष्यमाणयोः ग्रन्थयोः संबन्धमाह योगेनेति १ विद्यानन्दस्वरूपमाह विषयेति तस्यावान्तरभेदमाह दुःखाभावादीति २ तानेव विद्यामेव दर्शयति दुःखाभावश्चेति ३ निवर्त्तनीयं दुःखं विभजते ऐहिकमिति ऐहिकस्य निवृत्तिर्बृहदारण्यकवाक्येनोच्यते इत्याह निवृत्तिमिति ४ तच्छ्रुतिवाक्यं पठति आत्मानं चेदिति ५ आत्मनि शोकासंबन्धं दर्शयितुं तद्भेदमाह जीवात्मेति आत्मनो जीवत्वे निमित्तमाह चित्तादात्म्येति चैतन्यस्य स्थूलसूक्ष्मकारणरूपैस्त्रिभिः शरीरैस्तादात्म्यभ्रमे सति चितो भोक्तृत्वं भवति स भोक्ता जीव इत्युच्य-

योगेनात्मविवेकेन द्वैतमिथ्यात्वचिन्तया ब्रह्मानन्दं पश्यतोऽथ विद्यानन्दो निरूप्यते १ विषयानन्दवद्विद्यानन्दो धीवृत्तिरूपकः दुःखाभावादिरूपेण प्रोक्त एष चतुर्विधः २ दुःखाभावश्च कामाप्तिः कृतकृत्योऽहमित्यसौ प्राप्तप्राप्योऽहमित्येवं चातुर्विध्यमुदाहृतं ३ ऐहिकं चामुष्मिकं चेत्येवं दुःखं द्विधेरितं निवृत्तिमैहिकस्याह बृहदारण्यकं वचः ४ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ५ जीवात्मा परमात्मा चेत्यात्मा द्विविध ईरितः चित्तादात्म्यात्त्रिभिर्देहैर्जीवः सन्भोक्तृतां व्रजेत् ६ परात्मा सच्चिदानन्दस्तादात्म्यं नामरूपयोः गत्वा भोग्यत्वमापन्नस्तद्विवेके तु नोभयम् ७ भोग्यमिच्छन्भोक्तुरर्थे शरीरमनुसंज्वरेत् ज्वरास्त्रिषु शरीरेषु स्थिता न त्वात्मनो ज्वराः ८ व्याधयो धातुवैषम्ये स्थूलदेहे स्थिता ज्वराः कामक्रोधादयः सूक्ष्मे द्वयोर्बीजं तु कारणम् ९ ॥

ते ६ इदानीं परमात्मनः स्वरूपमाह परात्मेति तस्य भोग्यरूपत्वापत्तिप्रकारमाह तादात्म्यं नामेति नामरूपकल्पनाधिष्ठानरूपत्वेन तत्तादात्म्यं प्राप्य भोग्यमित्युच्यत इत्यर्थः भोक्तृत्वाद्यभावे कारणमाह तद्विवेक इति ताभ्यां शरीरत्रयजगद्भ्यां विवेके भेदज्ञाने सति नोभयं भोक्तृभोग्यरूपं नास्तीत्यर्थः ७ उक्तमर्थं विवृणोति भोग्यमिच्छन्निति ८ कस्मिन्शरीरे को ज्वर इत्याशंक्य स्थूलदेहे विद्यमानान्ज्वरान्दर्शयति व्याधय इति लिंगदेहगतान्ज्वरानाह कामेति ९ ॥

इदानीमुदाहृतश्रुतितात्पर्यकथनव्याजेन पूर्वोक्तमेवार्थं विशदयति अद्वैतेति तृतीयाध्यायोक्तप्रकारेण मायाकार्यनामरूपाभ्यां सच्चिदानंदे परमात्मनि विवेचिते भेदेन ज्ञाते सति सर्वं प्रपंचं मिथ्येति जानन् किं नाम भोग्यमिच्छति १० ततः पूर्वाध्यायोक्तरीत्या जीवात्मस्वरूपे असंगकूटस्थचैतन्यरूपे निश्चिते सति कामयितुरभावाज्ज्वरादिसंबंधो नास्तीत्याह आत्मानंदेति ११ इदानीमामुष्मिकं ज्वरं दर्शयति पुण्येति तस्याभावः प्रथमेध्याये निरूपित इत्याह प्रथमेति १२ ननु ज्ञानिन आरब्धकर्मविषया चिंता माभूदागामिकर्मविषया चिंता भवत्येवेत्याशंक्य तत्र चेत्याह पुष्करपर्णे इत्या-

अद्वैतानंदमार्गेण परात्मनि विवेचिते। अपश्यन्वास्तवं भोग्यं किं नामेच्छेत्परात्मवित् १० आत्मानंदोक्तरीत्यास्मिन्जीवात्मन्यवधारिते। भोक्ता नैवास्ति कोप्यत्र शरीरे तु ज्वरः कुतः ११ पुण्यपापद्वये चिंता दुःखमामुष्मिकं भवेत्। प्रथमाध्याय एवोक्तश्चिंता नैनं तपेदिति १२ यथा पुष्करपर्णेस्मिन्नपामश्लेषणं तथा। वेदनादूर्ध्वमागामिकर्मणोश्लेषणं बुधे १३ इषीकातृणतूलस्य वह्निदाहः क्षणाद्यथा। तथा संचितकर्मास्य दग्धं भवति वेदनात् १४ यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा १५ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान्न हंति न निबध्यते १६ मातापित्रोर्वधः स्तेयं भ्रूणहत्यान्यदीदृशं। न मुक्तिं नाशयेत्पापं मुखकांतिर्न नश्यति १७ ॥

दिश्रुत्या ज्ञानिन आगामिकर्मसंबंधनिराकरणात्तद्विषयापि चिंता नास्तीत्याह यथेति १३ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंते इति श्रुत्यवष्टंभेन संचितकर्मविषयापि चिंता ज्ञानिनो नास्तीत्याह इषीकेति १४ उक्तार्थे भगवद्वाक्यमपि प्रमाणयति यथैधांसीति १५। १६ अस्मिन्नेवार्थे न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया नास्य पापं न चकानास्मुखान्नीलं चेत्यपि पाठः न च द्वयोर्मुखान्नीलं चेति छांदोग्यश्रुतिवाक्यमर्थतः पठति मातापित्रोरिति न वेत्येकं पदं नीलमिति कांतिरित्यर्थः १७ ॥

उक्तचातुर्विध्यमध्ये द्वितीयप्रकारमाह दुःखेति ईरिताश्रुत्येतिशेषः अस्मिन्नर्थे पैतरेयश्रुतिवाक्यमर्थतः पठति सर्वानिति १८ जक्ष
न्क्रीडन् रममाणः स्त्रीभिर्यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति छान्दोग्यश्रुतिवाक्यमर्थतः पठति जक्षन्निति
१९ तत्रैव तैत्तिरीयश्रुतिवाक्यं पठति सर्वानिति ननु कर्मफलभोगाङ्गीकारे जन्मापि प्रसज्येतेत्याशंक्याह नान्यवदिति ज्ञानेन संचि
तकर्मणां दग्धत्वादज्ञवज्जन्म नास्तीत्यर्थः २० इदानीं तैत्तिरीयकबृहदारण्यकवाक्ये संदिग्धार्थे ततः पठति युवेति २१ ननु सर्वेषां सा

दुःखाभाववदेवास्य सर्वकामाप्तिरीरिता सर्वान्कामानसौ प्राप्य ह्यमृतोऽभवदित्यतः १८ जक्षन्क्रीड
न्रतिं प्राप्तः स्त्रीभिर्यानैस्तथेतरैः शरीरं न स्मरेत्प्राणः कर्मणा जीवयेदमुं १९ सर्वान्कामान्सहाप्नो
ति नान्यवज्जन्मकर्मभिः वर्तन्ते श्रोत्रिये भोगा युगपत्क्रमवर्जिताः २० युवा रूपी च विद्यावान्नीरोगो
दृढचित्तवान् सैन्योपेतः सर्वपृथ्वीं वित्तपूर्णां प्रपालयन् २१ सर्वैर्मानुष्यकैर्भोगैः संपन्नस्तृप्तभू
मिपः यमानंदमवाप्नोति ब्रह्मविच्च तमश्नुते २२ मर्त्यभोगे द्वयोर्नास्ति कामस्तृप्तिरतः समा भो
गान्निष्कामतैकस्य परस्यापि विवेकतः २३ श्रोत्रियत्वाद्वेदशास्त्रैर्भोगदोषानवेक्षते राजा बृहद्र
थो दोषांस्तान्गाथाभिरुदाहरत् २४ देहदोषाश्चित्तदोषा भोग्यदोषा अनेकशः शुना वान्ते पा
यसे नो कामस्तद्वद्विवेकिनः २५ ॥

र्वभौमादिहिरण्यगर्भांतानां जीवनिष्ठानामानंदानां कथं ज्ञानिनि सम्भव इत्याशंक्य सर्वेषामानंदानां ज्ञानिनानुगतब्रह्मांशत्वात्स
म्भव इत्याह यमानंदमिति २२ ननु सार्वभौमश्रोत्रिययोर्विषयप्राप्तिसाम्याभावात्कथमानंदसाम्यमित्याशंक्य नैरपेक्ष्यसाम्यात्तृप्ति
साम्यमित्याह मर्त्येति तृप्तिसाम्ये हेतुमाह भोगादिति २३ विवेकत इत्युक्तमर्थं विवृणोति श्रोत्रियत्वादिति विषयदोषाः कस्यां शाखा
यां केन निरूपिता इत्याशंक्य बृहद्रथेन मैत्रायणीयाख्यशाखायां गाथाभिरुक्ता इत्याह राजेति २४ देहेति विवेकिनः कामानुदये दृ

सार्वभौमाच्छ्रोत्रियस्याधिक्यमाह निष्कामत्व इति २६ नोभयमिति सार्वभौमत्वे साधनसाध्ययश्चाचतत्वाद्भीतिश्चेति दोषद्वयसत्त्वाच्छ्रोत्रिये तत्तदुभयाभावादाधिक्यमित्यर्थः श्रोत्रियस्याधिक्यांतरमाह गंधर्वेति २७ इदानीं गंधर्वानंदद्वैविध्यं दर्शयितुं श्लोकद्वयेन गंधर्वभेदमाह अस्मिन्निति २८।२९ चिरलोकपित्रानंदप्रदर्शनाय चिरलोकपितॄनाह अग्निष्वात्तादय इति देवानंदत्रैविध्यज्ञानाय देवभेदमाह कल्पादा

निष्कामत्वे समेप्यत्र राज्ञः साधनसंचये दुःखमासीद्धाविनाशादिति भीरनुवर्त्तते २६ नोभयं श्रोत्रियस्यातस्तदानंदोधिकोन्यतः गंधर्वानंद आशास्ति राज्ञो नास्ति विवेकिनः २७ अस्मिन्कल्पे मनुष्यः सन्पुण्यपाकविशेषतः गंधर्वत्वं समापन्नो मर्त्यगंधर्व उच्यते २८ पूर्वकल्पे कृतात्पुण्यात्कल्पादावेव चेद्भवेत् गंधर्वत्वं तादृशोत्र देवगंधर्व उच्यते २९ अग्निष्वात्तादयो लोके पितरश्चिरवासिनः कल्पादावेव देवत्वं गता आजानदेवताः ३० अस्मिन्कल्पेश्वमेधादिकर्म कृत्वा महत्पदं अवाप्याजानदेवैर्याः पूज्यास्ताः कर्मदेवताः ३१ यमाग्निमुख्या देवाः स्युर्ज्ञाताविंद्रबृहस्पती प्रजापतिर्विराट् प्रोक्तो ब्रह्मा सूत्रात्मनामकः ३२ सार्वभौमादिसूत्रांता उत्तरोत्तरकामिनः अवाङ्मनसगम्योयमात्मानंदस्ततः परः ३३ तैस्तैः काम्येषु सर्वेषु सुखेषु श्रोत्रियो यतः निस्पृहस्तेन सर्वेषामानंदाः संति तस्य ते ३४ ॥

विति ३० इंद्रबृहस्पती प्रसिद्धावित्यर्थः ३१।३२ सार्वभौमादिसूत्रांतानां श्रोत्रियान्न्यूनत्वद्योतनायाह सार्वभौमादीति एभ्यः सर्वेभ्योऽधिकमानंदमाह अवाङ्मनसेति यतोयमानंदोऽवाङ्मनसगम्योऽत एभ्यः सर्वेभ्योऽधिक इत्यर्थः ३३ इदानीमेषां सर्वेषामानंदाः येन श्रोत्रिये विद्यंते तस्य तेषु निस्पृहत्वादित्याह तैस्तैरित्यर्थः ३४ ॥

उपपादितमर्थमुपसंहरति सर्वेति ३५ इदानीं पक्षांतरमाह यद्वेति यथा स्वदेहे आनंदाकारबुद्धिसाक्षित्वेनानंदित्वमितरेष्वपि देहेषु
तद्वदित्यर्थः ३५ नन्वुक्तप्रकारेणाज्ञस्यापि सर्वानंदप्राप्तिरस्तीत्याशंक्य सर्वेषु सर्वबुद्धिसाक्ष्यहमिति ज्ञानाभावान्नैवमित्याह अ
ज्ञस्यापीति उक्तेऽर्थे तैत्तिरीयकश्रुतिं प्रमाणयति यो वेदेति गुहायां निहितं ब्रह्म यो वेद सोऽश्नुत इति योजना ३६ इदानीं तृतीयप्र

सर्वकामाप्तिरेषोक्ता यद्वा साक्षिचिदात्मना स्वदेहवत्सर्वदेहेष्वपि भोगानवेक्षते ३५ अज्ञस्याप्येतदस्त्ये
व न तृप्तिरबोधतः यो वेद सोऽश्नुते सर्वान्कामानित्यब्रवीच्छ्रुतिः ३६ यद्वा सर्वात्मतां स्वस्य साम्ना गा
यति सर्वदा अहमन्नं तथान्नादश्चेति साम ह्यधीयते ३७ दुःखाभावश्च कामाप्तिरुभे ह्येवं निरूपिते
कृतकृत्यत्वमन्यच्च प्राप्तप्राप्यत्वमीक्ष्यताम् ३८ उभयं तृप्तिदीपे हि सम्यगस्माभिरीरितम् त एवात्रा
नुसंधेयाः श्लोका बुद्धिविशुद्धये ३९ ऐहिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये बहु कृत्यं पुरास्याभूत्त
त्सर्वमधुनाकृतं ४० तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरं अनुसंदधदेवायमेवं तृप्यति नित्यशः
४१ दुःखिनोऽज्ञाः संसरंतु कामं पुत्राद्यपेक्षया परमानंदपूर्णोऽहं संसरामि किमिच्छया ४२ अ
नुतिष्ठंतु कर्माणि परलोकपिपासवः सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् ४३ ॥
व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ४४ ॥

कारमाह यद्वेति इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन्नित्यादिनेत्यर्थः ३७ अतीतग्रंथेन सिद्धमर्थं संक्षिप्याह दुःखाभावश्चे
ति अवशिष्टं कृतकृत्यत्वं प्राप्तप्राप्यत्वमित्युभयं तृप्तिदीपे द्रष्टव्यमित्यर्थः ३८ । ३९ । ४० । ४१ । ४२ । ४३ ४४ ॥

५५। ५६। ५७। ५८। ५९। ६०॥

निद्राभिक्षेस्नानशौचे नेच्छामि न करोमि च द्रष्टारश्चेत्कल्पयन्ति किं मे स्यादन्यकल्पनात् ५५ गुंजापुंजा दि दह्येत नान्यारोपितवह्निना नान्यारोपितसंसारधर्मानेवमहं भजे ५६ शृण्वंत्वज्ञाततत्त्वास्ते जानन्कस्माच्छृणोम्यहं मन्यंतां संशयापन्ना न मन्येऽहमसंशयः ५७ विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहं ५८ अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते ५९ आरब्धकर्मणि क्षीणे व्यवहारो निवर्तते कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ६० विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ६१ विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ६२ नित्यानुभवरूपस्य को मे वानुभवः पृथक् कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ६३ व्यवहारो लौकिको वा शास्त्रीयो वान्यथापि वा ममाकर्तुरलेपस्य यथारब्धं प्रवर्ततां ६४ अथवा कृतकृत्योऽपि लोकानुग्रहकाम्यया शास्त्रीयेणैव मार्गेण वर्तेऽहं का मम क्षतिः ६५ देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः तारं जपतु वाक्तद्वत्पठत्वाम्नायमस्तकं ६६ विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयताम् साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ६७ कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरंतरं ६८ धन्योऽहं धन्योऽहं नित्यं स्वात्मानमंजसा वेद्मि धन्योऽहं धन्योऽहं ब्रह्मानंदो विभाति मे स्पष्टं ६९ धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽद्य धन्योऽहं धन्योऽहं स्वस्याज्ञानं पला

इममध्यायार्थमुपसंहरति ब्रह्मानंदाभिध इति इति ब्रह्मानंदे विद्यानंदो नाम चतुर्थोध्यायः ४ पंचमाध्यायप्रतिपाद्यमर्थमाह अथात्रेति ननु विषयानंदस्य लौकिकत्वान्मोक्षशास्त्रे निरूपणमनुपपन्नमित्याशंक्य तस्य लौकिकप्रसिद्धत्वेपि ब्रह्मानंदैकदेशत्वेन ब्रह्मज्ञानोपयोगित्वाद्युक्तमित्याह द्वारेति ब्रह्मानंदैकदेशत्वे किं प्रमाणमित्याशंक्याह तदंशत्वमिति १ तामेव श्रुतिमर्थतः पठति ए

धन्योहं धन्योहं कर्तव्यं मे न विद्यते किंचित् धन्योहं धन्योहं प्राप्तव्यं सर्वमद्य संपन्नं ६१ धन्योहं धन्योहं तृप्तेर्मे कोपमा भवेल्लोके धन्योहं धन्योहं धन्यो धन्यः पुनः पुनर्धन्यः ६२ अहो पुण्यमहो पुण्यं फलितं फलितं दृढं अस्य पुण्यस्य संपत्तेरहो वयमहो वयं ६३ अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम् ६४ ब्रह्मानंदाभिधे ग्रंथे चतुर्थोध्याय ईरितः विद्यानंदस्तदुत्पत्तिपर्यंतोभ्यास इष्यतां ६५ इति श्रीभार विद्यानंदो नाम चतुर्थोध्यायः ४ अथात्र विषयानंदो ब्रह्मानंदांशरूपभाक् निरूप्यते द्वारभूतस्तदंशत्वं श्रुतिर्जगौ १ एषोस्य परमानंदो योऽखंडैकरसात्मकः अन्यानि भूतान्येतस्य मात्रामेवोपभुंजते २ शांता घोरास्तथा मूढा मनसो वृत्तयस्त्रिधा वैराग्यं क्षांतिरौदार्यमित्याद्याः शांतवृत्तयः ३ तृष्णा स्नेहो लोभरागावित्याद्या घोरवृत्तयः संमोहो भयमित्याद्याः कथिता मूढवृत्तयः ४ वृत्तिष्वेतासु सर्वासु ब्रह्मणश्चित्स्वभावता प्रतिबिंबति शांतासु सुखं च प्रतिबिंबति

५ ॥

षइति २ इदानीं विषयानंदस्य ब्रह्मानंदलेशत्वप्रदर्शनाय तदुपाधिभूतांतःकरणवृत्तीर्विभजते शांता इति शांताः सात्त्विको वृत्तयः घोरा राजस्यः मूढास्तामस्यः ता एव शांतादिवृत्तीर्दर्शयति वैराग्यमित्यादिना ३ उदाहृतासु त्रिविधास्वपि वृत्तिषु ब्रह्मणश्चिद्रूपत्वं प्रतिभातीत्याह वृत्तिष्विति शांतासु विशेषमाह शांतास्विति चशब्द उक्तद्वयसमुच्चयार्थः ५ ॥

उक्तार्थे श्रुतिवाक्यमर्थतः पठति रूपमिति तत्रैव व्यासस्तत्रैकं देशं पठति उपमेति ६ अत एवेति सूत्रस्य पूर्वभागः स्वरूपेणैकस्यापि संपक्ती न्नानात्वे श्रुतिं पठति एक एवेति ७ ननु निरवयवस्य ब्रह्मणः क्वचिच्चिन्मात्रभानमितरत्र चिदानंदभानमित्येवं विभागकरणमनुपपन्नमि त्याशंक्य चंद्रदृष्टांतेन परिहरति जले प्रविष्ट इति उक्तमर्थं दार्ष्टान्तिके योजयति तद्वदिति ८ तदेवोपपादयति घोरेति ९ ननु चंद्रोपाधे

रूपं रूपं बभूवासौ प्रतिरूप इति श्रुतिः उपमा सूर्यकेत्यादि सूत्रयामास सूत्रकृत् ६ एक एव तु भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् ७ जले प्रविष्टश्चंद्रोयमस्पष्टः कलुषे जले विस्पष्टो निर्मले तद्वद्द्वेधा ब्रह्मापि ह वृत्तिषु ८ घोरमूढासु मालिन्यात्सुखांशश्च तिरोहितः ईषन्नैर्मल्यतस्तत्र चिदंशप्रतिबिंबनं ९ यद्वापि निर्मले नीरे वह्नेरौष्ण्यस्य संक्रमः न प्रकाशस्य तद्वत्स्याच्चिन्मात्रोद्भूतिरत्र च १० काष्ठे त्वौष्ण्यप्रकाशौ द्वावुद्भवं गच्छतो यथा शांतासु सुखचैतन्ये तथैवोद्भूतिमाप्नुतः ११ वस्तुस्वभावमाश्रित्य व्यवस्था तूभयोः समा अनुभूत्यनुसारेण कल्प्यते हि नियामकम् १२ न घोरासु न मूढासु सुखानुभव ईक्ष्यते शांतास्वपि क्वचित्कश्चित्सुखातिशय ईक्ष्यतां १३ ॥

रूपकस्य द्वैविध्यादंशभानमनुपपन्नं प्रकृते तूपाधिभूतस्यांतःकरणस्यैकत्वादेकांशभानमनुपपन्नमित्याशंक्य दृष्टांतांतरमाह य द्वापीति १० इदानीं शांतासु वृत्तिषु चिदानंदयोः प्रतीतौ दृष्टांतांतरमाह काष्ठेत्विति ११ ननु एवं व्यवस्था कुतः कृतेत्याशंक्याह वस्त्विति तत्र किं नियामकमित्याशंक्याह अनुभूतीति १२ अनुभूतिमेव दर्शयति न घोरास्विति शांतास्वपि आनंदप्रकाशोक्तिः सो पि क्वचित्कचित्सुखातिशयो भवतीत्याह शांतेति १३ ॥

155

पूर्वोक्तघोरमूढवृत्तिषु सुखाभावमेवाभिनीय दर्शयति महद्द्वेषेति १४ शान्तास्वप्यानन्दप्रकाशोऽस्ति सोऽपि क्वचित्क्वचिन्नवेति तत्र प्रतिकूलदुःखसत्त्वादित्यर्थः सुखासिद्धौ दुःखं वर्द्धते सुखस्य प्रतिबन्धे क्रोधो भवति सुखाभावे कारणान्तरमाह द्वेषो वेति १५ परिहारस्याशक्यत्वे विषादो भवति तस्यापि तामसत्वान्न तत्र सुखमित्याह अशक्य इति क्रोधादिष्वित्यादयः स्पष्टार्थाः १६।१७।१८ एवं शान्तादीनां सिद्धिमित्याह वृत्ति

महद्द्वेषादिविषये यदा कामो भवेत्तदा राजसस्तस्य कामस्य घोरत्वान्न नु नो सुखं १४ सिद्धेन्नवेत्यस्ति दुःखमसिद्धौ न हि वर्द्धते प्रतिबन्धे भवेत्क्रोधो द्वेषो वा प्रतिबन्धकः १५ अशक्ये त्वप्रतीकारे विषादः स्यात्स तामसः क्रोधादिषु महद्दुःखं सुखशंकापि दूरतः १६ काम्यलाभे हर्षवृत्तिः शान्ता तत्र महत्सुखं भोगे महत्तरं लाभप्रसक्तावीषदेव हि १७ महत्तमं विरक्तौ तु विद्यानन्दे तदीरितम् एवं क्षान्तौ नत्यौदार्ये क्रोधलोभनिवारणात् १८ यद्यत्सुखं भवेत्तत्तद्ब्रह्मैव प्रतिबिम्बनात् वृत्तिष्वन्तर्मुखास्वस्य निर्विघ्नं प्रतिबिम्बनम् १९ सत्ता चितिः सुखं चेति स्वभावा ब्रह्मणस्त्रयः मृच्छिलादिषु सत्तैव व्यज्यते नेतरद्द्वयं २० सत्ता चिती द्वयं व्यक्तं धीवृत्त्योर्घोरमूढयोः शान्तवृत्तौ त्रयं व्यक्तं मिश्रं ब्रह्मेत्थमीरितं २१ अमिश्रं ज्ञानयोगाभ्यां तौ च पूर्वमुदीरितौ आद्येऽध्याये योगचिन्ता ज्ञानमध्याययोर्द्वयोः २२ ॥

ष्विति इदानीं सर्वत्र ब्रह्मस्वरूपानुभूतिप्रदर्शनाय तत्स्वरूपं स्मारयति सत्तेति मृच्छिलादिषु सत्तामात्रमित्यर्थः २० घोरमूढयोः द्वयोः सत्ताचिती द्वे शान्तवृत्तौ सच्चिदानन्दास्त्रयोऽपि व्यक्ताः एवं सप्रपञ्चं ब्रह्माभिहितमित्याह मिश्रमिति २१ अमिश्रं कुतो ज्ञायत इत्याशंक्याह अमिश्रमिति तौ च ज्ञानयोगौ पूर्वमेवोक्तावित्यर्थः कुत्रोक्तावित्याशंक्य योगः प्रथमाध्याये उक्त इत्याह आद्य इति समनन्तराध्याययोर्ज्ञानमुक्तमित्याह ज्ञानमिति २२ ॥

ननु सच्चिदानंदानां ब्रह्मरूपत्वे मायायाः किंरूपमित्याशंक्याह असत्तेति २३ नरशृंगादावसत्त्वं मृच्छिलादिषु जाड्यमिति विवेकः दुः
खं कुत्रेत्याशंक्याह घोरमूढेति एवं सर्वत्र मायाप्रतिभासने इत्याह एवमिति शांतादिवृत्तिषु ब्रह्मणो मिश्रत्वे किं कारणमित्यत आ
ह शांतास्विति २४ एतदभिधानं किमर्थमित्याशंक्य ब्रह्मध्यानार्थमित्याह एवमिति नरशृंगादिरूपेष्वत्र ब्रह्मध्यानं कर्तव्यमित्या

असत्ताजाड्यदुःखे द्वे मायारूपं त्रयं त्विदं असत्ता नरशृंगादौ जाड्यं काष्ठशिलादिषु २३ घोरमूढधि
योर्दुःखमेवं माया विजृम्भिता शांताद्यजडबुद्ध्यैक्यान्मिश्रं ब्रह्मेति कीर्तितम् २४ एवं स्थिते त्वयो
ब्रह्म ध्यातुमिच्छेत्पुमानसौ नरशृंगादिरूपे त्वेतेन शिष्टं ध्यायेद्यथायथा २५ शिलादौ नामरूपे द्वे
त्यक्त्वा सन्मात्रचिंतनम् त्यक्त्वा दुःखं घोरमूढधियोः सच्चिद्विचिंतनं २६ शांतासु सच्चिदानंदांस्त्री
नप्येवं विचिंतयेत् कनिष्ठमध्यमोत्कृष्टास्तिस्रश्चिंताः क्रमादिमाः २७ मंदस्य व्यवहारेऽपि मि
श्रब्रह्मणि चिंतनं उत्कृष्टं वक्तुमेवात्र विषयानंद ईरितः २८ ॥


ह नरशृंगादिमिति २५ अन्यत्रेमुक्तं कुत्र कथं ध्येयमित्यत आह शिलादाविति घोरमूढबुद्धिषु दुःखं परित्यज्य सच्चिद्रूपयोश्चिंतनं
कर्तव्यमित्याह त्यक्त्वेति २६ सात्विकवृत्तिषु तु सच्चिदानंदास्त्रयोपि ध्येया इत्याह शांतास्विति एवं ध्यानानां किं साम्यमित्यत आह कनि
ष्ठेति २७ इदानीं निर्गुणब्रह्मध्यानेऽनधिकारिणोनुग्रहाय मिश्रब्रह्मध्यानेऽधिकार इत्यभिप्रायेणाह मंदस्येति २८ ॥

एवं सवृत्तिकं ध्यानत्रयमुक्त्वाऽवृत्तिकं ध्यानमाह औदासीन्ये त्विति एभ्यो ध्यानेभ्योऽधिकमित्यर्थः उक्तं निगमयति ध्यानमिति २९ अ
यं ध्यानावान्तरभेदः किन्त्वित्याह न ध्यानमिति तर्हि किमेतदित्याशंक्याह ब्रह्मविद्येति इयं ब्रह्मविद्या कथमुत्पन्नेत्याशंक्याह ध्याने
नेति ३० अस्याविद्यात्वे हेतुमाह विद्यायामिति ३१ भेदकोपाधिवर्जनादित्युक्तं तानेव भेदकोपाधीनाह शांतेति एतेषां परिहारः के

157

औदासीन्ये त्वधीवृत्तेः शैथिल्यादुत्तमोत्तमम् चिंतनं वासनानंदे ध्यानमुक्तं चतुर्विधम् २९ न ध्या
नं ज्ञानयोगाभ्यां ब्रह्मविद्यैव सा खलु ध्यानेनैकाग्र्यमापन्ने चित्ते विद्या स्थिरीभवेत् ३० विद्या
यां सच्चिदानंदा अखंडैकरसात्मताम् प्राप्य भांति न भेदेन भेदकोपाधिवर्जनात् ३१ शांतो घो
रः शिलायाश्च भेदकोपाधयो मताः योगाद्विवेकतो वैषामुपाधीनामपाकृतिः ३२ निरुपा
धिब्रह्मतत्त्वे भासमाने स्वयंप्रभे अद्वैते त्रिपुटी नास्ति भूमानंदोऽत उच्यते ३३ ब्रह्मानंदाभिधे ग्रं
थे पंचमोध्याय ईरितः विषयानंद एतेन द्वारेणांतः प्रविश्यताम् ३४ प्रीयाद्धरिर्हरोऽनेन ब्र
ह्मानंदेन सर्वदा पायाच्च प्राणिनः सर्वान् स्वाश्रितान् शुद्धमानसान् ३५ ॥

नोपायेनेत्याशंक्याह योगाद्विवेकेति ३२ फलितमाह निरुपाधीति त्रिपुटीनामभावाद्भूमानंद इत्युच्यत इत्यर्थः ग्रंथमुपसंह
रति ब्रह्मानंदेति ३४ । ३५ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णा
ख्यविदुषा विरचिते उपदेशग्रंथविवरणे विषयानंदः पंचमोध्यायः ५ ॥ सं॰ १९४८ लिखितं गोनकौल ॥ शुभम् ॥



वेदांत